श्रीदेवानन्दसूरिरचितम्

श्रीअजितप्रभुचरितम्

आनन्दाङ्कं महाकाव्यम्

: सम्पादिका :

सा. विनयपूर्णाश्रीजी म.

: प्रकाशक :

आचार्य श्री ॐकारसूरि ज्ञानमन्दिर - सुरत

आ. श्री ॐकारसूरिज्ञानमन्दिरग्रन्थावलिः क्रमाङ्कः - १०४

श्रीदेवानन्दसूरिरचितम्

श्रीअजितप्रभुचरितम्

आनन्दाङ्कं महाकाव्यम्

-: आशीर्वाददातारः :-

प.पू.आ.भ. श्रीअरविन्दसूरीश्वरमहाराजाः

प.पू.आ.भ. श्रीयशोविजयसूरीश्वरमहाराजाः

-: प्रेरणादायकाः मार्गदर्शकाश्च :-

प.पू.आ.भ. श्रीमुनिचन्द्रसूरीश्वरमहाराजाः

-: सम्पादिका :-

सा. विनयपूर्णाश्रीजी म.

-: प्रकाशक :-

आचार्य श्री ॐकारसूरि ज्ञानमन्दिर

गोपीपुरा, सुभाषचोक, सुरत

SHRI AJITAPRABHU CHARITAM

Author : Acharya Devanandsooriji

वर्ष : २०७३ ई.स. २०१७

मूल्यम् : 600 Rs.

प्राप्तिस्थान :-

- **सुरत**

  आ. ॐकारसूरि आराधना भवन
  गोपीपुरा, सुभाषचोक,
  सुरत. सेवंतीभाई मो. ९८२४१५२७२७

  Email - omkarsuri@rediffmail.com
  mehta_sevantilal@yahoo.co.in

- **अमदावाद**

  - आ. ॐकारसूरि गुरुमंदिर
  वावपथकनी वाडी, दशापोरवाड सोसायटी,
  पालडी चार रस्ता, अमदावाद-७. फोन. ०७९-२६५८६२९३

  - सरस्वती पुस्तकभंडार
  हाथीखाना, रतनपोळ, अमदावाद-१ फोन. ०७९-२५३५६६९२

- **भीलडीयाजी**

  विजयभद्र चेरिटेबल ट्रस्ट
  पार्श्वभक्तिनगर, हाईवे.
  मु. भीलडी (बनासकांठा) फोन. ०२७४४-२३३१२९

मुद्रक :-
किरीट ग्राफीक्स - अमदावाद.
फोन : ९८९८४९००९१

પ્રકાશકીય

આચાર્ય શ્રીદેવાનન્દસૂરિરચિત **'શ્રીઅજિતપ્રભુ ચરિત'**નું પ્રકાશન કરતાં આનંદ થાય છે. વિદુષી સાધ્વીશ્રી **વિનયપૂર્ણાશ્રીજી**એ આનું એક માત્ર પ્રતિલિપિના આધારે સંપાદન સંશોધન કર્યું છે. તે વિશેષ આનંદની વાત છે.

પૂ. આચાર્ય ભગવંત શ્રી**યશોવિજયસૂરિ** મ.સા., પૂ. આચાર્ય ભગવંત શ્રી**મુનિચન્દ્રસૂરિ** મ.સા. આદિનું અમને સતત માર્ગદર્શન મળતું રહે છે. અને અમને ગ્રંથ પ્રકાશનનો લાભ મળતો રહે છે. પ્રકાશિત ગ્રંથોની સંખ્યા ૧૦૦ થી આગળ પહોંચી છે તે માર્ગદર્શક ગુરુભગવંતોના પ્રતાપે જ.

અદ્યાવધિ અપ્રગટ પ્રસ્તુત ગ્રંથ પ્રથમવાર પ્રકાશિત થાય છે. વિદુષી સાધ્વીજી વિનયપૂર્ણાશ્રીજીનું પણ આ પ્રથમ સંપાદન કાર્ય છે. સાધ્વીજી મહારાજ આવા બીજા પણ સંશોધન, સંપાદન કાર્યો કરે એજ પ્રાર્થના.

લી.

પ્રકાશક

कलिकालकल्पतरुश्रीपार्श्वजिनस्तोत्रम्

(द्रुतविलम्बितम्)

कलुषपांशुसमूहसमीरण !, मरण-जन्म-जरा-ऽऽमयवारण ! ।
अगद ! पार्श्वजिनेश ! कृपारसाद्, मम पुनातु सदा हृदयाम्बुजम् ॥१॥

त्रिदश-दानव-मानवसेवितांऽह्रियुगपङ्कजरुहस्तव भक्तितः ।
रुचिर ! पार्श्व ! कृपारत ! मेऽन्वहं, भवतु ते[१] स्मृतिसागरमग्नता ॥२॥

अशिवहृत् ! सुखकृद् ! भुवनेश्वर !, शरणदायक ! पार्श्वजिनेश्वर ! ।
सुविनयावनता प्रणमाम्यहं, स्मृतिरता हृदयोद्[२]गतभावतः ॥३॥

सकलदुष्कृतदारुविभावसुं, भविकपद्मविबोधदिवावसुम् ।
परमपार्श्वजिनं सततं श्रये, स्वगुणविस्तृतवैभवलब्धये ॥४॥

स्तवनभावितमद्हृदयाधिपः, प्रकटदिव्यगुणप्रकराधिपः ।
विजितदुर्जयमोहधराधिपो, विजयते प्रभुपार्श्वजिनाधिपः ॥५॥

अघतमःपटले तपनायते[३], शिवपथे ननु या सुरथायते ।
भवसमुद्रतरी तव दासता, मिलतु सा प्रभुपार्श्व ! भवे भवे ॥६॥

भवरुगौषध ! मोहनिवारक !, निखिलदोषपराङ्मुख ! देहि मे ।
वरद ! पार्श्व ! मनःशुचितां परामशुभवृक्षगजेन्द्रसमां द्रुतम् ॥७॥

कमठ-नागपतौ सममानस !, महिममन्दिर ! पार्श्वजिनेश ! माम् ।
चरणपङ्कजसेवनतत्परामव[४] सदा भवसागरतोऽवराम्[५] ॥८॥

अश्वसेनकुले चन्द्रः, सिद्धान्तरससंस्तुतः ।
पार्श्वो वितनुतां दिव्यां, **विनयपूर्ण**सम्पदम् ॥९॥

१.तव । २. हृदयोद्भूतभावतः । ३. तपनः इवाचरति । ४. रक्ष । ५. अधमाम्

भक्तियोगाचार्य-पूज्यपाद-आचार्यदेवेश-
श्रीयशोविजयसूरीश्वरसद्गुरूणां
स्तुत्यष्टकम्

येनाऽशोभि यशोभिस्त्रिजगत् स व्रतिशासकः ।
यशोविजयसूरीन्द्रो, जीयाद् वृजिननाशकः ॥१॥

राग-द्वेषभुजङ्गस्य, विषापहृत् कृपालुहृत् ।
यशोविजयसूरीशः, स्मर्यते श्रीयते मया ॥२॥

यस्याऽक्षिणी प्रभुं दृष्ट्वाऽऽनन्दाश्रुपूरिते सदा ।
यशोविजयसूरिं तं, नमस्कुर्वे प्रतिक्षणम् ॥३॥

यशोविजययोगीन्द्रं, साम्यभावे सुसंस्थितम् ।
स्वात्मगुणानुभूत्यर्थे, समुपासे निरन्तरम् ॥४॥

सुलक्षणसमूहेन, येन पृथ्वी पवित्रिता ।
यशोविजयसूरेस्तत्, समासेवे पदद्वयम् ॥५॥

शास्त्रार्थाऽमृतपानेन, निर्मलीकृतचेतसम् ।
यशोविजयसूरीन्द्रं, संस्तुवे स्वान्तशुद्धये ॥६॥

संसाराब्धौ ब्रुडत्सत्त्वतारणेऽत्यन्ततत्परम् ।
यशोविजयसूरीशं, भजेऽहं शुभभावतः ॥७॥

करुणादिगुणोपेतमपूर्वपुण्यधारकम् ।
यशोविजयसूरिं तं, नौमि **सविनयं** नयम् ॥८॥

સમર્પણ

संशोधने व्यस्तकरारविन्दं, सत्त्वोपकारे रतहृत्सरोजम् ।
मेधाविपङ्क्त्यर्चितपादपद्मं, वन्दे सदा श्रीमुनिचन्द्रसूरिम् ॥

પરમોપકારી, પથદર્શક, પ્રતિસમયાવિસ્મરણીય, સંશોધનપ્રેમી, કરૂણાનિધિ પ.પૂ.આ.ભ. શ્રીમુનિચન્દ્રસૂરીશ્વરજી મહારાજા !

અમારા જેવા અજ્ઞાની જીવો પર કરૂણાદૃષ્ટિ કરી. આપના અમૂલ્ય સમયનો ભોગ આપી સતત-સતત પ્રેરણા પ્રોત્સાહન અને માર્ગદર્શન દ્વારા આપશ્રીએ જ આ માર્ગે અમને પા-પા પગલી મંડાવી. અને હંમેશ જ્ઞાનમાર્ગમાં આગળ વધારવા માટેના પ્રયત્નો પણ આપશ્રીએ જ કર્યા.

જ્યારે જ્યારે અમારો ઉત્સાહ મંદ પડ્યો. ત્યારે ત્યારે આપશ્રીએ જ ઉત્સાહવર્ધક વાક્યો દ્વારા અમારા ઉત્સાહને વધારવાનું કામ કર્યું.

આપશ્રીની જ કૃપાદૃષ્ટિ અને આશિર્વાદનું આ ફળ છે.

આપશ્રીના ૫૦ વર્ષના સંયમપર્યાય નિમિત્તે આપના હસ્તારવિંદમાં આપનું જ આપને અર્પણ - સમર્પણ કરતા અમે ધન્યતા અનુભવીએ છીએ.

લિ. કૃપાકાંક્ષી **કુલશિશુ**

આવકાર

– આ. મુનિચન્દ્રસૂરિ

પૌર્ણમિક ગચ્છના આ. શ્રીપદ્મપ્રભસૂરિના શિષ્ય આ.શ્રી દેવાનન્દસૂરિએ રચેલ અને અદ્યાવધિ અપ્રગટ 'અજિતનાથપ્રભુ ચરિત'નું પ્રકાશન થઈ રહ્યું છે તે ઘણાં આનંદનો વિષય છે.

આગમપ્રભાકર મુનિશ્રી પુણ્યવિજયજી મ. શ્રીએ અનેક જ્ઞાનભંડારોના ઉદ્ધાર, સૂચિકરણ વગેરે કાર્યો કર્યા છે. કોઈ પણ જ્ઞાનભંડારમાં કોઈ નવો કે વિશિષ્ટ ગ્રંથ જોવા મળે તો તેઓ એની પ્રતિલિપિ કરાવી લેતા. ક્યારેક એમાં પાઠભેદ પણ નોંધાવતા. આવા ઘણાં ગ્રંથોની પ્રતિલિપિ 'પ્રાકૃત ગ્રંથ પરિષદ' પાસે છે. અમે એ પ્રતિલિપિ કરેલ ગ્રંથોની સૂચીમાં 'અજિતનાથ પ્રભુ ચરિત' જોયું. સંસ્થા પાસેથી એની ઝેરોક્ષ નકલ પ્રાપ્ત કરી. આ ગ્રંથની હસ્તલિખિત પ્રતો મેળવવા અમે અનેક જ્ઞાનભંડારોના સૂચીપત્રો તપાસ્યા પણ ક્યાંયથી એની હસ્તલિખિત એક પણ પ્રત મળી નહીં. વળી જે પ્રતિલિપિ મળી તેનું પ્રથમ પૃષ્ઠ પણ ઉપલબ્ધ ન હતું. ૧ થી ૧૪ શ્લોકો હતા નહીં. પૃષ્ઠ ૨ ઉપર ૧૫ માં શ્લોકથી ગ્રંથ શરૂ થતો હતો.

(આ પ્રતિલિપિ કરાવેલા ગ્રંથોની પુણ્યવિજય પ્રેસકૉપી = પુ.પ્રે. એવી સંજ્ઞા આપવામાં આવેલી છે. અહીં પણ પુ.પ્રે. સંજ્ઞા જ રાખી છે.)

પ્રતિલિપિ કાર્ય પણ સંસ્કૃતના અનભિજ્ઞ કોઈ લહિયાએ કરેલું હોવાથી ઘણું અશુદ્ધ લખાયેલું હતું.

આવા ઘણા કારણો સર આ ગ્રંથનું સંપાદન - સંશોધન કાર્ય જટીલ હતું. આવું પડકારરૂપ કાર્ય સંભાળે એવા કોઈ વિદ્વાનને હું શોધતો હતો અને સાધ્વી વિનયપૂર્ણાશ્રી મળી ગયા. એમને કેટલાક પ્રુફો જોઈ આપેલા એટલે એમની ક્ષમતા વિષે શ્રદ્ધા હતી. મેં કાર્ય એમને સોંપ્યું અને મને

સંતોષ છે કે વિદુષી સંપાદિકાએ અપાર શ્રમ અને ધીરજ સાથે આ કાર્ય પરિપૂર્ણ કર્યું છે.

આ ગ્રંથમાં આવતી કથાઓ જે જે ગ્રંથોમાં આવતી હોય તે તે ગ્રંથો સાથે તુલના કરી શુદ્ધીકરણ કર્યું છે.

વસુદેવહિંડી, ત્રિષષ્ટિ આદિ અનેક ગ્રંથો સાથે સરખામણી કરી છે. સામુદ્રિક બાબતોના વર્ણનને સામુદ્રિકગ્રંથો સાથે સરખાવ્યું છે.

વ્યાકરણની દૃષ્ટિએ પણ પ્રયોગોની ચકાસણી કરી છે. કોઈ ક્લિષ્ટ કે ઓછો જાણીતો પ્રયોગ આવે ત્યાં ટિપ્પણમાં એની રૂપસિદ્ધિ સમજાવી છે.

એક અપ્રગટ તીર્થંકર ચરિત્રનું સુચારુ સંપાદન - સંશોધન કરવા બદલ સંપાદિકા સાધ્વી વિનયપૂર્ણાશ્રીને અંતરના આશીર્વાદ.

ગ્રન્થકાર

પ્રસ્તુત 'અજિતનાથ પ્રભુ ચરિત' ના કર્તા દેવાનન્દસૂરિજીએ પોતાના ગુરુનું નામ 'પદ્મપ્રભસૂરિ' જણાવ્યું છે. એ સિવાય બીજી કશી વિગત તેઓશ્રીએ આપી નથી. 'દેવાનન્દ' નામના બે-ત્રણ મુનિઓ વગેરેના નામ મળે છે. આ. પદ્મપ્રભસૂરિના શિષ્ય દેવાનન્દસૂરિ પૌર્ણમિક ગચ્છમાં થયા છે.

આ ગચ્છનો પરિચય અને ગ્રંથકારની ગુરુપરંપરા વગેરે બાબતો ડૉ. શિવપ્રસાદે લખેલા "जैन श्वेताम्बर गच्छों का संक्षिप्त इतिहास" भा. २ (प्र. पू. आ. ॐकारसूरिज्ञानमंदिरग्रन्थावली - सूरत) (पृ. ९३१, ९३७-९३८) માં આ પ્રમાણે આપેલ છે.

पूर्णिमागच्छ का संक्षिप्त इतिहास

मध्ययुगमें श्वेताम्बर श्रमणसंघ का विभिन्न गच्छों और उपगच्छों के रूपमें विभाजन एक अत्यन्त महत्त्वपूर्ण घटना है । श्वेताम्बर श्रमणसंघ की एक अत्यन्त महत्त्वपूर्ण शाखा चन्द्रकुल [बाद में चन्द्रगच्छ] का विभिन्न कारणों से समय-समय पर विभाजन होता रहा । परिणामस्वरूप अनेक नये-नये गच्छों का प्रादुर्भाव हुआ । इनमें पूर्णिमागच्छ भी एक है । पाक्षिकपर्व पूर्णिमा को मनायी जाये या चतुर्दशी को ? इस प्रश्न पर पूर्णिमा का पक्ष ग्रहण

करने वाले चन्द्रकुल के मुनिगण पूर्णिमापक्षीय या पूर्णिमागच्छीय कहलाये । वि. सं. ११४९ / ई. सन् १०९३ अथवा वि. सं. ११५९/ ई. सन् ११०३ में इस गच्छ का आविर्भाव माना जाता है । चन्द्रकुल के आचार्य जयसिंहसूरि के शिष्य चन्द्रप्रभसूरि इस गच्छ के प्रथम आचार्य माने जाते हैं । इस गच्छ में धर्मघोषसूरि, देवसूरि, चक्रेश्वरसूरि, समुद्रघोषसूरि, विमलगणि, देवभद्रसूरि, तिलकाचार्य, मुनिरत्नसूरि, कमलप्रभसूरि आदि तेजस्वी विद्वान एवं प्रभावक आचार्य हुए हैं । इस गच्छ के पूनमियागच्छ, राकापक्ष आदि नाम भी बाद में प्रचलित हुए । इस गच्छ से कई शाखाएं उद्‌भूत हुई, जैसे प्रधानशाखा या ढंढेरियाशाखा, साधुपूर्णिमा या सार्धपूर्णिमाशाखा, कच्छोलीवालशाखा, भीमपल्लीयाशाखा, बटपद्रीयाशाखा, बोरसिद्धीयाशाखा, भृगुकच्छीयाशाखा, छापरियाशाखा आदि । (पृ. ९३१)

क्षेत्रसमासवृत्ति

यह कृति पूर्णिमागच्छीय पद्मप्रभसूरि के शिष्य देवानन्दसूरि द्वारा वि. सं. १४५५ / ई.सन् १३९९ में रची गयी हैं । कृति के अन्त में प्रशस्ति के अन्तर्गत रचनाकार ने अपनी लम्बी गुरु-परम्परा का उल्लेख किया है, जो इस प्रकार हैं :

चन्द्रप्रभसूरि
|
धर्मघोषसूरि
|
भद्रेश्वरसूरि
|
मुनिप्रभसूरि
|
सर्वदेवसूरि
|
सोमप्रभसूरि
|
रत्नप्रभसूरि
|
चन्द्रसिंहसूरि

देवसिंहसूरि
|
पद्मतिलकसूरि
|
श्रीतिलकसूरि
|
देवचन्द्रसूरि
|
पद्मप्रभसूरि
|

देवानन्दसूरि [वि.सं. १४५५ / ई. सन् १३९९ में क्षेत्रसमासवृत्ति के रचनाकार]

(जैन श्वेताम्बर गच्छों का संक्षिप्त इतिहास भा-२, पृ. ९३७-९३८)

આ જ ગ્રંથકારે ક્ષેત્રસમાસની વૃત્તિ રચ્યાનું આ ઉપરથી નિશ્ચિત થાય છે. તેમજ તપાસ કરતા કેવળ વૃત્તિ જ નહીં. પણ પૂ. દેવાનન્દસૂરિ મ. રચિત સંસ્કૃત ક્ષેત્રસમાસ (સ્વોપજ્ઞવૃત્તિ સાથે) અમને મળેલ છે. જેની ૧ પ્રતિ (ડા. ૫૧ ગ્રંથ-૧૦૦૨)પાટણ હેમચંદ્રાચાર્ય જ્ઞાનભંડારમાંથી મળેલ છે. જેમાં મૂળમાં ક્ષેત્રસમાસ છે.

બીજી પ્રતિ (નં. ૧૮૯૮૨) અમદાવાદ લાલભાઈ દલપતભાઈ ભારતીય સંસ્કૃત વિદ્યામંદિરમાંથી મળેલ છે. જેમાં છેલ્લે કેવળ ક્ષેત્રસમાસનો ૭મો અધિકાર જ છે. સંપૂર્ણ ગ્રન્થ નથી. અને ત્રીજી પ્રતિ (.....)માંથી મળેલ છે. જેમાં સ્વોપજ્ઞવૃત્તિ સાથે ક્ષેત્રસમાસ છે. આ ક્ષેત્રસમાસની પૂ. જિનભદ્રગણિ રચિત બૃહત્ક્ષેત્રસમાસ અને તેની પૂ. મલયગિરિજી મ.ની ટીકાના આધારે શાકે ૧૩૨૦માં શ્રીદેવાનન્દસૂરિ મહારાજાએ સંસ્કૃતમાં ૨૯૮ શ્લોક પ્રમાણ સ્વોપજ્ઞટીકા સાથે રચના કરેલ છે. જેમાં ઉપર જણાવેલ ગુરૂપરમ્પરા પ્રશસ્તિમાં વર્ણવેલ છે. તેમજ ગ્રન્થના અંતમાં મૂળશ્લોકો આ પ્રમાણે છે.

कलाभृतः पूतपादाः, पूर्णिमापक्षभासकाः ।
श्रीदेवचन्द्रगुरवः, श्रीमत् कुवलयं व्यधुः ॥१४॥

तत्पट्टोदयशैलरश्मिपतयो, विद्वत्प्रकाण्डाः क्षितौ,
श्रीपद्मप्रभसूरयो विजयिनस्तेषां प्रसादान्मया ।

शाकाब्दे नखपावकावनि (१३२०) मिते, दृब्धः कृतानुग्रहैः;
शोध्यः क्षेत्रसमास एष कुशलैः, सप्ताधिकारात्मकः ॥१५॥

वाग्देवता सदा देयादवदातगुणं वचः ।
अमूढप्रतिभामूलं, कीर्तिवाञ्छितपूर्तिसूः ॥१६॥

द्विःसूत्रकृन्नामगर्भः श्लोकोऽयम् ।
इह श्लोके चतुर्णां पादानां द्वितीयैर्वर्णैः सप्तमैश्च वारद्वयं
सूत्रकृता स्वनामोपन्यस्तं तच्च देवमूर्तिरिति । (वृत्तिमांथी,)

આ સિવાય અન્ય ગ્રંથો પણ રચ્યા હોય તેમ જણાય છે. 'समयसार-प्रकरणम्' स्वोपज्ञटीका साथे वि. सं. १९७१ માં ભાવનગરથી આત્માનંદ સભાએ પ્રગટ કરેલ છે.

આ ગ્રંથના અંતે નીચે પ્રમાણે પ્રશસ્તિ છે. આ કર્તા અજીતનાથ પ્રભુ ચરિતના કર્તાથી અભિન્ન જણાય છે.

लोआण देवचंद व्व, हिया पउमप्पहा जिणेसपया ।
देवाणंदसमुन्नइहेऊ सययं सिवं दिन्तु ॥१॥

श्रीपद्मप्रभगणधरपदद्वन्द्वराजहंस इमाम् ।
देवानन्दो व्यतनुत, टीकां स्वोपज्ञसमयसारस्य ॥२॥

निधिरसयुगशशि १४६९ सङ्ख्ये, वर्षे विक्रमनृपात् सहसि मासे ।
शुक्ले त्रयोदशतिथौ, सौम्यदिनेऽपूरि टीकेयम् ॥३॥

ગ્રન્થકારવિશે વિશેષ માહિતી મળતી નથી.

શ્રીઅજિતનાથ પ્રભુનું સરળ અને સુંદર સંસ્કૃત પદ્યમય ચરિત્ર વિદુષી સાધ્વીજી દ્વારા સંપાદન - સંશોધન થઈ પ્રગટ થઈ રહ્યું છે તે ઘણા આનંદની વાત છે. વિદુષી સાધ્વીજીઓ દ્વારા આવા કાર્યો થતાં રહે એજ અભિલાષા.

આ ગ્રંથનું વાંચન કરી વાચકો પ્રભુના જીવનને સમજે ઉપદેશને ગ્રહણ કરે એજ અભિલાષા.

●

॥ ૐ હ્રીઁ શ્રી પાર્શ્વનાથાય નમઃ ॥ ॥ સદ્‌ગુરુભ્યો નમઃ ॥

સમ્પાદકીય

પૌર્ણમિક ગચ્છના આ. પદ્મપ્રભસૂરિના શિષ્ય આ. દેવાનન્દસૂરિ રચિત અજિતનાથપ્રભુ ચરિતનું સંપાદન સંશોધન કરી પ્રકાશન કરતા અતિ આનંદ થાય છે.

સંપાદનનો આ પ્રથમ પ્રયાસ છે. અને માત્ર પ્રતિલિપિ કરેલ કૉપીના આધારે કોઈ પણ હસ્તલિખિત પ્રતના આધાર વિના સંપાદન સંશોધન કરવું એક પડકારજનક કાર્ય કહેવાય, પણ પૂ. આ. ભ. શ્રી મુનિચન્દ્રસૂરીશ્વરજી મહારાજાએ અમને આ કાર્ય સોંપ્યું અને અમે એ શ્રદ્ધાએ સ્વીકાર્યું કે - મુશ્કેલી પડે તો માર્ગદર્શન આપવા પૂ. આ. ભ. તૈયાર જ છે... અને અમે ભીલડીયાજીમાં આ કાર્ય શરૂ કર્યું...

પ્રતિલિપિમાં પ્રથમ પેજ પણ ન હતું એટલે ૧ થી ૧૪ શ્લોક અમે રચીને પૂર્તિ કરી. અને આ જ રીતે વચ્ચે ૨-૩ જગ્યાએ ખૂટતા શ્લોકો સંદર્ભ ગ્રંથોના આધારે રચીને પૂર્તિ કરી. અનેક સ્થળે અમે અન્યાન્ય ચરિત્રોનો આધાર લઈ - પાઠનિર્ણય પાઠસંશોધન કર્યા છે.

આ ગ્રંથના સંપાદન - સંશોધનના નિમિત્તે અનેકાનેક ગ્રંથો જોવાનો લ્હાવો મળ્યો. અને પૂજ્યશ્રીનું માર્ગદર્શન પણ મળતું રહ્યું જ્યાં પણ અમે અટક્યા મુંઝાયા કે તરત પત્રદ્વારા મૂંઝવણ વ્યક્ત કરીએ અને વિનાવિલંબે પત્રદ્વારા પૂજ્યશ્રી અમને પ્રત્યુત્તર મોકલાવે. જ્યાં જે ગ્રંથની જરૂર પડે તે ગ્રંથ પણ તત્ક્ષણ મોકલાવી આપે. કયા ગ્રંથો જોવા. કઈ રીતે જોવા. તેનું માર્ગદર્શન પણ પૂજ્યશ્રી આપે.

ઈ.સ. ૨૦૧૬ માં બોમ્બે લોઢાધામ આગળ પૂજ્યશ્રીને અકસ્માત થયો ત્યારે સ્વસ્થતાના સમાચાર માટે પત્ર મોકલાવીએ, અને પ્રત્યુત્તરમાં એક જ

જવાબ હોય કે અજિતચરિતનું કામ ચાલુ છે ને ? વિહારમાં સાથે રહેવાના પ્રસંગે સ્થાને પહોંચી દર્શનાદિ કાર્ય પૂર્ણ કરી જ્યારે પણ અ.ચ.ની શંકાના સમાધાનાર્થે પૂજ્યશ્રી પાસે જતા. ત્યારે તરત જ સ્વકાર્ય એક બાજુ મૂકી સુંદર સમાધાનો આપતા. શારીરિક થાક હોવા છતાં જેઓશ્રીએ આરામની પણ ક્યારેય દરકાર કરી નથી.

સુરત - ચાતુર્માસના પ્રસંગે પણ ગમે ત્યારે ગમે તેટલી વાર પૂજ્યશ્રી પાસે જઈએ ત્યારે પણ સંશોધનકાર્ય એક બાજુ મૂકી અમૂલ્ય સમયનો ભોગ આપતા. આ રીતે સ્વયં ની વ્યસ્તતામાં અને ક્યારેક શારીરિક અસ્વસ્થતામાં પણ અસીમ વાત્સલ્યથી પ્રસન્નતાપૂર્વક જેઓશ્રીએ સમાધાનો આપી અનન્ય ઉપકાર કર્યો છે.

પ્રૂફની ઝેરોક્ષ કરાવવી, પ્રેસમાં મોકલવું, અમને પુનઃ મોકલવા આવા કાર્યો પણ જેઓશ્રીએ ઉદારહૃદયથી કર્યા. અને આ રીતે સ્વયં અંગીકૃત કરેલા વચનને પ્રારંભથી પૂર્ણતા સુધી નિભાવ્યું.

પરિણામે આ ગ્રંથ સંપાદન થઈ શક્યો છે.

संशोधन अने तुलना

આ ગ્રંથના શુદ્ધીકરણ માટે અમે જે જે ગ્રંથોનો આધાર લીધો છે. તે અને આ ગ્રંથના તે તે વિષયની સાથે અન્ય જે ગ્રંથોની સમાનતા છે. તે નીચે મુજબ છે.

સર્ગ-૨ માં – बन्धुवैरस्ये कीर्तिचन्द्र-समरविजयकथा तेमज सर्प-गारुडिकनी अन्तरङ्गघटना.

સર્ગ ૩ માં – योनि-कुलवर्णन.

સર્ગ ૪ માં – धर्मस्थैर्ये धनमित्रकथा.

સર્ગ ૬ માં – कृतकर्मविपाके वसुमतीकथा, श्रवणेन्द्रिये सुभद्राकथा, चक्षुरिन्द्रिये लोलाक्षकथा, रसनेन्द्रिये रसलोलकथा, घ्राणेन्द्रिये गन्धप्रियकथा, स्पर्शनेन्द्रिये सुकुमालिकानृपकथा.

સર્ગ ૭ માં – सम्यक्त्वमाहात्म्ये अमरदत्तभार्याकथा.

ઉપરોક્ત સર્વે કથા વગેરેનું ઉપદેશમાલા(પુષ્પમાલા)માં રહેલી તે તે કથાઓની સાથે ઘણું સામ્ય છે. ઉપદેશમાલા ગ્રંથ પ્રાકૃતમાં છે. પણ તેમાં તે કથાઓ વાંચતા ઘણી જગ્યાએ તો એવું જ લાગે કે આ ગ્રંથમાં પ્રાકૃતનું સંસ્કૃતમાં રૂપાન્તરણ થયું ન હોય ? તેમજ ઉપદેશમાલામાં બન્ધુ, લક્ષ્મી, સ્ત્રી વગેરેના વૈરસ્યમાં દૃષ્ટાંતો આપ્યા છે. તેજ રીતે અહીં પણ સર્ગ - ૨ માં છે. કેવલ કથાઓની ભિન્નતા છે. દૃષ્ટિકોણ એજ છે.

સર્ગ - ૧. **મઙ્ગલકલશકથા**નું શાંતિનાથચરિત્ર (પૂ. માણિક્યચંદ્ર સૂ.મ) અને મુનિસુવ્રતસ્વામિચરિત્ર (પૂ. વિનયચંદ્ર સૂ.મ) માં રહેલી મઙ્ગલકલશકથાની સાથે ઘણું સામ્ય છે. ક્યાંક શબ્દથી સામ્ય છે. ક્યાંક શબ્દ બદલાયા છે. અર્થ એ જ રાખ્યો છે. ક્યાંક પ્રયોગ બદલાયા છે. અને ક્યાંક થોડું વિસ્તૃત વર્ણન છે. પૂ. ગણિ તીર્થભદ્રવિજય મ.સા. દ્વારા સંપાદિત 'શ્રીમઙ્ગલકલશચરિત્રસઙ્ગ્રહ' પણ આ કથાની શુદ્ધિ માટે ઉપકારક બનેલ છે.

ચમ્પકમાલાકથાનું મુનિસુવ્રતસ્વામિચરિત્રમાં રહેલી તે કથાની સાથે ઘણું સામ્ય છે. (આ કથા સુપાસનાહચરિયંમાં પણ છે) **નાગકેતુકથા**નું કથારત્નસાગરમાં રહેલી તે કથાની સાથે તેમજ **મિત્રત્રયકથા** અને **શ્રાદ્ધપ્રતિમાવર્ણન**નું વાસુપૂજ્યચરિત્ર (પૂ. વર્ધમાન સૂ.મ.) ની સાથે સામ્ય છે.

સર્ગ - ૨. **અગડદત્તકથા**નું ઘટનાઓના વર્ણનની અપેક્ષાએ અને પાત્રો વગેરેના નામની દૃષ્ટિએ વસુદેવહિંડીની સાથે સામ્ય છે. તે ઉપરાંત મુનિસુવ્રતસ્વામિચરિત્રમાં રહેલી તે કથાની સાથે આ કથાનું ઘણી જગ્યાએ શબ્દશઃ સામ્ય છે.

જેમ કે-

અજિત ચ૦ ૨।૩૯૧. મુનિ૦ ચ૦ ૨।૯૯

आदेशं देहि तं चौरं, त्वत्पादान्तमुपानये ॥ (उत्तरार्द्ध)

અજિત ચ૦ ૨।૩૯૫. મુનિ૦ ચ૦ ૨।૧૦૩

दिवसानतिचक्राम, विक्रमैकधनः स षट् ॥ (उत्त०)

અજિત ચ૦ ૨।૪૨૨. મુનિ૦ ચ૦ ૨।૧૩૧

तुष्टस्त्वद्विक्रमाच्छिष्ट !, मां जानीहि मलिम्लुचम् ।

भुजङ्गं नाम लोकानां, ...

ઘણી જગ્યાએ પર્યાયવાચી શબ્દો દ્વારા ભિન્નતા છે, કે પ્રયોગની ભિન્નતા છે. ભાવાર્થ એ જ રહે છે.

જેમ કે –

અજિત ચ૦ ૨।૩૯૦ सस्मितं नृपतिः प्रोचे, 'वक्तीदं भद्र ! किं भवान् ।
नान्यस्य वारके ह्यन्यः, कृतान्तेनाऽपि नीयते' ॥

મુનિ૦ ચ૦ ૨।૯૮ विहस्योचे महाराजः, 'किमेतद् भवतोदितम् ।
नान्यस्य वारकेऽप्यन्यत्कृतान्तेनाऽपि नीयते' ॥

અજિતચ૦ ૨।૩૯૭ तद् व्रजामि विदेशं किं ?, किं वाऽद्मि विषमं विषम् ।
हृत्वा तां कामिनीं किं वा, यामि क्वचन दुर्गमे ॥

મુનિ૦ ચ૦ ૨।૧૦૫ किं व्रजामि विदेशेऽहं, किं वाऽद्मि गरलं खलु ।
धृत्वा तां योषितं यामि, किं वाऽरण्ये सुदुर्गमे ॥

કથારત્નસાગર, ઉત્તરાધ્યયન વગેરેમાં પણ આ કથા છે.

મધુબિન્દુકથા પરિશિષ્ટપર્વ સર્ગ ૨ માં રહેલી તે કથા સાથે સામ્ય ધરાવે છે.

જિનપાલિત-જિનરક્ષિતકથાનું શુદ્ધીકરણ શાંતિનાથચરિત્ર, ઉપદેશમાલા અને ધર્મરત્નપ્રકરણના આધારે કરેલ છે. તેમજ શ્લોક ૭૭૮ થી ૮૪૫ સુધીનું વર્ણન ત્રિષષ્ટિશલાકાપુરુષચરિત્ર (૨।૧।૧૩૯ થી ૨।૧।૨૫૫) ની સાથે થોડું થોડું સામ્ય ધરાવે છે.

સર્ગ - ૩ નું વર્ણન ત્રિ. શ. પુ. ચ. અને વાસુપૂજ્યચરિત્રની સાથે સામ્ય ધરાવે છે.

સર્ગ - ૪. સગરચક્રિના ષટ્ખંડસાધનનું વર્ણન ત્રિ.શ.પુ.ચરિત્ર (પર્વ-૨ । સર્ગ-૪) ની સાથે તેમજ પૂર્ણમેઘ અને સુલોચનના પૂર્વભવનાં સંબંધનું વર્ણન અને મેઘવાહન અને સહસ્રાક્ષના પૂર્વભવનું વર્ણન ત્રિ.શ.પુ.ચરિત્ર (પર્વ-૨।સર્ગ-૫) ની સાથે સામ્ય ધરાવે છે.

સર્ગ - ૫. સગરપુત્રોના સ્વેચ્છાવિહારનું વર્ણન ત્રિ.શ.પુ.ચરિત્ર (પર્વ-૨સર્ગ-૫) સાથે અને **વરુણવર્મકથા** ચઉપ્પન્નમહાપુરિસચરિયંમાં રહેલ તે કથાની સાથે સામ્ય ધરાવે છે.

સર્ગ - ૬. શ્લો. ૧ થી ૨૩૧ સુધીનું વર્ણન ત્રિ.શ.પુ. ચરિત્ર (પર્વ-૨સર્ગ-૫ અને પર્વ-૨સર્ગ-૬) ની સાથે અને **અશોકશ્રીકથા** શાંતિનાથ ચરિત્રની સાથે સામ્ય ધરાવે છે. અને **લોલાક્ષકથા**માં સામુદ્રિકશાસ્ત્રનું વર્ણન છે. તેનું શુદ્ધીકરણ ઉપદેશમાલા (પુષ્પમાલા), કુવલયમાલા, સામુદ્રિકશાસ્ત્ર, સામુદ્રિકતિલક, હસ્તસંજીવન તથા વિવેકવિલાસના આધારે કરેલ છે.

સર્ગ - ૭. **સુલક્ષણા-શુદ્ધભટ્ટકથા** ત્રિ.શ.પુ. ચરિત્ર (પર્વ-૨સર્ગ-૩) માં રહેલ તે કથાની સાથે સામ્ય ધરાવે છે.

પરમતારક પરમાત્માની દિવ્યકૃપાથી અને પ.પૂ. આ. શ્રી મુનિચન્દ્રસૂરીશ્વરજી મહારાજાની અસીમકૃપા અને માર્ગદર્શન દ્વારા તે તે ગ્રંથો મળતા ગયા. જેથી તે તે ગ્રંથોના આધારે આ ગ્રંથનું શુદ્ધીકરણ કરવાનો પ્રયત્ન કરેલ છે.

આ ગ્રંથમાં કરેલ શુદ્ધીકરણના કેટલાક ઉદાહરણ નીચે મુજબ છે.

વ્યંજનના ફેરફારનાં ઉદાહરણ

અશુદ્ધ	શુદ્ધ	અશુદ્ધ	શુદ્ધ
૧।૮૨૨	स → र	नेत्रचकोसणां	→ नेत्रचकोराणां
૨।૨૫૦	न → त	निःसपन्नमिदं	→ निःसपत्नमिदं
૨।૨૫૦	स → म	धनसात्मसात्	→ धनमात्मसात्
૨।૨૫૨	ल → न	हत्वाप्लोमि	→ हत्वाऽऽप्नोमि
૨।૪૭૧	त → भ	सदंतिकः	→ स दम्भिकः
૨।૪૭૬	थ → ध	थ न पुंजाभिधो	→ धनपुञ्जाभिधो
૨।૪૯૦	द्र → क्र	चंद्रे	→ चक्रे
૨।૪૯૬	श्र → ज	श्रयश्रीकांक्षिणोर्जज्ञे	→ जयश्रीकाङ्क्षिणोर्जज्ञे
૨।૯૫૮	व → क	सागरद्वितयायुष्वः	→ सागरद्वितयायुष्कः
૩।૩૪૪	व → त	खलु वातस्य	→ खलु तातस्य

अशुद्ध शुद्ध	अशुद्ध शुद्ध
३।५५१ ल → भ	विलुर्भव्यैः → विभुर्भव्यैः
३।५५५ र्ष → र्थ	श्रौतादर्षाद् → श्रौतादर्थाद्
३।६३५ ज्ज → क्ष	लज्जाणि → लक्षाणि
४।५६ ण → प	शरक्षेण → शरक्षेपा(द्)
४।१०६ द → ह	दूरवान् → हूरवान्
४।१०८ भ → र	निर्विषोभगवत् → निर्विषोरगवत्
४।११० ध → भ	रिवाम्भोधिर्धनैरपि → रिवाम्भोभिर्धनैरपि
४।२१४ छ → उ	छत्तरपूर्वस्यां → उत्तरपूर्वस्यां
४।३२७ ध → थ	वृधा → वृथा
४।३५० च → व	चेद → वेद
४।३८६ क्ष → द	विवाक्षे → विवादे
४।४४६ क → त	विस्कृतः → विस्तृतः
५।९६ ज → त	नीजः → नीतः
५।१९४ ज → ज्ञ	विजायेति → विज्ञायेति
६।२८१ द → प	पितरमद्राक्षीत् → पितरमप्राक्षीत्

सूचना :- प्रेसकोपीमां जेवो पाठ हतो, तेवो ज पाठ आपीने बाजुमां शुद्ध पाठ लखेल छे.

એ પ્રમાણે સર્વે ઉદાહરણોમાં સમજવું.

स्वरना फेरफारना उदाहरण

	अशुद्ध		शुद्ध
१।५०६	भानक्षत्रसुरावार्यौ	→	भानुक्षेत्रे सुराचार्यो
१।६२७	प्रणितार्थेजनव्रजाः	→	प्रीणितार्थिजनव्रजाः
२।३११	स च त्रि	→	सवित्रि !
२।६७६	स्वीचक्रोऽसौ	→	स्वीचक्रेऽसौ
३।३६०	न दायो	→	नेदीयो
४।४१	स्वामीत्येन	→	स्वामात्येन
४।१७९	कुंडलद्वितीयच्छलात्	→	कुण्डलद्वितयच्छलात्
५।१४५	करत्रिकंटकोदग्र....	→	करात्तकण्टकोदग्र

વધારાના અક્ષરો દૂર કર્યાના ઉદાહરણ

	अशुद्ध	शुद्ध
૨।૧૨૫	लब्धभिक्षो पिरमुचिरं →	लब्धभिक्षोऽपि सुचिरं
૨।૬૯૫	योग्यैश्चापि →	योगैश्चापि
४।૩૨૦	द्रव्या व्यार्जनं →	द्रव्यार्जनं
४।૩૩૮	कृतज्ञानानां →	कृतज्ञानां
४।૩४६	नान्योन्यो त्रा →	नान्योऽत्रा
४।४०७	दुरितव्यूहीहापोहकृद् →	दुरितव्यूहापोहकृद्
४।४४८	मन्दिरतोरणाम् →	मन्दिरतोरणा

ખૂટતા અક્ષરો ઉમેર્યાના ઉદાહરણ

	अशुद्ध	शुद्ध
૧।૮૦४	महादुःर्व्यथ्यते →	महादुः[खै]र्व्यथ्यते
૨।६૨	प्रतिष्ठतोन्मनाः →	[प्रति] प्रातिष्ठतोन्मनाः
૨।૧૨૩	निर्मि भोजनम् →	निर्मि[त]भोजनम्
૨।૮૨૩	स्फारालङ्काद्ध्यः →	स्फारालङ्का[रा]द्ध्यः
४।૧૧૩	सिकता रस्थितीः →	सिकता[स्रस्त]रस्थिताः
४।૩४૩	न मित्रोऽपि →	[ध]नमित्रोऽपि
४।४०४	ग्घ हृदयः →	[मु]ग्धहृदयः
४।४૨૮	काक्येव →	[ए]काक्येव

અનુનાસિક ઉમેર્યાના ઉદાહરણ

	अशुद्ध	शुद्ध
૧।६०૮	एवमगिवधो →	एवमङ्गिवधो
૧।૮૧५	सततम् →	सन्ततम्
૨।६૩	वसुसभारभासुरः →	वसुसम्भारभासुरः
६।૨૮૧	किमवया →	किमम्बया
६।५૩६	अनियत्रितदृग् →	अनियन्त्रितदृग्

એકથી વધારે ફેરફારના ઉદાહરણ

	अशुद्ध	शुद्ध
૧।૧૬૦	स नेशस्य →	स निशम्य
૧।૩૯૪	न व्यामवदना →	तच्छ्यामवदना
૧।૬૨૧	स्वीवक्तुर्नेकटं →	स्वीचक्रुर्निकटं
૧।૯૮૭	*चित्रोत्तरौऽपि न सर्वज्ञधर्मः →*	*चित्तरोपितसर्वज्ञधर्मः*
૧।૯૯૩	विवकरांबुवरे →	विचकाराऽम्बरे
૨।૨૦૦	भूपश्चायं च यदृक्षो →	भूपश्चाऽवञ्चयद् दक्षो
૩।૨૧	चित्राधिक्यगते युत्वा →	चित्राधिष्ण्यगते च्युत्वा
૪।૪૩૭	सत्स्वावल्याह्वौ →	शश्यावल्याह्वौ
૫।૮૨	न स्वथा →	तद्यथा

આગળ-પાછળના અક્ષરોને વ્યવસ્થિતકર્યાના ઉદાહરણ

૧।૨૩૯	कुशलेन →	कलशेन
૪।૧૦૫	जय विमांगिनाम् →	जयमिवाङ्गिनम्

★ આ ગ્રંથમાં ખુટતા પાઠ ચોરસ બ્રેકેટમાં [ ] અને સંશોધિત પાઠ રાઉંડ બ્રેકેટમાં ( ) ઉમેર્યા છે. જેમકે ૪।૪૫૬ ક્રી[ડ]તો.... ૬।૪૮૬ સિંહસ્ય(સ્યેવ)

ગ્રંથની વિશેષતા

આ ગ્રંથમાં ગ્રંથકર્તાશ્રીએ અનેક સ્થળે કર્મ. સત્પુરુષ, પુણ્ય, તપ, ભાવના વગેરે વિષયક સુભાષિતો આપેલા છે.

कर्मणां हि परिणामान्नास्ति तद् यन्न जायते ।૬।૭૮ ॥

कृतं हि कर्म नाऽभुक्त्वा, छुटत्यङ्गी कदाचन ।૬।૩૭૮ ॥

दुःखिताः परदुःखेन, प्रायो यद्दुर्लभा नराः ।૧।૮૦૦ ॥

परोपकारकरणे, न श्राम्यन्ति यदुत्तमाः ।૧।૬૪૩ ॥

सागस्यपि कृपासार्द्रहृदया हि महाशयाः ।૧।૭૫૯ ॥

सन्तोऽसत्स्वपि वत्सलाः ।૧।૩૬૬ ॥

पुण्यतेजो हि दुर्जयम् । ૧।૩૭૫ ॥

तपोमाहात्म्यतो नूनं, स्युः सुरा अपि किङ्कराः ।१।९८४ ॥
भावनाकामगौः सर्वकार्यसिद्धिकरी खलु ।१।१२२८ ॥
दानात् परं न यद् विश्वे, वशीकरणमुत्तमम् ।१।६५७ ॥

● એક જ વસ્તુનું વિવિધ ઉપમા દ્વારા વર્ણન

चारित्रं कर्मकक्षौघलवित्रम् ।३।४१०॥ परिव्रज्यां पापपन्नगजाङ्गुलीम् ।१।३७१ ॥ दीक्षां शर्मारामैकसारणिम् ।३।४१७ ॥

● કલ્પના દ્વારા જડ પદાર્થોમાં સચેતનતાનું વર્ણન

शक्रस्य सहसा सिंहासनं कम्पमवाप्नुवत् ।
नृत्यं प्रादुश्चकारेव, जिनजन्मप्रमोदतः ॥३।११८॥
वैजयन्त्यः पुरो मन्दमरुत्कम्प्राञ्चला बभुः ।
वीजयन्त्य इव स्वामिभक्त्या [भ]वदवार्दितान् ॥३।४९४ ॥

● ક્યાંક થોડા ફેરફાર સાથે સમાન રચના

तदमूमे[व] विनयात्, तोषयिष्यामि सत्वरम् ।
भूमौ स्खलितपादो हि, भूमिमेवावलम्बते ॥१।७५७ ॥
तदमूमेव विनयात्, प्रसन्नां करवै द्रुतम् ।
भूमौ स्खलितपादो हि, भूमिमेवावलम्बते ॥६।२७२ ॥

● ક્યાંક કાવ્ય ચમત્કૃતિ

बाह्यानरीन् स शस्त्रेण, यथाऽजैषीन्महीपतिः ।
मात्राधिकेन तेनैव, तथैवाऽभ्यन्तरानपि ॥३।११ ॥

● સર્ગ ૩ માં ૨૨૦ થી ૨૨૪. ૫૨૬ થી ૫૨૯ અને ૬૧૦ થી ૬૧૮ માં શક્રદ્વારા કરાયેલી પરમાત્મસ્તવના અને સર્ગ ૫ માં શૌરસેની. માગધી વગેરે ભાષામાં સગરપુત્રો દ્વારા કરાયેલી પ્રભુસ્તવના સુંદર છે. તેમજ અનેક સ્થળે સમયે સમયે વૈરાગ્યવિષયક ઉપદેશ આદિ ઘણું આ ગ્રંથરૂપી મહાસાગરમાં છે.

ઉર ઉછળે ઉપકારસ્મરણ. ઉપકારીચરણે અગણિતનમન

દિવ્યાશીષદાતા યુગમહર્ષિ પ.પૂ. આ. **શ્રી ભદ્રસૂરીશ્વરજી મહારાજા.** શાસનપ્રભાવક, સંઘએકતાશિલ્પી પ.પૂ. આ. **શ્રી ૐકારસૂરીશ્વરજી**

મહારાજા. અપ્રમત્તતાનો આદર્શ આપનારા પ.પૂ. આ. શ્રી **અરવિંદસૂરીશ્વરજી મહારાજા.** પરમના આનંદને માણનારા, જીવનરૂપી વનને નંદનવન સમાન બનાવનારા, પરમોપકારી, વાત્સલ્યવારિધિ પ.પૂ. આ. શ્રી **યશોવિજયસૂરીશ્વરજી મહારાજા.** પ્રેરણા પાથેયનું દાન કરનારા, અગણિત સંશયોનું સુંદર સમાધાન આપનારા, ઉત્સાહને પ્રવર્ધમાન બનાવનારા, પાયાથી શિખરસુધી ગ્રંથપ્રકાશનની જવાબદારી સંભાળનારા, અમૂલ્ય સમયનો ભોગ આપી સ્વાધ્યાયમાં રત બનાવનારા, પ્રસન્નતાપૂર્ણ કૃપાદૃષ્ટિ વર્ષાવનારા, વસ્તુતઃ આ ગ્રંથ સંપાદનના સમગ્રયશના અધિકારી, પરમોપકારી પ.પૂ.આ. **શ્રી મુનિચન્દ્રસૂરીશ્વરજી મહારાજા.** મિતભાષી પ.પૂ. આ શ્રી**રાજપુણ્યસૂરીશ્વરજી મહારાજા.** પ્રવચનકુશળ પ.પૂ. આ. શ્રી **ભાગ્યેશવિજયસૂરીશ્વરજી મહારાજા.** સર્ગ ૫ માં શૌરસેની, માગધી વગેરે ભાષાના શ્લોકોની સંસ્કૃતછાયા કરી આપનારા પ.પૂ. આ. શ્રી **શીલચન્દ્રસૂરીશ્વરજી મહારાજા.** શ્રુતભક્તિથી પ્રેરાઈ સર્ગ ૧-૨ ના પ્રૂફ તપાસી આપનારા પ.પૂ. **દીક્ષિતપ્રભ વિ.મ.સા.** તથા તેમના શિષ્ય પ.પૂ. **સૌમ્યપ્રભ વિ. મ. સા.** અનેક સ્થળે સમસ્યાઓના સમાધાનાર્થે અમૂલ્ય સમયનો ભોગ આપનારા પ.પૂ. **અક્ષયચન્દ્રવિ.** મ. સા. પૂ. આ. ભ. શ્રી ભદ્રસૂરીશ્વરજી મ.સા.ના આજ્ઞાવર્તિની પૂ.સા.શ્રી **પ્રભાશ્રીજી** મ.સા.ના શિષ્યા અનન્યોપકારિણી પૂ.સા. શ્રી **કનકપ્રભાશ્રીજી** મ.સા. પરમહિતૈષિણી દાદીગુરુણી પૂ.સા. શ્રી **પૂર્ણચન્દ્રાશ્રીજી** મ.સા. જન્મથી જ સુસંસ્કારોનું દાન આપી પ્રભુ શાસનમાં પ્રવેશ કરાવનારા, અધ્યયનમાટે સતત પ્રેરણા કરનારા, અગણિતઉપકારી, પરમવંદનીય, ગુરુમાતા પૂ.સા. **શ્રીકુલચન્દ્રાશ્રીજી** મ.સા. વેયાવચ્ચ, નમ્રતા અને લઘુતાનો આદર્શ આપનારા, જેઓનો સતત આ કાર્યમાં નિઃસ્વાર્થભાવે સહયોગ મળ્યો છે. એવા અનન્ય ઉપકારી, પરમવંદનીય ગુરુભગિની પૂ. સા. શ્રી **સિદ્ધાન્તરસાશ્રીજી** મ.સા. સંસ્કૃત ભાષાનો પ્રારંભિક અભ્યાસ બહુ જ પ્રેમપૂર્વક કરાવનારા પંડિતવર્ય શ્રી **અમૃતભાઈ.** વ્યાકરણ વિષયક પ્રશ્નોનું સમાધાન આપનારા પંડિતવર્ય શ્રી **પ્રવીણભાઈ** અને પં. શ્રી **જનકભાઈ**નો પણ આ પ્રસંગે કૃતજ્ઞતાપૂર્વક આભાર માનીએ છીએ.

આ ગ્રંથ સંપાદનમાં નામી-અનામી જેઓનો સહયોગ મળેલ છે. તે સર્વેનો હૃદયથી આભાર માનીએ છીએ.

પુસ્તકનું સુંદર મુદ્રણ કરી આપનારા કિરીટ ગ્રાફીક્સને પણ ખૂબ ખૂબ ધન્યવાદ.

ગ્રન્થકારશ્રીના આશયથી વિરુદ્ધ જતું કાંઈ પણ સંશોધન મતિમંદતાના યોગે થઈ ગયુ હોય તો ગ્રન્થકારમહર્ષિની ક્ષમા યાચીએ છીએ.

પરમકૃપાળુ પરમાત્મા અને પરમોપકારી પૂજ્ય ગુરુદેવોની પરમકૃપા અને આશીર્વાદથી જ આ કાર્ય થયેલ છે. પ્રાન્તે આ કાર્યમાં પ્રથમ પ્રયાસ હોવાથી અને એક જ પ્રેસકૉપીનો આધાર હોવાથી સંપાદિત આ ગ્રંથમાં મતિમાંદ્યથી દૃષ્ટિદોષથી કે પ્રમાદથી રહી ગયેલ ક્ષતિઓને પ્રકૃતિથી કૃપાળુ એવા સજ્જનો શુદ્ધ કરી પરિશ્રમને સફળ કરે એજ વિનમ્રભાવે અભ્યર્થના.

લિ. કૃપાકાંક્ષી વિનયપૂર્ણાશ્રીજી

શ્રુતલાભ

પ્રસ્તુત ગ્રંથ પ્રકાશનનો સંપૂર્ણ લાભ

શ્રી રાંદેરરોડ જૈન શ્વે.મૂ. પૂ. સંઘ

રાંદેર રોડ, અડાજણ પાટિયા - સૂરત એ

જ્ઞાનદ્રવ્યમાંથી લીધો છે.

શ્રી સંઘની શ્રુતભક્તિની

અનુમોદના અનુમોદના

सम्पादनोपयुक्तग्रन्थसूचिः

- अनेकार्थसङ्ग्रहः
- अभिधानचिन्तामणिनाममाला (स्वोपज्ञवृत्तियुता)
- अमरकोशः
- उपदेशमाला (पुष्पमालाऽपराभिधाना)
- उपदेशमाला (हेयोपादेयाटीका)
- उत्तराध्ययनम्
- कथारत्नसागरः
- कुवलयमाला (सिंघी जैन ग्रन्थमाला. ग्रन्थाङ्क-४५)
- क्रियारत्नसमुच्चयः
- गौतमपृच्छा
- चउप्पन्नमहापुरिसचरियं
- त्रिषष्टिशलाकापुरुषचरित्रमहाकाव्यम्
- धनञ्जयनाममाला
- धर्मरत्नप्रकरणम्
- परिशिष्टपर्व
- मङ्गलकलशचरित्रसङ्ग्रहः
- मुनिसुव्रतस्वामिचरित्रम् (विनयचन्द्रसूरिविरचितम्)
- वसुदेवहिण्डी
- वासुपूज्यचरित्रम् (वर्धमानसूरिरचितम्)
- विवेकविलासः
- शब्दरत्नमहोदधिः
- शान्तिनाथचरित्रम् (माणिक्यचन्द्रसूरिरचितम्)
- संवेगरङ्गशाला
- संस्कृतधातुकोषः
- सामुद्रिकशास्त्रम्
- सामुद्रिकतिलकम्
- सिद्धहेमशब्दानुशासनम्
- सुपासनाहचरियं
- हस्तसञ्जीवनम्

विषयानुक्रमः

प्रथमः सर्गः

विषयः	पृष्ठाङ्कः
मङ्गलाचरणम्	१
सङ्क्षेपतो भवत्रयवर्णनम्	३
विमलवाहनस्वरूपप्रथमभववर्णनम्	४
धर्मचर्चा	७
धर्मस्य फलम्	९
दाने **मङ्गलकलशकथा**	१०-४३
मङ्गलकलशस्य पूर्वभवः	३८
शीले **चम्पकमालाकथा**	४४-७७
पञ्च कुतूहलकारिण्यः कथाः	५२
त्रिविक्रमकथा	५८
कुशवित्तकथा	६१
तपसि **नागकेतुकथा**	७८-१०१
नागकेतुपूर्वभववर्णनम्	७८
मित्रत्रयकथा	८०
श्राद्धप्रतिमावर्णनम्	१००
भावनायां **कूरगडुकमुनिकथा**	१०२-१२१
कूरगडुकमुनिपूर्वभववर्णनम्	१०२
द्वादशभावनावर्णनम्	११२

द्वितीयः सर्गः

विमलवाहननृपस्य गुरुदर्शनेच्छा	१२३
विमलवाहनराज्ञः सद्भावना	१२४
श्रीअरिन्दमगुरुवन्दनार्थं राज्ञ उद्यानगमनम्	१२६
लक्ष्म्यादिविरसतासूचिका **गुरोर्देशना**	१८९
लक्ष्मीदुरन्ततायां श्रीपतिकथा	१२८
बन्धुवैरस्ये कीर्तिचन्द्र-समरविजयकथा	१३९
स्त्रीविरतायामगडदत्तकथा	१५१
विषयतुच्छत्वे मधुबिन्दुकथा	१८१
देहलालनवैफल्ये शशिप्रभकथा	१८४

विषयः	पृष्ठाङ्कः
देशनान्ते वैराग्यकारणस्य पृच्छा	१९०
गुरुणा स्वीयवृत्तान्तस्वरूपा कथिताऽन्तरङ्गघटना	१९१
विमलवाहनभूपस्य प्रव्रज्याग्रहणेच्छा	१९७
मन्त्रिभिः सह परामर्शः	१९८
राज्यग्रहणार्थे कुमाराय निवेदनम्	२००
कुमारस्य राज्याभिषेकः	२०१
कुमारमुद्दिश्य राज्ञः शिक्षावचनानि	२०२
विमलवाहननृपस्य प्रव्रज्याग्रहणम्	२०३
विमलवाहनराजर्षिमुद्दिश्य गुरोः शिक्षावचनम्	२०४
अविरतिपरिहारे जिनपालित-जिनरक्षितकथा	२०४
विमलवाहनमुनेस्तीर्थकृत्कर्मोपार्जनम्	२१७
विजयविमाने गमनम् (**द्वितीयभवः**)	२१८

तृतीयः सर्गः

श्रीअजितप्रभोर्मातापित्रादि	२२०
श्रीअजितप्रभोश्च्यवनं स्वप्नदर्शनादि च	२२२
श्रीअजितप्रभोर्जन्म	२२६
दिक्कुमारिकाकृतजन्ममहः	२२७
देवेन्द्रकृतजन्ममहोत्सवः	२३१
शक्रेन्द्रकृता जिनस्तुतिः	२४१
सगरचक्रिणो जन्म	२४३
जितशत्रुनृपविहितोऽजितजिन-सगरचक्रिजन्मोत्सवः	२४४
बाल्यक्रीडा	२४७
देहवर्णनादि	२४८
जितशत्रुनृपस्य सचिवेन सह वार्तालापः	२५०
श्रीअजितजिनस्य पुरः सचिवविज्ञप्तिनिवेदनम्	२५३
श्रीअजितजिनस्य पाणिग्रहणम्	२५५
जितशत्रुनृपस्य दीक्षाग्रहणेच्छा	२५९
श्रीअजितप्रभो राज्याभिषेकः	२६१
श्रीअजितप्रभोश्चिन्तनम्	२६३
श्रीअजितजिनस्य सांवत्सरिकदानम्	२६५

विषयः	पृष्ठाङ्कः
श्रीअजितजिनप्रव्रज्यामहोत्सवः	२६७
श्रीअजितप्रभोः संयमग्रहणम्	२६९
ब्रह्मदत्तनृपगृहे प्रभोः पारणम्	२७१
श्रीअजितप्रभोः केवलज्ञानप्राप्तिः	२७३
देवनिर्मितसमवसरणस्य स्वरूपम्	२७५
समवसरणे द्वादशपर्षदां स्थानादिनिरूपणम्	२७७
सगरचक्रिणः प्रभुवन्दनार्थं गमनम्	२७८
देवेन्द्रकृता श्रीअजितजिनस्तुतिः	२७९
श्रीअजितप्रभोर्देशना	२८०-२८४
योनि-कुलवर्णनम्	२८१
अङ्गारकारकदृष्टान्तः	२८३
गणभृतां स्थापना	२८५
गणभृद्देशनादि	२८७
३४ अतिशयाः	२८८

चतुर्थः सर्गः

सगरचक्रिणः षट्खण्डसाधनम्	२९०
धर्मविषये धनमित्रकथा	३१४
पूर्णमेघ-सुलोचनयोः पूर्वभवसम्बन्धः	३३१
मेघवाहन-सहस्राक्षयोः पूर्वभवः	३३३
चक्रिसुतोत्पत्तिवर्णनम्	३३४

पञ्चमः सर्गः

सगरपुत्राणां स्वेच्छाविहारः	३३६
वरुणवर्मणः कथा	३३८
अष्टापददर्शनम्	३५७
सगरात्मजैः कृता जिनस्तुतिः	३५९

षष्ठः सर्गः

सगरपुत्रैरष्टापदरक्षणाय परिखाकरणम्	३६१
सगरात्मजानां नागेन्द्रेण भस्मीकरणम्	३६५

विषयः	पृष्ठाङ्कः
अमात्य-सैन्या-ऽन्तःपुरस्त्रीणां विलपनम्	३६६
अयोध्यां प्रति प्रस्थानम्	३६७
मुमूर्षूणाममात्यादीनां द्विजेन प्रतिबोधनम्	३६८
स्वपुत्रमृत्युमिषाद् द्विजन्मना सगरप्रतिबोधनम्	३६९
सगरस्य विलापः	३७६
द्विजेन सगरस्याऽऽश्वासनम्	३७९
गङ्गाप्रवाहस्खलनाय भगीरथस्य गमनम्	३८१
भगीरथस्य अयोध्यां प्रति गमनम्	३८३
कृतकर्मविपाके वसुमतीकथा	३८४
गिरा कृतकर्मविपाके अशोकश्रीकथा	३९५
जह्न्वादिसगरपुत्राणां भगीरथस्य च पूर्वभवाः	३९८
भगीरथस्य विनीतायामागमनं राज्याभिषेकश्च	४००
श्रीअजितप्रभोः सहस्राम्रवणे समागमनम्	४००
श्रीअजितेशस्य **पञ्चेन्द्रियदुर्विपाकसूचककथापञ्चकमयदेशना**	**४०१-४३९**
श्रवणेन्द्रियासक्तौ सुभद्राकथा	४०२
चक्षुरिन्द्रियासक्तौ लोलाक्षकथा	४०६
सामुद्रिकशास्त्रम्	४०६
घ्राणेन्द्रियासक्तौ गन्धप्रियकथा	४२५
रसनेन्द्रियासक्तौ रसलोलकथा	४२८
स्पर्शनेन्द्रियासक्तौ सुकुमालिकानृपकथा	४३५
सगरचक्रिणः प्रव्रज्या	४३९
सगरराजर्षेः केवलज्ञानप्राप्तिः	४४१
सप्तमः सर्गः	
कौशाम्बीनगरे प्रभोः समवसरणम्	४४२
दृढसम्यक्त्वे सुलक्षणा-शुद्धभट्टयोः कथा	४४३
सम्यक्त्वमाहात्म्ये अमरदत्तभार्याकथानकम्	४५०

• • •

॥ अर्हम् ॥

॥ श्रीभीलडीयाजीपार्श्वनाथाय नमः ॥

॥ श्रीभद्र-विलास-ॐकार-अरविन्द-यशोविजय-मुनिचन्द्रसूरिगुरुभ्यो नमः ॥

श्रीदेवानन्दसूरिरचितम्

श्रीअजितप्रभुचरितम्

प्रथमः सर्गः

[शिवमार्गोपदेष्टारं, ज्ञातारं विश्ववस्तुनः ।
श्रीशत्रुञ्जयतीर्थेशमादिनाथं नमाम्यहम् ॥१॥

सर्वकर्मारयो येन, विजिता आत्मशक्तितः ।
अन्तर्वैरिजयार्थं तमजितं सततं श्रये ॥२॥

स्वमांसदानतः पारापतस्य रक्षको हि यः ।
स श्रीशान्तिजिनो भूयादमन्दानन्दहेतवे ॥३॥

सिद्धियोषातिसक्तेन, येन राजीमती मुदा ।
त्यक्ता सोऽरिष्टनेमिर्द्रागू, भूयाद् वोऽरिष्टनाशनः ॥४॥

अचिन्त्यमहिमाशाली, यः कल्पद्रुसमः कलौ ।
स श्रीपार्श्वो मनोऽभीष्टं, ददातु भविनां सदा ॥५॥

यदंह्रिस्पर्शहर्षेण, मन्ये मेरुः प्रनृत्तवान् ।
श्रीमान् स श्रीमहावीरः, श्रेयसेऽस्तु भवे भवे ॥६॥

---

१. इदं तु ध्येयम्- अस्य 'श्रीअजितप्रभुचरितस्य' एकोऽपि हस्तलिखित आदर्शः प्राप्तो नास्ति, केवलम् आगमप्रभाकरमुनिपुण्यविजयजी-सञ्जीकृतमुद्रणार्हप्रतिः (पु.प्रे. = पुण्यविजयप्रेसकोपि इति सङ्केतिता) प्राप्ता, अस्याः प्रथमं पत्रं न प्राप्यते, अतः १ तः १४ मिताः श्लोका अपि न लब्धाः, एते १-१४ श्लोका अस्माभी रचिता अत्र [ ] कोष्ठके प्रदर्शिताः संपा. ।

गुरुं श्रीगौतमं वर्यममनन्तलब्धिशेवधिम् ।
प्रणौमि भावतः सर्वविघ्नव्यूहोपशान्तये ॥७॥

यस्याः स्मरणमात्रेण, शुद्धबुद्धिर्भवेद् ध्रुवम् ।
प्रणमामि जगद्वन्द्यां, तां श्रुतदेवतां सदा ॥८॥

यस्य कृपां समासाद्य, जडोऽपि विबुधायते ।
तं गुरुं स्वात्मभावेन, प्रणमामि क्षणे क्षणे ॥९॥

अनादिकालतो जीवाः, पर्यटन्त्यत्र संसृतौ ।
दुःखशताकुलानां तु, तेषां कोऽपि न रक्षकः ॥१०॥

अस्मिन्नसारसंसारे, शरण्यो धर्म एव हि ।
चिन्तामणिसदृक्षः सोऽर्हत्कथितश्चतुर्विधः ॥११॥

रागद्वेषविजेता च, साम्यभावे सदा रतः ।
निर्गतसर्वदोषो यः, सकलगुणधारकः ॥१२॥

देशकालादिकं सर्वं, केवलालोकचक्षुषा ।
जानीते न तु रक्तः स्याद्, द्वेषव्याप्तोऽपि नो भवेत् ॥१३॥

संसेव्यमानपादाब्जः, सुरासुरनरेश्वरैः ।
सर्वज्ञो भगवान् धर्मस्योपदेशं ददाति सः ॥१४॥ [त्रिभिर्विशेषकम्]

अर्हत्पादाम्बुजध्यानवर्जिता मोहतर्जिताः ।
अर्जितं कृच्छ्रतोऽप्याशु, नयन्ति नृभवं वृथा[१] ॥१५॥

जगन्नम्यं जगत्पूज्यं, जगत्स्तुत्यं जगत्प्रभुम् ।
अर्हन्तमप्रपन्नानां, कुतो भवति यः शमः ॥१६॥

---

१. 'वृथा' इति सङ्गतमाभाति ।

अतश्चाहं स्फुरद्भक्तिव्यक्तशक्तिर्जडोऽपि सन् ।
अनादिभवसम्बद्धतीव्रतृष्णापनुत्तये[1] ॥१७॥

अजितस्यार्हतः क्रूरैरजितस्यान्तरारिभिः ।
वृत्तपीयूषसरसीं, लसन्नवरसां श्रये ॥१८॥ युग्मम् ॥

जम्बूद्वीपविदेहस्थ**वत्सा**ख्यविजयेऽभवत् ।
सुसीमायां पुरि क्ष्मापो, नाम्ना **विमलवाहनः** ॥१९॥

सोऽ**रिन्दमगुरो**र्लब्ध्वा, दीक्षां **विजय**सञ्ज्ञके ।
अनुत्तरविमानेऽभूत्, सुरः प्रवरदीप्तिभूः ॥२०॥

ततश्च्युत्वा **विनीतायां**, **जितशत्रु**महीभुजः ।
विजयाकुक्षिभूः पुत्रो, भूत्वाऽर्हन् सिद्धिमीयिवान् ॥२१॥

इति सङ्क्षेपतः प्रोक्तं, भवत्रयमयं प्रभोः ।
अजितस्यार्हतो वृत्तं, श्रूयतामथ विस्तरात् ॥२२॥

सर्वद्वीपाब्धिभिर्विष्वक्, परीतोऽनुचरैरिव ।
राजेव वर्यवृत्तश्री**र्जम्बूद्वीपो** विराजते ॥२३॥

यः सुरान् स्वर्गिरिव्याजादूर्ध्वबाहुर्वदत्यदः ।
'दिवं पुण्यक्षयकरीं, श्रित्वा मा धात भोः ! स्मयम् ॥२४॥

नेक्षध्वे किममी भव्या, मां श्रिताः सुकृतादृताः ।
इहामुत्रापि युष्माकं, सेव्यतामाश्रयन्त्यहो'[2] ॥२५॥ युग्मम् ॥

अस्ति तत्राऽविरहितमर्हच्चक्रयर्द्धचक्रिभिः ।
वर्षं **महाविदेहा**ख्यं, द्वात्रिंशद्विजयान्वितम् ॥२६॥

---

१. तृष्णापनयनाय । २. दासताम् ।

तत्र **सीता**महानद्या, याम्यकूलानुकूल्यकृत् ।
विजयो **वत्स**नामाऽस्ति, विजयी सर्वसम्पदा ॥२७॥

अखण्डप्रवरश्रीको, भूमीमण्डलमण्डनम् ।
रक्ता-रक्तवतीकुल्या**वैताढ्यैः** स षडंशभाक् ॥२८॥

वैताढ्योत्तरदिग्वर्त्तिमध्यखण्डकृतस्थितिः ।
सीमन्त इव भूवध्वाः, **सुसीमा** नाम तत्र पूः ॥२९॥

तज्ज्ञविज्ञातमहिममुक्तारोपमनोहराः ।
निर्भाग्यैर्दुर्लभा यत्र, विहारा हारवद्धिताः ॥३०॥

श्रीसङ्गोल्लासिसौभाग्येनाऽभिभूतपितामहाः ।
यत्रानेके कलाकेलिजनकाः पुरुषोत्तमाः ॥३१॥

यत्र सद्गुरुजीमूते, देशनामृतवर्षिणि ।
वृषपोषकृतोत्साहा, भव्याः समयवेदिनः ॥३२॥

ऊपिरे सम्मदोत्कर्षाद्वित्तबीजं सुनिर्मलम् ।
अनुत्तरफलावाप्त्यै, विपुले क्षेत्रसप्तके ॥३३॥ युग्मम् ॥

विशुद्धविलसद्रत्नगुरुगोभरसङ्गिभिः ।
यदावासैः सदा दोषोदयः क्षयमनीयत ॥३४॥

विलासार्थोल्लसन्नैकमूर्त्तिः किं सप्रियः स्मरः ।
इत्याशशङ्के यत्र स्त्रीपुंसवर्गो विशारदैः ॥३५॥

तत्र सुत्रामतुल्यज्ञः, सदसज्ज्ञानकोविदः ।
विदितः शुशुभे भूमिविभु**र्विमलवाहनः** ॥३६॥

न्याये नियोजयन्नित्यमन्यायाद्विनिवारयन् ।
वत्सलः पारयामास, स्वप्रजा इव स प्रजाः ॥३७॥

प्रतापतपने यस्य, तीव्रे तपति सर्वतः ।
वैरिपार्थिवकासारा, भृशं कार्श्यमशिश्रियन् ॥३८॥

सदा यस्य यशःसोमे, शुभ्रीकुर्वति विष्टपम् ।
अरिनारीमुखाब्जानि, युक्तं विच्छायतां ययुः ॥३९॥

अर्थिसार्थसुरमणिर्वैरिवंशाशुशुक्षणिः ।
भीतानां त्रायकः सोऽधाद्, दानयुद्धर्मवीरताम्[१] ॥४०॥

सोऽत्यजत् स्वाङ्गजमपि, सदोषं मललीलया ।
सगुणं बहु मेनेऽन्यमप्यारण्यप्रसूनवत् ॥४१॥

कृत्याकृत्यविभागज्ञः, सुकृतैकविकाशिधीः ।
स शश्वत् सर्वजीवेषु, करुणार्द्रं मनो दधौ ॥४२॥

आददानः करं लोकादुचितं शुचितानिधिः ।
दासीकुर्वन्नरिक्ष्मापान्, सोऽर्थसार्थमपप्रथत् ॥४३॥

कान्तं कान्तापरीरम्भरसलालसमानसः ।
स शचीकामुकमपि, जहास महसां निधिः ॥४४॥

एवं धृतावधानोऽसौ, परस्परमबाधया ।
त्रिवर्गं साधयन्निन्ये, वासरान् सुखभासुरान् ॥४५॥

मन्त्री **विमलबुद्ध्या**ख्यो, बुद्धिराजीविनीरविः[२] ।
सीमा सुकृतिनां स्फूर्जत्तत्त्वातत्त्वविवेचनः ॥४६॥

चतुर्दिक्श्रीसमाकृष्टिमन्त्रानिव यथोचितम् ।
सदुपायान् प्रयुञ्जानः, सामादींश्चतुरोऽनिशम् ॥४७॥

---

१. 'युद्धवीरो दयावीरस्त्यागवीरश्च सोऽभवत्' इति त्रिषष्टि० २।१।४१ ॥
२.बुद्धिकमलिनीसूर्यः ।

सच्चकोरसुधाभानुर्गुणमाणिक्यरोहणः[१] ।
तस्य भूपस्य समभूद्राज्यचिन्ताविधायकः ॥४८॥ त्रिभिर्विशेषकम् ॥

शृङ्गारमञ्जरीकुक्षिशुक्तिमुक्तामणिः सुतः ।
हरिवाहननामाऽभूत्, सद्गुणस्तस्य भूपतेः ॥४९॥

अन्येद्युर्नरशार्दूलः, कृतप्राभातिकक्रियः ।
सुधर्मासुषमाखर्वगर्वसर्वस्वजित्वरे ॥५०॥

सदसि प्रोल्लसद्रत्नप्रभापूर्णककुम्मुखम् ।
सिंहासनमलञ्चक्रे, पूर्वाद्रिमिव भास्करः ॥५१॥ युग्मम् ॥

सुधादीधितिसङ्काशस्फुरदातपवारणः ।
क्वणत्कङ्कणवारस्त्रीचाल्यमानोरुचामरः ॥५२॥

प्रतापतापितारातिमण्डलैर्मण्डलेश्वरैः ।
अनेकैर्भक्तिसम्भारान्नतपादाम्बुजद्वयः ॥५३॥

नीतिव्रततिपाथोदैर्धृतामोदैर्नियोगिभिः ।
चकोरैरिव पेपीयमानवक्त्रेन्दुदीधितिः ॥५४॥

अधःकृतधनाधीशैर्बहुभिर्व्यवहारिभिः ।
रत्नालङ्काररम्याङ्गैः, परितः परिवारितः ॥५५॥

विद्या[२]वारिधिवातापिविपक्षैः क्षतसंशयैः ।
मेधाविभिः सुधाप्रख्यगीर्भिरानन्दितश्रुतिः ॥५६॥

प्रत्यक्षो वासव इव, विशामीशो मनांसि न ।
केषां प्रमोदयामास, वाससद्म जयश्रियः ? ॥५७॥ षड्भिः कुलकम् ॥

---

१. चन्द्रः । २. विद्यासागरपाने अगस्तिसदृशैः ।

तस्यां संसदि सम्भाषं, क्षितौ तन्त्रविशारदाः ।
रचयाञ्चक्रिरे धर्मगोचरं सुचिरं मिथः ॥५८॥

कश्चिज्जजल्प 'कल्पद्रुरिव सङ्कल्पितप्रदः ।
धर्मः परोपकाराद्यैः, सदुपायैरुपार्ज्यते' ॥५९॥

परो वक्ति स्म 'सुव्यक्तं, धर्मं जानीध्वमुज्ज्वलम् ।
अभ्यर्चनाद्देव-पित्रतिथीनां श्रुतिसम्मतात्' ॥६०॥

वावदूकोऽवदच्चान्यो, 'व्रतमात्रविचारणा ।
कुलक्रमागतं धर्मं, साधयन्तु मनीषिणः' ॥६१॥

अलापीदपरस्तुण्डताण्डवं स्फारयन्निजम् ।
'न स्तः प्रत्यक्षालक्ष्यत्वाद्धर्माधर्मौ खपुष्पवत्[१]' ॥६२॥

एवं विविधभङ्गीभिर्विवादं तन्वतस्तकान् ।
वीक्ष्य प्रेक्षावतां मुख्यः, क्षमानाथो[२] व्यचिन्तयत् ॥६३॥

'क्रियाः परोपकाराद्याः, सत्पुंस्त्वं सूचयन्ति हि ।
ताभिर्विशिष्टः स[द्]दृष्टो, धर्मो निश्चीयते न तु ॥६४॥

श्रुतिप्रोक्तं च देवादिपूजनं हिंसयाऽङ्कितम् ।
कथं तत्र भवेद्धर्मः, कृशानाविव[३] शीतता ॥६५॥

यदि वाऽयं क्रमायातस्तर्ह्यमी धीवरादयः ।
मीनादिघातप्रवणाः, सुतरां मार्गगामिनः ॥६६॥

धर्माऽधर्मौ न विद्येते, इति प्रलपितं वृथा ।
ऋद्ध-दुःस्थादिवैचित्र्यस्यान्यथानुपपत्तितः ॥६७॥

---

१. आकाशकुसुमवत् । २.नृपः । ३. अग्नौ ।

विदुषामप्यमीषां मे, मनोहारी न वाक्क्रमः ।
तन्मया कतमो धर्मः, श्रयणीयः शिवार्थिना ॥६८॥

यदि वा किं वृथा चिन्तां, कुर्वे क्लेशैककारणम् ।
पुरो **विमलबुद्ध्या**ख्ये, सत्यस्मिन् मन्त्रिपुङ्गवे ॥६९॥

अयं ह्यशेषशास्त्रज्ञस्तत्त्वातत्त्वविवेकिताम् ।
कर्तुं क्षमो मानसौकाः[१], क्षीरनीरान्तरं यथा ॥७०॥

वयसः परिणामेन, बिभ्राणोऽनुपमां मतिम् ।
ममाऽयं पितृदेशीयः[२], सद्गुरुप्रतिमोऽथवा ॥७१॥

तन्मामेष विशेषेण, यं धर्मं ननु वक्ष्यति ।
निर्वृतिनगरीं गन्तुं, मतः पन्थाः स एव मे' ॥७२॥

ध्यात्वेति मन्त्रिवदने, प्रसादविशदां दृशम् ।
न्यस्यन्नरेश्वरोऽवादीन्, मृद्वीकामधुरं[३] वचः ॥७३॥

'मन्त्रिन् ! सौम्यतया सोमो, गाम्भीर्येण धुनीधवः[४] ।
बुद्ध्या वृन्दारकाचार्यो, भवानेवाऽवनीतले ॥७४॥

त्वया स्वबुद्धिमाहात्म्यान्निहता अहिताः[५] समे ।
दुनोति धर्मसन्देहस्त्वेको मामहितः परः ॥७५॥

तद्घाताय जवाद्वाणी, कृपाणीयति तेऽनिशम् ।
प्रयुङ्क्ष्व मादृशां मुग्धमतीनां हितहेतवे' ॥७६॥

इत्थं भूपगिरा कादम्बिन्येव सचिवोत्तमः ।
नीलकण्ठ इव प्राप्तः, प्रमोदमतनोद् गिरम् ॥७७॥

१.हंसः । २. पितृतुल्यः । ३. द्राक्षामधुरम् । ४.समुद्रः । ५. शत्रवः ।

'राजन् ! हृष्टोऽस्मि नितरां, धर्मजिज्ञासया तव ।
यत्नत्वान्वेषिणी बुद्धिः, प्रादुःष्यान्नोरुकर्मणाम् ॥७८॥

सावधानं शृणु क्ष्माप !, पापप्रकरवर्जित ! ।
सद्धर्मस्य फलं वच्मि, स्वरूपं च यथाक्रमम् ॥७९॥

उत्तमं मङ्गलं धर्मो, धर्मः सौख्यद्रुकाननम् ।
धर्मो दुःखाद्रिदम्भोलिर्धर्मः श्रीवल्लिवारिमुक् ॥८०॥

धर्मतः सुकुलावाप्तिर्धर्मतो निर्मलं यशः ।
धर्मान्निरुपमं रूपं, धर्मादारोग्यमद्भुतम् ॥८१॥

धर्मं ब्रुवन्ति सर्वार्थसाधकं दुःखबाधकम् ।
एतस्य तु स्वरूपं न, बुध्यन्ते जडबुद्धयः ॥८२॥

अर्हता विमलज्ञानविज्ञातजगता स तु ।
दान-शील-तपो-भावभेदादूचे चतुर्विधः ॥८३॥

दानं सर्वसुखस्थानं, शीलं मूलं शिवश्रियः ।
तपः पुण्यद्रुमावापो, भावना भववार्द्धिनौः ॥८४॥

अमुं चतुर्विधं धर्मं, ये धन्याः पर्युपासते ।
तेऽध्यासते सिद्धिसौधं, सिद्धानन्तचतुष्टयाः ॥८५॥ युग्मम् ॥

दानं शारदशीतांशुकान्तिकान्तयशस्करम् ।
दानं स्याच्छक्रचक्र्यादिसाम्राज्यस्यापि कारणम् ॥८६॥

दानं दत्तं निर्विशेषमप्यङ्गिष्वनुकम्पया ।
सर्वभोगोपभोगश्रीसामग्रीहेतुतां श्रयेत् ॥८७॥

पात्रे तु विहितं दानं, चिन्तातीतफलप्रदम् ।
सुक्षेत्रोप्तस्य बीजस्य, फलर्धिं हि प्रमाति कः ? ॥८८॥

सत्पात्रपाणिकमले, कमलां वासयन्ति ये ।
सुस्थानारोपहृष्टेव, तानसौ सेवतेऽनिशम् ॥८९॥

सच्चित्त-वित्त-पात्राणां, संयोगो दुर्लभो भुवि ।
लभ्यो भव्यैर्भाविभद्रैः, कैश्चिदेव कथञ्चन ॥९०॥

दानात् सौभाग्यमारोग्यं, प्राज्यं राज्यं यशः परम् ।
यथा **मङ्गलकलसः**, प्राप क्षमाप ! तथा शृणु ॥९१॥

अत्रैव **जम्बु**द्वीपेऽस्ति, वर्षं **भरत**सञ्ज्ञकम् ।
तस्यार्द्धे दक्षिणे देशोऽ**वन्ति**नामा रमास्पदम् ॥९२॥

श्रीयुगादिजिनेशस्य, तनयोऽ**वन्तिवर्द्धनः** ।
अतिष्ठिपत् स्वनाम्नाऽयं, रामणीयकमन्दिरम् ॥९३॥

तत्राऽस्ति विश्वविख्यातस्फारऋद्धिविराजिनी ।
अवन्ती नाम नगरी, नानाश्चर्यविलासभूः ॥९४॥

यत्र चैत्योच्चयाग्रस्था, हैमाः कुम्भाः शुभात्मनाम् ।
शिवा[ध्व][1]यायिनां स्वार्थसिद्धिसूचाकृतो बभुः ॥९५॥

तत्र राजा **वैरिसिंहः**, सिंहतुल्यपराक्रमः ।
आचक्राम परान् प्रौढोपायो न्यायोज्जितान्तकः ॥९६॥

यस्य क्रमनखज्योतिर्जले प्रत्यर्थिपार्थिवाः ।
प्रतापहव्यवाहेन[2], तापिताः शास्तुरन्वहम् ॥९७॥

सर्वाङ्गसङ्गिलावण्यपूर्णा पुण्यनिकेतनम् ।
आसीत्तस्य प्रिया **सोमचन्द्रा** सोमसमानना ॥९८॥

---

१. मोक्षमार्गगामिनाम् । २. अग्निना ।

धनदं धनपूरेणाऽनुकुर्वन् कृतिनां वरः ।
धनदत्ताह्वयस्तत्र, श्रेष्ठी श्रेष्ठगुणोऽजनि ॥९९॥

येन मानससौधे स्वे, स्थिरसद्दर्शनासने ।
आस्यते स्म सुखं धर्मभूपतिर्बहुमानतः ॥१००॥

क्षीरसागरडिण्डीरपिण्डपाण्डुरशीलभाक् ।
तस्य प्रियाऽभवत् **सत्यभामा** सत्यवचोनिधिः ॥१०१॥

प्रेमाम्बुधिं स्फूर्जयतोरजस्रमवियुक्तयोः ।
समाः[1] शनैस्तयोर्जग्मुः, कलाभृज्ज्योत्स्नयोरिव ॥१०२॥

स्वल्पावशेषरजनौ, कदाचिज्जातजागरः ।
श्रेष्ठी शिष्टशिरोरत्नं, चिन्तयामासिवानिति ॥१०३॥

'पूर्वपुण्यवशात् पद्माकेलिसद्माऽभवं भृशम् ।
अमोदयं स्वमित्राणि, पात्रवर्गमपूजयम् ॥१०४॥

राजप्रसादतरणौ, दीप्ते नित्योदयस्पृशि ।
सर्वाशाभासिनि ममासज्जनैः कुमुदायितम् ॥१०५॥

बहु किं ? कृतकृत्योऽस्मि, सर्वथा किन्तु दूयते ।
मानसं मे निजकुलानन्दनं नन्दनं विना ॥१०६॥

किं करोमि धनैः स्वर्णैं, रूप्यैर्मुक्ताफलैरपि ।
प्रवालैः सिचयैर्यद्वा, यन्नेक्षे नन्दनाननम् ॥१०७॥

कलङ्किनं चन्द्रमसं, पद्मनालं सकण्टकम् ।
अपेयपाथसं सिन्धुं, बुधं दारिद्र्यविद्रुतम् ॥१०८॥

स्वल्पायुषं च गुणिनं, धनवन्तं निरङ्गजम् ।
सृजन् हन्तैष दुर्वेधाः, खलानां नाग्रणीः कथम् ? ॥१०९॥ युग्मम् ॥

---

१. **वर्षाणि** ।

तारुण्यं मे गतप्रायं, वार्द्धकं सविधे स्थितम् ।
तदङ्गजं विना व्यर्थं, गार्हस्थ्यं हा गमिष्यति ॥११०॥

कुलाधारः स्मराकारः, सद्मश्रीनायकः सुतः ।
केनोपायेन मे भावी, नयनाम्भोजभास्करः' ॥१११॥

एवं विकल्पप्रालेयग्लपिताननीरजम् ।
करन्यस्तकपोलं तं, प्रियं वीक्ष्य प्रियाऽवदत् ॥११२॥

'अश्रुतदृष्टपूर्वकं, मालिन्यं नाथ ! ते मुखे ।
केऽमी निःश्वासदण्डा वा, दीर्घा दुःखौघसूचकाः ॥११३॥

आमयः कोऽपि ते कायं, किं प्राणेश ! विबाधते ? ।
अप्रसादो भुवो भर्त्तुरभूद्धेतोः कुतोऽपि वा ? ॥११४॥

जज्ञे वा काऽपि रैहानिरिष्टनाशोऽथवा क्वचित् ? ।
किंनिमित्तमिदं दुःखं ?, गोप्यं नो चेत्तदुच्यताम् ॥११५॥

कृताऽस्मि सुखसम्भारभाजनं सर्वदा त्वया ।
प्रसीद तद्दुःखभागमपीदानीं प्रयच्छ मे' ॥११६॥

श्रेष्ठी जजल्प 'नो कश्चिदामयो मम वल्लभे ! ।
अप्रसादोऽवनीभर्त्तुः, कुतो न्यायाध्वचारिणः ? ॥११७॥

नार्थहानिर्नेष्टनाशः, का च त्वां प्रति गोप्यता ? ।
निष्पुत्रतैव मर्माविच्छल्यतुल्या दुनोति माम्' ॥११८॥

ज्ञातपत्याशया **सत्या**[१], ततो मधुरमूचुषी ।
'सुकरे कर्मणि स्वामिन् !, कः खेदस्तव मेदुरः ॥११९॥

१. सत्यभामा ।

अन्या अनन्यसामान्याः, कन्या उद्वह मा मुहः ।
भाविनस्तनयास्तासु, द्युक्ष्मासु सुरशाखिवत् ॥१२०॥

निरपत्या हि याः पापाः, पुनरुद्वाहकाङ्क्षिणः ।
प्रतिषेधन्ति कान्ता मां, तासु मा जीगणः प्रभो !' ॥१२१॥

श्रेष्ठी गिरमथाऽब्रूतानुचितं वक्षि किं प्रिये ! ।
नाद्यापि हृदयं वेत्सि, सुकृतैकमतेर्मम ॥१२२॥

त्वत्कुक्षिसम्भवाः पुत्राश्चेतो धिन्वन्ति चेन्मम ।
तत्प्रमोदाय सन्त्वन्यैः, पुनः प्राणप्रिये ! कृतम् ॥१२३॥

तदुपायमुपायज्ञे !, कञ्चित् सुवदने ! वद ।
स्त्रीजातित्वेन तव यद्धारती पक्षपातभाक्' ॥१२४॥

सत्यभामा ततोऽवादीदादीनवविमुक्तया[१] ।
वाचा कुण्ठीकृतोन्मत्तकोकिलाकोमलध्वनिः ॥१२५॥

'नाथ ! पूजय सद्भक्त्या, भक्तचिन्तामणीयितम् ।
देवदेवं तथा देहि, दानं पात्रेषु भावतः ॥१२६॥

साधर्मिकाणां वात्सल्यं, विधेहि शुभधीनिधे ! ।
दीनैस्त्याजय दीनत्वं, ज्ञानं सज्ज्ञानमानय ॥१२७॥

एवं निर्माय मनसोर्मिनिर्माणस्य सत्क्रियाम् ।
तव चेन्नन्दनो भावी, तर्हि पूर्णा मनोरथाः ॥१२८॥

नो चेत् सुकृतकर्मेदमाराद्धं शुभभावतः ।
परत्राऽपि परं सौख्यं, विधास्यति बुधोत्तम !' ॥१२९॥

---

१. दोषरहितया ।

एवं दयितया शिष्टः, श्रेष्ठी हृष्टो विशिष्टधीः ।
प्रत्यूहव्यूहापोहाय, प्रावृतद्धर्मकर्मणि ॥१३०॥

निशि सुप्तं तमन्येद्युस्तुष्टा शासनदेवता ।
प्रत्यक्षतामिता स्माह, 'भाग्यवांस्तनयोऽस्तु ते' ॥१३१॥

इतश्च निशि निद्राणा, [शयने] स्वल्पकल्पना ।
सत्यभामाऽभितः पुष्पस्रक्श्रेणिमहितं [ततम्] ॥१३२॥

राजीवराजिवदनं, पूर्णकुम्भं शुभप्रदम् ।
कल्याणहेतुं कल्याणमयं[१] स्वप्ने व्यलोकत ॥१३३॥ युग्मम् ॥

तया निवेदितस्वप्नः, पतिः शुभमतिर्जगौ ।
'समग्रगुणसम्पूर्णः, सुतस्ते भविता प्रिये !' ॥१३४॥

गर्भं बभार सा सारं, पुपोष भृशतोषभाग् ।
समये सुषुवे वार्त्तमदं[२]भ्रद्युतिराजितम् ॥१३५॥

काराङ्गिमोचनं पुर्यां, पताकोद्यत्प्रपञ्चनम् ।
व्यधत्त भूपं विज्ञप्य, पुत्रजन्मोत्सवे **धनः** ॥१३६॥

सुन्दर्यो ननृतुस्तारं, पेठुर्मङ्गलपाठकाः ।
नेदुर्मङ्गलतूर्याणि, कृतार्था अर्थिनोऽभवन् ॥१३७॥

प्रवृत्तेषु महेष्वेवं, द्वादशेऽह्नि पिताऽतनोत् ।
आख्यां **मङ्गलकलस**[४], इत्यस्य स्वप्नसङ्गताम् ॥१३८॥

गुणैः सार्धं वर्धमानः, पित्रोः सम्प्रीणयन् मनः ।
अयं जयन्ततुल्यश्रीः, समभूदष्टहायनः ॥१३९॥

---

१. स्वर्णमयम् । २. नीरुजम् । ३. प्राज्यकान्तिशोभितम् । ४. 'कलशः कलसो निपः' (अभि० चिन्ता० श्लो० १०१९) इति द्विविधौ शब्दौ स्तः ।

जिनार्चार्थे सुमादानबद्धबुद्धिः स्वयं **धनः** ।
गच्छत्यहरहः प्रातरारामं स्फुरदुद्यमः ॥१४०॥

बालोऽयं बाल्यचापल्याद्वार्यमाणोऽपि चान्यदा ।
पित्रा समं ययौ तत्राऽऽलुलोके मालिकेन[1] च ॥१४१॥

मालिकः श्रेष्ठिपुत्रं तं, विज्ञाय प्रवरैः फलैः ।
सच्चकार यतः **पूज्याः, सर्वैः सर्वत्र तादृशाः** ॥१४२॥

श्रेष्ठी प्राप्तो गृहं पूजां, जगत्पूज्यस्य तेनिवान् ।
बालोऽपि चकृवान् पुष्पाद्यर्पणेन सहायताम् ॥१४३॥

यात्येवं समयेऽन्येद्युः, स तातं विनयी जगौ ।
'अहमेवाथ पुष्पेभ्यो, यास्याम्यारामममन्वहम्' ॥१४४॥

निषेधतोऽपि ता[त]स्याऽनुमतिं प्राप्य भक्तितः ।
ययौ स नित्यमारामं, शौण्डीरः सिंहपोतवत् ॥१४५॥

श्रेष्ठ्यादेशात्तस्य सारां[2], मालाकारोऽनिशं व्यधात् ।
ददौ सुरभिपुष्पाणि, सुस्वादूनि फलान्यपि ॥१४६॥

इत्थं स्वतातभक्तोऽयमभ्यस्यन्नन्तराऽन्तरा ।
कलाकलापं तारुण्यसन्निधिं समुपेयिवान् ॥१४७॥

इतश्च पुरि **चम्पायां,** कम्पितारिचयो नृपः ।
सद्दानोद्यत्करो हस्तिवदस्ति **गुणसुन्दरः** ॥१४८॥

गुणावलीति तस्याऽस्ति, देहिनीव गुणावली ।
प्रेयसी पेशलालापपराभूतसुधारसा ॥१४९॥

---

१. मालाकृता । २. 'सार'मिति पु.प्रे. । श्रीमाणिक्यचन्द्रसूरिरचिते श्रीशान्तिनाथचरित्रे १।१९७। 'बालोऽसौ मे सुतस्तेन, सारा कार्याऽस्य सर्वथा' इति ।

तयोः कल्पलतास्वप्नाख्यातसद्भाग्यवैभवा ।
त्रैलोक्यसुन्दरी जज्ञे, सुन्दराकृतिरङ्गजा ॥१५०॥

उल्लङ्घ्य शैशवाध्वानं, भृशं श्रान्तिमुपेयुषी ।
व्यश्राम्यद्यौवनारामे, सा लावण्याम्बुशालिनि ॥१५१॥

प्रज्ञाप्रकर्षे भारत्या, रूपे रू(र्दं)पककान्तया[1] ।
गङ्गया शीलनैर्मल्ये, शश्वद्योपममे बुधैः ॥१५२॥

बभूव यां विनिर्मातुमिच्छतो वेधसो ध्रुवम् ।
अभ्यासायैव सर्वोऽन्यनारीसर्गस्त्रिविष्टपे ॥१५३॥

जनन्यादेशतो नन्तुमागतां तां परेद्यवि ।
दृष्ट्वाऽध्यासीन्नृपः कोऽस्या, भविष्यत्युचितः पतिः ॥१५४॥

विसृज्य संसदं धीमानन्तःपुरमवाप्य च ।
वरस्वरूपं पप्रच्छ, राज्ञी साऽपीत्यभाषत ॥१५५॥

'इयमेकैव दुहिता, पुत्रस्थानेऽस्ति नाथ ! ते ।
तदस्या नोचितो दूरे, विवाहो विरहार्त्तिदः ॥१५६॥

स्वकीयमन्त्रिपुत्रेण, कन्यामेनां विवाहय ।
हृदयेश ! यथा शश्वन्नेत्रानन्दाय जायते' ॥१५७॥

तथेति मत्वा तां वाचं, भूषयन् भूपतिः सभाम् ।
सप्रसादं निजामात्यमित्यवोचत् ससम्मदः ॥१५८॥

'अमात्य ! निजपुत्रीयं, त्वत्पुत्राय मया ददे ।
तद्विवाहप्रगुणतां, जवाद्बुद्धिनिधे ! कुरु' ॥१५९॥

---

१. रत्या ।

स निशम्येति तनयं, निजं त्वग्दोषिणं विदन् ।
व्याजोत्तरपरः प्राह, 'क्व भूमीभृदहं क्व च ? ॥१६०॥

यथा मराल-बकयोर्यथा कोकिल-काकयोः ।
कस्तूरी-पङ्क्योर्यद्वदब्धि-गोष्पदयोर्यथा ॥१६१॥

सूर-खद्योतयोर्यद्वत्, कल्पद्रुम-करीरयोः ।
यथा तथाऽऽवयोर्भर्तृ-भृत्ययोर्महदन्तरम् ॥१६२॥ युग्मम् ॥

इदं च विश्रुतं विश्वे, सम्बन्धः सदृशो भवेत् ।
नागेन्द्र-राजित्तौ क्वापि, नहि सम्बन्धमर्हतः ॥१६३॥

अन्यच्च सह देवेन, महान् कर्त्तुं कथं क्षमे ? ।
इक्षुदण्डान् सामयोनिस्पर्द्धया को जिघत्सति ?' ॥१६४॥

अमुं ततः प्रतिवचोगोचरीचकृवान्नृपः ।
भाषतेऽदो भवान् मन्त्रिन् !, किं साम्प्रतमसाम्प्रतम् ॥१६५॥

आवयोरन्तरं किन्तु, यः कोशो मे तवैव सः ।
तदुत्सवविधाने का, चिन्ता मानय मद्वचः' ॥१६६॥

एवं भूपेन मधुरमुक्तोऽसौ बहुमानतः ।
उत्साहितः परैश्चापि, दृढः[१] प्रत्युत्तरेऽभवत् ॥१६७॥

ततश्चोमिति जल्पित्वाऽनन्योपायो गृहं गतः ।
आराधयद् गोत्रदेवीं, दर्भसंस्तरसंश्रितः ॥१६८॥

श्रीखण्डा-ऽगुरु-कर्पूरसारपूजाप्रमोदिता ।
उपवासत्रयान्तेऽथ, प्रत्यक्षा तस्य देव्यभूत् ॥१६९॥

---

१. 'हुंठ' इति पु.प्रे. ।

ऊचे च 'वत्स ! तुष्टाऽस्मि, क्षिप्रमिष्टं निवेदय' ।
ततोऽसौ हर्षितः क्लृप्ताञ्जलिर्देवीं व्यजिज्ञपत् ॥१७०॥

'प्राप्तव्याघ्रतटीन्यायो, देवि ! पृथ्वीशशासनम् ।
तव प्रसादादुल्लाघे[१], सुते निर्वाहयाम्यहम्' ॥१७१॥

देव्यप्यूचे 'न समर्थाऽस्मि, भवत्पुत्राऽऽमयक्षये ।
यस्मान्निकाचितं कर्म, भोग्यं तीर्थकरैरपि' ॥१७२॥

विषण्णो न्यगदन्मन्त्री, 'त्वत्प्रसादेऽप्यहं हहा ।
रवावप्युदिते चक्षुहीनवन्न विशेषभाक् ॥१७३॥

समानय ततो देवि !, नरं कञ्चन सुन्दरम् ।
भाटकेन विवाह्यैनां, यो दद्यान्मम सूनवे' ॥१७४॥

देवी जजल्प 'यः कश्चिदस्या एव पुरो बहिः ।
मन्दुरारक्षक[२]क्लृप्ताग्नौ, तृतीयेऽह्नि कुमारकः ॥१७५॥

शीतार्त्तोऽभ्येति रात्रौ तं, गुप्तमानाय्य कन्यकाम् ।
विवाहये'रिति प्रोच्याऽन्तर्दधे देवता क्षणात् ॥१७६॥ [युग्मम्]

मन्त्री गुप्तं स्थानपालमेकमेवमथाऽशिषत् ।
'यो रात्रावेति शीतार्त्तो, बालः सोऽर्घ्य उपांशु मे' ॥१७७॥

ततो मौहूर्त्तिकैर्लग्नं, निर्दोषं निरणाययत् ।
अचीकरच्चोप[३]यमसज्जतां सचिवेश्वरः ॥१७८॥

देव्यथो **मङ्गलं** ज्ञानाद्भूपकन्योचितं वरम् ।
ज्ञात्वा**ऽवन्ती**मयासी[त्] [त]मारामस्थमवैक्षत ॥१७९॥

---

१. निरामये । २. अश्वशालारक्षककृताग्नौ । ३. विवाहसज्जताम् ।

'कुमारः सोऽयमुर्वीशकन्यकां भाटकेन यः ।
परिणेतेति'तं देवी, व्योमस्थाऽश्रावयन्नरम् ॥१८०॥

सोऽथ दध्यावसम्बद्धमनिरीक्षितवक्तृकम् ।
चित्रकृत् किमिदं वाक्यं, वक्तव्यं तत्पितुः पुरः ॥१८१॥

इति ध्यायन् गृहं प्राप्तो, व्यस्मार्षीत् केलिलालसः ।
द्वितीयेऽप्यह्नि चाऽश्रौषीदारामस्थस्तथैव तत् ॥१८२॥

अद्य वप्तुर्[1]वदिष्यामि, निश्चितं चिन्तयन्निति ।
तत्क्षणं वात्यया प्रादुर्भूतयोत्पाटितोऽम्बरे ॥१८३॥

तया च तूलवन्नीयमानोऽसौ मानसान्तरे ।
चतुरश्चिन्तयामास, प्राप्तसीमा सचेतसाम् ॥१८४॥

दुर्निवारो विधिरहो !, यत् स्वप्नेऽपि न चिन्त्यते ।
विदधाति क्षणादेव, तच्छुभाशुभमङ्गिनाम् ॥१८५॥

मुक्तोऽथ क्षणत**श्चम्पा**ऽऽसन्नाटव्यामटन् सरः ।
अपश्यद् दृश्यहंसालिशालिपालिलसद्द्रुमम् ॥१८६॥

क्षीरसागरसारेण, परोपकृतये विधिः ।
यद्विधाय ध्रुवं यानहंसान् रक्षाकृतेऽमुचत् ॥१८७॥

स्मितारविन्दसन्दोहमरन्दार्पणतर्पिताः ।
अलयो मधुरारावा, जगुर्यस्याऽनिशं गुणान् ॥१८८॥

स्वादुस्वामृतपूरेणाऽमृतकुण्डं विजित्य यत् ।
नन्नर्त स्मेरपद्मास्यं, लोलकल्लोलहस्तकैः ॥१८९॥

---

१. पितुः । २. 'ननु निस्मेर....' इति पु.प्रे. ।

तत्र स्नातः पीतपयाः, क्रूरश्चापदशङ्कितः ।
न्यग्रोधद्रुममारोहदसौ पालीविभूषणम् ॥१९०॥

तदा सूर्योऽपि तद्दुःखप्रतीकाराक्षमः किल ।
मन्दौजाः कालवशतो, ह्रिया द्वीपान्तरं ययौ ॥१९१॥

सवितर्यापदं प्राप्ते, यज्जजृम्भे कुपुत्रवत् ।
अन्धकारः किल श्यामोऽश्लाघ्यस्तेनैनसाऽभवत् ॥१९२॥

ससोमतारकाव्याजादिनास्ते[१] दुःखदूनया ।
दिनश्रिया हारमुक्ता, विष्वक् क्षिप्ताः सनायकाः ॥१९३॥

बभुर्दिनपतेरस्ते, तारकास्तारकान्तयः ।
प्रमोदन्ते खलु क्षुद्रा, महतामापदुद्गमे ॥१९४॥

तमोनिदानं सच्चक्राभीष्टा सद्दृष्टिलोपिनी ।
दोषा[२] दोषास्पदं मत्तपोषावत् प्रसृताऽभितः ॥१९५॥

क्वायं वटद्रुमस्तच्च, क्व सौधमिति चिन्तयन् ।
उदीच्यामैक्षतोद्द्योतं, दिक्षु चक्षुः स विक्षिपन् ॥१९६॥

ततः किञ्चि[द्वि]लीनार्त्तिर्वटादुत्तीर्य सत्वरम् ।
चलन्नुद्द्योतमुद्दिश्य, स्थानपालान्तिकं गतः ॥१९७॥

शी[ता]र्त्तं दुर्मदास्ते तं, तपन्तं तत्र जागृवौ ।
निघ्नन्तो यष्टि-मुष्ट्याद्यैरश्लीलवचसोऽहसन् ॥१९८॥

मन्त्रिशिष्टः स्थानपालस्तथा दृष्ट्वा निवार्य तान् ।
तापयित्वा रहः क्वापि, गुप्तं [तं] मन्त्रिणे ददौ ॥१९९॥

---

१. सूर्यास्ते । २. रात्रिः ।

तद्रूपमुदितो मन्त्री, गुप्तमाप्तैरकारयत् ।
स्नानाशनादिकं तस्य, रक्षन् गेहाद्बहिर्गतम् ॥२००॥

यामिकाः सचिवादिष्टा, नाऽत्यजंस्तस्य सन्निधिम् ।
देश-ग्रामादिनामानि, पृच्छतोऽपि न चाभ्यधुः ॥२०१॥

बन्धुवत् सत्कृतिः किं मेऽरिवत् किं वा नियन्त्रणम् ।
इति विस्मितमन्येद्युस्तमभाषत धीसंखः[1] ॥२०२॥

'किञ्चिन्मा वत्स ! विस्मेष्ठाः, सत्कुर्वे त्वां स्वकार्यतः ।
यतः **स्वार्थं विना बन्धा(न्धुम)पि नाऽऽद्रियते जनः**' ॥२०३॥

'मया बालेन कः स्वार्थ ?', इति तेनोदितः पुनः ।
मन्त्र्यूचे 'देहि राट्कन्यां, विवाह्य मम सूनवे' ॥२०४॥

बालो जगाद 'मा वादीस्तातैतत् पापकृद्वचः ।
अकार्यं हि न कुर्वन्ति, मरणेऽपि विवेकिनः ॥२०५॥

शास्त्रेषु नानादानानि, वर्णितानि विचक्षणैः ।
दानं पाणिगृहीत्यास्तु[2], नैवोक्तं क्वचिदास्तिकैः' ॥२०६॥

श्रुत्वेति न्यगदन्मन्त्री, क्रोधारुणविलोचनः ।
'मद्वाचं चेन्न कर्त्तासि, तदा मारयितास्मि रे' ॥२०७॥

स स्माह 'धीनिधे ! यत्ते, रोचते कुरु तज्जवात् ।
नयाध्वस्थस्य नो मे भीर्मरणाद् ध्रुवभाविनः' ॥२०८॥

करवालं ततः कोशादाकृष्य निशितं द्रुतम् ।
मन्त्रिणाऽसौ रुषाऽभाषि, 'रेऽभीष्टां देवतां स्मर' ॥२०९॥

---

१. मन्त्री । २. पत्न्याः ।

कलशोऽप्याह 'शरणं, शरण्योऽर्हन् ममाऽधुना ।
भवतु स्वःश्रियां हेतुर्धर्मश्च तदुदाहृतः' ॥२१०॥

ततोऽवदन्नरा आप्ताः, सचिवं पेशलोक्तयः ।
'निर्मन्तुः क्षीरकण्ठोऽयं, मुधा किं मार्यते विभो ! ? ॥२११॥

उररीकारयिष्यामो, वयमेतं भवन्मतम्' ।
मन्त्रिणं तेऽभिधायेति, बालमालपिषुर्यथा ॥२१२॥

'मा स्म भो ! म्रियथा मन्त्रिमतं मन्यस्व सन्मते ! ।
जीवन्नरो भद्रशतं, पश्यतीति न किं श्रुतम् ?' ॥२१३॥

बालोऽथ दध्यिवान् केयमहो ! विधिविचित्रता ।
क्व सा पुरी **विशाला**ख्या ?, ममेहागमनं क्व वा ? ॥२१४॥

क्व वा वातेनोत्पतनं ?, तद्वा क्व व्योमभाषितम् ? ।
तदिदं खलु भाव्येव, परं स्वार्थो विधीयते ॥२१५॥

ध्यात्वेत्यभाषताऽमात्यं, 'मया चेत् कारयिष्यसि ।
स्वकार्यमार्यवर्यैकं, मत्कार्यमपि तत्कुरु' ॥२१६॥

'वद कुर्वे किमि'त्युक्ते, मन्त्रिणा **मङ्गलो**ऽभ्यधात् ।
'वसुधाधिपतिर्वस्तु, मङ्गलेषु ददाति यत् ॥२१७॥

तन्मे देयं **विशाला**ध्वगतं कार्यं च पूरुषैः' ।
मन्त्र्यपि प्रतिपद्यैतत्, स्वकृत्येषु प्रवृत्तवान् ॥२१८॥

अखण्डशोभं स्वःखण्डश्रीविडम्बिनमादरात् ।
मण्डपं मेदिनीशोऽपि, निजभृत्यैर्व्यधापयत् ॥२१९॥

अथाऽऽचारप्रवीणाभिः, कुलस्त्रीभिः कुमारकः ।
सहर्षं कारितस्नानश्चारुचन्दनचर्चितः ॥२२०॥

सदशोज्ज्वलसंवीतवासाः सारविभूषणः ।
विन्ध्यशैलानुजमिव, समारूढो मतङ्गजम् ॥२२१॥

विविधातोद्यनिर्ह्रादपूरितोडुपथोदरः ।
मायूरच्छत्रवृन्देन, दर्शयन्नद्भुतां श्रियम् ॥२२२॥

मागधेषु पठत्सूच्चैर्निर्मलान् विपुलान् गुणान् ।
लोलनेत्रासु परितो, लीलास्फुरदुलूलुषु ॥२२३॥

अवाप्य मण्डपं द्वारि, समुत्तीर्णो मतङ्गजात् ।
गृहीतार्घो मातृगृहं[१], श्वश्र्वा निन्ये विधिज्ञया ॥२२४॥ पञ्चभिः कुलकम् ॥

हस्तालेपे प्रवृत्तेऽथ, शुभलग्नोदये विदः ।
धन्यम्मन्याया धात्रीशकन्यायाः करमाददे ॥२२५॥

अथो वेदिगृहे भ्राम्यन्, परितो जातवेदसम् ।
भूपाल्लेभे दुकूलाद्यं, विविधं मङ्गलेषु सः ॥२२६॥

तथाऽप्यसौ कृती वध्वा, हस्तं यावन्मुमोच न ।
तावद् भूपोऽवदद् 'वत्स !, किञ्चिद्याचस्व वाञ्छितम्' ॥२२७॥

पञ्चवल्लभवाहेभ्यो, वाहपञ्चकमुत्तमम् ।
ययाचे सोऽपि लेभे च, नृपानन्दस्य तत् कियत् ? ॥२२८॥

ततः प्रियान्वितोऽचालीत्, सचिवावसथं प्रति ।
वीक्षाविस्मेरनयनैः, पौरैरिति च तुष्टुवे ॥२२९॥

क्षीरोदतनयाशाली, किमयं पुरुषोत्तमः ? ।
सर्वः किमथवा सर्वमङ्गलासङ्गमङ्गुलः ? ॥२३०॥

---

१. लग्नस्थानम् । 'मायरु' इति भाषायाम् ।

प्राचीनबर्हिरर्थात् किं, पौलोमीपरिरम्भभाक् ? ।
रोहिणीयोगमापन्नः, किं वा पीयूषदीधितिः ? ॥२३१॥

इत्याद्याकर्णयन् कर्ण्णसुखं पौरवचश्चिरम् ।
प्राप च्छद्मखनेः पद्मवदनः सद्म मन्त्रिणः ॥२३२॥

वासगेहेऽथ पल्यङ्के, निषण्णं तं सवल्लभम् ।
अन्तरङ्गा [नरा]स्तूर्ण्णं, गमनार्थमसज्जयन् ॥२३३॥

वपुश्चिन्तामिषाद्यावदसौ सद्भूतसङ्गरः[२] ।
निर्यात्यनुययौ तावज्जलपात्रकरा वधूः ॥२३४॥

कृताङ्गचिन्तं[३] कान्तं सा, विचिन्तं चतुराऽबुधत् ।
अभ्यधाच्च 'क्षुधा तृड् वा, किमु त्वां नाथ ! बाधते ?' ॥२३५॥

उमित्युक्तवति प्रेयस्यथ मातृनिकेतनात् ।
सधीच्याऽऽनीनयद् वेगान्, मोदकान् सलिलं च सा ॥२३६॥

मङ्गलोऽथ तया सार्धं, मोदकांश्चित्तमोदकान् ।
सुधातुलं जलं चास्वादयन्नेवमभाषत ॥२३७॥

'अमी सान्वयनामानो, भवेयुर्मोदकास्तदा ।
अवन्तीनगरीनीरसम्बन्धं चेदवाप्नुयुः' ॥२३८॥

कलशेन सलीलं तत्, स्वस्थानज्ञापनेच्छया ।
गूढमुक्तं निशम्यैषा, दध्यौ विस्मयभाग् भृशम् ॥२३९॥

आर्यपुत्रः पुरीं कस्मात्तां योजनशतान्तराम् ।
अस्मार्षीत्तत्र वा मातृकुलमस्य भविष्यति ॥२४०॥

---

१. आप्ताः । २. सत्यप्रतिज्ञः । ३. विशिष्टचिन्तायुक्तम् ।

ततश्चेयमदाच्चन्द्र-लवङ्गैलादिबन्धुरम् ।
ताम्बूलं प्रेयसे प्रेमस्थूलंकरणमुत्तमम् ॥२४१॥

तदा नरैः पुनरसौ, सञ्ज्ञितः सादरं प्रियाम् ।
'वर्चोगेहं[1] गमिष्यामि, तिष्ठे'त्याभाष्य निर्ययौ ॥२४२॥

अवन्त्याः पथि विन्यस्तं, तैर्नरैस्तद्धयादिकम् ।
अदर्श्यताऽस्मै निस्सीमगाम्भीर्यजलराशये ॥२४३॥

एकं रथं सारभृतं, गृहीत्वा चतुरो हयान् ।
न्ययोजयदबध्नाच्च, हयमेकं स पृष्ठतः ॥२४४॥

सत्कृत्य शेषविभवैस्तान्नरान् स नरोत्तमः ।
पृष्ट्वाऽध्वग्राम-नगरनामादि प्रास्थित क्रमात् ॥२४५॥

प्राप्तोऽ**वन्तीं** द्रुतं स्वीयमावासं प्रविशन् रथी ।
पितृभ्यामनभिज्ञातश्चिल्लाभ्यां भृशरोदनात् ॥२४६॥

'राजपुत्र ! वणिग्वेश्म, नेक्षसे किं विशस्यहो ? ।
अध्वा पुरो न निर्याती'त्युक्तोऽनंसीत्तयोः पदान् ॥२४७॥ युग्मम् ॥

अथो मातरपितरावभिज्ञाय निजं सुतम् ।
कण्ठे विलग्याऽरुदतां, रोदयन्तौ पुरीमपि ॥२४८॥

तयोश्च पृच्छतोः पुत्रः, स्ववृत्तान्तं यथातथम् ।
अचीकथदतूषिष्टां, व्यस्मेषातांतरां च तौ ॥२४९॥

मन्यमानौ बृहद्भाग्यभङ्गीसङ्गिनमङ्गजम् ।
उत्सवं व्यधिषातां च, तदा जन्मोत्सवाधिकम् ॥२५०॥

---

१. विष्ठागृहम् ।

धनं देशान्तरानीतं, तान् पञ्चापि [च] वाजिनः ।
न्यवीविशद् गृहस्यान्तर्मङ्गलो मङ्गलालयः ॥२५१॥

स्वावासं वासवावाससदृशं स व्यधापयत् ।
भाग्यप्राग्भारलब्धायाः, किमसाध्यं श्रियः खलु ? ॥२५२॥

विधत्तेऽनर्थशान्तिं श्रीर्जगत्संवननं तथा ।
दारिद्र्यमारणं दोषश्रेणेर्द्वेषमपि द्रुतम् ॥२५३॥

विपदुच्चाटनं सौख्यपुष्टिं सृष्टिं गुणावलेः ।
खल[वि]स्रम्भं तदसौ, महाविद्यासमा स्मृता ॥२५४॥ युग्मम् ॥

यः पद्मवासया गाढानुरागेण कटाक्षितः ।
ईर्ष्ययेवाऽपसर्पन्ति, सततं विपदस्ततः ॥२५५॥

श्रीरेव स्तूयतामेका, सर्वैरन्यैः सुरैरलम् ।
यन्महिम्ना मघवाद्या, अपि श्लाघ्या जगत्त्रये ॥२५६॥

अथ चाऽनुज्ञया पित्रोः, सततं विनयोज्ज्वलः ।
आनन्दयन्नुपाध्यायमध्येतुं प्रावृत[त्] कृती ॥२५७॥

विद्या भोगकरी पुंसां, विद्या सत्कीर्त्तिकारणम् ।
बन्धुर्विदेशे विद्यैव, यतन्ते तत्र तद् बुधाः ॥२५८॥

कार्याकार्यविचारं नो, विद्याद् राभसिको भवेत् ।
विद्याविहीनसूनू[श्च], वर्तते तत् पशूपमः ॥२५९॥

ये बाह्ये लोचने ताभ्यां, बाह्यं वस्तु निरीक्ष्यते ।
अन्तस्तत्त्वेक्षणे त्वेकं, शास्त्रमान्तरनेत्रति[1] ॥२६०॥

---

१. आन्तरनेत्रमिवाचरति ।

अथाऽचिरेण मेधाविमूर्द्धन्यः सकलाः कलाः ।
सम्प्राप्य कुमुदं पुष्णन्, सोऽभात् सोम इवाऽपरः ॥२६१॥

इतश्च वाससदने, प्रजिघ्ये तेन मन्त्रिणा ।
धृतौद्वाहिकनेपथ्यो, रोगरुग्णनिजाऽङ्गजः ॥२६२॥

पल्यङ्कसङ्गिनं प्रेमालापिनं साऽपि तं क्षणात् ।
विज्ञायाऽन्यतरं हित्वा, निरयासीद् गृहाद् बहिः ॥२६३॥

पुरः सखीनां चाचष्ट, 'कष्टं कष्टं क्व स प्रियः ।
कर्पूरपूरसुरभिरामगन्धिरयं क्व च ?' ॥२६४॥

सख्यो जजल्प 'भ्रान्ताऽसि, कुतः परनरागमः ?' ।
साऽब्रूत 'पश्यताऽऽगत्य, भ्रान्तिर्युष्माकमेव हि' ॥२६५॥

ताभिस्तथाकृतेऽबोधि, तत्स्वरूपं यथास्थितम् ।
धृत्वा स्वपार्श्वे प्रातः सा, मातृगेहमनायि च ॥२६६॥

अथाऽमात्यः प्रगे राजसदने व्याजवारिधिः ।
पूच्चकार परं खेदं, नाटयन् कद्वदाग्रणीः ॥२६७॥

'देवाऽभाग्यवतां सीमा, मुषितो मुषितोऽस्मि हा ।
ईप्सुः सुखश्रियं दुःखसागरे प्रत्युताऽपतम्' ॥२६८॥

'केनाऽसि मुषितो मन्त्रिन् !, किं ते दुःखमिदं नवम् ?' ।
ससम्भ्रमं महीशेनेत्युक्तो मन्त्रिब्रुवोऽब्रवीत् ॥२६९॥

'प्रभो ! भवत्सुतापाणिस्पर्शमात्रेण मत्सुतः ।
तादृग्दृष्टविशिष्टाङ्गोऽप्यभूत् कुष्ठगलत्तनुः ॥२७०॥

१. कुमन्त्री ।

तन्मे तनयसाम्राज्यावाप्त्याशाकल्पवल्लरी ।
समूलकाषं कषिता, क्षणाद्दुर्दैवदन्तिना' ॥२७१॥

श्रुत्वेति खेदविवशो, विशामीशः कनीमिमाम् ।
तादृग्वात्सल्यवसतिमप्यदृश्याननां व्यधात् ॥२७२॥

भूपाज्ञया जनन्याऽपि, साऽवज्ञाविषयीकृता ।
दध्यावाः[१] ! कीदृशः कर्मविपाको मेऽतिदारुणः ॥२७३॥

मया पूर्वभवे नूनं, निर्दोषः कोऽपि दूषितः ।
कर्मोपतस्थे तदिदं, **कोऽपि भुङ्क्ते हि नाऽकृतम्** ॥२७४॥

अयं खलु प्रियो नैव, ममाऽभाग्यैः स दूरितः ।
उज्जयिन्यम्बुना यो हि, मोदकान् मोदकान् जगौ ॥२७५॥

दम्भारम्भममुं कञ्चिद्, दुराचारस्य मन्त्रिणः ।
शङ्के वक्तुं तु नो शक्ता, को हि मन्येत मद्वचः ? ॥२७६॥

ज्योतिष्केण तथा देहलक्षणैर्वेद्मि यन्मम ।
प्रियोऽवधिर्भाग्यभाजां, सौभाग्यैकनिधिर्भवेत् ॥२७७॥

भाग्यैकलभ्यः सो**ऽवन्त्याम**स्ति मन्ये हृदीश्वरः ।
तस्मादौपयिकं[२] चिन्त्यं, भाग्याविर्भावकारणम् ॥२७८॥

ध्यात्वेत्यन्येद्युरम्बां साऽवादी[न्] 'मातस्तथा कुरु ।
यथैकदा तातमीक्षे, किञ्चिद् वच्मि च वाञ्छितम्' ॥२७९॥

मातेत्युक्ताऽपि किञ्चिन्न, यदा प्रत्युत्तरं ददौ ।
तदाऽतिदुःखदूना सा, दीनास्या पर्यचिन्तयत् ॥२८०॥

---

१. 'दध्यौ आः' इति सन्धिविश्लेषः । २. उपायः ।

किं करोमि ? पुरः कस्य, दुःखपूरं निजं ब्रुवे ? ।
कमाश्रयामि ? कं वोपालम्भे ही भाग्यवर्जिता ? ॥२८१॥

दुःखानि मां समायान्तु, सर्वाण्यपि समन्ततः ।
वितथस्तु कलङ्कोऽयं, किमभूदतिदाहकः ? ॥२८२॥

मातः ! पितः ! कथमियं, निर्मन्तुर्दूष्यते सुता ।
यदि वाऽयं न दोषो वां[1], विधेः किन्तु दुरात्मनः ॥२८३॥

रे रे दुर्दैव ! निर्दोषान्, दूषयन्नेनसोऽपि किम् ।
न बिभेति भवान् ? यद्वा, निर्घृणे का विचारणा ? ॥२८४॥

याऽहं सर्वत्र सर्वेषां, जज्ञे वत्सलतास्पदम् ।
तस्या ममाऽधुना वाचं, धि[क्] कश्चिन्न शृणोत्यपि ॥२८५॥

चाण्डालपाटक इव, मात्राद्यैरपि मेऽन्तिकम् ।
दूरेणाऽत्याजि दुर्दैव !, किमिदं भवता कृतम् ? ॥२८६॥

केनोपायेन स प्रेयान्, ज्ञास्यते गुणसेवधिः ।
कथङ्कारं कलङ्केन, विमुक्ता भवितास्मि च ॥२८७॥

इति चिन्ताचितस्वान्ता, कदाचित् **सिंह**भूपतिम् ।
भूपमान्यं प्रणम्योचे, विनयाद्रचिताञ्जलिः ॥२८८॥

'त्वं मे तातसमस्तातप्रीतिपात्रं च वर्त्तसे ।
तत्कृपां कृत्वा मत्कार्ये, तातं विज्ञपयैतकत् ॥२८९॥

देव ! त्वत्पुत्रिका याऽस्ति, दैवाद्दोषस्य भाजनम् ।
सुप्रसन्नस्य ते सैकां, विज्ञप्तिं प्रविधित्सति' ॥२९०॥

---

१. युवयोः ।

तदूरीकृत्य **सिंहो**ऽपि, गत्वा भूपं तथाऽवदत् ।
यथोन्मीलत्कृपः सोऽपि, तामाकार्यैवमब्रवीत् ॥२९१॥

वत्से ! स्वैरं वदाऽथैषा, 'पुंवेषं तात ! मेऽर्पय' ।
इत्युक्त्वाऽजनि तूष्णीका, ततोऽन्तर्दध्यिवान् नृपः ॥२९२॥

केनाप्यर्थेन महता, पुंवेषं याचते सुता ।
मम तन्नीतिविज्ञस्य, युक्तमेतत्समर्पणम् ॥२९३॥

ध्यात्वेति भूपतिस्तस्यै, पुंवेषं प्रददौ मुदा ।
सिंहं च स्वप्रतिकृतिं, तस्या रक्षार्थमादिशत् ॥२९४॥

सुरक्षिता हि सुन्दर्यः, स्युः कुलस्य विभूषणम् ।
कलङ्केनाऽन्यथा नूनं, दूषयन्त्यमलं कुलम् ॥२९५॥

पुनर्नृपोऽवदद् 'वत्से !, भूयोऽप्याख्याहि किञ्चन' ।
सा स्माह 'तात ! गच्छामि, **विशालां** त्वदनुज्ञया' ॥२९६॥

राजाऽपि ज्ञाततच्चित्ताशयः सानन्दमूचिवान् ।
'वत्से ! व्रज परं शीलं, पायाः पापापहारकम्' ॥२९७॥

शीलादपायविलयः, शीलात् सुकृतकेलयः ।
शाश्वतं भूषणं शीलं, शीलं महिममन्दिरम् ॥२९८॥

अथो कुमारवेषा सा, नतभूपपदाम्बुजा ।
क्रमे**णोज्जयिनीं** प्रापत्, जयिनी बुद्धिसम्पदा ॥२९९॥

अवन्तीशोऽपि **चम्पेश**सुतं **त्रैलोक्यसुन्दरम्** ।
विज्ञायाऽऽयान्तमभ्येत्य, महैः प्रावेशयत् पुरीम् ॥३००॥

त्रैलोक्यसुन्दरं[१] चाप-कृपाण्यादिशुभक्षरम् ।
दृष्ट्वाऽवन्तीपतिर्दध्रे, भूप्राप्तत्रिदशभ्रमम् ॥३०१॥

अदात् सौधं च सन्मानपूर्वं तस्मै धराधवः ।
तस्मिन्नथ कुमारोऽपि, स**सिंह**स्तस्थिवान् सुखम् ॥३०२॥

अन्यदा गुप्तहृदया[२]ऽऽकूतोऽसौ बहलद्रुमम् ।
सुनिर्मलजलं पूर्वदेशं तस्याः पुरो विदन् ॥३०३॥

धराधीशमनुज्ञाप्य, प्रासादे तत्र कारिते ।
सप्तभूमे महोत्साहः, प्रविवेश शुभेऽहनि ॥३०४॥ युग्मम् ॥

कदाचित् संश्रितो वातायनं **त्रैलोक्यसुन्दरः** ।
पयःपानाय तानश्वान्, गच्छतोऽपश्यदध्वनि ॥३०५॥

प्रत्यभिज्ञाय तान् धीमान्, बुभुत्सया तदीशितुः ।
प्रायुङ्क्त स्वनरान् ज्ञातवृत्तास्तेऽस्याऽगदन्निति ॥३०६॥

'**चम्पापुरी**तो **मङ्गलकलस**स्तुरगानिमान् ।
आनिनायेति' तच्छ्रुत्वा, कुमारः प्रत्यभाषत ॥३०७॥

'क्व तिष्ठति स वाहेशः ?, किं करोतीति वित्त भोः !' ।
विदित्वाऽऽहुस्तेऽपि 'गेहासन्नेऽभ्यस्यत्यसौ कलाः' ॥३०८॥

तच्छ्रुत्वा निरणैषीच्च, स एवाऽयं मम प्रियः ।
यतितव्यं तथा किन्तु, **सिंहः** प्रत्येत्यदो यथा ॥३०९॥

ध्यात्वेति चाऽभ्यधात् **सिंहं**, 'तात ! क्रेष्याम्यमून् हयान् ।
ईशोऽमीषां कलाचार्यमाराधयति साम्प्रतम् ॥३१०॥

---

१. सुन्दरदेहम् । २. गुप्तहृदयाशयः ।

अध्यापको निमन्त्र्यस्तत्, सर्वैश्छात्रैः समन्वितः ।
यथा तद्वृन्दमध्यस्थः, सोऽप्येति तुरगेश्वरः ॥३११॥

ततश्च तस्य हृदयं, ज्ञात्वाऽर्थ्यन्ते तुरङ्गमाः ।
क्रय-विक्रयहेतोर्यद्वस्तु बिभ्रति वाणिजाः' ॥३१२॥

न्यमन्त्रयत **सिंहो**ऽपि, प्रत्यूषेऽध्यापकं द्रुतम् ।
छात्रव्रातवृतः सोऽपि, तत्राऽऽगाद् भूरिसम्मदः ॥३१३॥

स्त्रीनरो **मङ्गलं** पश्यन्निमेषोज्झितदृग्युगः ।
पुलक-स्वेद-कम्पादिभावाकीर्णं वपुः दधौ ॥३१४॥

कुमारशिक्षिताश्चाथ, भोजनार्थमसज्जयन् ।
जनसङ्ख्यात एकैकन्यूनं तत्राऽऽसनादिकम् ॥३१५॥

ततस्ते तुमुलोत्ताला, बालाश्चापलशालिनः ।
निविष्टेऽध्यापके सज्जासनेषु समुपाविशन् ॥३१६॥

यावन्**मङ्गलकलसः**, स्थैर्यस्थानं गुणोदधिः ।
वीक्षते तावदात्मार्थं, तत्र नाऽपश्यदासनम् ॥३१७॥

सव्याजं स्त्रीनरः स्वीयनरान् सेर्ष्यमधाऽभ्यधात्[१] ।
'अभुक्त एव रे ! स्थास्यत्ययं किं पुरुषाग्रणीः ? ॥३१८॥

यद्यन्यदासनं नास्ति, न्यस्यतां तर्हि मामकम्' ।
इत्युक्ते ते तथाऽकार्षुरुपाविक्षच्च **मङ्गलः** ॥३१९॥

आसने महति क्ष्मापयोग्यस्थालादिसङ्गते ।
निषण्णोऽसौ तदा पङ्क्तेरन्तमप्यादिमादधौ ॥३२०॥

---

१. 'अथ' इत्यर्थः ।

ततस्तथा तैः सर्वेषां, मोदकाः परिवेषिताः ।
यथा **मङ्गलकलस**मसम्प्राप्ताः समापिताः ॥३२१॥

कुमारोऽभ्यधिताऽथैतान्, 'प्राक्तना यदि मोदकाः ।
न सन्त्यसौ(स्मै) तद्दीयन्तां, **विशाला**वारियोगजाः ॥३२२॥

त एवाऽस्मै हि रोचन्त,' इति श्रुत्वाऽथ विस्मितः ।
मङ्गलो व्यमृशद्वक्ति, कुमारः किमिदं वचः ? ॥३२३॥

नूरूपं किन्तु बिभ्राणा, नेयं भवति मत्प्रिया ? ।
अन्यथा घटतेऽमुष्मिन्नीदृग्गीःसम्भवः कथम् ? ॥३२४॥

इति ध्यायन् कुमारेण, सीमा प्रेक्षावतां प्रियः ।
स एवं स्वोचितैरेवं, सदक्रियत वस्तुभिः ॥३२५॥

भोजनान्तेऽथ तांश्छात्रांस्ताम्बूलाद्यैरमानयत् ।
कुमारः सद्धियां धाम, विशेषेण तु **मङ्गलम्** ॥३२६॥

यथा यथाऽस्य सम्मानं, छात्रायैक्षन्त[1] निर्भरम् ।
तथा तथा दुदुविरे, **पङ्क्तिभेदो हि दुःसहः** ॥३२७॥

कुमारोऽध्यापकमथाऽवादीत् 'काञ्चित् कथामहम् ।
शुश्रूषुश्छात्रवदनात्, तदाऽऽज्ञापय कञ्चन' ॥३२८॥

अध्यापकोऽथ च्छात्राणां, सम्मुखं यावदैक्षत ।
तावत्तेऽसूयया क्रान्ताः, स्मित्वा युगपदूचिरे ॥३२९॥

'सम्मानमेवं लेभे यः, स कथां वो वदिष्यति' ।
अध्यापकेरितोऽवादीत्, सोत्साहो **मङ्गल**स्ततः ॥३३०॥

---

१. रोर्यः [सि.हे.श. १।३।२६] इति सूत्रेण 'रस्य यः' ।

'कल्पिताऽन्या च पृथ्वीशसूनो ! द्वेधा कथा स्मृता ।
भूयोऽन्याऽपि द्विधा स्वानुभूताऽन्याचरिताऽपि च ॥३३१॥

तद् ब्रूहि का कथा कथ्या ?', कुमारोऽप्याह सस्मितम् ।
'वद काञ्चित् स्वानुभूतां, चमत्कारकरीं कथाम् ॥३३२॥

कथा हि सा चमत्कारो, यच्छ्रुतेरेव विस्फुरेत् ।
स्युः सत्यं मोदकास्ते हि, ये**ऽवन्ती**वारियोगजाः' ॥३३३॥

पुनः सङ्केतसंवेधात्तां निर्णीय निजां प्रियाम् ।
सिंहे शृण्वति स स्वीयवृत्तं विस्मयकृद् भृशम् ॥३३४॥

गीर्वाणपथगीःपूर्वोद्भूतवात्यापहारतः ।
आरभ्य स्वपुरावाप्तिः, प्रोचे कन्याविवाहयुक् ॥३३५॥ युग्मम् ॥

तन्निशम्य कुमारोऽपि, रुषाविष्ट इवाभ्यधात् ।
'असम्बद्धप्रलापी भोः !, कोऽयं किल पिशाचकी ? ॥३३६॥

वात्ययाऽपहृतिः स्वस्य, कोऽयं तादृक् च मन्त्रिणः ।
त्यागो वध्वाश्च तादृश्याः, कथं श्रद्धीयते न्वहो ! ॥३३७॥

भो ! भोस्तदस्मत्सचिवदूषकं धरतैतकम्' ।
इत्थं कुमारे वदति, सच्छात्रपाठकोऽनशत् ॥३३८॥

गत्वा च **धनदत्ताया**ऽऽचख्यौ'युष्मत्सुतः कथाम् ।
तामलापीद्यया सोऽस्ति, धृतो नष्ट्वा गता वयम्' ॥३३९॥

श्रेष्ठी व्याकुलचेतस्कस्तनयापायशङ्कया ।
प्राभृतं सज्जयामास, गन्तुं राजकुलं प्रति ॥३४०॥

अथ नारीनरो मालोपरि **मङ्गल**मादरात् ।
नीत्वाऽऽसने चासयित्वा, **सिंह**प्रत्यक्षमूचिवान् ॥३४१॥

'विवाहे कान्त ! मे तातस्तदा यन्मङ्गलेषु ते ।
अददिष्ट समस्तं तत्, साम्प्रतं प्रकटीकुरु ॥३४२॥

यथैष **सिंह**नृपतिस्तातप्रतिनिधिर्मम ।
तद्वीक्षणात् क्षणाद् वृत्तमिदं सर्वं विबुध्यते' ॥३४३॥

मङ्गलोऽथाऽवदत् '**सिंहः**, श्वशुरो मन्निकेतनम् ।
गच्छतु स्वच्छधीर्वस्तु, तत् सर्वमपि पश्यतु' ॥३४४॥

सिंहक्ष्मापोऽपि साश्चर्यः, प्राप्तवांस्तस्य मन्दिरम् ।
धनेन भीतभीतेन, सत्कृतो न्यगदन्मृदु ॥३४५॥

'श्रेष्ठिपुङ्गव ! मा भैषीर्मा भैषीर्यत्त्वदात्मजः ।
चम्पाधिपतिजामाता, मा ताम्य स्वाम्यसि ध्रुवम् ॥३४६॥

कुमारो यः स्नुषा सा ते, हेतोः पुंवेषधारिणी ।
चम्पाधीशस्य दुहिता, दिष्ट्या दृष्टोऽद्य तत्पतिः ॥३४७॥

तस्याः पित्रा विवाहे यद्, [य]द् ददे तव सूनवे ।
तत् सर्वं दर्शयाऽस्माकं, चेतः प्रत्येत्यरं यथा' ॥३४८॥

श्रेष्ठी हृष्टोऽथ **सिंहाय**, समस्तं वस्त्वदर्शयत् ।
तच्च **चम्पेश**नामाङ्कं, दृष्ट्वा सोऽपि प्रतीतवान् ॥३४९॥

सौधप्राप्तेन **सिंहेना**ऽनुज्ञाताऽथ स्वरूपभृत् ।
त्रैलोक्यसुन्दरी पत्युः, पादौ नत्वेत्थमभ्यधात् ॥३५०॥

'तदा मां जीविताधीश !, च्छलयित्वा भवान् ययौ ।
वाचामगोचरं दुःखमन्वभूवमहं पुनः' ॥३५१॥

मङ्गलोऽथाऽवदत् 'कान्ते !, जज्ञे तद्दैवजृम्भितम् ।
अतः परं पुनर्दुःखराशेर्दत्तो जलाञ्जलिः ॥३५२॥

स्वस्थानज्ञापनार्थं च, प्राज्ञे ! सङ्केतमार्पय[म्] ।
ततः प्रिये ! त्वमप्याविश्चकर्थ स्वमतिप्रभाम्' ॥३५३॥

अथ **[सिं]हः** पुनः कृत्वा, तां नृवेषां विचक्षणः ।
नीत्वाऽ**वन्तीश**सविधे, सर्वं [त]द्वृत्तमाख्यत ॥३५४॥

अस्याः शीलमहो ! शुद्धमहो ! धार्ष्ट्यं च मन्त्रिणः ।
इति ध्यायन्नृपः प्रोचे, 'वत्से ! भज निजं पतिम्' ॥३५५॥

ततोऽ**वन्ती**श्वरानुज्ञां, समवाप्य वधूवरम् ।
तद् ययौ प्रवरामोदसुन्दरं श्रेष्ठिमन्दिरम् ॥३५६॥

अथ श्रेष्ठी निजावासे, दशाऽहानि व्यधापयत् ।
महानन्ददद्दद्गीतनृत्यवाद्यैर्महामहान् ॥३५७॥

श्रेष्ठ्यादिकाननुज्ञाप्य, **चम्पां सिंह**स्तु जग्मिवान् ।
'क्व तनूजेति' राज्ञोक्तः, सर्वं व्यक्तमुवाच च ॥३५८॥

समार्पयच्च तत् सैन्यं, नृवेषं चापि भूभुजे ।
सोऽपि प्रमुमुदे बाढं, स्वसुतामहिमश्रुतेः ॥३५९॥

दध्यौ चास्या अहो ! शीलमहो ! शक्तिरहो ! मतिः ।
अहो ! स्वदयिते भक्तिरहो ! दोषविमुक्तता ॥३६०॥

ततो नृपः पुनः **सिंह**ं, प्रहित्य प्रियसंयुताम् ।
आनाययत् सुतामुत्कस्तं[१] जामातरमीक्षितुम् ॥३६१॥

वधूवराविमौ वीक्ष्य, मूर्त्ताविव रतिस्मरौ ।
साफल्यं नेत्रयोर्मेने, दृष्टदृष्टव्ययोर्नृपः ॥३६२॥

---

१. उत्कण्ठितः ।

लावण्यसलिलं पौर्यः, पुरं प्रविशतोस्तयोः ।
सतृष्णं विस्मयस्मेरनयनाञ्चलयोऽधयन् ॥३६३॥

दध्यौ धरापतिर्धिग् धिग्, नृशंसो[1] धीसखः कुधीः ।
स्वामिद्रोही मम सुतां, वृथा दोषाददूषयत् ॥३६४॥

नृपोऽमात्यं सतनयं, हन्तुं **सिंह**मथाऽऽदिशत् ।
मङ्गलश्च तदाऽवादीत्, करुणाकेलिमन्दिरम् ॥३६५॥

'देवाऽयं तातदेश्यो[2] मे, सचिवो मुञ्च मुञ्च तत् ।
मा वधीर्मा वधीरेनं, **सन्तोऽसत्स्वपि वत्सलाः**' ॥३६६॥

तेन जामातृवचसा, महीशोऽतिचमत्कृतः ।
देशान्निर्वापयामास, मन्त्रिणं पापसत्रिणम् ॥३६७॥

इहाप्यन्यायतो दुःखं, लभन्ते देहिनश्चिरम् ।
परत्र यत्तु दुःखं तत्, केवली वेद केवलम् ॥३६८॥

मङ्गलो मातापितरा**ववन्ती**तो नृपाज्ञया ।
आनाय्य न्याय्याचरणस्तस्थिवान् सप्रियः सुखम् ॥३६९॥

अन्येद्युर्नृपतिः प्रेत्यसुखावाप्तिस्फुरन्मतिः ।
मङ्गलाय प्रदाय स्वं, राज्यं स्वाराज्य[3]सन्निभम् ॥३७०॥

शीलभद्रगुरूपान्तेऽत्यन्तसंविग्नमानसः ।
उपाददे परिव्रज्यां, पापपन्नगजाङ्गुलीम् ॥३७१॥ युग्मम् ॥

भूपोऽथ **मङ्गलो** नीतिप्रवणः पर्यतोषयत् ।
प्रजाः करैः[4] सुमृदुभिर्यथा सोमः कुमुद्वतीः ॥३७२॥

---

१. क्रूरः । २. पितृसमः । ३. स्वर्गराज्यसमानम् । ४. श्लोकेऽस्मिन् शब्दश्लेषेणोपमा दर्शिता, राज्ञः पक्षे 'करैः' = राजग्राह्यैर्भागैः, चन्द्रस्य पक्षे 'करैः' = किरणैः ।

कदाचिदवजानन्तस्तं वणिक्त्वान्महीश्वरम् ।
प्रत्यन्तपार्थिवाः[१] स्फारानीकव्यञ्चितभूतलाः ॥३७३॥

राज्यं जिघृक्षवोऽक्षामपौरुषाः परुषाशयाः ।
दुर्द्धरा रुरुधुर्भानुं, पवनोद्धूतरेणुवत् ॥३७४॥ युग्मम् ॥

मङ्गलोऽप्यगलद्धामा, निःसामान्यबलो बली ।
लीलयैव जिगायैनान्, **पुण्यतेजो हि दुर्जयम्** ॥३७५॥

प्रतापतापितारातेर्भुवं तस्येति शासतः ।
जयशेखरनामाऽभूत्, तनयो विनयोज्ज्वलः ॥३७६॥

अन्यदा समवासार्षीदुद्याने ज्ञानभास्करः ।
दुष्कर्मेभघटासिंहो, **जयसिंहो** महामुनिः ॥३७७॥

वनपालमुखाज्ज्ञात्वा, तमायान्तं नराधिपः ।
गत्वा नत्वा च शुश्राव, विपाकं पुण्य-पापयोः ॥३७८॥

देशनान्ते च पप्रच्छ, 'भगवन्नत्र जन्मनि ।
भाटकेन बभूवेदं, कुतो मे पाणिपीडनम् ? ॥३७९॥

दोषोज्झिता च कान्ता मे, कुतोऽभूल्लक्ष्मभाजनम् ? ।
संशीतिव्रततिव्रातं[२], छिन्ध्यमुं ज्ञानपर्शुना' ॥३८०॥

अथाऽवोचत स ज्ञानी, '**भरते**ऽत्रैव विद्यते ।
क्षितिप्रतिष्ठितं नाम, पुरं श्रीभरभासुरम् ॥३८१॥

सोमचन्द्राभिधो धर्मी, तत्राऽऽसीत् कुलपुत्रकः ।
श्रीदेवी दयिता तस्य, भर्तृभक्तिविभूषिता ॥३८२॥

---

१. समीपवर्तिनृपाः । २. संशयवल्लीसमूहम् ।

तत्रैव च पुरे तस्य, वयस्यः शस्यधीरभूत् ।
जिनदेवाभिधः श्राद्धः, शुद्धः श्रद्धाभृताशयः ॥३८३॥

जिनदेवोऽन्यदा रात्रिशेषे सस्मार जागरी ।
संसारे सारमेकं श्रीः, सर्ववाञ्छितसाधिका ॥३८४॥

लक्ष्मीं विना नरो लोके, सर्वथैव न रोचते ।
यथा जीवं विना वर्ष्म, विना वा ब्रह्म सद्यतिः ॥३८५॥

गत्वा देशान्तरं तस्मात्, प्रयत्नादर्जयामि ता[म्] ।
पूरयित्वा च सर्वेषामाशाः कुर्वे स्थिरं यशः ॥३८६॥

कदाचन पुनर्दैवाद्विदेशेऽवस्थितस्य मे ।
मृतिर्भवेत्तदा पुण्यहीनस्य ननु का गतिः ? ॥३८७॥

स्ववयस्याय तद् द्रव्यमर्पयामि निजं यथा ।
ददात्येष सुपात्रेषु, श्रेयोऽमुत्र च मे भवेत् ॥३८८॥

चिन्तयित्वेति दीनाराऽयुतं न्यस्य सुहृत्करे ।
प्रोचे'देशान्तरं यामि, भवान् दद्यादिदं धनम् ॥३८९॥

अस्य पुण्यस्य षष्ठोंऽशं[१]स्तवे'त्याभाष्य सोऽचलत् ।
सोमोऽथ सप्रियो द्रव्यं, तद्दीनादौ ददौ मुदा ॥३९०॥

तया राया स्फुरच्छ्रद्धः, कुर्वाणः पात्रसत्कृतिम् ।
सोमोऽपि सुकृतं प्राप, शशिशुभ्रं यशोऽपि च ॥३९१॥

परद्रविणदानेऽपि, दातुर्माहात्म्यमुल्लसेत् ।
यच्छन् पाथोधिपाथोऽपि, किं न स्यादुन्नतोऽम्बुदः ? ॥३९२॥

---

१. भागः ।

भद्राख्यसख्याः प्राणेशं, वीक्ष्य त्वग्दोषदूषितम् ।
सोमप्रिया बभाषे तां, प्रत्येवं हास्यतोऽन्यदा ॥३९३॥

'महिमाऽसौ त्वदङ्गस्याऽपूर्वो यत् पतिरीदृशः' ।
भद्राप्याकर्ण्य तच्छ्यामवदनाऽजनि तत्क्षणम् ॥३९४॥

तां सखेदां परिज्ञाय, **श्रीदेवी** घृणयान्विता ।
उवाच 'सखि ! हास्येन, मयोक्तं हृदि मा कृथाः' ॥३९५॥

एवं हास्येन तत्कर्म, शर्महारि बबन्ध सा ।
पदे पदे हहा कर्म, बन्धन्त्येवं प्रमादिनः ॥३९६॥

अन्यदा **मदना**ख्याया, वेश्यायाः पञ्चभिर्नरैः ।
दुर्दान्तैः सममुद्यानस्थायाः संलाप इत्यभूत् ॥३९७॥

'अहो ! धर्माग्रहपरौ, बाढनिर्मलमानसौ ।
श्रीदेवी-सोमचन्द्रौ न, कम्प्यौ केनापि शीलतः' ॥३९८॥

तेषां पुंसामन्यतमः, **कामाङ्कुर** इति श्रुतः ।
श्रीदेव्याः शीलविध्वंसे, विदधे दृढसङ्गरम् ॥३९९॥

मदनाऽपि स्वसौभाग्यादुन्मत्ताऽभ्यधित द्रुतम् ।
'विधास्ये **सोमचन्द्रस्य,** शीललीलायितक्षयम्' ॥४००॥

कामाङ्कुरोऽथ **श्रीदेवीं,** विदित्वैकाकिनीं रयात् ।
गेहं प्राप्याऽवद'देहि, वाञ्छितं प्रणताय मे' ॥४०१॥

किं तदित्यमुया प्रोक्तः, सोऽभासिष्ट 'ममाऽङ्क[गम्] ।
स्मरतापं स्वाङ्गसङ्गपीयूषेणाऽपसारय' ॥४०२॥

'रे रे ! सत्पथविभ्रष्ट !, धृष्ट[१] ! दुर्गतिकष्टदम् ।
किं ब्रूषेऽह्नाय दृग्मार्गं, त्यजाऽन्त्यजसमक्रमः ॥४०३॥

सुशीला ललना लीलालयं लावण्यशालिनम् ।
त्यजन्त्युर्वीशमप्यन्यमर्त्यमात्रस्य का कथा ?' ॥४०४॥

इत्युक्तोऽपि तया सत्या, स यावत् याति नो शठः ।
तावत् स्वशीलरक्षायै, सा पूत्कर्त्तुं प्रचक्रमे ॥४०५॥ त्रिभिर्विशेषकम् ॥

ततो राजकुलाद् भीतिं, बिभ्राणः स तदोकसः ।
निर्गत्य गतवान् स्वीयमित्रेभ्योऽकथयच्च तत् ॥४०६॥

इतश्च **मदनो** द्यानस्थिता **सोमं** स्वमन्दिरम् ।
यान्तं सायं[२] विलोक्याऽऽशु, कुलस्त्रीवेषधारिणी ॥४०७॥

आगत्याऽन्तिकमब्रूत, 'मद्भर्त्ताऽन्तर्वणं स्थितः ।
त्वामाह्वयति केनापि, कार्येणाऽऽर्यजनाग्रिम !' ॥४०८॥ युग्मम् ॥

सोमोऽपि ऋजुधीः प्राप, तद्वनं तत्पतिं पुनः ।
तत्राऽनिरीक्ष्य किं न्वेतदिति ध्यायंस्तयोच्यत ॥४०९॥

'सौभाग्यसम्बन्धेनाऽथ, प्रार्थनाकल्पपादप ! ।
शरणं भव मे बाढं, पीडितायाः स्मरेषुभिः' ॥४१०॥

ऊचे **सोमो** 'हहा भद्रे !, कुलद्वयकलङ्कदम् ।
नेदं नौ युज्यते कर्म, धर्मविध्वंसकारणम्' ॥४११॥

मदनोवाच 'मा वादीः, प्रतिबोधवचोऽधुना ।
मंस्यसे मद्वचो नो चेत्तन्मर्त्तास्मि तवोपरि' ॥४१२॥

---

१. निर्लज्ज ! । २. 'सायं तं सायं' इति पु.प्रे. पाठः ।

'यद्येवं तर्हि मां विद्धि, त्वत्प्रागपि मृतं ध्रुवम्' ।
इत्युक्त्वा सोऽसिमाकृष्य, छिन्ते यावत् स्वमस्तकम् ॥४१३॥

तावत् सा तं करे धृत्वा, स्वनिवेदनपूर्वकम् ।
क्षमयित्वाऽगमत् स्वीयास्पदं सोऽपि गृहं गतः ॥४१४॥

श्रीदेवी-सोमचन्द्रौ तावेवं शीलोज्ज्वलस्थिती ।
विहिताराधनावन्ते, प्राप्तावादिमताविषम्[१] ॥४१५॥

तत्राऽऽयुः पञ्चपल्यानि, पूरयित्वा क्रमाच्च्युतौ ।
युवामभवतं पूर्वरीत्या तौ दम्पती नृप ! ॥४१६॥

दानमाहात्म्यतो राजंस्तवाऽभूवन् पराः श्रियः ।
परं परार्थदोषेणाऽवक्रयोपयमोऽप्ययम् ॥४१७॥

परिपूर्णस्य शीलस्य, तदानीं च प्रपालनात् ।
भूयोऽपि सङ्गमोऽभूद्वां[२], शर्मद्रुमघनाघनः ॥४१८॥

सखी च दूषिता हास्यात्तोषिता यच्च मङ्क्ष्वपि ।
त्वत्पत्न्या पृथिवीनाथ !, जातं यातं च लक्ष्म तत्' ॥४१९॥

इति पूर्वभवं श्रुत्वा, [तौ] जातिस्मृतिमीयतुः ।
दध्यतुश्च फलं हीदृग्, जज्ञेऽल्पस्याऽपि कर्मणः ॥४२०॥

संसारेऽत्र फलन्तीत्थं, चेत् कर्माणि शरीरिणाम् ।
राज्येनाऽनेन तदलं, कर्मादानैकहेतुना ॥४२१॥

ध्यात्वेति तौ सुतं भूपं, कृत्वा जगृहतुर्व्रतम् ।
पालयामासतुश्चासिधारातीव्रं जितेन्द्रियौ ॥४२२॥

---

१. प्रथमदेवलोकम् । २. युवयोः ।

क्रमेण सूरिणा स्वीयपदे न्यस्तोऽथ **मङ्गलः** ।
साधूनानन्दयामास, सुरानिव सुरेश्वरः ॥४२३॥

प्रान्तेऽनशन[त]श्चैतौ, **ब्रह्मलोक**मुपेयतुः ।
भूयो मर्त्यौ सुरौ मर्त्यौ, भूत्वा मुक्तिमवाप्स्यतः ॥४२४॥

एवं **मङ्गलकलसं**, दानादुल्लसितेन्दिरम् ।
समाकर्ण्य सकर्णाः स्थ, तत्र शश्वत् समुद्यताः ॥४२५॥

प्रायस्तिर्यगमर्त्य-नारकिभवावाप्तोद्भवैर्दैहिभि-
र्दानं न प्रददे नरेषु तदहो, प्राप्याऽपि जन्मं न यैः ।
पात्रे स्वश्रियमादधद्भिरनिशं, वृष्टं प्रमोदाश्रुभि-
स्तैर्वैधेयजनाश्रितैर्भवदवो, निर्वापिता वै कथम् ॥४२६॥ [शार्दूलवि.]

दानेषु शास्त्रेऽभयदानमाद्यं, सत्पात्रदानं गदितं द्वितीयम् ।
एतद्द्वयं सिद्धिसुखैकहेतुरपारसंसारसमुद्रसेतुः ॥४२७॥ [उपजातिवृत्तम्]

तथाऽनुकम्पोचितकीर्त्तिभेदं,
दानत्रयं भोगफलं न्यगादि ।
स्वर्गापवर्गाप्तिनिबन्धने तद्,
भव्या ! यतध्वं खलु दानधर्मे ॥४२८॥ [उपजातिवृत्तम्]

—● इति दाने **मङ्गलकलसकथा**, ग्रं. ३५१, अक्षर-४ ●—

दानं निर्द्रविणैर्भूम्ना, नाराद्धुं किल शक्यते ।
बाह्यहेत्वनपेक्षं तत्, सच्छीलं परिशील्यताम् ॥४२९॥

भो भव्या ! भवपाथोधेः, परं कूलं यदीप्सवः ।
समाश्रयत तच्छीलपोतं[१] ज्ञाननियामकम्[२] ॥४३०॥

१. नावम् । २. नाविकम् ।

पीयूंषति[1] विषं तोयत्याश्रयाशः स्रजत्यहिः ।
गोष्पदत्यम्बुराशिश्च, शीलभाजां शरीरिणाम् ॥४३१॥

अङ्गिनां शुद्धशीलानां, सुरासुरनरर्द्धयः ।
न दुर्लभा न दूरे च, मोक्षसौख्यमपि ध्रुवम् ॥४३२॥

चिन्तामणिः करे तेषां, तेषां कल्पद्रुमो गृहे ।
कामगौः सविधे तेषां, येषां शीलं समुज्ज्वलम् ॥४३३॥

शीलं **चम्पकमाला**वद्विमलं कलयन्ति ये ।
विलीय[न्ते]ऽरयस्तेषां, सुराश्च स्युर्वशंवदाः ॥४३४॥

तथाहि–

जम्बूद्वीपस्य भरते, **विशाला**ख्या समस्ति पूः ।
बहुभिर्धनदैर्बाढं, या विप्रकुरुतेऽ**लकाम्** ॥४३५॥

भूपोऽपाल्ल**लिताङ्ग**स्तां, भुजौ यस्य विरेजतुः ।
यमदण्डाविवोद्दर्पविपक्षौघविघातने ॥४३६॥

तस्य **प्रीतिमती**कुक्षिसरसीकलहंसिका ।
सुता **चम्पकमाले**ति, बभूवाऽद्भूतरूपभूः ॥४३७॥

असौ बहूनां पुत्राणामुपर्येकाऽजनिष्ट यत् ।
सौभाग्यवसतिः पित्रोस्तेनाऽतिप्रेमभूरभूत् ॥४३८॥

धात्रीभिर्लाल्यमानाऽसौ, मन्मनालापशालिनी ।
चक्रे पित्रोः श्रुतिवापीः, सुधारसभृता इव ॥४३९॥

समये मेदिनीनाथः, समाहूयेत्यथादिशत् ।
महोपाध्याय**कुमुदचन्द्रं** सत्कारपूर्वकम् ॥४४०॥

---

१. **पीयूषमिवाचरति ।**

'मेधाविमुख्य ! वत्सा मे, यथा सर्वकलास्वियम् ।
कुशला स्यात्तथा यत्नमेकतानमनाः कुरु' ॥४४१॥

स तथेति नृपादेशं, प्रतिश्रुत्य विशारदः ।
शारदेन्दुसितां कीर्त्तिं, लिप्सुस्तामध्यजीगपत् ॥४४२॥

सा वाङ्मात्रमुपाध्यायात्, प्राप्याऽपापाशया रयात् ।
कला विवेद सकलाः, पूर्वाभ्यस्ता इव प्रधीः ॥४४३॥

शब्दव्युत्पत्तिनिपुणा, साहित्याहितसन्मतिः ।
तर्कसम्पर्कसुभगा, भारते प्रतिभान्विता ॥४४४॥

वीणादिवाद्यनिष्णाता, नाटकेषु पटुर्भृशम् ।
प्रशस्यधर्मशास्त्रज्ञा, बभूव नचिरादियम् ॥४४५॥ युग्मम् ॥

नारीचूडामणिश्चूडामणावेषा विशेषतः ।
वैदुष्यमापुषी तारतारुण्यभ्राजिभूघना ॥४४६॥

पूर्णेन्दुसुन्दरमुखी, नीलोत्पलविलोचना ।
कुन्दविद्योतिरदनाऽधरधिक्कृतविद्रुमा ॥४४७॥

कम्बुप्रतिकृतिग्रीवा, चक्रद्वन्द्वाकृतिस्तना ।
कूपोपमलसन्नाभी, रम्भास्तम्भनिभोरुका ॥४४८॥

रक्तराजीवसङ्काशक्रमाऽन्येद्युरसौ कनी ।
आययौ भूपसदसमुपाध्यायसमन्विता ॥४४९॥ विशेषकम् ॥

प्रणतां तां पिता स्नेहातिरेकादङ्कगां व्यधात् ।
प्रेमाऽपत्ये निर्गुणेऽपि, पितुः स्यात् सगुणे किमु ? ॥४५०॥

इतश्चास्ति **कुणालायां**, पुर्यां राजा**ऽरिकेसरी** ।
शरीरीव स्मरः स्वामी, **ललिताङ्ग**नृपस्य सः ॥४५१॥

नाम्नाऽ**मरगुरु**स्तेन, स्वगुरुः कार्ययोगतः ।
प्रहितस्तत्र च तदा, प्राप्तोऽविशददः सदः ॥४५२॥

राज्ञा चासनदानादिसत्कारपरितोषिते ।
तत्रासीनेऽथ सञ्ज्ञे, क्षेमप्रश्नादिकं मिथः ॥४५३॥

सोऽपि रूपवतीमेनां, कन्यां दृग्भ्यां निशामयन् ।
दध्यावियं ममेशस्य, [योग्याऽस्ति] प्रेयसी ननु ॥४५४॥

नरेशस्तामथाऽप्राक्षी[द्], '[व]त्से ! मम निवेदय ।
त्वं जज्ञाथ कलाः काः काः, स्वीयप्रज्ञाप्रकर्षतः' ॥४५५॥

यावत् किञ्चन नोवाच, [सा] तावत् **कुमुदो**ऽवदत् ।
'वेत्ति सर्वाः प्रकर्षं तु, प्राप्ता चूडामणावियम्' ॥४५६॥

अमरः सस्मितं स्माह, 'विज्ञे ! चेद्वेत्सि तद्वद ।
कः कीदृक्षः कदा भावी, कान्तस्ते ? कति चाऽऽत्मजाः ?' ॥४५७॥

ह्रिया नतमुखाब्जेयं, न ददौ किञ्चिदुत्तरम् ।
ततोऽवक् **कुमुदो** 'वत्से !, का ह्रीस्ते प्रश्नितोत्तरे' ॥४५८॥

साऽथो जजल्प 'भावी मे, वरः क्ष्मापोऽ**रिकेसरी** ।
इतश्चाऽह्नो वत्सरान्ते, स मे पाणिं ग्रहीष्यति ॥४५९॥

अन्यच्च द्वादशाब्दानि, सार्द्धानि विरहो मम ।
भावी तेन समं सोऽथ, स्वयमेव च रङ्क्ष्यते ॥४६०॥

ततो भावि सुतद्वन्द्वमिति पृष्टं न्यवेदयम् ।
अपृष्टमपि किञ्चित्ते, ब्रुवे राजगुरो ! शृणु ॥४६१॥

ज्येष्ठोऽम्रियत ते सूनुरितोऽह्नो दशमेऽहनि ।
तत्रैव निशि ते कान्ता, सुतं च सुषुवेऽद्भुतम्' ॥४६२॥

श्रुत्वेति युगपच्छोक-हर्षौ राजगुरुर्दधत् ।
पुनः पप्रच्छ 'पञ्चत्वं, प्राप सूनुरसौ कथम् ?' ॥४६३॥

साऽथो विचार्य विदुषी, वदति स्म 'यदा भवान् ।
पुरात् प्रास्थित भूपालनिदेशाद्दक्षशेखरः ॥४६४॥

तदाऽनुयानसौ सूनुर्निर्भर्त्स्य स्थापितस्त्वया ।
कतिचिद्दिवसान्मातुः, पार्श्वेऽस्थात् क्रीडया सुखम् ॥४६५॥

तरवारिं तवाऽन्येद्युर्गृह्णन् मात्रा निवारितः ।
रोषणो गणयामासाऽपमानं मानसे बहु ॥४६६॥

ततः पुर्या बहिर्गत्वा, वाप्यां झम्पामदादसौ ।
असूंस्तृणाय मन्यन्ते, मानिनो ह्यवमानिताः ॥४६७॥

तत्राऽसौ बहुले पङ्के, निममज्ज तथा यथा ।
स्वजनैर्वीक्ष्यमाणोऽपि, वीक्षामासे न हि क्वचित् ॥४६८॥

तत्ते ज्ञापयितुं वृत्तं, प्रहितोऽस्ति कुरङ्गकः ।
स्थितो राजसभाद्वारे, जवादाहूय पृच्छ्यताम्' ॥४६९॥

राज्ञाऽऽह्वाय्याऽथ पृष्टोऽसौ, तत्तथैव न्यवेदयत् ।
चमच्चकार तज्ज्ञानसंवादा[द]खिला सभा ॥४७०॥

प्रोचे राजगुरु'र्भूप !, साक्षाद् गीस्तव पुत्रिका ।
अस्यास्त्रिकालविषयं, तथ्यं ज्ञानं स्फुरत्यलम्' ॥४७१॥

अथ क्ष्मापेन प्रीतेन, स्वर्ण्ण-क्षौमादिवृष्टिभिः ।
निर्वापितः श्रमार्चिष्मानुपाध्यायस्य सत्वरम् ॥४७२॥

अलब्ध च धराधीशादुपाध्यायधुरन्धरः ।
सुवर्णलक्षप्रमितं, शासनं बहुमानतः ॥४७३॥

लोकैरप्येष वस्त्राद्यैरर्चितोऽथ महीभुजा ।
विसृष्टोऽध्ययनागारमासदत् कन्यया समम् ॥४७४॥

भूपोऽप्राक्षीत्ततो राजगुरुं 'कारणतः कुतः ।
प्रभुणा प्रहितोऽसीति, जल्पाऽनल्पगुणाकर !' ॥४७५॥

अथैषोऽवदद'ग्राहि, गिरिः **कालिञ्जरा**भिधः ।
मदोन्मत्तेन पल्लीशेन, **दम्भि**सञ्ज्ञेन दम्भिना ॥४७६॥

तत्तं स्वीकृत्य स्वं सैन्यं, मुञ्च मुञ्चेति सन्मते ! ।
त्वां **कुणालापुरी** भर्त्ता, समादिशति सादरम्' ॥४७७॥

ललिताङ्गः समाचख्यौ, 'दुर्गः[१] स्वीकृत एव सः ।
पल्लीशो मे पुरः कोऽयं, पञ्चास्यस्य[२] कुरङ्गवत्' ॥४७८॥

तेनेत्युक्त्वा विसृष्टोऽथाऽ**मरः** प्राप्तो निजां पुरीम् ।
भूपमाशीभिरानन्द्याऽऽसाम्बभूवोचितासने ॥४७९॥

ऊचे च 'भवदादेशा**द्विशालां** गतवानहम् ।
सत्कृतो **ललिताङ्गेन**, लब्धवांश्च दृशोः फलम्' ॥४८०॥

किं तद्दृक्फलमित्युक्तः, स भूयोऽवक् प्रमोदतः ।
'देव ! तस्य तनूजाऽस्ति, सुकृतप्राप्यदर्शना ॥४८१॥

रूपेण स्वर्गवामाक्षीः, क्षीणगर्वाः करोति या ।
वाङ्माधुर्येण वसुधां, मुधा माधुर्यडम्बराम् ॥४८२॥

गुणैरनन्यसामान्यैर्विस्माययति या बुधान् ।
तिरस्करोत्यङ्गिरसमपि बुद्ध्या प्रकृष्टया ॥४८३॥

---

१. 'जगृहे दम्भसञ्ज्ञेन' इति विनयचन्द्रसूरिरचिते श्रीमुनिसुव्रतस्वामिचरित्रे ।६।११५॥ २. सिंहस्य ।

यस्याश्चूडामणिज्ञानं, निरौपम्यं विशेषतः ।
किं बहूक्त्या गुणास्तस्या, नो वाच्या जिह्वयैकया ॥४८४॥

एवं स्तुवन् राजगुरुः, सर्वमाविश्चकार तत् ।
यत्तस्यां सदसि ज्ञानं, चमत्कारि तया जगे ॥४८५॥

तत्तया भवतो वेधा, विदध्याद् घटनां यदि ।
गौरीं हरेण घटयंस्तदा न क्षूणभाग्[1] भवेत्' ॥४८६॥

गुरोर्गिरमिति श्रुत्वा, भृशमुत्कलिकाकुलः ।
अवदन्नृपतिस्तीव्रं, शल्यितः स्मरसायकैः ॥४८७॥

'मदर्थे सा कुमारी किं, नार्थिता भवता कृतिन् ! ।
कन्यार्थनान्न लघुता, महतामपि जातुचित्' ॥४८८॥

गुरु[रू]चे 'मोत्सुको भूर्यत् सत्यज्ञानयाऽनया ।
हायनान्ते[2] भवानेव, भावी भर्त्ताऽभ्यधीयत' ॥४८९॥

भूमिभर्त्ता बभाषेऽथ, 'कल्पकालोपमो मम ।
हायनो हा कथं यास्यत्येष तद्दर्शनं विना ॥४९०॥

ततः स्थगीधरीभूय, तत्र गत्वा त्वया समम् ।
द्रक्ष्यामि तां वरारोहामन्यथा जीवितं न मे' ॥४९१॥

न ह्रियं न भियं नैवाऽवर्णवादं न चौचितीम् ।
गणयन्ति विशिष्टेष्टजनचोरितचेतसः ॥४९२॥

ततः स्थगीधरीभूतभूमीश्व[र]युतो गुरुः ।
व्यावृत्य सबलस्तूर्णं, तां **विशालां** पुरीं ययौ ॥४९३॥

---

१. 'क्षतिभाग्' इत्यर्थः । अत्र 'क्षूण' शब्दो देश्यः ॥ २. वर्षान्ते ।

सदः प्राप्तो नरेशेन, पृष्टो हेतुं द्रुतागतेः ।
स किञ्चिद् भाषते यावद्भूपजा तावदाययौ ॥४९४॥

गुरोर्द्रुतागतेर्हेतुं, पृष्टा प्रश्नं विचार्य सा ।
अतनोत् सत्यकुमुदकौमुदीसुन्दरां गिरम् ॥४९५॥

'नाऽनंसीत् तात ! ते पादौ, पुरो योऽयं स्थगीधरः ।
तस्य कार्ये समायासीदाशु राजगुरुः कृती' ॥४९६॥

भूपोऽप्यथ **कुणाले**शं, तं विज्ञायोपगृह्य च ।
आसयित्वाऽऽसने भक्त्या, बद्धाञ्जलिरदोऽवदत् ॥४९७॥

'प्रभो ! मम सुता धन्या, यस्या विज्ञानसंश्रुतेः ।
अलञ्चक्रे सभामेतां, भवानपि कुतूहली ॥४९८॥

अद्याऽस्माकं महान् पुण्यपरिपाकः स्फुटोऽभवत् ।
स्वामी रूपपरावर्तेनापि यद् गेहमीयिवान् ॥४९९॥

कल्पद्रुमोऽद्य फलितो, जज्ञे मे मन्दिराजिरे ।
कामकुम्भोऽद्य वा लब्धो, भाग्योदयवशान्मया ॥५००॥

अद्याऽहं स्फुरदानन्दः, प्रलीननिखिलव्यथः ।
वसुधाधिप ! जातोऽस्मि, प्राप्य त्वद्दर्शनामृतम् ॥५०१॥

प्रभो ! राज्यमिदं माद्यद्गजाश्वरथपत्तिकम् ।
सराष्ट्रमृद्धिमत् कोशं, सम्पूर्णमुररीकुरु ॥५०२॥

स्वभुजिष्यमिमं भक्तं, निदेशकरणोद्यतम् ।
प्रसद्याऽनुगृहाणेश !, सद्यः कृत्यं निवेद्यताम्' ॥५०३॥

इत्युक्तिभाजं तमथ, स्मयमानोऽ**रिकेसरी** ।
जगाद 'कन्यकादानं, युक्तमभ्यागतस्य मे' ॥५०४॥

विशालेशोऽवदत् 'पूर्वमेवेयं ते ददे सुता ।
किन्त्वेषा वक्ति वर्षान्ते, प्रश्नाभ्यूहात् करग्रहम्' ॥५०५॥

अथाऽब्रूताऽ**मरो** 'देव !, लग्नं शुध्यति नैषमः ।
भानुक्षेत्रे सुराचार्यो, यदारोहति सम्प्रति' ॥५०६॥

पत्रीं कन्या लिखित्वाथ, तातहस्ते समार्पयत् ।
गृहीत्वा तां पुरोधाश्च, स्पष्टमेवमवाचयत् ॥५०७॥

फाल्गुनश्चैतैकादश्यां, सर्वदूषणवर्जितम् ।
सर्वग्रहबलोपेतं, सल्लग्नमिति निर्णयः ॥५०८॥

अथोत्थाय **विशालेशः**, स्वप्रभुं तं सगौरवम् ।
निनाय विनयी सौधे, वरिवस्याविशारदः ॥५०९॥

स्नपयित्वा भोजयित्वा, प्राभृतैरथ चारुभिः ।
विशालेशेन सन्मान्यमानोऽब्रूताऽ**रिकेसरी** ॥५१०॥

'धत्ते यदि परां भक्तिं, भवान् मयि महाशय ! ।
तत्तूर्णं प्रहिणोत्वेतां, मया सह निजात्मजाम्' ॥५११॥

ललिताङ्गस्तथेत्युक्त्वा, तनयाममुना सह ।
प्रजिघाय हितोदारपरिवारां शुभेऽहनि ॥५१२॥

ततः क्रमेण सम्प्राप्तः, स्वपुरी**मरिकेसरी** ।
तस्यै ददौ महासौधं, धन्यम्मन्यः प्रमोदभृत् ॥५१३॥

भूपतिर्भोजनस्यान्ते, सगुरुः प्रतिवासरम् ।
तत्राऽऽगत्य तया गोष्ठीं, चक्रे शक्रसमः श्रिया ॥५१४॥

अप्रीणयच्च सा शश्वच्छर्करारससोदरैः ।
प्रश्नोत्तरकथाकाव्यादिभिर्भूप-पुरोधसौ ॥५१५॥

कुतूहलकरीं काञ्चित्, कथां कथय कोविदे ! ।
ताभ्यां कदाचिदित्युक्ता, सा वक्तुमुपचक्रमे ॥५१६॥

'श्रूयतां कन्यका काचिदजानद्भिर्मिथो ददे ।
पृथक् पृथग् वरेभ्यो या, जनक-भ्रातृभिः पुरा ॥५१७॥

अथ त्रयोऽपि सोत्साहा, वरा युगपदाययुः ।
दैवाच्च दन्दशूकेन, दष्टाऽम्रियत कन्यका ॥५१८॥

तेष्वभूद् भस्मसाच्चैकश्चितायाममुया सह ।
तस्याः सिषेवे भस्मापि, विहितानशनः परः ॥५१९॥

तां जिजीवयिषुः पूजापूर्वं भक्त्युल्लसन्मनाः ।
तूर्णमाराधयामास, तृतीयो गोत्रदेवताम् ॥५२०॥

ततश्च प्राप्य पीयूषं, चितां सिक्त्वा च तद् द्वयम् ।
सोऽजीवयद्यतोऽचिन्त्यो, दैवतो महिमा महान् ॥५२१॥

अहम्पूर्विकयाऽथैषु, तां काङ्क्षत्सु कुमारिकाम् ।
स्याद्वरः कतमो योग्य ?, इत्यालोच्य निवेद्यताम्' ॥५२२॥

विमृशन्तावथाऽनुद्यन्मनोभूप-पुरोधसौ ।
आहतुस्त्वां विनाऽलं को, निर्णेतुमिदमुत्तरम्' ॥५२३॥

ततः सा न्यगदत् 'तस्या, जीवदाता पिता ध्रुवम् ।
सहोत्थः सोदरस्त्यक्ताशनो ज्ञेयस्तु वल्लभः' ॥५२४॥

सैवं विस्माप्य तौ बाढं, कथां भूयोऽप्यभाषत ।
'प्रापाते न्यायनिष्ठेन, राज्ञा केनापि तस्करौ ॥५२५॥

वधार्हागस्कृतौ तौ चाऽवध्याविति महीभुजा ।
नीरन्ध्रीकृत्य पेटायां, न्यस्याऽम्भोधौ प्रवाहितौ ॥५२६॥

कश्चिच्च तीरमासाद्य, तां पेटां लब्ध्वोदघाटयत् ।
तौ च पप्रच्छ कतिथो, दिवसो वामिहस्थयोः[१] ? ॥५२७॥

तयोरेकस्तदा तूर्णं, तं तुर्यदिनमभ्यधात्[२] ।
तदुच्यतां कथं तेन, ज्ञातमेतद्विशारदौ ! ? ॥५२८॥

ताभ्यां त्वमेव ब्रूहीति, गदिते कन्यकाऽगदत् ।
'चतुर्थज्वरयोगेन, स हि विज्ञातवानदः' ॥५२९॥

पुनः साऽथ कथां स्माह, 'भूपस्यैकस्य कन्यकाम् ।
खेटः[३] कश्चिदपाहार्षीत्ततो भूपोऽभ्यधादिदम् ॥५३०॥

'यः कश्चित् पुरुषोत्तंसः, कन्यां प्रत्याहरेदिमाम् ।
तस्मै दास्य इती[दं] मे, ग्रावरेखोपमं वचः' ॥५३१॥

तस्य राज्ञश्च राज्येऽस्ति, नररत्नचतुष्टयम् ।
नैमित्तिको रथकारः, साहस्रश्च भिषक् तथा ॥५३२॥

नैमित्तिको दिशं जज्ञे, रथकृद्विदधे रथम् ।
तेनाऽभ्रगामिना गत्वा, साहस्रः खेटमक्षणीत् ॥५३३॥

क्षण्यमानेन तेनाऽथ, च्छिन्नं कन्याशिरो भिषक् ।
समधत्त ततो भूपश्चतुर्भ्योऽपि ददाविमाम् ॥५३४॥

कुमारी साऽथ चतुरा, प्रोचे 'यः काष्ठभक्षणम् ।
विधास्यति मया साकं, मां स एव विवक्ष्यति' ॥५३५॥

मन्त्रिनिर्मितप्रच्छन्नसुरुङ्गाद्वारि सज्जिताम् ।
चितां सह तया यश्च, विवेशैतां व्युवाह सः ॥५३६॥

---

१. युवयोः । २. चतुर्थदिनम् । ३. विद्याधरः ।

कोऽसौ निवेद्यतां दक्षावित्युक्त्वा कन्यका स्थिता ।
ताभ्यां वेत्सि त्वमेवेति, प्रत्यूचे सा ततोऽवदत् ॥५३७॥

'निमित्तज्ञोऽसौ यद्वेद, स सत्यज्ञानशेवधिः ।
विज्ञाया विद्यते नैव, साम्प्रतं मृतिरित्यदः' ॥५३८॥

भूयोऽपि श्रूयतां 'काचिन्नारी भूषणपेटिकाम् ।
आमुद्र्याऽमुञ्चदालोके, सपत्नीस्तैन्यभीतितः ॥५३९॥

सखीगृहगतायां च, तस्यां दुष्टसपत्न्यपि ।
तामुद्घाट्य गृहीत्वा च, हारं पुनरमुद्रयत् ॥५४०॥

साऽप्यागता दृशा पेटां, दृष्ट्वा हारं च तं गतम् ।
ज्ञात्वा सपत्नीं पप्रच्छ, न चाऽमनुत सा यदा ॥५४१॥

तदा सत्यसुरस्पर्शशपथार्थमनीयत ।
हारं ददौ च **देवा हि, दुर्नयानां भयावहाः** ॥५४२॥

कथं पेटामनुद्घाट्य, भूषणान्यनिभाल्य च ।
सा बुबोध गतं हारमिति ब्रूतं लसद्धियौ ! ॥५४३॥

त्वां विनेदृक् क्व चातुर्यमिति ताभ्यां प्रजल्पिते ।
साऽभाषिष्ट 'स्वच्छकाचमयी पेटाऽत्र कारणम्' ॥५४४॥

पुनः कथामजल्पत् सा, 'क्वापि ग्रामे महर्द्धिके ।
कुलपुत्रक एकोऽभूत्, सारवैदग्ध्यशेवधिः ॥५४५॥

परिणीतश्च सोऽन्यस्मिन्, ग्रामे वर्याकृतिं कनीम् ।
कथञ्चनाऽपि श्वशुरगृहं नाऽऽयाति सा पुनः ॥५४६॥

गाढोत्कण्ठाचितस्वान्ते, तस्मिन् मित्रयुतेऽन्यदा ।
तामानेतुं द्रुतं प्राप्ते, साऽनेशत् क्वापि दूरतः ॥५४७॥

अहो ! महत्ते सौभाग्यं, यत् प्रियाऽपि न सम्मुखम् ।
पश्यतीति वयस्यैः स, हस्यमानो मुहुर्मुहुः ॥५४८॥

मन्दाक्षभरनम्रास्यो, विलक्षः खेदभाग् भृशम् ।
वलित्वा स्वगृहं प्राप्तः, स्वजनैरप्यहस्यत ॥५४९॥ युग्मम् ॥

पुनः कदाचिदानेतुमिमामुद्यमवानयम् ।
केनापि सुहृदाऽप्यूनपुण्यवन्नाऽन्वगम्यत ॥५५०॥

एकाक्यपि ततश्चासौ, निर्ययावुद्वहंस्त्रपाम् ।
नाधुना तामनादाय, सद्माऽऽयामीति चिन्तयन् ॥५५१॥

मार्गे देवकुलं किञ्चित्, प्राप्य मध्यं प्रविश्य च ।
नत्वा महाप्रभावाढ्यं, यक्षं भक्त्येत्यभाषत ॥५५२॥

'देव ! चेन्मम कान्ता सा, सानुरागा मया समम् ।
समेष्यति स्वमूर्ध्ना तद्, विधास्ये त्वत्पदार्चनम्' ॥५५३॥

एवमुक्त्वा प्रयान् प्राप, श्वशुरौकः क्रमादसौ ।
साऽपि यक्षप्रभावेण, प्रियसङ्गोत्सुकाऽजनि ॥५५४॥

श्वश्र्वाऽथ सत्कृतो नानाशनाद्यैरयमादरात् ।
औत्सुक्यकलितां कान्तां, गृहीत्वा वलितः प्रमुत् ॥५५५॥

तद्यक्षभवनं प्राप्तः, प्रोचे[ऽथ] प्रेयसीं यथा ।
'तिष्ठेह यावद[म]रं, वन्दे महिममन्दिरम्' ॥५५६॥

इत्युक्त्वोत्तीर्य शकटाद्यक्षगेहं गतोऽसिना ।
छित्त्वाऽब्जवच्छिरः स्वीयं, तत्पादार्चां चकार सः ॥५५७॥

तत्राऽनायाति तद्वीक्षाहेतोः शकटिकस्तया ।
प्रहितस्तं तथा वीक्ष्य, कम्प्राङ्गः पर्यचिन्तयत् ॥५५८॥

हहाऽस्य किमिदं कर्म, घोरं लोकेऽधुना च मे ।
स्त्रीलुब्धोऽसौ जघानैनमिति भाव्ययशो महत् ॥५५९॥

म्रियेऽहमपि तच्चित्ते, चिन्तयित्वेति दीर्घधीः ।
स्वशिरस्तीक्ष्णया शस्त्र्याऽच्छिनत् सोऽतुच्छसाहसः ॥५६०॥

तयोरथाऽनागमने, किमिति व्याकुला भृशम् ।
साऽपि तत्र द्रुतं प्राप्ता, तथावस्थौ ददर्श तौ ॥५६१॥

अध्यायच्च न चौरादिर्हन्ता कोऽप्यत्र दृश्यते ।
तच्छलितमिदं मन्ये, यक्षस्यैवाऽस्य किञ्चन ॥५६२॥

पुराऽपि खलु लोको मामाह भर्तृविरागिणीम् ।
भर्तृघ्नीमधुना वक्ता, तन्ममापि मृतिर्वरम् ॥५६३॥

इत्यादाय च्छुरीं यावच्छिन्तेऽसौ स्वशिरो रयात् ।
तावद्यक्षोऽवदद् 'बाले !, मा कार्षीः साहसं महत् ॥५६४॥

मया लभ्यं हि पत्युस्ते, शीर्षमेतदगृह्यत ।
स्वदोषाशङ्कितश्चायं, वराकोऽसून् वृथा जहौ ॥५६५॥

त्वं तु किं म्रियसे मुग्धे !, मुधे'त्युक्ताऽथ साऽवदत् ।
'जनापवादभीताऽहमसून् धर्त्तुं न हि क्षमे' ॥५६६॥

यक्षो विज्ञाय तां मृत्यावेकाग्रां तुष्टमानसः ।
अजल्पदनयोः शीर्षे, न्यस्य स्वस्वकबन्धयोः ॥५६७॥

तयाऽथ हर्षसञ्जातौत्सुक्यया शिरसी तयोः ।
न्यस्ते मिथोविपर्यासाज्जीवितौ तौ च सत्वरम् ॥५६८॥

ततस्तौ मम ममेति, प्रेयसीगोचरं भृशम् ।
विवादं विदधानौ द्राक्, स्वकीयं ग्राममापतुः' ॥५६९॥

तज्जल्पतं बुधोत्तंसौ !, कस्य सा खलु युज्यते ।
इति **चम्पकया** पृष्टावूचाते राट्-पुरोधसौ ॥५७०॥

'सरस्वतीव सत्प्रज्ञा, त्वमेवेदं सुदुर्गमम् ।
निर्णेतुमीशिषे नूनं,' ततः सोवाच वाग्मिनी ॥५७१॥

'सर्वस्य गात्रस्य शिरः, प्रधानं यद्बुधा विदुः ।
तत् कबन्धशिरो यस्य, तस्य सेति विनिर्णयः' ॥५७२॥

प्रत्यहं वर्त्तमानासु, गोष्ठीष्वेवं सविस्मयः ।
नृपोऽन्यदाऽवदत् 'स्तुत्याः, कला एव शरीरिणाम्' ॥५७३॥

यदूचे -

प्रायो न कस्यापि भवेत् समग्रः,
कलाकलापो दशमं निधानम् ।
कलङ्कयुक्तोऽपि सुवृत्तशाली,
क्षीणोऽपि पीनोऽजनि येन चन्द्रः ॥५७४॥ [उपजातिवृत्तम्]

प्रोचे **चम्पकमाला**ऽथ, 'श्लाघ्या धर्मकलैव हि ।
तां विना देहिनां ज्ञेया, विकलाः सकलाः कलाः ॥५७५॥

उक्तं च -

युध्यन्ते पक्षिपशवः, पठन्ति शुकशारिकाः ।
धर्मं शक्नोति यः कर्त्तुं, स शूरः स च पण्डितः ॥५७६॥

समाचरन्ति ये धर्मं, सर्वथा सुपरीक्षितम् ।
ते नमस्याः सुरेन्द्राणामपि स्युः पुरुषोत्तमाः' ॥५७७॥

ऊचे राजा ततः सत्यं, धर्मः श्रेयोनिबन्धनम् ।
न तु शुद्धतया शक्यो, निर्णेतुं मतभेदतः ॥५७८॥

पुरोधा अवदद् 'धर्मे, का विधेया विचारणा ।
श्रुत्युक्तैः स हि यज्ञादिकर्मभिः साध्यते बुधैः' ॥५७९॥

यदाहुः -

"यज्ञार्थं पशवः सृष्टाः, स्वयमेव स्वयम्भुवा ।
यज्ञोऽस्य भूत्यै सर्वस्य, तस्माद्यज्ञे वधोऽवधः ॥५८०॥

औषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा ।
यज्ञार्थं निधनं प्राप्ताः, प्राप्नुवन्त्युच्छ्रितिं पुनः" ॥५८१॥

[योगशास्त्र २।३३-३४]

अथो कुमार्यभाषिष्ट, 'मा मा वादीरयुक्तिमत् ।
पशुहिंसात्मकैर्यज्ञैः, केवला दुर्गतिर्ध्रुवम् ॥५८२॥

जले चेत्तरति ग्रावा, वह्निश्चेच्छीततां भजेत् ।
प्रतीच्यां चेदुदेत्यर्कः, स्वर्गिरिश्चेत् प्रकम्पते ॥५८३॥

चन्द्रादङ्गारवृष्टिश्चेच्चेदभव्येऽपि धर्मधीः ।
तदप्यङ्गिवधान्नैव, जायते धर्मसम्भवः ॥५८४॥

त्रिविक्रमः क्रतून् कुर्वन्, सम्यग्ज्ञानविवर्जितः ।
अवाप यत् फलं प्राज्ञ !, तदेकाग्रमनाः शृणु' ॥५८५॥

क्षितिप्रतिष्ठितपुरे, **जितशत्रु** महीपतेः ।
आसीत् **त्रिविक्रमो** भट्टः, पुरोधा वेदपारगः ॥५८६॥

दध्यौ चेतसि सोऽन्येद्युः, स्त्रीभावादिव धिग् रमा ।
चापलं नोज्झति प्राप्ते, प्रियेऽपि पुरुषोत्तमे ॥५८७॥

न हि स्थिरा क्वचिल्लक्ष्मीः, स्यादुपायशतैरपि ।
तदुपाददते केचित्, फलमस्याः सचेतनाः ॥५८८॥

असारयाऽनया तस्मात्, सारं सुकृतसञ्चयम् ।
गृह्णामि दृषदा चिन्तारत्नवद् गुरुयत्नतः ॥५८९॥

ध्यात्वेति द्रव्यव्ययतः, स कासारमचीखनत् ।
तरूनश्वत्थमुख्यांश्च, तस्य पाल्यामरोपयत् ॥५९०॥

तत्र प्रारब्धयज्ञोऽसौ, प्रमोदात् प्रतिहायनम् ।
छागान्निहत्य न्यखनद्यज्ञस्तूपान् समुन्नतान् ॥५९१॥

कालक्रमेण तद्ध्यानलीनचेता**स्त्रिविक्रमः** ।
मृत्वा तत्रैव नगरे, छागत्वं समुपेयिवान् ॥५९२॥

पितृक्रममुञ्चन्तस्तनया अन्यदा मुदा ।
छागं तमेव यज्ञार्थमानिन्युर्निजसद्मनि ॥५९३॥

छागः प्राग्भवसम्बन्धि, तत् कुटुम्बं विलोकयन् ।
जातजातिस्मृतिः सर्वं, निजवृत्तमबुध्यत ॥५९४॥

मखार्थं नीयमानोऽसावारटन् करुणं पथि ।
मासोपवासिना ज्ञाननिधिनाऽवाचि साधुना ॥५९५॥

'स्वयं[१] स[रः] खानयित्वा, स्वयमारोप्य च द्रुमान् ।
स्वयं यज्ञान् विधायाऽपि, किमु बिब्बीति जल्पसि ?' ॥५९६॥

छागे तच्छृतिमात्रेण, तूष्णींशीलेऽथ ते द्विजाः ।
सचित्रा जगदुः 'साधो !, बभणे किमिदं त्वया ?' ॥५९७॥

---

१. तुला-सयमेव य रुक्ख रोविए, अप्पणियाए वितड्डि कारिया ।
उवाइयलद्धया य से, किं छगला ! 'बे बि'त्ति वाससे ? ॥
[वसुदेवहिण्डिग्रन्थे पे. ३०]
सयमेव य लुक्ख लोविया, अप्पणिआ य वियड्डि खाणिया ।
ओवाइयलद्धओ य सि, किं छेला ! बेबेति वाससी ? ॥
[उत्तराध्ययननिर्युक्ति २।१३८]

जीवघातान्निजपितुश्छागतां तेऽपि साधुतः ।
श्रुत्वाऽभ्यधु'रभिज्ञानं, विना कः प्रत्ययोऽत्र नः' ॥५९८॥

अभ्यधत्ताऽथ निर्ग्रन्थो, 'जनको वो विवेद यत् ।
तत् पृच्छत निधिस्थानं, छागं प्रत्ययहेतवे' ॥५९९॥

तैः पृष्टः सोऽथ तत्पादाग्राभ्यां पशुरदीदृशत् ।
प्रतीयुस्तेऽपि धर्मं च, पप्रच्छुः प्रणता मुनिम् ॥६००॥

आदिदेश मुनि'र्भो भो मुग्धा ! भ्रान्ता मुधा चिरम् ।
धर्मस्य साधनं जीवत्राणमेव विबोधत ॥६०१॥

यथा चक्षुर्विना वक्त्रं, न भात्यम्बु विना सरः ।
गन्धं विनाऽथवा पुष्पं, तथा धर्मो दयां विना ॥६०२॥

धर्मं प्राणभृतां घाताद्यो वैधेयो विधित्सति ।
स प्राणिणिषति प्राश्य, कालकूटं किलाऽन्धधीः ॥६०३॥

बाह्यं हिंसामयं यज्ञं, तत् परित्यज्य धीधनाः ! ।
भावयज्ञं प्रपद्यध्वं, दुष्कर्मध्वंसनेच्छया ॥६०४॥

मनःकुण्डस्थध्यानाग्नौ, [प्र]दीप्ते साम्यवायुना ।
इन्द्रियाणि पशून् हत्वा, भावयज्ञो विधीयताम् ॥६०५॥

उक्तं च -

यूपं कृत्वा पशून् हत्वा, कृत्वा रुधिरकर्दमम् ।
यद्येवं गम्यते स्वर्गे, नरके केन गम्यते ?' ॥६०६॥

एवं मुनिगिरा बुद्धास्ते श्राद्धत्वं प्रपेदिरे ।
छागोऽप्यनशनं सद्यः, प्रपद्याऽभूत् सुरोत्तमः ॥६०७॥

एवमङ्गिवधो धर्मबुद्ध्याऽपि खलु निर्मितः ।
निबन्धनं दुर्गतेः स्यादिति चेतसि निश्चिनु ॥६०८॥

सौवस्तिकस्[1]ततः स्माह, 'त्वद्वचोभानुभानुभिः ।
अज्ञानतिमिरव्रातस्त्रस्तो मेऽद्य समन्ततः ॥६०९॥

प्रवरः सर्वधर्मेषु, मया धर्मः कृपात्मकः ।
बुबुधे सर्वमणिषु, चिन्तामणिरिवाऽद्भुतः ॥६१०॥

कुलक्रमागतस्त्वेष, धर्मः सन्त्यज्यते कथम् ? ।
दुःशीलाऽपि निजा माता, त्यज्यते किं हि केनचित् ?' ॥६११॥

बालाऽप्यबालबुद्धिः सा, ततः प्रोवाच सस्मितम् ।
'दारिद्र्य-मान्द्य-जाड्याद्याः, सेव्याः स्युः किं क्रमागताः ? ॥६१२॥

मम तातस्य कूपोऽयमिति कुग्रहतः किल ।
पिबत्यम्बु न हि क्षारं, कोऽपि तस्यैव शुद्धधीः ॥६१३॥

दुःशीलाया जनन्याश्च, नार्च्यता तादृगीक्ष्यते ।
[भो भद्र !] भद्रबुद्ध्या स्वकुधर्मं मुञ्च मुञ्च तत् ॥६१४॥

एवं दत्तप्रबोधोऽपि, चेतिष्यसि न चेद् द्विज ! ।
कुशवित्त इवात्यन्तं, तत् पश्चात्तापमाप्स्यसि' ॥६१५॥

तथाहि –

'चत्वारः सुहृदः केचित्, **कोशलाया**[2] धनायया ।
चेलुर्देशान्तरं प्रापुः, क्रमाल्लोहाकरं च ते ॥६१६॥

कुशांश्च जगृहुर्वर्षास्वमी लाभप्रदा इति ।
तदा च तत्र सम्प्राप्तवणिग्भ्य इति शुश्रुवुः ॥६१७॥

---

१. पुरोहितः । २. धनेच्छया ।

मूढा लोहाकरे लीना, मुधाऽऽयासं वितन्वते ।
श्रीनिमित्तं न गच्छन्ति, पुरःस्थं रजताकरम् ॥६१८॥

तन्निशम्य त्रयस्तेषु, ग्रहमोक्षविशारदाः ।
व्यक्रीणत कुशानेको, न तु मूढः कदाग्रहात् ॥६१९॥

गता रूप्याकरं रूप्यमगृह्णन्नथ तेऽग्रतः ।
श्रुत्वा स्वर्णाकरं त्यक्तरूप्याः प्रचलिताः पुरः ॥६२०॥

प्राप्य स्वर्णाकरं स्वर्णं, स्वीचक्रुर्निकटं पुनः ।
ज्ञात्वा रत्नाकरं त्यक्तस्वर्णास्तत्राऽगमन् द्रुतम् ॥६२१॥

रत्नानि खनितुं चाथ, प्रारभन्ताऽलभन्त च ।
सपादलक्षमूल्यानि, प्रदीप्तान्यर्कबिम्बवत् ॥६२२॥

तेषां च खननावाप्तरत्नानां राजमानवाः ।
नवांशान् परिगृह्णन्ति, दशांशः खनकस्य तु ॥६२३॥

स तु मूर्खः कुशैरेव, तुष्टो नाऽयतताऽधिकम् ।
सुहृद्भिः सारवस्तूपादानार्थं भणितोऽभ्यधात् ॥६२४॥

'भो ! नाऽहं चलचित्तोऽस्मि, युष्मद्वल्लोभबाधितः ।
नाऽऽयाससन्ततिं कुर्वे, कुशैरेवास्मि निर्वृतः' ॥६२५॥

तेऽथ त्रयोऽपि सम्प्राप्य, प्रत्येकं रत्नपञ्चकम् ।
आययुः स्वीयनगरं, वस्त्वसारं विमुच्य तत् ॥६२६॥

कुशवित्तोऽपि सम्प्राप, परं ते तु त्रयः सुखम् ।
रत्नद्रव्येण सम्प्रापुः, प्रीणिताऽर्थिजनव्रजाः ॥६२७॥

स दुर्बुद्धिस्तु तां तेषां, प्राज्यामृद्धिं विलोकयन् ।
पश्चात्तापपरो जज्ञे, दुःखभाजनमन्वहम् ॥६२८॥

त्वमप्येवं द्विजन्मेन्द्र !, धर्मं दोषलवोज्झितम् ।
अस्वीकुर्वन्न सौख्यानि, लप्स्यसे **कुशवित्तवत्**' ॥६२९॥

एवं प्रबोधितौ राजगुरुर्भूपोऽपि चैतया ।
[वि]शुद्धं प्रतिपेदाते, धर्मं सर्वज्ञदेशितम् ॥६३०॥

इत्थं सततगोष्ठीभिर्मधुरे वत्सरे गते ।
पुण्याहे पृथिवीपालः, सोत्साहमुदुवाह ताम् ॥६३१॥

तया सह परं सौख्यं, भुञ्जानो भूमिवासवः ।
क्षणकल्पान्यनल्पानि, हायनान्यनयन्नयी ॥६३२॥

दधती सुदती चैषा, शीलमान्तरभूषणम् ।
बाह्यभूषणसम्भारं, वपुष्याचारतो दधौ ॥६३३॥

पुरोहितोऽन्यदा प्रातःप्रायायां रजनौ स्वकम् ।[1]
सैरिभारूढमाच्छा[दो]ज्झितं कृ[ष्ण]विलेपनम् ॥६३४॥

तरन्तं तटिनीतोये, हन्यमानं कशादिभिः ।
आकार्यमाणं कृष्णाङ्ग्या, स्वप्ने वीक्ष्य विबुद्धवान् ॥६३५॥ युग्मम् ॥

स्मृतपञ्चनमस्कारः, साध्वसोद्भूतवेपथुः ।
अचिन्तयच्च न स्वप्नममुं वेद्मि शुभायति[म्] ॥६३६॥

देवीं **चम्पकमालां** तत्, पृष्ट्वा तत्त्वार्थसाधनम् ।
सावधानमनाः कुर्वे, खर्वेतरसुखश्रिये ॥६३७॥

इति सञ्चिन्त्य चित्तेन, तरसोत्थाय तल्पतः ।
शुचीभूय च तत्त्वज्ञः, स सर्वज्ञमपूपुजत् ॥६३८॥

---

१. '**अन्येद्युरमरः स्वप्ने, आत्मानं विगताम्बरम् ।**
लुलायपृष्ठमारूढं, प्रौढकृष्णविलेपनम्' ॥ **मुनि.च. ६।१६८॥**

ततः परिषदं प्राप्तः, स्वप्नं भूपमजिज्ञपत् ।
भूपोऽवग् 'देव्यपृष्टाऽपि, स्वप्नार्थं खलु वक्ष्यति' ॥६३९॥

उभावपि ततो देव्याः, सविधं ययतुर्जवात् ।
स्वप्नं फलं च साऽज्ञासीत्, स्वयं चूडामणेर्बलात् ॥६४०॥

स्माह 'चाऽतः परं मासा, दश ते जीवितं ततः ।
यतस्व परलोकार्थं, धर्ममाराधयोत्तमम्' ॥६४१॥

पुरोधाः प्रत्यभाषिष्ट, बहुमानान्वितं वचः ।
'देवि ! त्वं धर्मदानेन, गुरुर्मम पुराऽप्यभूः ॥६४२॥

इदानीमपि मे ब्रूहि, परलोकस्य साधनम् ।
परोपकारकरणे, न श्राम्यन्ति यदुत्तमाः' ॥६४३॥

तत**श्चम्पकमाला**ऽपि, प्रोद्भवधर्मसौरभाम् ।
मोदितार्यजनालिं वाक्स्रजं समुदलासयत् ॥६४४॥

'इतः स्थानाद्योजनानां, शते सार्द्धेऽस्ति ऋद्धिमत् ।
पुराणाख्यं पुरं नूत्नं, गीर्वाणनगरप्रभम् ॥६४५॥

तत्र **सिद्धान्त**नामाऽस्ति, केवली भुवनार्चितः ।
तस्मादात्तव्रतः सिद्धिपदं कोविद ! लप्स्यसे' ॥६४६॥

स निशम्येति शान्तात्मा, सम्मदोद्भासिमानसः ।
ज्यायांसं तनयं न्यास्थत्, स्वपदे भूपसम्मतः ॥६४७॥

तां देवीं गुरुवन्नत्वा, सत्त्वानानन्द्य दानतः ।
पुराणपुरमाप्तश्च, गुरोस्तस्मादभूद् व्रती ॥६४८॥

देहेऽपि निर्ममः सारसंवेगाभोगभासुरः ।
तपसा सर्वकर्माणि, हत्वा चाप परं पदम् ॥६४९॥

अथाऽरिकेसरी भूपो, देव्या **चम्पकमालया** ।
रञ्जितोऽत्यर्थमपरा, देवीर्न समभावयत् ॥६५०॥

दूनाऽथ **दुर्लभा**देवी, मुख्यपत्नी महीपतेः ।
हृन्मग्नगाढशल्येव, विकल्पानित्यकल्पयत् ॥६५१॥

वरं दष्टाऽतिदुष्टेन, विषोदग्रेण भोगिना ।
सम्पन्ना भस्मसाज्ज्वालाकराले पावके वरम् ॥६५२॥

वरं च वार्द्धौ पतिता, शल्यविद्धा वरं हृदि ।
सपत्न्या विलसन् भर्त्ता, न पुनर्वीक्षितो वरम् ॥६५३॥

तासामेव जनुः श्लाघ्यं, शस्यं तासां च जीवितम् ।
यासां पतिः सदा वश्यो, भवेत् किङ्करवत् किल ॥६५४॥

तदुपायं कमप्येषा, रचयाम्यचिरादपि ।
यथा भर्त्ता विरज्याऽस्यां, स्यान्ममाऽश्रान्तमाश्रवः ॥६५५॥

ध्यात्वेति **सुलसां** नाम, योगिनीं पापयोगिनीम् ।
अनेकमन्त्रतन्त्रादिवेदिनीं सच्चकार सा ॥६५६॥

भोजनैर्वसनैर्गन्धैर्माल्यैः साऽपि स्म तुष्यति ।
दानात् परं न यद्विश्वे, वशीकरणमुत्तमम् ॥६५७॥

ऊचे च सादरं 'वत्से !, वद किञ्चित् समीहितम् ।
यथा तदुष्करमपि, कृत्वा स्यामनृणा तव' ॥६५८॥

जगाद **दुर्लभा** 'मातरशरण्याऽस्मि साम्प्रतम् ।
तेन त्वां शरणं प्राप्ता, दुःखाब्धेरुद्धराऽऽशु माम् ॥६५९॥

मायाविन्याऽनयाऽरञ्जि, राजा **चम्पकमालया** ।
कृतापराधामिव मां, वीक्षते न दृशाऽपि हि ॥६६०॥

तदम्ब ! मत्कृते कञ्चिदुपायं तं कुरु द्रुतम् ।
कलङ्किनी यथाऽसौ स्याद्राजा च मयि रज्यते' ॥६६१॥

सुलसा स्माह 'कर्मैत[द्], दुष्करं यदियं सदा ।
क्षुद्रैरधृष्यं निर्व्याजं, विधत्ते धर्ममार्हतम् ॥६६२॥

तथाऽपि वत्से ! त्वद्भक्तिप्राग्भारेण प्रमोदिता ।
यथा तथा यतिष्येऽहं, तस्याः कालुष्यनिर्मितौ' ॥६६३॥

इत्युक्त्वा सोत्थिता दध्यौ, कुतो नु व्यपदेशतः ? ।
तस्या गच्छामि सविधं, विवि[क्ते] छलवाञ्छया ॥६६४॥

हुं ! विद्यते सुतो नाऽस्यास्तदुपायोक्तिदम्भतः ।
गता लप्स्ये छलमथ, करिष्ये **दुर्लभे**प्सितम् ॥६६५॥

विमृश्येति द्वितीयेऽह्नि, प्राप्तां तां सद्म सादरम् ।
द्वास्थ**श्चम्पकमालाया,** ज्ञापयामास सत्वरम् ॥६६६॥

दध्यौ देवी किमनया, कुलिङ्गिन्या यदीदृशाम् ।
सङ्गेनापि कलङ्क्येत, धर्मो नील्याः पटो यथा ॥६६७॥

चित्तेऽनिष्टाऽप्यनिषिद्धा, साऽऽगत्याऽऽशीःपुरःसरम् ।
निषद्य गोष्ठीमारेभे, सदम्भेन हृदा मुदा ॥६६८॥

प्रस्तावे चैवमाचख्यौ, 'देवि ! नास्त्यङ्गजस्तव ।
तं विना खलु गार्हस्थ्यविधिर्वन्ध्योऽवकेशिवत् ॥६६९॥

किञ्चाऽनिरीक्षितसुतमुखानां गतिरप्यहो ! ।
निषिध्यते धर्मशास्त्रकोविदैर्विदुषीतरे ! ॥६७०॥

उपादत्स्व ततः पुत्रावाप्तये मूलिकामिमाम् ।
भक्तिनम्रा सृजाऽर्चां च, कालीदेव्याः सविस्तरम्' ॥६७१॥

तदाकर्ण्याऽवदद्देवी, 'विश्वं मुष्णासि दम्भतः ।
मयि तु ज्ञाततत्त्वायां, नावकाशोऽस्ति योगिनि ! ॥६७२॥

भवेद्यदि गतिः पुत्रैस्तद् ब्रूहि विदुषिब्रुवे ! ।
किमर्थं दुष्करं धर्मकर्म कुर्वन्ति कोविदाः ? ॥६७३॥

कुक्कुरी-सूकरी-नागी-झषी-गोधादयोऽपि च ।
दुर्गतिं नैव यास्यन्ति, कृताऽकृत्योच्चया अपि ॥६७४॥

तनया भवितारश्चेत्तद्भवन्त्येव कर्मतः ।
अन्यथा न भवन्त्येव, विदस्तत्त्वमिदं विदुः ॥६७५॥

चेन्मूलिकादिभिः पुत्रा, भवन्तीति विनिर्णयः ।
वन्ध्याः काश्चन तत् क्वापि, न भवेयुर्महीतले ॥६७६॥

निग्रहानुग्रहपरा, रागद्वेषविसंस्थुलाः ।
देवताश्चाभ्यर्चयितुं, मां वक्षि परमार्हतीम् ॥६७७॥

को मतङ्गजमारुह्य, खरमारोहति प्रधीः ? ।
आराध्य देवदेवं को, देवानिमान्निषेवते ?' ॥६७८॥

सुलसेति तदा देव्या, कृतप्रत्युत्तरा रयात् ।
उत्तस्थौ कोपकम्प्राङ्गी, दन्तदष्टरदच्छदा ॥६७९॥

अथ रात्रौ नृपे प्रेम्णा, सम्प्राप्ते वासवेश्मनि ।
विचक्रे विद्यया तत्र, पुंरूपं **सुलसा** स्फुटम् ॥६८०॥

तद्वीक्ष्य रोषतो यावत्, खड्गोद्धुरकरो नृपः ।
शय्योत्थायमधाविष्ट, तावन्नैक्षिष्ट तं नरम् ॥६८१॥[1]

१. 'पञ्चम्या त्वरायाम्' [सि.हे.श. ५।४।७७] इति सूत्रेणाऽयं प्रयोगः ।

अध्यासीच्च ध्रुवं विद्याभृता केनचनाऽसकौ ।
रमते निर्भरं वाचि, मृषा दुष्टा च मानसे ॥६८२॥

हन्म्येनां किन्त्वियं शुद्धधर्मदाना[द्] गुरुर्मम ।
अतः परमियं पापा, स्प्रष्टव्या न ततो मया ॥६८३॥

धर्मविज्ञाऽपि यदसावित्थं विषयलालसा ।
अकृत्येषु मतिं धत्ते, तदहो ! मोहजृम्भितम् ॥६८४॥

सञ्चिन्त्येत्यचलानाथस्तत्र पुंरूपमन्वहम् ।
ईक्षमाणो विलक्षोऽस्या, अङ्गसंस्पर्शमत्यजत् ॥६८५॥

साऽपीङ्गितादिभिर्भूपं, भ्रश्यद्रागं विजानती ।
सुलसाचेष्टितं सर्वं, चूडामणिबलादवैत् ॥६८६॥

विवाहात् प्राग् यदज्ञायि, कर्म भोगान्तरायिकम् ।
उपतस्थेऽधुनैतत्तद्वेद्यं केन निवार्यते ? ॥६८७॥

सर्वोऽपि कर्मणां पूर्वकृतानां फलमश्नुते ।
निमित्तमात्रं जायेत, परस्तु सुख-दुःखयोः ॥६८८॥

इति ध्यानभरोदारविवेकविमलाशया ।
विषयान् विषसङ्काशान्, मन्वाना सत्तपःपरा ॥६८९॥

सर्वज्ञवाग्सुधापूरशमिताऽसातपावका ।
विशेषात् पौषधं पर्वदिवसेषु वितन्वती ॥६९०॥

सामायिकव्रतं सारं, सततं बिभ्रती सती ।
त्रिकालं पूजयन्ती च, श्रीजिनेन्द्रपदाम्बुजे ॥६९१॥

उपसर्गप्रसङ्गेऽपि, स्वर्गिरिस्थिरचित्तताम् ।
पुरातनमुमुक्षूणां, स्मृत्वा पुलकिता सखा(दा) ॥६९२॥

सुलसाविहितं तथाऽपकारमतिदारुणम् ।
उपकारं परं मन्यमाना निन्ये दिनानियम् ॥६९३॥ सप्तभिः कुलकम् ॥

अपृच्छदन्यदा धर्मपरां देवीं महल्लिका[१] ।
तादृक्प्रेमसुधासिन्धुर्नीरागस्त्वयि किं नृपः ? ॥६९४॥

देव्युवाचाऽखिलं कर्म, निमित्तं भुवनत्रये ।
शुभाशुभपरः कोऽत्र, हेतुस्तज्ज्ञैर्विचार्यते ॥६९५॥

विदतां चाखिलान् भावान्, भुवने क्षणनाशिनः ।
इष्टाप्तिनाशयोः कीदृग्, मुद्-विषादोदयः किल ॥६९६॥

विस्रसातः समीरौघोद्धूततूलचयोपमम् ।
जनन्याः[२] ! प्रेम मे खेदो, न मनागपि वर्त्तते ॥६९७॥

महल्लिकाऽप्यथो देवीमजल्पत् कल्पितस्मिता ।
'कोऽप्यागच्छति विद्याभृत्, पुमांस्ते वासवेश्मनि' ॥६९८॥

देवी श्रुत्वेति श्रवसोस्त[प्त]त्रपुनिभं वचः ।
विधुराऽवददाः ! किं मे, समभूद्वचनीयता ॥६९९॥

वरं रागो वरं बन्धो, वरं रिपुपराभवः ।
कालधर्मो वरं नेदृग्, विगानं तु वरं भुवि ॥७००॥

किमहं जन्म सम्प्राप्ता, तथा चेज्जीविता किमु ।
जीविता चेत्तदीदृक्षं, कौलीनं हा किमासदम् ॥७०१॥

प्रागपि प्रश्नतश्चैतज्ज्ञातं यद्धनलोभतः ।
सुलसा विद्ययोन्मत्ता, मां निर्दोषामदूषयत् ॥७०२॥

१. अन्तःपुररक्षिका । २. 'जननि ! आः' इति सन्धिविश्लेषः ।

न दूयेऽप्यणुमात्रं यज्जाने निर्मन्तुरस्म्यहम् ।
दूये तु यज्जिनमतं, निष्कलङ्कं कलङ्क्यते ॥७०३॥

लोको ह्यबद्धवदनो, वक्ता यत् परमार्हती ।
एषैवं चेष्टते हन्त, तद्धर्मोऽपीदृशोऽसकौ ॥७०४॥

त[दि]दानीं मया कार्यं, तत् किञ्चिद्येन सत्वरम् ।
अपगच्छति मालिन्यं, तमिस्रमिव भानुना' ॥७०५॥

नेपथ्यान्तरितो धात्रीधवः पल्यङ्कमाश्रितः ।
श्रुत्वा तदखिलं चित्ते, दध्याविति विशुद्धधीः ॥७०६॥

स्वलोचनाभ्यामद्राक्षमहं विद्याभृतं नरम् ।
अस्या वचःक्रमश्चायं, किमिदं घटते नु तत् ? ॥७०७॥

इयं विधिव[शा]च्छीलविकला यदि सम्भवेत् ।
दिव्यादपि न शुध्येत्तद्दिव्यस्य **विषमा गतिः** ॥७०८॥

विशुद्धैवेयमथवा, जाने नारीमतल्लिका ।
कुतः कालुष्यकलना, निर्मले मानसाम्भसि ॥७०९॥

ततो दिव्यादियं शुद्धिं, सम्प्राप्य विधिनाऽधुना ।
स्वशीलसौरभं विश्वे, प्रख्यापयतु सर्वतः ॥७१०॥

इत्थं ध्यायति भूनाथे, प्रातःसमयबोधकः ।
तारस्वरं पपाठेति, पटुर्मङ्गलपाठकः ॥७११॥

'याऽभून्मालिन्यभीर्दैवात्, प्राची सा विगलत्तमाः ।
अह्नाय शुध्यतीदानीमिने सम्भावनोन्मुखे' ॥७१२॥

श्रुतमागधवाक्योऽथ, स्वगतं दध्यिवान्नृपः ।
उपश्रुतिरियं देव्याः, शुद्धिमाख्याति निश्चितम् ॥७१३॥

अथ निर्मितनिःशेषप्रातःकृत्यो विशां विभुः ।
प्राप्तो धर्माधिकरणमेवं वाचमुपाददे ॥७१४॥

भो ! भो ! जनप्रवादेन, या दुःशीलेति पप्रथे ।
तस्याश्चम्पकमालाया, दिव्यमद्य प्रदीयताम् ॥७१५॥

शुद्धायामेव तस्यां मे, भोक्तव्यमिति भूधनः ।
जल्पन् पौरैः 'प्रभो ! मा मा, वादीर्दुष्करमेतकत्' ॥७१६॥

इत्युक्तः सत्यसन्धोऽहमित्युत्तरपरो रयात् ।
देवीमाह्वातुं शुद्धान्ते, प्रजिघाय महल्लिकाम् ॥७१७॥ युग्मम् ॥

देव्यपि प्रश्नविज्ञाताकूता पारितपौषधा ।
स्नाता परिहितोद्दामोद्गमनीयाऽऽर्चयज्जिनम् ॥७१८॥

कायोत्सर्गविधानाच्चाऽऽराध्य शासनदेवताम् ।
अवदद्देवि ! विघ्नौघं, हंसि त्वं विमलात्मनाम् ॥७१९॥

शुद्धाया ह्यद्वचःकायैर्ममाऽसद्दोषमेतकम् ।
हत्वा प्रवचने कुर्या, वर्यां क्षिप्रं प्रभावनाम्' ॥७२०॥

ततस्तस्यां नृपसदः, प्राप्तायां **दुर्लभा**दिकाः ।
तस्थुः सपत्न्यो नेपथ्यान्तरिता व्याकुला हृदि ॥७२१॥

अथ तैलं कटाहान्तर्गतं तापितमग्निना ।
छणत्कारैर्विपक्षाणां, हृदि दाहमजीजनत् ॥७२२॥

धर्माध्यक्षैस्ततस्तत्र, प्रक्षिप्ते तप्तमाषके ।
प्रफुल्लास्याऽवदद्देवी, प्राञ्जला योजिताञ्जलिः ॥७२३॥

'मनो-वचन-कायैश्चेत्, स्वप्नेऽपि पुरुषः परः ।
चिन्तितो भाषितः स्पृष्टस्तदग्ने ! मत्करं दहेः ॥७२४॥

पुष्पदन्तौ लोकपालावीक्षध्वं मनसाऽपि चेत् ।
ममाऽस्ति शीलमालिन्यमग्निर्दहतु तत्करम्' ॥७२५॥

याव**च्चम्पकमालै**वं, बभाषे प्रस्फुटाक्षरम् ।
ताव[द]ग्निः समुत्तस्थौ, नगरे प्रलयाग्निवत् ॥७२६॥

स्फुटद्वंशत्रटत्कारैः, पतत्सौधध्वसत्कृतैः ।
नष्टप्राणा इव जना, बभूवुर्गतचेतनाः ॥७२७॥

प्राज्यैर्मनोरथैः साकं, जनानां भाग्यभङ्गतः ।
धगद्धगिति सद्योऽपि, स्नेहकुम्भाः प्रजज्वलुः ॥७२८॥

तारस्वरेण चक्रन्दुर्भीष्मे तत्र क्षणे जनाः ।
निर्दग्धद्रविणागारमानुषाः प्रस्फुरच्छुचः ॥७२९॥

गवां वियुक्तवत्सानां, हम्भारावैः सुदुःश्रवैः ।
हृदयानि दयालूनां, दलयामासिरे रयात् ॥७३०॥

मातरोऽपि निजप्राणत्राणार्थं स्वशिशूनपि ।
दुःखेन स्वोदरे व्यूढान्, ज्वलितेऽग्नौ हहाऽत्यजन् ॥७३१॥

प्रोन्मुक्तजीवितव्याशा, धार्मिकाः सुगतीप्सवः ।
शिश्रियुः शरणं स्वेष्टदेवतां दुरितापहाम् ॥७३२॥

दुर्निवारे काम इव, प्रकामं तापदायिनि ।
ज्वलत्यग्नौ जहुः के के, धीरा अपि न धीरताम् ? ॥७३३॥

असाध्योऽयमुपायानां, विविधानां महाऽऽमवत् ।
सप्तार्चिः सर्वजन्तूनां, धिक् प्राणानन्तयिष्यति ॥७३४॥

हा किमेतदकाण्डेऽपि, समभूदिति भूधवः ।
जनाश्च यावद् ध्यायन्ति, तावद्वाणी दिवीत्यभूत् ॥७३५॥

'सुरापगापयःपूतशीललीलावतीममूम् ।
देवीं कलङ्कयतां वः, स्तोकमेवैतदप्यहो' ॥७३६॥

श्रुत्वेति निखिलाः पौरा, दैन्यविस्मयशालिनः ।
रक्ष रक्षेति जल्पन्तः, पेतुर्देव्याः पदाब्जयोः ॥७३७॥

भूपालोऽप्यूचिवान् 'देवि !, प्राप्तमेतैर्दुराशयैः ।
त्वय्यसद्दोषदानद्रोः, फलमुग्रं पचेलिमम् ॥७३८॥

त्वं तु सत्त्ववती सर्वसत्त्वेषु हितकारिणी ।
महाशया क्षमस्वाऽऽगः, पाहि पाहि रयात् पुरम्' ॥७३९॥

देवी ततोऽभ्यधादर्हन्, देवः सङ्गोज्झितो गुरुः ।
अर्हत्प्रणीतो धर्मश्चैकाग्रं यद्येषु मे मनः ॥७४०॥

चित्तेऽधारि च चेत् कान्तो**ऽरिकेसर्ये**व नाऽपरः ।
तद्वह्निः शाम्यतु नवं, हर्म्याद्यं चास्तु सत्वरम्' ॥७४१॥

तद्वचःसमकालं च, जैनामर्या तथाकृते ।
जितामरपुरीदर्पा, ननर्तेव ध्वजैः पुरी ॥७४२॥

कौतुकेन तथा भक्त्या, प्राप्तैर्व्योम्नि स्थितैः सुरैः ।
प्रहतस्याऽऽनशे ध्वानो, दिशो मङ्गलदुन्दुभेः ॥७४३॥

'चिरं जय चिरं नन्द, प्रसरच्छीलसौरभे !' ।
इति वाचा समं तस्यां, पुष्पाणि ववृषुः सुराः ॥७४४॥

इति दृष्टाऽद्भुता[द्] भीता, **सुलसा** सहसा ततः ।
नत्वा महासतीमेतामेवं दीनं वचोऽवदत् ॥७४५॥

'देवि ! देवास्त्वदीयेन, वृत्तेनैते वशीकृताः ।
सेवाहेवाकितां भेजुरङ्किताः किङ्करा इव ॥७४६॥

विद्याबलान्मयाऽदर्शि, भूपालाय परः पुमान् ।
धिग् धिग् द्रविणलोभेनाऽऽविर्भूतां मम दुर्मतिम् ॥७४७॥

तत् प्रसीद प्राणभिक्षां, देहि मे नतवत्सले ! ।
जिनधर्मप्रदानेनाऽनुगृहाण च मामलम् ॥७४८॥

धर्मपोतं त्वदादिष्टं, विना क्वोन्मज्जनं मम ? ।
महापातकभारेण, मज्जन्त्या भववारिधौ' ॥७४९॥

सुलसामिति जल्पन्तीं, स्माह देवी 'त्वया न मे ।
कृतं किञ्चन किन्त्वेष, विपाकः पूर्वकर्मणाम् ॥७५०॥

धन्याऽसि त्वमसि प्राज्ञेऽधुनाऽप्यूरीकरोषि यत् ।
श्रीसर्वज्ञमतं पपे, कालकूटोच्चयामृतम्' ॥७५१॥

देव्या इदं मृदुवचः, शुश्रुवांसस्तदा जनाः ।
तस्या विज्ञाततत्त्वत्वं, प्रशशंसुर्मुहुर्मुहुः ॥७५२॥

भूपं कोपकडाराक्षं, **सुलसा**घातनोद्यतम् ।
देवी **चम्पकमालै**व, न्यषेधत् करुणार्द्रहृत् ॥७५३॥

देव्यथो **दुर्लभा**ऽप्येवमध्यासीज्ज्ञानशून्यया ।
धिग्मयाऽस्यां महासत्यां, मत्सरोऽकारि दारुणः ॥७५४॥

मत्कृतं साम्प्रतं चेदं, सर्वमाविरभूत् क्षणात् ।
कियच्चिरं भवेच्छन्नमेनः खलु विनिर्मितम् ॥७५५॥

भविष्याम्यधुनाऽमुष्याः, शापेनाऽह्नाय भस्मसात् ।
अचिन्त्यो हि सुसाध्वीनां, महिमा भुवनोत्तरः ॥७५६॥

तदमूमे[व] विनयात्तोषयिष्यामि सत्वरम् ।
भूमौ स्खलितपादो हि, भूमिमेवावलम्बते ॥७५७॥

ध्यात्वेति **दुर्लभा** नत्वा, पादौ देवीं व्यजिज्ञपत् ।
'क्व ते कलङ्कोऽकारीद(मा)मभ्यर्थ्य **सुलसां** मया ॥७५८॥

ममाऽभयकरं पृष्ठे, करं देहि महासति ! ।
सागस्यपि कृपासार्द्रहृदया हि महाशयाः' ॥७५९॥

यदुक्तम् -

अपकारिण्यपि प्रायः, स्वच्छाः[१] स्युरुपकारिणः ।
मारके[भ्यो]ऽपि कल्याणं,[२] रसराजः[३] प्रयच्छति ॥७६०॥

एवं दीनगिरे तस्यै, कारुण्यकरिविन्ध्यभूः ।
प्रददावभयं देवी, पृष्ठन्यस्तकराम्बुजा ॥७६१॥

राजाऽप्याख्यत् 'त्वयि कथं, देवि ! लक्ष्म लसेत् किल ।
क्षारत्वं किमु कुत्रापि, पीयूषेऽपि परिस्फुरेत् ? ॥७६२॥

किन्तु तुच्छाशयाऽनया, कृतं किञ्चन वैकृतम् ।
अवलोक्याऽविमृश्यैव, कुविकल्पमकल्पयम् ॥७६३॥

विवाहात् प्रागपि प्रश्नाद्विरहं च त्वमभ्यधाः ।
क्षमस्व तद्यन्मयका, वृथैवाऽस्यवहेलिता' ॥७६४॥

पौरैरथ प्रतिपदं, सप्रमोदं नतस्तुता ।
मङ्गलैर्विविधैर्देवी, प्रापदन्तःपुरान्तरम् ॥७६५॥

वाचामविषयं प्रेम, बिभ्रता भूभुजा समम् ।
बुभुजे च चिरं भोगान्, प्रयता धर्मकर्मणि ॥७६६॥

प्रतिग्रामं प्रतिपुरं, जिनसद्मान्यचीकरत् ।
पात्रेषु च ददौ दानमन्वहं सा महासती ॥७६७॥

---

१. 'सौम्या' इति अभि.चिन्ता. ।१०५०। श्लोकस्य वृत्तौ । २. स्वर्णम् । ३. पारदः ।

ततोऽस्या **भुवनानन्द-करिसिंहा**भिधौ सुतौ ।
बभूवतुर्विक्रमिणौ, सुता च **जयसुन्दरी** ॥७६८॥

प्रेमाब्धिमग्नमन्येद्युर्विषयैकरतं नृपम् ।
वैराग्यविमुखं देवी, बोधयामास तद्यथा ॥७६९॥

'आपाते मधुराः स्वामिन् !, परिणामेऽतिदारुणाः ।
विषयाः प्रविहातुं ते[1], युज्यन्ते भवहेतवः ॥७७०॥

किञ्चाऽत्र नश्वरे विश्वे, भावाः [शुभाऽ]शुभा अपि ।
यान्तोऽशुभत्वमीक्ष्यन्ते, तदास्था तेषु कीदृशी ॥७७१॥

तथाहि -

य एव स्वीयसौन्दर्यसन्तर्जितपुरूरवाः ।
स एवोदग्ररुग्ग्रस्तः, कुत्स्यः स्याज्जगतोऽपि हि ॥७७२॥

य एव प्रसृतिप्रायप्रसरल्लोचनद्वयः ।
स एव कालयोगेन, जात्यन्ध इव जायते ॥७७३॥

य एव वावदूकाग्र्यो, वाचस्पतिनिभप्रभः ।
कालात् स एव मूकत्वं, भजते भग्नगीर्बलः ॥७७४॥

किं बहूक्तेन ? सर्वाङ्गसुन्दरोऽप्यसुमान् भवे ।
पङ्गुकुण्यादितां कालात्, कलयेत् पातकोदये ॥७७५॥

यैव रम्भायते[2] तारतारुण्या किल कामिनी ।
भयङ्करा पिशाचीव, सैव स्यात् प्राप्तवार्द्धका ॥७७६॥

अन्यच्च -

---

१. तव । २. रम्भा इवाचरति ।

मल-मूत्रा-ऽस्थि-मांसा-ऽसृग्-मज्ज-श्लेष्मादिपूरिते ।
धिग्धर्ममवजानन्ति, रक्ता योषिद्वपुष्यपि ॥७७७॥

बाढं रम्यतरस्याऽपि, नारीदेहस्य चेद् भवेत् ।
व्यत्यासोऽन्तर्बहिस्तत् स्युर्दुर्वाराश्च द्विकादयः ॥७७८॥

जनो यथा मृगाक्षीषु, दृढभावेन रज्यते ।
तथा श्रीजैनधर्मे चेन्न दूरे तत् परं पदम्' ॥७७९॥

देव्यैवं बोधितो धात्रीधवो भवविरागवान् ।
न्यास्थज्ज्येष्ठे सुते राज्यं, संयमश्रीजिघृक्षया ॥७८०॥

सदेवीकस्ततो दीक्षां, गृहीत्वा गुरुतः कृती ।
देवभूयमुपेयाय, क्रमात् शिवमवाप्स्यति ॥७८१॥

एवं **चम्पकमालायाः**, श्रुत्वोदाहरणं जनाः ! ।
शीलं बिभृत निःशेषमहिमाप्तिनिबन्धनम् ॥७८२॥

दिव्यौदारिकभेदभृन्निगदितं, यन्मैथुनं ह्यद्वचः-
कायैस्तन्न करोति कारयति नो, नैवानुजानाति च ।
इत्यष्टादशभेदमिन्दुविमलं, यो ब्रह्म धत्ते दृढं,
सोत्कण्ठं स सुखश्रिया परमया, धीमान् समाश्लिष्यते ॥७८३॥
[शार्दूलविक्रीडितवृत्तम्]

—● शीले **चम्पकमाला**कथा । ग्रं. ३५६, अ. ४० ●—

हेतुर्महिम्नां सर्वेषां, शुद्धं शीलं भवत्यहो ! ।
तपोऽपीदृक्षमन्यच्च, हन्ति कर्म निकाचितम् ॥७८४॥

देवेन्द्रो देववृन्दैर्यद्, विनतो विनयाञ्चितैः ।
महर्द्धिको भुनक्ति स्वः, प्रसूनं तत्तपस्तरोः ॥७८५॥

फलं तु निर्वृतेः पदं, क्षये निखिलकर्मणाम् ।
नीरन्ध्रानन्तविज्ञानदृष्टिवीर्यसुखात्मकम् ॥७८६॥

मूढाः काङ्क्षन्ति सौख्यानि, न तु तन्वन्ति सत्तपः ।
नेति चेतन्ति कार्यस्योद्भवो हेतुमृते कुतः ? ॥७८७॥

तप्यमानास्तपस्तीव्रं, देहिनो निर्मलाशयाः ।
शक्राणामपि सेव्याः स्युर्मानवानां किमुच्यते ? ॥७८८॥

प्रत्यूहव्यूहमत्युग्रं, व्यपहन्ति समन्ततः ।
शं चाऽऽविष्कुरुते **नागकेतो**रिव परं तपः ॥७८९॥

तद्यथा -

जम्बूद्वीपे[१]ऽस्ति **भरत**मण्डनं **कुण्डिनं** पुरम् ।
अन्तर्बहिश्च पुन्नागैः, सुमनःशालिभिः शुभत् ॥७९०॥

वणिक् तत्र श्रियां पात्रमभवत् **सुन्दरा**ह्वयः ।
तस्याऽजनिष्ट कालेन, **चन्दनो** नाम नन्दनः ॥७९१॥

अभङ्गुराऽभाग्यनिधेर्जातमात्रस्य तस्य च ।
अम्बाऽभूत् सूतिरोगार्त्ता, कालिन्दी[२]सोदराऽतिथिः ॥७९२॥

बालत्वे मरणं मातुर्वल्लभायाश्च यौवने ।
वार्द्धके च सुतस्येति, त्रयं स्यात् पक्त्रिमें[३]ऽहसि ॥७९३॥

ववृधे दिवसैरेष, विमात्राऽवमतोऽपि सन् ।
अरक्षितपदार्थस्य, रक्षिता दैव एव यत् ॥७९४॥

विमाता दुर्वचोगर्भैस्ताडनैस्तमपीडयत् ।
प्रायः सपत्नीतनये, वैरभावो विजृम्भते ॥७९५॥

१. 'द्वीपे जम्बूद्वीपे' इति पु.प्रे. । २. यमाऽतिथिः । ३. पापे ।

भार्यासक्तः पिताऽप्येनं, निरभर्त्सयताऽनिशम् ।
यतो **नारीजिता मर्त्त्या, विचारविकलाः क्षितौ** ॥७९६॥

शैशवं समतिक्रान्तः, क्रान्तो दुःखभरेण सः ।
कदापि कञ्चन मुनिं, ववन्दे करुणाखनिम् ॥७९७॥

धर्मलाभाशिषा तेन, नन्दितः सोऽश्रुमिश्रदृक् ।
दुःखमाविश्चकाराऽन्तःप्रचितं गद्गदध्वनिः ॥७९८॥

'प्रभो ! जीवन्मृतोऽस्म्येष, नृपशुर्भाग्यवर्जितः ।
विमातुर्जनकाच्चाप्ततीव्रनानाकदर्थनः ॥७९९॥

कस्याऽग्रे स्वानि दुःखानि, हृद्गतानि ब्रुवे विभो ! ।
दुःखिताः परदुःखेन, प्रायो यद्दुर्लभा नराः ॥८००॥

यूयं सर्वजनीनास्त[द्], दुःखमेतत् प्रकाश्यते ।
जानेऽस्माज्जीवितान्मृत्युः, सर्वदुःखापहो वरम्' ॥८०१॥

वाचंयमस्ततोऽवोचत्, 'वत्स ! दुःखमिदं कियत् ? ।
देही दुःखान्यनन्तानि, लभते यद् भवभ्रमे ॥८०२॥

कृतपञ्चेन्द्रियवधो, महारम्भपरिग्रहः ।
मांसाहारादिनिरतो, मृत्वाऽङ्गी नरकं गतः ॥८०३॥

परमाधार्मिककृतैस्तथाऽन्योन्यमुदीरितैः ।
क्षेत्रजैश्च महादुः[खै]र्व्यथ्यते वचनातिगैः ॥८०४॥ युग्मम् ॥

जलस्थलनभश्चारितिर्यग्गतिमवाप्तवान् ।
जन्तुराप्तोऽतिशीतोष्ण-वध-बन्धादिभिर्व्यथाम् ॥८०५॥

मर्त्यत्वेऽपि जरा-मृत्यु-दास्य-रोग-वियोगजैः ।
दुःखैरशरणः क्लिश्यत्यङ्गी दुष्कर्मसङ्गतः ॥८०६॥

ईर्ष्या-विषाद-लोभादिव्यथया च्युतिभीतितः ।
देवजन्मन्यपि भवेत्, सौख्यमेकान्ततो न हि ॥८०७॥

एवं पापोदयाज्जीवाः, प्रस्फुरत्क्लेशकोटयः ।
लोकनाथमनाराध्य, क्लेशान्तं न वितन्वते' ॥८०८॥

'**लोकनाथः** प्रभो ! कोऽसौ ?', **चन्दनेने**ति जल्पिते ।
तत्त्वप्रकाशिनीं वाचमुवाच यतिनायकः ॥८०९॥

'समस्ति **दूरपारा**ख्यं, पुरं यस्य बुधा विदुः ।
अधोलोकं भूमिगृहानूर्द्ध्वलोकं शिरोगृहान् ॥८१०॥

अविचार्यबलो वश्यसुराऽसुरनरेश्वरः ।
उग्रशासननामाऽस्य, पुरस्येष्टे जनेश्वरः ॥८११॥

निग्रहानुग्रहविधौ, प्रह्वः[1] स प्रकटं ददौ ।
उच्चैःपदं सुमनसां, द्विजिह्वानामधःपदम्[2] ॥८१२॥

शुद्धबुद्ध्यभिधस्तस्य, सचिवः प्रस्फुरद्गुणः ।
सर्वव्यापारनिपुणोऽभ्राम्यत्तत्राऽखिले पुरे ॥८१३॥

वह्निस्यस्तस्य **पुरुषाश्रया** ह्वः समजायत ।
योऽभजद्भोजनस्यापि, भाजने नान्तरं मनाक् ॥८१४॥

स्नाते चालङ्कृते चास्मिन्, मित्रे मन्त्र्यपि सन्ततम् ।
बाढं प्रीतः स्वयं नाऽस्नाद्भाराऽलङ्कृतीर्न च ॥८१५॥

विविधैर्भोजनैर्नित्यं, भोजयामासिवानमुम् ।
तुष्टश्चैतावताऽभुक्त, न कदाचिदयं स्वयम् ॥८१६॥

---

१. 'पहु'रिति पु.प्रे. । ३. दुर्जनानाम् । ३. मित्रम् ।

बहु किं स्ववयस्यस्य, स्पृहापूर्त्तिचिकीरयम् ।
अकार्षीत् विविधक्लेशान्, स्वार्थभ्रंशमचिन्तयन् ॥८१७॥

वयस्योऽपि परं प्रेम, दर्शयन्नवियोगवान् ।
मन्त्रिणा सह जागर्ति, शेते गच्छति तिष्ठति ॥८१८॥

एवं सुहृदसौ तस्य, नित्यासक्ततया खलु ।
अवापदपरां **नित्यमित्र**मित्यभिधां जनात् ॥८१९॥

अथ **विश्वहितो** नाम, विश्वपूज्यो महापुमान् ।
मित्रकार्यकृते गाढप्रयासं तं विलोकयन् ॥८२०॥

किं श्रद्दधाति वचनं, ममासौ दुर्मदो न वा ? ।
इति द्विधामनाः प्रोद्यत्कृपः प्राह कदाचन ॥८२१॥ युग्मम् ॥

'सखा तवैष चेतोहृदूपश्रीः सुकुलोद्भवः ।
केषां नेत्रचकोराणां, न हि चन्द्रातपायते[१] *॥८२२॥*

परमेतद्दृशां किञ्चिद्विमृश स्वच्छधीनिधे ! ।
यथाऽमुष्मिन् दृढं रक्तो, भवान्नाऽसौ तथा त्वयि ॥८२३॥

अयमन्तःकुशुद्धो यत्, स्नानभोज्यादिना यदा ।
न सत्क्रियेत खलवद्विरूपः स्यात्तदैव हि ॥८२४॥

दधानः कृत्रिमं प्रेम, स्वार्थनिर्मितलम्पटः ।
भवन्तं दुःखविधुरमनुगन्ता न चैषकः ॥८२५॥

तद्यावद्दैवतो नाऽयं, जह्यात् प्रेम समुज्ज्वलम् ।
तावत् परः सुहृत् कर्त्तुं, युक्तस्ते त्राणकृद् भये ॥८२६॥

---

१. चन्द्रातपः-चन्द्रिका इवाचरति ।

अनिर्मितान्यमित्रस्त्वं, यदाऽनेन प्रमुच्यसे ।
भावी दूरस्थलोकानामुपहासास्पदं तदा' ॥८२७॥

श्रुत्वेति किञ्चित्सम्प्राप्तचेतनो व्यदधादयम् ।
कृतज्ञाख्यं परं मित्रमुन्मीलच्छिथिलादरः ॥८२८॥

अपिप्रिणच्च सद्भोज्य-वस्त्र-ताम्बूल-मण्डनैः ।
सुहृदं तं परं प्रेमपरः पर्वणि [पर्वणि] ॥८२९॥

तेन पर्वसु सर्वेषु, पूज्यमानमनारतम् ।
तं निरीक्ष्य जनाः **पर्वमित्र**मित्याख्ययाऽभ्यधुः ॥८३०॥

एवं मित्रद्वयीगाढप्रेमपाशनियन्त्रितम् ।
बभाषेऽमुं करुणयाऽन्येद्युर्**विश्वहितः** पुनः ॥८३१॥

'त्वया पर्ववयस्यो यो, निर्ममे निर्मलाशयः ।
स चारुः किन्त्वसौ दुःखे, तव दुःखं धरिष्यति ॥८३२॥

अपनेतुं तु दुःखं नो, शक्तिरस्य मनागपि ।
भद्र ! यं सुहृदं कर्तुं, मया प्रोक्तोऽसि सोऽपरः ॥८३३॥

स सन्तुष्टो नमनतः, स्तवनाद्वाऽपि सम्भवेत् ।
उद्धरे[द्] दैवदुःखाच्च, तत्र मैत्रीं तनुष्व तत्' ॥८३४॥

'क्वेदृगस्ति सुहृच्छुद्धबुद्धिना विनयादिति ।
अनुयुक्तो **विश्वहितः**, सारां गिरमथाऽतनोत् ॥८३५॥

'उदारस्फाररूपो यः, सुधाद्युतिसमद्युतिः ।
जाह्नवीवीचिविशदवसनः सारमण्डनः ॥८३६॥

स्मेरराजीवसङ्काशवदनः सुप्रसन्नदृक् ।
भ्राजिष्णुर्भाग्यसम्भारैर्नम्यमानो घनैर्जनैः ॥८३७॥

कदाचिद् दृश्यते देवाधिदेवभवने स्फुटम् ।
कदाचित् साधुशालासु, कदाचित् कृतिसद्मसु[१] ॥८३८॥

लोकनाथाभिधः सिद्धपुमान् सर्वगतः स हि ।
शक्तः सर्वेभ्योऽपायेभ्यो, रक्षितुं स्वाश्रिताङ्गिनः ॥८३९॥ चतुर्भिः कलापकम् ॥

तत्तेन सह सौहार्दं, विधेहि स्वहितेच्छया ।
एधि स्फुरितकल्याणस्ततस्त्वमकुतोभयः' ॥८४०॥

इति **विश्वहिता**च्छुत्वा, विधित्सुस्तेन सौहृदम् ।
दिने दिने **शुद्धबुद्धि**र्विससर्प प्रमद्वरः ॥८४१॥

ततो **विश्वहितेना**ऽय[म]भियुक्तो मुहुर्मुहुः ।
यानस्थ एवाऽवन्दिष्ट, **लोकनाथं** तमेकदा ॥८४२॥

प्रयोजनवशाद् गच्छन्, कदाचिद्दूरवर्त्मनि ।
तस्य दृष्टस्य स्वनरैः, प्रणामं समदेशयत् ॥८४३॥

कदापि प्रेषयामास, केनापि प्राभृतीकृतम् ।
तस्मै पार्श्वचरैरेष, फलपुष्पादि सुन्दरम् ॥८४४॥

एनं सानन्दमन्येद्युः, पुन**र्विश्वहितो**ऽशिषत् ।
'सेवस्व विश्वमहितमेनमादरतो बुध ! ॥८४५॥

दूरस्थममुमालोक्य, वन्दस्वोत्तीर्य यानतः ।
ढौकयस्व स्वहस्तेनाऽमुष्मै पुष्पफलादिकम् ॥८४६॥

एवमाराधयत्येनं, यद्येकाग्रमना भवान् ।
रक्षत्यसौ तदा तीव्रात्, प्रत्यूहव्यूहतो ननु' ॥८४७॥

---

१. **'कदापि सदने सताम्' इति वासुपूज्यचरित्रे ।२।१६४३।**

अथ सोऽपि तदा चक्रे, **तद्विश्वहित**शासनम् ।
चतुरः को न मनुते ?, शिक्षां ह्यायतिसुन्दराम् ॥८४८॥

नियमाद् यन्नमत्येष, वर्त्मन्येनं निरीक्षितम् ।
अवोचंस्तं ततोऽमुष्य, **प्रणामसुहृदं** जनाः ॥८४९॥

मित्रत्रयीं **शुद्धबुद्धि**रेवंरीत्या प्रमोदयन् ।
समयं समतीयाय, राजकार्यपरायणः ॥८५०॥

कदाचि**न्नित्यमित्रेणा**वियुक्तः शयनस्थितः ।
प्रबुद्धः पार्श्वतोऽपश्यच्छ्यामानुन्मुद्गरान्नरान् ॥८५१॥

'के यूयं ? किं समायाता'स्तेनेति प्रश्निता अमी ।
प्राहुः'प्राहेष्महि वयं, त्वयि क्रुद्धेन भूभुजा' ॥८५२॥

'किमागो मे ? मयि नृपः, किं वा व्याकरदित्यमी ।
पृष्टास्त्वाहुर्भूभृदेव, जानात्यागस्तवोत्कटम् ॥८५३॥

भवांस्त्वैश्वर्यतोऽमुष्मात्, कृष्ट्वा कूपे नृपाज्ञया ।
क्षेप्योऽस्माभिरिति' श्रुत्वा, दुःश्रवं मन्त्र्यकम्पत ॥८५४॥

तं **नित्यसुहृदं** मान्द्यदीनया चाऽवदद् गिरा ।
'सखे ! सखे ! रक्ष रक्ष, क्रुद्धो मयि धराधवः ॥८५५॥

सुहृदः सम्पदि प्रायः, सुप्रापा बहवोऽपि हि ।
विपद्यपि भवेद्यस्तु, धरा तेनैव धार्यते ॥८५६॥

ताता-ऽम्बा-वल्लभा-भ्रातृ-सुतादिभ्योऽपि यत् प्रियः ।
त्वं ममाऽसि सुहृत्तस्माद्भयादस्मात् समुद्धर' ॥८५७॥

ततो **नित्यसुह**न्म्लानवदनः प्रत्यभाषत ।
'राट् क्रुद्धो यदि तत् किं मे, ब्रूषे सम्बन्धतः कुतः ?' ॥८५८॥

नासौ प्रत्यभिजानाति, किं मामिति स **शुद्धधीः** ।
स्माह'नो वेत्सि मां मित्र !, भ्रान्तचित्तः कथं त्वसि ?' ॥८५९॥

सोऽप्युवाचाऽथ 'ज्ञातोऽसि, किमप्यागो महद् व्यधाः ।
तदुग्रशासनो भूपस्त्वां निग्राहयति स्फुटम् ॥८६०॥

ततोऽद्य भवता किं मे, राजद्विष्टविधायिना ।
स्वकृतं स्वयमेवैको, भुङ्क्ष्व किं भाषसे बहु' ॥८६१॥

परः प्रोचे 'सखेऽकार्षमकृत्यं त्वत्कृते बहु ।
यदि वा स्वेनोपकृतं, जल्पद्भिर्ह्रीयते स्वयम्' ॥८६२॥

अथ **नित्यसुहृद्** गाढं, विधुरः सेर्ष्यमभ्यधात् ।
'वाचाट ! कर्णकटुकं, किं जल्पस्यसकृन्मुधा ? ॥८६३॥

वि[द]धाने मयि स्नानाशनाद्याधास्तथा स्वयम् ।
तत् स्वार्थे त्वयका सर्वं, चक्रे किञ्चिन्न मत्कृते ॥८६४॥

नृपद्विष्टेन नो कश्चित्, त्वयाऽर्थो मे मृषागिरा ।
याहि दूरे द्रुतमिति', तेनासौ विधृतो गले ॥८६५॥

अत्रान्तरे **शुद्धबुद्धिमुग्रशासन**किङ्करैः ।
धृतं श्रुत्वाऽऽकुलः **पर्वसुहृदा**गाद् द्रुतं गृहम् ॥८६६॥

विमुक्त**नित्यमित्रा**शः, सोऽप्यस्राम्बुप्रपूर्णदृक् ।
दीनो विलोकयामास, **पर्वमित्रा**ऽऽननं तदा ॥८६७॥

ऊचे **पर्वसुहृ**न्मित्र !, हहा ! कष्टेऽपतः कथम् ।
इदं मदीयसर्वस्वमपि दत्त्वा छुटाऽधुना ॥८६८॥

अथवा कष्टमखिलमेतन्मयि नियोजय ।
धनेन जीवितेनापि, किमस्माकं त्वया विना' ॥८६९॥

श्रुत्वेति दध्यिवान् **शुद्धमति**र्मूढेन धिग्मया ।
पोषितः सर्वयत्नेन, सर्वथा **पुरुषाश्रयः** ॥८७०॥

कृतज्ञस्य पुनः किञ्चिन्न कदाचन निर्ममे ।
अनयोश्चान्तरमिदं, प्रत्यक्षं हन्त वीक्ष्यते ॥८७१॥

इति चिन्तापरममुं, तत्क्षणं **पुरुषाश्रयः** ।
क्रोशन् गाढं गले धृत्वा, दूरीचक्रेतरां स्वतः ॥८७२॥

'एनं विना भविष्यामि, कथं हा भाग्यवर्जितः ।
अस्य स्थाने नयध्वं मामेनं मुञ्चत मुञ्चत' ॥८७३॥

इति तारं प्रलपति, स्वशिरस्ताडनापरे ।
सदुःखे **पर्वमित्रे**ऽमुं, जगृहुर्भूपकिङ्कराः ॥८७४॥ युग्मम् ॥

पर्वमित्रमशोशोचीत्तस्मिन् कृष्टे हठेन तैः ।
सुखं शिश्ये पुन**र्नित्यवयस्यः** कृतकृत्यवत् ॥८७५॥

वह्निना भीषणेनोच्चैर्ध[गद्ध]गिति कुर्वता ।
दुर्दर्शनस्य कूपस्योपकण्ठं तैरनायि सः ॥८७६॥

अहो ! कष्टमहो ! कष्टमत्र क्षेप्स्यन्त्यमी ह माम् ।
कश्चिदस्ति न मे त्राता, हा तापोऽयं सुदुःसहः ॥८७७॥

हुं ! मां **विश्वहितो**ऽवोचत्, त्वां कष्टभरपातिनम् ।
पाता सिद्धपुमाल्लो**ँकनाथः** सर्वगतो ध्रुवम् ॥८७८॥

तदस्मिन् समये कामं, कष्टं कष्टमये मम ।
स **लोकनाथः** शरणं, भूयाद्विघ्नौघघातकः ॥८७९॥

इत्यसौ यावदध्याय[त्], तावत्तारत्वरा नराः ।
उदारमूर्त्तयो वर्यधैर्याः स्पष्टमहौजसः ॥८८०॥

शशाङ्ककिरणाकारदण्डमण्डितपाणयः ।
श्वेतवासःपरीधाना, उदीच्याः केचिदाययुः ॥८८१॥ युग्मम् ॥

'रे रे ! मुञ्चत नो यूयं, कूपे क्षेप्तुममुं क्षमाः ।
लोकनाथनरेष्वस्मास्वीक्षमाणेषु साम्प्रतम् ॥८८२॥

नो चेद्युध्यध्वं पश्यामः, पौरुषं वः किलोन्मदाः' ।
इति तेषां गिरा भूपकिङ्करैः कलये[१] स्थितम् ॥८८३॥

मिथो जातेऽथ समरे, सिद्धपुंभिः समुद्गरैः ।
जिग्यिरे ते शठा उच्चैःस्थिते **लोके** प्रपश्यति ॥८८४॥

तेषु त्रस्तेषु क्षुण्णेषु, पतितेषु मृतेषु च ।
ननृतु**र्लोकनाथीय**[२]पुमांसो विजयोर्ज्जिताः ॥८८५॥

अथ ते कूपपार्श्वस्थं, तं गृहीत्वा करेऽभ्यधुः ।
त्वत्**प्रणामवयस्य**स्त्वामाह्वयत्येहि सत्वरम् ॥८८६॥

स तैः सममथाऽचालीत्, सौधं चाग्रे निरैक्षत ।
सद्दृष्टितुष्टिदं सर्वकल्याणमयमुत्तमम् ॥८८७॥

रामणीयकगुणाक्षिप्तमनाः सम्मदमेदुरः ।
तत्राऽविशदसौ सर्वेन्द्रियाह्लादनिबन्धने ॥८८८॥

भूर्भुवः[स्व]स्त्रयीनाथैर्वन्द्यमानं महादरात् ।
सर्वदर्शनसूरीन्द्रैर्नूयमानं[३] स्वबुद्धितः ॥८८९॥

प्रसन्नया दृशा शश्वद्वीक्षमाणं स्वसेवकान् ।
निषण्णमासने वर्ये, चतुश्चरणसुन्दरे ॥८९०॥

---

१. समराय । २. लोकनाथसम्बन्धिनराः । ३. स्तूयमानम् ।

तं **लोकनाथ**मङ्गोद्यत्तेजोनिर्जिततापनम् ।
तस्य **विश्वहितस्या**ऽङ्केऽवष्टब्धं दृष्टवानसौ ॥८९१॥ त्रिभिर्विशेषकम् ॥

तस्यर्द्धिदर्शनाच्चित्ते, विस्मितश्चेत्यचिन्तयत् ।
प्रदत्तं **नित्यमित्राय,** सर्वस्वं धिग् मया मुधा ॥८९२॥

सदकार्यपि धिक्कार्याऽकार्यमूढेन न न्वसौ ।
सङ्केतसदनं विश्वसम्पदां सर्वभीतिहृत् ॥८९३॥

कृती मामन्वशासिष्यत्तदा **विश्वहितो** न चेत् ।
अतन्वन्नतिमप्यसौ, तदाऽवाप्स्यं नु कां गतिम् ? ॥८९४॥

इति ध्यायन् ववन्देऽसौ, **लोकनाथं** ससम्भ्रमः ।
तेनाऽप्याश्लिष्य धृत्वाऽङ्केऽप्रच्छि वै[धु]र्यकारणम् ॥८९५॥

भी**रुग्रशासना**दुग्रेत्युक्तवांश्चौच्यताऽमुना ।
'मा भैषीर्मां श्रितानां न, [स] प्रभूष्णुर्नृपाधमः ॥८९६॥

अहं न सच्चकाराऽमुं, किञ्चिदित्यपि मा हृदि ।
खित्थाः **प्रणामः सर्वेषु, सत्कारेषु यतो महान्** ॥८९७॥

स्याच्छ्रीदानेन भृत्यानां, शौर्यादेरनृणो नृपः ।
प्रणामस्य पुनस्तेषामनृणो न कथञ्चन ॥८९८॥

तत् त्रिविष्टपसाम्राज्यादपि किञ्चित् परं पदम् ।
अददत्त्वत्प्रणामस्य, कथं स्यामनृणः कृतिन् ! ? ॥८९९॥

काञ्चिद्ददामि तद्यावद्, वृद्धिमस्य ऋणस्य ते ।
तावत् सर्वभयत्यक्तो, मा मुचः सन्निधिं मम' ॥९००॥

---

१. कलान्तरम् ।

इत्युक्त्वा निजसौधाग्रे, नीत्वाऽस्थाप्यत तेन सः ।
चिन्तासमानसमयपूर्णकामचयश्चिरम् ॥९०१॥[१]

कदाचि**ल्लोकनाथ**स्तमुवाचा'ऽत्र चिरं स्थितः ।
भवानज्ञायि तैर्दुष्टात्मभिर्भूपतिकिङ्करैः ॥९०२॥

अमी कदाच[न] [च]राश्छलिनो बलिनो भृशम् ।
त्वां ग्रहीष्यन्ति मे दृष्टिं, वञ्चयित्वा महामते ! ॥९०३॥

तत्तत्र क्वापि मुञ्चामि, भवन्तं भव्यसत्तम ! ।
भवेयुर्यत्र ते द्रष्टुमपि त्वां न प्रभूष्णवः ॥९०४॥

गच्छतां तत्र किन्तु स्यात्, पन्थाः क्लेशावहोऽङ्गिनाम् ।
सोढव्यं तत्र यद्दुःखं, क्षुत्-पिपासादिभिर्महत् ॥९०५॥

तत् क्लेशसहने स्थैर्यं, वर्यं निर्माय मानसे ।
अनुत्तरं पदं प्राप्तुमेह्यह्वाय मया सह ॥९०६॥

मार्गेऽरयः समारब्धोदग्रदम्भाः ससम्भ्रमम् ।
मुखेऽतिमधुराश्चित्ते, विरसा रभसादपि[२] ॥९०७॥

मधुरैरन्नपानाद्यैर्लोभयन्तः पदे पदे ।
भवन्तमाह्वयिष्यन्ति, दीनवाक्यप्रपञ्चिनः ॥९०८॥ युग्मम् ॥

तेषु चेद्वपुषा वाचा, स्वान्तेनापि च रक्ष्यसे ।
रक्षिष्यामि तदा न त्वां, गृह्यमाणं छलेन तैः' ॥९०९॥

एवं शिक्षास्थिरममुं, गृहीत्वाऽचलदध्वनि ।
लोकनाथः प्रभापूरपराभूतार्कमण्डलः ॥९१०॥

---

१. विचारणातुल्यसमयपूर्णीभूतमनोरथसमूहः । २. रभसात् = वेगात् = किम्पाकात् ।

मार्गे प्रपास्वसौ तृष्णगपि शीताम्बुभिर्वधूः ।
निमन्त्रणपरा मेने, भुजङ्गीरिव दुःखदाः ॥९११॥

क्षुधातुरः पुरः सत्रागारेषु प्रणयाञ्चितम् ।
नरानाह्वयतोऽमंस्त, स व्याघ्रानिव भीषणान् ॥९१२॥

मार्त्तण्डचण्डपादैश्च[1], तप्तः फल-सुमाकुलान् ।
छायातरूनवाज्ञासीत्तरां विषतरूनिव ॥९१३॥

शुभवस्तुष्वरक्तोऽसद्वस्तूनां चाऽद्विषन्नयम् ।
वहन् **लोकेश**[2]शिष्टिं तां, हृदि हारलतामिव ॥९१४॥

गच्छन्नग्रे महत् सद्माऽनुपमानं न्यरूपयत् ।
पुण्यवद्भिः पापिभिश्चाऽदृष्टपूर्वं सुनिर्मलम् ॥९१५॥ युग्मम् ॥

कुतोऽप्यजातभीस्तिष्ठाऽनन्तं कालमिहेति' तम् ।
उक्त्वा सिद्धपुमान् भूयो, लोकाभीष्टचिकीर्षयौ ॥९१६॥

सोऽपि तत् सौधमध्यास्य, परानन्दवशंवदः ।
तृणपूलतुला[3] मेने, सर्वाः शक्रादिसम्पदः ॥९१७॥

अस्याः कथाया हृदयं, शृणु भो अवधानवन् ! ।
पुरं य**द्दूरपारा**ख्यमपारो **भव** एव सः ॥९१८॥

राजो**ग्रशासनः कर्मपरीणामो**ऽत्र बुध्यताम् ।
मन्त्री तु **शुद्धमत्या**ख्यः, **शुद्धात्मा जीव** एव हि ॥९१९॥

*तस्य **नित्यसुहृद्देहः**, प्रोक्ताशेषगुणो मतः ।*
ज्ञेयः **पर्ववयस्य**स्तु, **सौजन्यकलितो जनः** ॥९२०॥

---

१. सूर्यचण्डकिरणैः । २. लोकनाथस्योपदेशम् । ३. 'तृणपूलवर्त्तुला' इति पु.प्रे. ।

यश्च **विश्वहितः** पूज्य, **उपदेशः** स सद्गुरोः ।
यस्तच्छिष्ट्या **नतिसुहृच्चक्रे धर्मः** स कीर्त्तितः ॥९२१॥

ये निष्ठुराः समाजग्मु**रुग्रशासनकिङ्कराः** ।
ते **दुष्कर्मगणा** व्याधि-मृत्यु-दुर्गतिहेतवः ॥९२२॥

तै रुद्धः **शुद्धधी**र्जन्तुर्देहमालोक्य निष्क्रियम् ।
मेने सर्वाभिसारेण, तस्मिन्नुपकृतं मुधा ॥९२३॥

स्वदुःखदुःखितं पश्यंस्तदा च स्वजनं जनम् ।
तत्राल्पमपि सत्कारं, कृतं साध्वित्यमन्यत ॥९२४॥

ततश्चैष गले धृत्वा, वपुषा दूरितः स्वतः ।
शोचति स्वजने नीतः, **कूपं** यं **नरको** हि सः ॥९२५॥

तत्राऽग्निर्दुःखसम्भारो, दुःसहोऽस्मात् ससाध्वसे ।
अमुष्मिन् स्मृत**लोकेशे**, प्राप्ता ये प्रवरा नराः ॥९२६॥

ते धर्मपाक्षिकाः कर्मगणा दुष्कर्मणां गणान् ।
जित्वा धर्मस्य लीलौको, विवेकाख्यं तमापिपन् ॥९२७॥

तत्र दानादिसत्पादोपशमासनमाश्रितम् ।
गुरूपदेशावष्टम्भमसौ धर्मं व्यलोकयत् ॥९२८॥

सौधाग्रभुवि धर्मेण, कालं कमपि यच्च सः ।
स्थापितोऽन्वभवत् सौख्यं, सा सम्यग्दृक्सुरस्थितिः ॥९२९॥

सारां दत्त्वा ततः शिक्षामलुभ्यन् विषयव्रजे ।
धर्मेण स सदानन्दः, सिद्धिसौधेऽध्यरोप्यत ॥९३०॥

लोकनाथः स धर्मोऽयमाराद्धो विधिवद् ध्रुवम् ।
भवेत् सर्वसुखावाप्तिहेतुर्दुःखभरान्तकः ॥९३१॥

तद्भद्र ! यदि भद्राणि, विमुद्राण्यभिकाङ्क्षसि ।
धर्मं सेवस्व यत्नेन, प्रशमोपेतमानसः ॥९३२॥

दान-शील-तपो-भावभेदो नो यैरुपास्यत ।
धर्मो विवेकविकलैर्दृष्टाल्पसुखलालसैः ॥९३३॥

ते काङ्क्षन्ति कथं मूढाश्चमत्कारकरीं श्रियम् ।
शारदेन्दुवलक्षं च, यशो जगति विस्फुरेत्' ॥९३४॥ युग्मम् ॥

श्रुत्वेति **चन्दनः** साधुधुर्यमभ्यधित 'प्रभो ! ।
दानं दातुमशक्तोऽहमस्वाधीनधनो यतः ॥९३५॥

तपस्यामि तपः किन्तु, सच्छीलः शुद्धभावनः ।
तन्निवेदयाऽवद्यज्ञ !, मम किञ्चिद्वरं तपः' ॥९३६॥

साधुः स्माह 'विधेहि त्वं, चतुर्थं पाक्षिके तपः ।
षष्ठं च कष्टनाशाय, चातुर्मासिकपर्वणि ॥९३७॥

सांवत्सरं महापर्वाऽष्टमेनाऽऽराधयोद्यतः ।
एवं तन्वन्नपारस्य, दुःखाब्धेः पारमाप्स्यसि ॥९३८॥

उपैति तपसा कर्म, निकाचितमपि क्षयम् ।
सिद्धान्ते गणभृद्भिर्यत्, प्रोक्तमेवं तपःफलम् ॥९३९॥

कर्म निर्जर[य]त्यन्नग्लायकः श्रमणो हि यत् ।
नरके नारका वर्षशतेनापि न तत् खलु ॥९४०॥

प्रातरेव क्षुधा ग्लायन्, यः स्यात् पर्युषिताशनः ।
अथवा निस्पृहप्रान्तभोज्यन्नग्लायकोऽत्र सः ॥९४१॥

तथा चतुर्थभक्तेन, यत् कर्म क्षपयेन्मुनिः ।
न तन्नैरयिका वर्षसहस्रेणापि दुर्गतौ ॥९४२॥

षष्ठभक्तेन या साधोर्निर्जरा कर्मणां भवेत् ।
लभेरन्नारका वर्षलक्षयाऽपि न तां ध्रुवम् ॥९४३॥

श्रमणोऽष्टमभक्तस्थः, क्षपणं कर्मणां हि यत् ।
कुरुते वर्षकोट्यापि, [न] तन्नैरयिकाङ्गिनः ॥९४४॥

दशमाहारिणः साधोर्यावती कर्मनिर्जरा ।
कोटीकोट्यापि वर्षाणां, नारकाणां न तावती ॥९४५॥

दुष्कर्मद्रुमभङ्गाय, द्विरदोपमविक्रमे ।
तपसि प्राज्ञ ! तन्मा स्म, प्रमादं विदधा मुधा ॥९४६॥

शमप्रधानो धर्मश्चाभिदधे धीधनैर्यतः ।
तेनोपसर्गसङ्गेऽपि, मा कार्षीः क्रोधमुद्धुरम्[1] ॥९४७॥

प्राप्येति साधुशिक्षां स, तोषपोषं वहन् हृदि ।
तदाप्रभृत्यपि तपो, व्यधादघजिघांसया ॥९४८॥

अथाऽन्यदा पर्युषणापर्वणि प्रशमाश्रयः ।
असौ कृताष्टमतपा, धृतसामायिकव्रतः ॥९४९॥

विलासयन्मनोमीनं, सद्ध्यानोदन्वदूर्मिषु ।
विमुक्ताशेषसावद्योऽश्रयत् तृणकुटीरकम् ॥९५०॥ युग्मम् ॥

अकस्मात्तत्र च तदा, प्रातिवेश्मिकवेश्मनि ।
उत्तस्थावनलश्चण्डपवनप्रेरणोल्वणः ॥९५१॥

प्रतीपानिलयोगेनाऽदग्धेऽप्यत्र कुटीरके ।
विमाता मत्सरभरादसिं(ग्निं) चिक्षेप पापिनी ॥९५२॥

---

१. दशमभक्तस्य ।

मध्यस्थपरिणामत्वाद्बद्धमर्त्त्यभवस्थितिः ।
अग्निना दह्यमानोऽसौ, कथाशेष[त्व]माप्तवान् ॥९५३॥

इतश्च –

चन्द्रकान्तमयावासैश्चन्द्रदीधितियोगतः ।
स्रवद्भिः पङ्किला बाढं, **चन्द्रकान्ता** समस्ति पूः ॥९५४॥

पौरा यत्र बभुः सर्वमङ्गलाश्लेषहर्षिणः ।
महेश्वराः सदा मूर्द्धाऽधरायितकलाभृतः ॥९५५॥

राजा **विजयसेना**ह्वस्तत्राभूद् [1]यदसिः सदा ।
द्वेषिकुण्डलिनां नागदमनीसदृशोऽशुभत् ॥९५६॥

तत्र **श्रीकान्त** नामाऽभूत्, कान्तश्रीः श्रेष्ठिपुङ्गवः ।
सङ्ख्यातीतधनः प्राज्यभूपसन्मानभूषितः ॥९५७॥

श्रीसखी नाम कान्ताऽस्य, कान्ताऽऽस्यजितचन्द्रमाः ।
श्रीसर्वज्ञक्रमाम्भोजभृङ्गी रङ्गद्गुणावलिः ॥९५८॥

[2]पुत्रीयती तनोति स्मोपयाचितशतानि सा ।
गृहस्थानां विना पुत्रं, प्राज्याऽपि श्रीर्न भाति यत् ॥९५९॥

स **चन्दनस्य** जीवोऽथ, तस्याः कुक्षाववातरत् ।
पूर्णे च समये जातः, सुतः स्वर्णसमाऽङ्गरुक् ॥९६०॥

सद्धर्मकर्मसोत्साहभव्यौघमघनाशनम् ।
सांवत्सरं महापर्वाऽभूच्चाऽऽसन्नतरं तदा ॥९६१॥

---

१. यस्य तरवारिः । २. पुत्रम् इच्छन्ती ।

इदं पर्युषणापर्वाऽऽराध्यं कृत्वाऽष्टमं तपः ।
इति जल्पपरं लोकं, तदा बालो निरीक्ष्य सः ॥९६२॥

सञ्जातजातिस्मरणः, प्रोद्यच्छ्रद्धाभरः कृती ।
तपोऽष्टमं विशिष्टात्मा, प्रत्यपद्यत तत्क्षणम् ॥९६३॥ युग्मम् ॥

नीरोगमपि तं त्यक्ताहारं पश्यन् पिता भृशम् ।
भृतो दुःखेन विविधानुपचारानकारयत् ॥९६४॥

स्वप्रतिज्ञातनिर्वाहबद्धबुद्धिस्त्वसौ शिशुः ।
निराहारस्तृतीयेऽह्नि, कलितोऽतुच्छमूर्च्छया ॥९६५॥

जीवन्तमपि तं बालं, मत्वाऽनागतजीवितम् ।
लसद्विवेका माताऽस्य, हृदयोद्भिन्नगूढशुक् ॥९६६॥

मा भूत् पर्युषणापर्वोत्साहभङ्गोऽद्य दुःखतः ।
इति हेतोर्न कस्यापि, तं वृत्तान्तं न्यवेदयत् ॥९६७॥ युग्मम् ॥

बालं तु तं मृदुक्षौमवेष्टितं प्रविधाय सा ।
गृहारामभुवि च्छन्नं, न्यखनद्भवतत्त्ववित् ॥९६८॥

पारणादनु तद्वृत्तं, वज्रपातसहोदरम् ।
श्रुत्वा श्रेष्ठी शोकदीर्णहृल्लोकान्तरमीयिवान् ॥९६९॥

धराधवः सपुत्रं तं, परेतं श्रेष्ठिनं विदन् ।
जिघृक्षुरस्य सर्वस्वं, प्रैषीत् पञ्चकुलं गृहे ॥९७०॥

विशन्ति यावन्निःशङ्कं, राड्नरास्ते गृहान्तरम् ।
अभ्रक्षितः[१] कोऽपि तावद्, गलहस्तयति[२] स्म तान् ॥९७१॥

---

१. गगनस्थितः । २. गले न्यस्तो हस्तः = गलहस्तः, तेन अपक्षिपति-गलहस्तयति = करगृहीतगलेन दूरीकरोतीत्यर्थः ।

मिमिलुर्न कपाटाश्चाऽऽदीयमाना बलादपि ।
विस्मितास्तेऽथ भूपाय, निखिलं तदजिज्ञपन् ॥९७२॥

अथागत्य स्वयं भूपः, कोशागारं विशन् रयात् ।
श्रुतभीषणहुङ्कारो, न्यषदद् द्वारि भीतिभृत् ॥९७३॥

भक्त्या स्माह च 'भो गेहाधिष्ठातस्त्रिदशोत्तम ! ।
जल्प प्रत्यक्षतां प्राप्य, किं मामेवं निषेधसि ?' ॥९७४॥

साक्षाद्भूय ततो दिव्यमूर्त्तिः सुरवरोऽभ्यधात् ।
'धरणेन्द्रोऽहमन्यायात्त्वां निषेधामि भूपते !' ॥९७५॥

'अन्यायो मम निर्वीराद्रव्यं स्वीकुर्वतः कुतः ?' ।
इत्युक्तवन्तं धात्रीशं, **धरणः** प्रत्यभाषत ॥९७६॥

'निर्वीराऽसौ कुतो भूप !, प्राणत्यपि तनूद्भवे ? ।
साक्षाद्विलोकयाऽध्यक्षे, **पदार्थे संशयो हि कः ?**' ॥९७७॥

इत्युक्त्वा स सुरो बालं, तन्मात्राऽऽनाय्य तं जवात् ।
जीवन्तं भासुराकारं, दर्शयामास भूभुजः ॥९७८॥

सविस्मयेन भूपेन, पृष्टः किमिदमित्यथ ।
तत्प्राचीनभवाख्यानपूर्वमाख्यत् फणीश्वरः ॥९७९॥

'जातिस्मृतिस्फुरज्ज्ञानः, श्रुत्वा पर्युषणामसौ ।
दुष्करं साम्प्रतमपि, चकृवानष्टमं तपः ॥९८०॥

मूर्च्छाच्छादितचैतन्यो, जनन्या मृत इत्ययम् ।
निखातो भुवि पुण्यात्मा, सत्त्वभाजां धुरन्धरः ॥९८१॥

अत्रान्तरे विमानं मे, गच्छतो गगनाङ्गणे ।
तपोमाहात्म्यतोऽमुष्य, मन्दिरस्योर्ध्वमस्खलत् ॥९८२॥

अवधिज्ञानविज्ञातयानस्खलनकारणः ।
अध्यास्याऽमुष्य सद्म त्वां, द्रव्यादानान्न्यवारयम् ॥९८३॥

अमुं च प्राप्तचैतन्यमकार्षं हर्षपोषतः ।
तपोमाहात्म्यतो नूनं, स्युः सुरा अपि किङ्कराः' ॥९८४॥

एवमुक्त्वा फणिप्रष्ठेऽलञ्चक्रुषि निजालयम् ।
भूपः श्रेष्ठिपदं तस्मै, बालाय प्रददे मुदा ॥९८५॥

नागनाथस्य सान्निध्याल्लेभे यज्जीवितं श्रियम् ।
तेन नाम्ना **नागकेतु**रिति पृथ्व्यां स पप्रथे ॥९८६॥

यशःशुभ्रितदिग्भागो, लीलावासो गुणश्रियः ।
चित्तरोपितसर्वज्ञधर्मः सत्कर्मकर्मठः ॥९८७॥

क्रमेण वर्धमानोऽयमसमानस्फुरन्महाः ।
महाशयः सतां चेतांस्यानन्दयदनारतम् ॥९८८॥ युग्मम् ॥

पूर्वजन्मसमभ्यस्तं, तच्चतुर्थादिकं तपः ।
तथैव पर्वसूदारभावो व्यधित सोऽनिशम् ॥९८९॥

कृपानिधिर्जिनेशार्चापरः पात्रे ददद्धनम् ।
शृण्वानः समयार्थांश्च[1], मर्त्यजन्माऽकृतार्थयत् ॥९९०॥

कोऽपि ना कोपिनाऽन्येद्युरविमृश्य महीभुजा ।
सूचकैः सूचितालीकचौरदोषो व्यपाद्यत ॥९९१॥

स च तस्मिन्नृपे बिभ्रन्मन्युमन्यायवर्जितः ।
विपद्य सद्यः सञ्जज्ञे, दीप्तिमानसुरः सुरः ॥९९२॥

---

१. शास्त्रार्थान् ।

प्रयुक्ताऽवधिरुज्ज्वालज्वलनोग्रक्रुधः स च ।
सपुरक्ष्मापघाताय, विचकाराऽम्बरे शिलाम् ॥९९३॥

प्रदत्तासु प्रतोलीषु, तेन सर्वोऽपि पूर्जनः ।
गर्भक्रोडनिवासीव, भृशं दैन्यं समीयिवान् ॥९९४॥

सभूपः सकलो लोकश्छादितोष्णांशुमण्डलाम् ।
निपतामि पिनष्मीति, सुदारुणमहारवाम् ॥९९५॥

पुरस्योपरि संवीक्ष्य, तां शिलां पृथु वेपथुः ।
बिभयामास सुतरां, **न भयं हि मृतेः परम्** ॥९९६॥ युग्मम् ॥

अथ क्ष्मापाज्ञयाऽमात्यादिभिर्बन्धुरबुद्धिभिः ।
तद्वापच्छान्तये **नागकेतु**रत्यर्थमर्थितः ॥९९७॥

परोपकृतये सोऽपि, धृतोत्साहो नराग्रणीः ।
शुचिरभ्यर्च्य सर्वज्ञं, ययौ पौषधमन्दिरम् ॥९९८॥

पौषधं चोररीकृत्य, कष्टामयमहौषधम् ।
चित्तस्फुरच्छुभध्यानः, कायोत्सर्गं प्रपन्नवान् ॥९९९॥

क्षणादथाऽसुरस्तस्य, पुण्येनाऽध्यक्षतां गतः ।
विनयाद् विनतोऽवादीत्, स्वरूपं निखिलं निजम् ॥१०००॥

नागकेतुर्जगादाऽथ, 'भो भो विबुधसत्तम ! ।
एकमागो नृपस्येदं, क्षम्यतामविचारिणः ॥१००१॥

मेधाविन् ! मा विधाः क्रोधं, सुखरोधनिबन्धनम् ।
यतः सहचरं वैरं, क्रोधाज्जन्मनि जन्मनि' ॥१००२॥

---

१. तदापत्तिनिवारणाय ।

श्रेष्ठिनेत्यनुशिष्टः सोऽसुरः सम्प्राप्य शान्तताम् ।
सञ्जहारोपसर्गं तं, जहर्ष सकलाऽपि पूः ॥१००३॥

प्रसर्पति जयध्वाने, समागत्याऽथ भूपतिः ।
प्रणनामैनमसुरं, सारनेपथ्यभासुरम् ॥१००४॥

अन्वशात् सोऽपि भूमीशं, 'मा कार्षीरविचारितम् ।
साम्प्रतं श्रेष्ठिनिर्बन्धात्, समन्तुरपि मुच्यसे' ॥१००५॥

इत्युक्त्वाऽस्मिन्निजपदं, प्राप्ते पृथ्वीशपुङ्गवः ।
तुष्टाव श्रेष्ठिनं हृष्टः, कष्टाकूपारनाविकम् ॥१००६॥

अहो ! ते धर्मविस्फूर्त्तिरहो ! ते तप उज्ज्वलम् ।
अहो ! ते प्रभुता स्फीता, त्वयाऽहो ! रत्नसूर्महो ॥१००७॥

श्रेष्ठी प्रोचे 'कथमलं, कार्यस्याऽस्याऽस्मि साधने ।
किन्तु प्राक्तनपुण्यानि, विजयन्ते भवादृशाम् ॥१००८॥

तत्तान्येव दानादिकर्मभिः शुद्धवासनाः ।
सेवध्वं ध्वस्तनिःशेषविघ्नव्रतानि कोविदाः !' ॥१००९॥

इति श्रेष्ठिगिरा तुष्टस्तदाऽकार्षीन्महीपतिः ।
जिनपूजा-बन्दिमोक्ष-पात्रदाना-ऽभयादिकम् ॥१०१०॥

नागकेतुः पुनः श्रेष्ठी, स्मरंस्तद्वृत्तमासुरम् ।
वैराग्यरङ्गितः पश्यन्, भवं दुःखभरास्पदम् ॥१०११॥

समक्षं भूमिपादानां, वेश्मभारं निजाऽङ्गजे ।
निधाय श्राद्धप्रतिमापालने मानसं दधौ ॥१०१२॥ युग्मम् ॥

ततः प्रणत्य विधिना, सम्पृच्छन् प्रतिमाविधिम् ।
सूरिभिः शुद्धसिद्धान्तनिधिभिः सोऽन्वशिष्यत ॥१०१३॥

'शुद्धं बिभर्त्ति सम्यक्त्वं, त्रिकालं पूजयन् जिनम् ।
यत्र मासं गृही साऽऽद्या, **दर्शनप्रतिमा** मता ॥१०१४॥

मासद्वयं भवेद्यत्र, शुद्धाणुव्रतपालकः ।
पूर्वानुष्ठानसंयुक्तः, सा **व्रतप्रतिमा**ऽपरा ॥१०१५॥

यत्र सामायिकं धत्ते, द्विसन्ध्यं प्राक्क्रियायुतः ।
त्रीन् मासान् सा **सामायिकप्रतिमा** स्मर्यते बुधैः ॥१०१६॥

पौषधप्रतिमा मासांश्चतुरो यत्र पौषधम् ।
चतुर्विधं चतुष्पर्व्यां, धत्ते पूर्वक्रियान्वितः ॥१०१७॥

पञ्च मासान् धरन् पूर्वक्रियाः प्रकट[1](प्रासुक)भोजनः ।
स्नानोज्झितो ब्रह्मचारी, दिवा रात्रौ प्रमाणवान् ॥१०१८॥

पौषध[स्थ]श्चतुष्पर्व्यां, प्रतिमामाश्रयेन्निशि ।
यत्र श्राद्धो भवेत् सा तु, प्रतिमा **प्रतिमा**[भि]धा ॥१०१९॥ युग्मम् ॥

पूर्वक्रियायुजः षष्ठी, षण्मासान् ब्रह्मचारिणः ।
सप्तमी सप्त मासान् स्यात्, सचित्तं मुञ्चतोऽखिलम् ॥१०२०॥

त्यजतः स्वयमारम्भं, मासानष्टाऽष्टमी मता ।
नवमी स्यान्नव मासाननारम्भयतः परैः ॥१०२१॥

दशम्यां पुनरुद्दिष्टकृताहारविवर्जकः ।
मुण्डी यद्वा शिखी मासान्, दश स्यान्निर्ममो धने ॥१०२२॥

एकादश्यां पुनरेकादश मासान् मुनीयितः ।
मुण्डितो लुञ्चितो वाऽऽत्तरजोहृति[2]-पतद्ग्रहः ॥१०२३॥

---

१. 'प्राशुकभोजनः' इति वासुपूज्यचरित्रे ॥२।१०१५॥ २. गृहीतरजोहरण-पतद्ग्रहः ।

'भिक्षां [मे] देहि प्रतिमां, बिभ्राणाय दशोत्तराम्' ।
इति जल्पन् प्रासुकान्नग्राही चरति बन्धुषु ॥१०२४॥ युग्मम् ॥

एकादशाऽमूः प्रतिमा, **नागकेतो** ! महाशय ! ।
मोहाम्भोधिं तितीर्षूणां, नौर्दैश्या[1] गृहमेधिनाम्' ॥१०२५॥

श्रुत्वेति श्राद्धधुर्योऽसौ, गुर्वादेशवशंवदः ।
धन्यम्मन्यः प्रयत्नेन, प्रतिमाः पर्यपालयत् ॥१०२६॥

अन्यदा पौषधस्थोऽयं, शुक्लध्यानं समाश्रितः ।
क्षणाद् घातीनि कर्माणि, हत्वाऽभूत् केवलोज्ज्वलः ॥१०२७॥

देवतादत्तनिर्ग्रन्थवेषः सैष चिरं भुवि ।
भव्यानानन्दयामास, चकोरानिव चन्द्रमाः ॥१०२८॥

समये भुवनाभ्यर्च्यो, लोकोत्तरगुणव्रजः ।
आससाद च लोकाग्र[म]नन्तसुखसुन्दरम् ॥१०२९॥

भव्या ! नव्यामिमां **नागकेतो**राकर्ण्य सत्कथाम् ।
प्रतनुध्वं तपस्तीव्रमखण्डं सुखमीप्सवः ॥१०३०॥

यत् प्रत्यूहगजव्रजे प्रतिकलं, पञ्चास्यपोतायते[2],
यस्माल्लब्धिततिं समृद्धिमसमां, धत्ते चमत्कारिणी[म्] ।
तीर्थैशैरपि कर्मशत्रुहनने, शस्त्रं यदेवेष्यते,
हेतौ सर्वसुखश्रियां तपसि कस्तस्मिन् प्रमाद्येद्बुधः ? ॥१०३१॥
[शार्दूलविक्रीडितवृत्तम्]

—● तपसि **नागकेतुकथा** । ग्रं. २४९ ●—

१. तरितुल्या । २. पञ्चास्यपोत इव आचरति ।

अमी दानादयो धर्माः, सर्वे स्वर्गापवर्गदाः ।
भावनासहिता एव, न तद्विरहिताः[१] पुनः ॥१०३२॥

दानं यथा प्रियगिरा, सारण्येव द्रुमावलिः ।
तत्त्वज्ञतेव साम्येन, प्रशमेनेव सन्मुनिः ॥१०३३॥

विनेयो विनयेनेव, नयेनेव नरेश्वरः ।
धत्ते भावनया धर्मः, सर्वशोभां परां तथा ॥१०३४॥ युग्मम् ॥

दुर्मत्तचित्तमातङ्गसृणिः पापतमोऽर्करुक् ।
सिद्धिश्रीललनादूती, भावना भाव्यतां बुधैः ॥१०३५॥

कायक्लेशमकृत्वाऽपि, तपोऽतप्त्वाऽपि दुःसहम् ।
कूरगडुकवत् सोऽर्थसिद्धिं भावनयाऽऽप्नुयात् ॥१०३६॥

तथाहि शुद्धचारित्रपवित्रैः साधुभिर्वरे ।
क्वचिद् गच्छे मुनिः कश्चिन्, मासेनाऽपारयत् सदा ॥१०३७॥

अन्येद्युराश्रयात् पूर्णतपाः साधुः स पारणे ।
क्षुल्लकेन समं काले, निर्ययौ विजिहीर्षया ॥१०३८॥

वर्षावशात्तदा चाऽऽसन्, दर्दुर्यः पथि भूरिशः ।
एकां च क्षपकः साधुः, प्रमादेनाऽवधीत् पदा ॥१०३९॥

ऋजुहृत् क्षुल्लकश्चैनां, दृष्ट्वोचे 'महदद्य ते ।
मुने ! जातमघं पादाहतेर्यद्दर्दुरी मृता' ॥१०४०॥

अजीर्णं तपसः क्रोध, इति सत्यापयन् वचः ।
तपस्वी समुदीर्णक्रुत्, कम्पमानरदच्छदः ॥१०४१॥

---

१. भावनाविरहिताः ।

अङ्गुल्या दर्शयन् पूर्वमृता भेकीः पदे पदे ।
अभ्यधाद् 'रे ! मया जघ्ने, किमसावप्यसावपि' ॥१०४२॥ युग्मम् ॥

क्षुल्लकोऽक्षुद्रचित्तोऽथ, तूष्णीमासीदसीमधीः ।
सचेतना हि चेष्टन्ते, सर्वत्र समयोचितम् ॥१०४३॥

प्रतिक्रमणकाले तु, तदेनः क्षुल्लकेन सः ।
स्मारितो हृदये दीप्ततीव्ररोषहुताशनः ॥१०४४॥

'मिथ्यावादिन् ! किमद्यापि, तथैव परिजल्पसि' ।
इत्युक्त्वा धावितो हन्तुं, गृहीत्वा खेलमल्लकम् ॥१०४५॥ युग्मम् ॥

तीव्रक्रोधानसुमतः, कृत्याकृत्यविचारणा ।
समाश्रयति नो जातु, दुर्भगानिव कामिनी ॥१०४६॥

पीतमद्य इव क्रोधोद्धुरोऽरुणविलोचनः ।
भ्रष्टः सदध्वनो निन्द्यः, प्रपतेन्नरकावटे ॥१०४७॥

ततोऽन्तराले स्तम्भेन, स्खलितो भिन्नमस्तकः ।
मृत्वाऽरण्ये क्वचिद् दृष्टिविषाहीनां कुलेऽजनि ॥१०४८॥

कुले तत्र च प्राग्जन्मविराद्धश्रमणव्रताः ।
जातिस्मृतियुजः सर्वे, विद्यन्ते किल पन्नगाः ॥१०४९॥

दिवाऽस्मद्दृग्विषेणोच्चैः, प्राणिघातः स्म मा भवत् ।
इति ते रजनौ भ्रान्त्वा, प्रासुकाहारमाशिषुः ॥१०५०॥

सोऽपि क्षपकजीवो हि, निजं प्राच्यं जनुः स्मरन् ।
सज्ज्ञानगर्भवैराग्यसङ्गतो हृदि दध्यिवान् ॥१०५१॥

आः ! कीदृक्षमुदेति स्म, मम दुष्कर्म दारुणम् ।
नियंतं[1] क्षीयते कर्माऽनुपभुक्तं न जातुचित् ॥१०५२॥

जीव ! प्राप्याऽपि मानुष्यं, लब्ध्वाऽपि जिनशासनम् ।
चारित्रवानपि क्रोधाद्धिग् धिक् प्राप्तोऽसि दुर्गतिम् ॥१०५३॥

दुर्विपाकं क्रुधः श्रीमदर्हद्वाचा विदन्नपि ।
भवाब्धावन्धवज्जीव !, पेतिवाननसि हा वृथा ॥१०५४॥

इहाऽमुत्र च कोपोऽसौ, सौख्याम्भोधिघटोद्भवः[2] ।
निमित्तं सर्वदुःखानामामयानामपथ्यवत् ॥१०५५॥

हा दृष्टिविषनागत्वं, कोपादासेदिवानहम् ।
बहुप्राणविघातेन, दुर्गदुर्गतिकारणम् ॥१०५६॥

इति ध्यायन् दृष्टिविषोद्भूताङ्गिवधभीरुकः ।
दिवाचारं त्यजन् रात्रौ, भ्राम्यन् प्रासुकमाश सः ॥१०५७॥

समुल्लसितनिर्वेदं, मानसं तस्य बिभ्रतः ।
बिभरामास दुष्कर्मस्पर्द्धया तानवं तनुः ॥१०५८॥

इतश्च विपुलश्रीके, **श्रीवसन्तपुरे** पुरे ।
पुत्रोऽदश्यत नागेनाऽरिमर्दननरेशितुः ॥१०५९॥

विषं प्रसरदङ्गेऽस्य, च्छादयामास तत्क्षणम् ।
ज्ञानावरणकर्मेव, दुर्वारं हन्त चेतनाम् ॥१०६०॥

दुःखौघविह्वलेनाऽथ, नरनाथेन सत्वरम् ।
प्रयुक्ता मान्त्रिकास्तत्रोपचारान् विविधान् व्यधुः ॥१०६१॥

---

१. बद्धम् । २. सुखसागरपाने अगस्तिसदृशः ।

मन्त्र-यन्त्रौषधादीनि, तत्र न्यस्तानि मोघताम् ।
अवापुरूषरक्षोणीसमारोपितबीजवत् ॥१०६२॥

तदेकनन्दनो भूपः, क्षीणोपायसमुच्चयः ।
[स] वज्राहतवत् क्ष्मायां, पपात गतचेतनः ॥१०६३॥

क्षणेन चेतनां लब्ध्वाऽघोषयन्नगरेऽखिले ।
विषवेगापहर्त्रे भो !, राज्यार्द्धं प्रददाम्यदः ॥१०६४॥

तच्छ्रुत्वा मान्त्रिकः कश्चिद्, भूपाभ्यर्ण्णमुपागतः ।
जगावमारिं नागानां, विधापय विभो ! पुरे' ॥१०६५॥

राज्ञा तथाकृते सोऽपि, लिखित्वा मण्डलद्वयीम् ।
आचकर्षोभयान् सर्पान्, गन्धनाऽगन्धनाभिधान् ॥१०६६॥

सर्वदिग्भ्यः समाजग्मुर्मन्त्रिकृष्टाः फणाभृतः ।
अचिन्त्यो हि मणी-मन्त्रौषधीनां महिमाऽद्भुतः ॥१०६७॥

मान्त्रिकः स्माह 'भो नागा !, गन्धनाऽगन्धनाख्ययोः ।
यथोचितं मण्डलयोरवस्थानं विधीयताम्' ॥१०६८॥

शासनं[1] मान्त्रिकस्यैतत्तैरकारि तथैव हि ।
महामहिमसाराणामाज्ञा कैर्नाम लङ्घ्यते ॥१०६९॥

कुमारं मारसङ्काशं[2], यो ददंश दुरात्मकः ।
तं विनाऽन्ये यथास्थानं, यान्तु सर्वे सरीसृपाः[3] ॥१०७०॥

इति मान्त्रिकवाचाऽस्थादगन्धनकुलोद्भवः ।
एकः सागा महानागः, परे जग्मुर्यथागतम् ॥१०७१॥

---

१. आज्ञा । २. कामदेवसमानम् । ३. सर्पाः ।

चितां कीनाशजिह्वाभज्वालामालासमाकुलाम् ।
विरचय्याऽवदद्दन्दशूकं तं मान्त्रिकाग्रणीः ॥१०७२॥

'जिजीविषुर्यदि तदाऽमुष्याऽङ्गाद् विषमापिब ।
नो चेदेतां चितां वेगात्, प्रविश प्राणनिःस्पृहः' ॥१०७३॥

अपिपासुर्विषं वान्तं, सोऽगन्धनभुजङ्गमः ।
चितां विवेश मन्त्रेणाऽऽकुलः कलितसत्कुलः ॥१०७४॥

कुलोद्भवा वरं प्राणपरिहारं प्रकुर्वते ।
भुञ्जते विषयान् वान्तान्न त्वगन्धननागवत् ॥१०७५॥

विषग्रस्तसमस्ताङ्गे, कुमारेऽथ मृतिं गते ।
कोपाटोपं धराधीशो, जातौ कुण्डलिनां दधौ ॥१०७६॥

'समानेष्यति यः कश्चित्, सर्पतुण्डं ममाऽग्रतः ।
तस्मै दास्यामि दीनारमिति' लोकान् जजल्प च ॥१०७७॥

प्रकृत्या हिंसको लोको, विशेषाल्लोभतः पुनः ।
प्रावृतन्नागहिंसायामज्ञानं हा शरीरिणाम् ॥१०७८॥

दयाहीनेष्वहीनेवं, घ्नत्सु कञ्चन मान्त्रिकः ।
तदेव दृग्विषव्यालवनं भ्राम्यन् समाययौ ॥१०७९॥

बह्वीस्तत्रौरगीर्वीक्ष्य, रेखास्तुष्टमना भृशम् ।
प्रापोरगबिलद्वाराण्याशु रेखाऽनुसारतः ॥१०८०॥

तेषु चाऽमुञ्चदाकृष्टिनिमित्तं किञ्चिदौषधम् ।
महाप्रभावेण तेन द्राग्, व्याकुला निर्ययुश्च ते ॥१०८१॥

शिरांसि निर्यतां तेषामच्छिनत् सोऽतिनिष्कृपः ।
क्षपकाहिबिलेऽमुञ्चत्, क्रमाच्चाऽऽकर्षणौषधम् ॥१०८२॥

मा प्रापन्मरणं म[द्]दृग्वीक्षणादेष कर्षकः ।
इत्यारभत निर्गन्तुं, सोऽहिः पुच्छेन सत्कृपः ॥१०८३॥

निर्गतं निर्गतं भोगभागं छिन्दति मान्त्रिके ।
भोगिराड् नो रुषो लेशमप्यतनुत मानसे ॥१०८४॥

आत्मन् ! भुङ्क्ष्व कृतं कर्म, नाऽकृतं ह्युपतिष्ठते ।
कोपं कुर्वन् पुरावत्त्वं, मा स्म पप्तः कुयोनिषु ॥१०८५॥

प्राणापहारिणं चैनं, दुष्कर्मव्यूहभेदकम् ।
वयस्यत्वेन मन्यस्व, भजस्व शरणं जिनम् ॥१०८६॥

एवं ध्यानपरः स्वांहो, गर्हन् मृत्वाऽवतीर्णवान् ।
अरिमर्द्दनभूपालपत्न्या गर्भं भुजङ्गमः ॥१०८७॥ विशेषकम् ॥

नागाधिष्ठातृदेव्याऽथ, प्रोचे 'भूप ! कुकर्म किम् ।
प्रारब्धं नरकक्रोडवासकारणमेतकत् ॥१०८८॥

भविष्यति तनूजस्ते, दयालुः शमवान्नयी ।
मेधावी विक्रमी सर्वलक्षणाक्षुण्णविग्रहः ॥१०८९॥

मारिं वारय सर्पाणां, रोषं मुञ्च स्वमानसात् ।
दुःखाम्भोधौ निजात्मानं, मा क्षैप्सीः क्षितिपुङ्गव !' ॥१०९०॥

अथ भूमानघाद् भीमसर्पघातान्न्यवर्त्तत ।
पुपोष राज्ञी गर्भं च, शस्तसम्पूर्णदोहदा ॥१०९१॥

सुदिने चाऽजनि सुतः, क्ष्मापदृक्कुमुदैणभृत् ।
सान्वयां **नागचन्द्रा**ख्यां, दधच्चाऽवर्द्धताऽन्वहम् ॥१०९२॥

आजन्म शमपाथोधिर्बुद्धिव्रततिभूरुहः ।
श्रीखण्डशीतलवचाः, कस्याऽसौ नाहरन्मनः ? ॥१०९३॥

जिनागमसुधास्वादसक्तः प्रव्यक्तचेतनः ।
मेने भोगानयं भोगिभोगानिव सुदारुणान् ॥१०९४॥

तस्य सद्गुरुबाहुल्यासेवनाद् वृद्धिमासदत् ।
चित्तालवाले वैराग्यद्रुमो मोक्षफलप्रदः ॥१०९५॥

अत्याग्रहादेव पुत्रोऽप्यथाऽसौ पितरौ निजौ ।
अनुज्ञाप्य गुरोः पादमूले व्रतधुरां दधौ ॥१०९६॥

पूर्वतिर्यग्भववशात्, क्षुधाक्रान्तः प्रतिक्षणम् ।
आरभ्योदयतो भानोरस्तं यावदभुक्त सः ॥१०९७॥

जना मुहुर्मुहुः कूरं, भुञ्जानं क्रूरतोज्झितम् ।
जजल्पुरल्पकर्माणं, **कूरगडुक** इत्यमुम् ॥१०९८॥

आददानो विशुद्धात्मा, शुद्धमाहारमन्वहम् ।
कर्म निर्जरयामास, निर्ममो मुनिराडयम् ॥१०९९॥

एकद्वित्रिचतुर्मासोपवासाऽकृतपारणाः ।
चत्वारः समजायन्त, गच्छे तस्मिंस्तपस्विनः ॥११००॥

स क्षुल्लकमुनिस्तेषां, प्रशंसन्नब्धुतं तपः ।
निर्मायो निर्ममे वैयावृत्त्यमत्यन्तशुद्धहृत् ॥११०१॥

स्वं निनिन्देति चाऽजस्रं, धिगहं सत्त्ववर्जितः ।
मन्दभाग्योऽसकृद् भुञ्जे, क्व लप्स्ये निर्वृतिश्रियम् ? ॥११०२॥

अन्येद्युस्तेषु पश्यत्सु, क्षपकेषु कृताञ्जलिः ।
ननाम शासनसुरी, पूर्वं तं क्षुल्लकं मुनिम् ॥११०३॥

चतुर्मासोपवासोग्रतपसा पश्यताऽथ तत् ।
साक्षेपं भ्रकुटीभीष्मचक्षुषाऽवादि देवता ॥११०४॥

'कथं विवेकवैकल्यं, रे रे पण्डितमानिनि ! ।
त्वमप्येवं कलयसि, नमन्ती धान्यकीटकम् ॥११०५॥

असिधारोपमोदग्रतपसोऽस्मान् विहाय किम् ।
ललज्जिषेऽपि नो एनं, वन्दमाना जडाशये !' ॥११०६॥

देव्यूचे 'भावतपसा, युष्माकं पश्यतामपि ।
पूज्योऽयं जगत्यां भावी, तत् कोपो मा विधीयताम् ॥११०७॥

आहारपरिहारेण, प्रथितं द्रव्यतस्तपः ।
भावतस्तु तपस्तद्या, शमादिगुणपूर्णता ॥११०८॥

क्षुधापीडितदेहानां, दरिद्राणामपीह वै ।
तपो नास्ति ? द्रव्यतः किन्तु, न श्लाघ्यं तन्मनीषिभिः ॥११०९॥

किञ्चाऽनादौ भवेऽमुष्मिन्, परिभ्राम्यन्ननारतम् ।
द्रव्यक्षपकतां जन्तुरलब्धाऽनन्तशः किल ॥१११०॥

विवेकिनोऽपि यद् ब्रूथ, धान्यकीटक इत्यमुम् ।
मत्सरापूरितहृदां, तत्तपोहानिकृद्वचः ॥१११॥

उपवासः सदाऽप्यस्य, प्रासुकाहारभोजिनः ।
स्वशक्त्यैव जिनाधीशैस्तपश्च प्रतिपादितम् ॥१११२॥

तद् भावतपसा ज्येष्ठो, युष्माभिः शमवानयम् ।
भाव्यनुत्तरकल्याणः, स्वतो हीनः किमुच्यते ? ॥१११३॥

अन्यच्च केवलज्ञाने, जातेऽस्य प्रातरुज्ज्वले ।
वन्दारुसुरनाथैर्मे, नाऽवकाशो भविष्यति ॥१११४॥

स्वसेवावसरेऽमुष्मिन्, वन्देऽमुं तेन साधवः ! ।
प्रस्तावं वेद यो विश्वे, स एव स्वार्थसाधकः' ॥१११५॥

तन्निशम्य क्रुधाक्रान्ताः, श्रमणास्तेऽभ्यधुर्द्रुतम् ।
असावविरतो नन्तुं, युक्तोऽस्याः स्वसदृक्त्वतः ॥१११६॥

देव्यथो तस्य तेषां च, क्षान्तौ क्रोधे च निर्भरम् ।
विन्दानाऽनुपमेयत्वमन्तर्धत्ते स्म सत्वरम् ॥१११७॥

द्वितीयेऽह्नि प्रातराशं[1], गृहीत्वा क्षुल्लको मुनिः ।
आगत्याऽऽमन्त्रयामास, चतुर्मासोपवासिनम् ॥१११८॥

स तु कोपान्नितिष्ठेव, तपस्वी तस्य भाजने ।
मिथ्यादुष्कृतदानेनाऽक्षमयत् क्षुल्लकोऽपि तम् ॥१११९॥

एवमग्रेऽपि तान्यस्तनिष्ठ्यूतांस्त्रीन् परानपि ।
क्षुल्लकोऽक्षमयत् पादपद्मन्यस्तशिरा इति ॥११२०॥

धिग् धिग् मया प्रमादेन, नार्पितं खेलमात्रकम् ।
जातोऽस्मि वो महर्षीणामसमाधिनिबन्धनम् ॥११२१॥

ममाऽऽगः क्षम्यतामेतदित्युक्त्वा सततं शमी ।
तन्निष्ठ्यूतं समुद्वृत्य, भुञ्जानो भावनां दधौ ॥११२२॥

हहाऽहं पशुवद्बद्धलक्ष्योऽस्म्यन्नकृते सदा ।
एते च क्षपकास्तीव्रं, तप्यन्ते दुस्तपं तपः ॥११२३॥

उद्वेगकारिणोऽजस्रं, ममैतेषां तपस्विनाम् ।
दुष्कर्मभ्यः कथङ्कारं, मुक्तिः खलु भविष्यति ॥११२४॥

मिथ्या मे दुष्कृतं भूयात्तदमुष्य महागसः ।
यतीश्वराणामुद्वेगं, विधास्यामि पुनर्न हि ॥११२५॥

---

१. प्रभातभोजनम् ।

जैनलिङ्गधरस्यापि, ममाऽविरतियोगतः ।
गमिष्यति भवो वृद्धिं, कौमुदीसङ्गतोऽब्धिवत् ॥११२६॥

साधवोऽमी अहमपि, साधुः ख्यातिरियं जने ।
महानस्ति विशेषस्तु, महीध्र-परमाणुवत् ॥११२७॥

इति भावनया साधुधुर्यः स क्षणमात्रतः ।
क्षपकश्रेणिमारुह्य, घातिकर्मक्षयं व्यधात् ॥११२८॥

कलयामास च ज्ञानं, लोकालोकप्रकाशकम् ।
अनन्तद्रव्यपर्यायविषयं केवलाह्वयम् ॥११२९॥

सुरभिः प्रववौ वायुर्विश्वविश्वप्रमोदकृत् ।
देवा गन्धोदकं पुष्पव्रातं च ववृषुर्जवात् ॥११३०॥

सौवर्णकमले दिव्ये, दिविषद्भिर्विनिर्मिते ।
उपविश्य सुधादेश्यां, देशनां विदधे मुनिः ॥११३१॥

असकृद्भोजिनोऽप्यस्य, साधोर्ऋद्धिः किमीदृशी ? ।
इति संशयशल्यं स, प्राक्रंस्तोद्धर्त्तुमङ्गिनाम् ॥११३२॥

तथाहि –

एकैकभावना भो भोः !, सर्वसिद्धिनिबन्धनम् ।
दान-शील-तपांसि स्युर्निष्फलान्येव यां विना ॥११३३॥

प्राणिनोऽमूमनारुह्य, भावनामधिरोहणी[म्] ।
मध्यमध्यासते सिद्धिसौधस्य न कदाचन ॥११३४॥

सा च भव्यैर्भावनीया, भेदैर्द्वादशभिः सदा ।
निविरीसतमःस्तोमापहर्त्री भानुमूर्त्तिवत् ॥११३५॥

—● द्वादशभावनावर्णनम् ●—

तद्यथा –

वस्तुष्वनित्यतां ध्यायेदत्राणं चैकतां तथा ।
अन्यत्वमथ संसारमशौचं लोकमेव च ॥११३६॥

कर्मणामाश्रवं शश्वत्, संवरं निर्जरां तथा ।
उत्तमांश्च गुणान् बोधिदुर्लभत्वं तथैव च ॥११३७॥ युग्मम् ॥

इन्द्रजाले क्षितं वस्तु, दृष्टमात्रं विनश्यति ।
यथा तथा सुहृद्बन्धु-देह-श्री-यौवनादिकम् ॥११३८॥

स्वप्नसम्प्राप्तसाम्राज्यो, यथा कश्चित् प्रमोदते ।
तथैश्वर्यमिदं लब्ध्वा, मुधा माद्यति बालिशः ॥११३९॥

किं दृप्यति श्रियं प्राप्य, तारुण्यमदमेदुरः ।
यत् पञ्चाहात् परं न श्रीर्न तारुण्यं न चासकौ ॥११४०॥

एवं समस्तवस्तूनां, ध्यायन्नश्वरतां सदा ।
निर्ममो व्रियते मुक्तिश्रिया बद्धानुरागया ॥११४१॥ [अनित्यता-१]

अङ्गिनां जन्ममरणरागौघवशवर्त्तिनाम् ।
समस्ति कोऽपि न त्राता, करुणं क्रन्दतामपि ॥११४२॥

अश्रान्तं विविधक्लेशान्, विषह्य श्रीरुपार्जिता ।
मृत्युना ह्रियमाणं स्वस्वामिनं पाति नो मनाक् ॥११४३॥

कालेऽनादावनन्ते च, चक्रि-विष्णु-बलैरपि ।
ना कोऽपि त्रायतेऽत्रायि, त्रास्यते वाऽपि मृत्युतः ॥११४४॥

प्रहीणजन्ममरणमेकमर्हन्तमन्वहम् ।
शरण्यं शरणं कुर्वन्, मुच्यते सर्वभीतितः ॥११४५॥

एवं विशुद्धहृदयः, कश्चिदासन्नसिद्धिकः ।
ध्यायत्यशरणं भीतो, भवकान्तारचारतः ॥११४६॥ [अशरणम्-२]

एकः करोति कर्माणि, भुङ्क्ते देही तथैककः ।
म्रियते जायते चैकः, सखा कोऽपि न कुत्रचित् ॥११४७॥

स्वं स्वं कर्मफलं सर्वो, भुङ्क्ते यत् संसृताविह ।
ततः कः स्वजनः कस्य, कस्य वा कः परो भवेत् ॥११४८॥

स्वजनानां कृते पापान्यनेकानि करोति यः ।
तस्य हा सु[ख]-दुःखौघविभागी स्यान्न कश्चन ॥११४९॥

एकत्वं भावयन्नेवं, विरतः पापकर्मणः ।
रतश्चात्महिते कर्मपञ्जरान्मुच्यतेऽङ्गवान् ॥११५०॥ [एकत्वम्-३]

अन्यत् कुटुम्बमन्या च, लक्ष्मीरन्यदिदं वपुः ।
जन्तुर्न केनचिद्यस्मादमुत्रैषोऽनुगम्यते ॥११५१॥

मातरः पितरो भार्यास्तनुजाः स्वजनास्तथा ।
सम्प्राप्ताः कति नो कर्मवशतो भ्राम्यताऽङ्गिना ? ॥११५२॥

प्रदोषे पक्षिवद् वृक्षे, देशकुट्यां च पान्थवत् ।
तेषां योगः समस्तोऽपि, वियोगान्तो ध्रुवं भवे ॥११५३॥

इत्यन्यत्वं स्मरन् रागद्वेषोज्झितमतिः सदा ।
प्राणी संसारपर्यन्तं, तनुते स्वल्पकालतः ॥११५४॥ [अन्यत्वम्-४]

जायते नारकस्तिर्यङ्, मनुष्यो निर्जरोऽपि च ।
जन्तुः कर्मानुसारेण, संसारे सुखदुःखभाक् ॥११५५॥

तत्र नारकतां प्राप्तो, बीभत्सः श्यामविग्रहः ।
निमेषमात्रमपि नो, शरीरी लभते सुखम् ॥११५६॥

परमाधार्मिकैः प्राच्यं, स्मारयित्वाऽघमुल्वणम् ।
हन्यते बध्यते चासौ, छिद्यते भिद्यतेऽपि च ॥११५७॥

छिन्नभिन्नोऽपि दग्धोऽपि, त्रुटितोऽपि च नारकः ।
सूतवन् मिलति प्राच्यक्रूरकर्मविपाकतः ॥११५८॥

मर्त्तुकामोऽपि भोग्यायुर्वशान्न म्रियतेऽसकौ ।
वैरं विकल्प्याऽसदपि, सार्द्धं चान्येन युध्यते ॥११५९॥

क्षेत्रस्वभावसम्पन्नशीतोष्णादिप्रपीडितः ।
प्रभूतं समयं पापफलं भुञ्जीत नारकः ॥११६०॥

प्राप्तः स्थावरतिर्यक्त्वे, पृथ्व्यादिषु जनिं पुनः ।
शरीरी दुःखमत्यन्तं, सहते खननादिभिः ॥११६१॥

निगोदेष्वङ्गवान् क्षुल्लभवग्रहणयोगतः ।
वारान् सप्तदशैकस्मिन्नुच्छ्वासे म्रियते हहा ॥११६२॥

कृमि-मत्कुण-दंशादिविकलेन्द्रियतां गतः ।
विमर्दनाद्यैः सततं, मरणं लभतेऽसुमान् ॥११६३॥

अव्यक्तचेतनो धिग् धिग्, देहवान् विकलेन्द्रियः ।
व्यर्थं शब्दायते याति, तिष्ठत्यपि निषीदति ॥११६४॥

पञ्चेन्द्रियेषु तिर्यक्षूत्पन्नः शीतातपादिभिः ।
कशारादिप्रहारैश्च, दुःखमाप्नोति दारुणम् ॥११६५॥

जलस्थलखचारीह, पञ्चाक्षः पिशिताशिभिः ।
दाश-व्याध-शाकुनिकैराहारार्थं निबर्ह्यते ॥११६६॥

मानुषत्वेऽप्यहो ! गर्भे, शैशवे यौवने तथा ।
वार्द्धकेऽपि च नो सौख्यं, चिन्त्यमानं निरीक्ष्यते ॥११६७॥

प्रतिरोमाग्निवर्णाभिः, सूचिभिर्भिन्नभूघनः ।
यदुःखं लभते जन्तुस्तद् गर्भेऽष्टगुणं मतम् ॥११६८॥

योनियन्त्राद्विनिष्क्रान्तिक्षणे दुःखं लभेत यत् ।
तदनन्तगुणं दुःखाद्, गर्भवासभवादपि ॥११६९॥

क्षुधा-तृष्णा-गदाक्रान्तः, स्वं ज्ञापयितुमक्षमः ।
शैशवे केवलं रोदित्यम्बाऽऽस्यन्यस्तलोचनः ॥११७०॥

द्रव्यार्जनकृते नानोपायान् कुर्वंश्च यौवने ।
जहाति हन्त दूरेण, कृत्याकृत्यविवेचनम् ॥११७१॥

केवलं कामिनीवक्त्रविलोकनविलोलधीः ।
शिक्षां गुरुजनस्याऽपि, मन्यते कालकूटवत् ॥११७२॥

वार्द्धके क्षीणनिःशेषशक्तिः कम्प्रकरांह्रिकः ।
वातभग्नवपुः शोच्यो, बन्धूनामपि जायते ॥११७३॥

मालतीकुसुमप्रख्यमूर्द्धजो गलिताङ्गकः ।
दन्तोज्झिताननो वृद्धो, न धर्मे कुरुते रतिम् ॥११७४॥

अनन्तसौख्यसदनं, गीर्वाणत्वं गतोऽपि सन् ।
पश्यन् स्वतोऽधिकामन्यऋद्धिं बाढं विषीदति ॥११७५॥

हरन् मूढाशयस्तत्र, परकीयां स्त्रियं श्रियम् ।
आहतः पविनेन्द्रेण, षण्मासान् सहते व्यथाम् ॥११७६॥

तां विमानश्रियं पश्यंश्चिन्तयंश्चान्यतश्च्युतिम् ।
यां प्राप्नोत्यधृतिं दीनो, वेद सर्वविदेव ताम् ॥११७७॥

संसारः स्वस्य दोषौघमेवं भावयतो जनात् ।
प्रकामं लज्जित इवाऽपसरत्येव दूरतः ॥११७८॥ [संसारः-५]

शुक्रशोणितभूर्मातृजग्धान्नरससर्जितः[१] ।
नवस्रोतःस्रवद्विस्रसः कायः कथं शुचिः ? ॥११७९॥

सुस्वादुन्यपि भोज्यानि, कल्पन्ते यत्र वर्चसे[२] ।
प्रस्रवाय च पानानि, किं शौचं तत्र वर्ष्मणि ? ॥११८०॥

अशौचं भावयन्नेवं, भव्यसत्त्वो महामतिः ।
कायसंस्कारविरतोऽप्याकाङ्क्षः स्याच्छिवश्रियः ॥११८१॥ [अशौचम्-६]

अधोमुखन्यस्तमहाशरावोपरि संस्थितम् ।
शरावसम्पुटं ह्रस्वमनुकुर्वन् महाननः ॥११८२॥

ऊर्द्ध्वाधस्तिर्यग्भेदेन, बिभ्राणो भुवनत्रयीम् ।
लोको धर्मादिभिर्द्रव्यैः, प्रपूर्णश्चिन्त्यते बुधैः ॥११८३॥ युग्मम् ॥

विमाननरकद्वीपपारावारादिगोचरम् ।
संस्थानं चिन्तयेल्लोके, धर्मध्यानविधानधीः ॥११८४॥

---

१. 'मातृजश्चरन्नरसर्वार्जतः' इति पु.प्रे. । २. विष्ठाय ।

लोकेऽस्मिन् शत्रुतां मित्रं, शत्रुश्चाप्नोति मित्रताम् ।
पुत्रत्वं जनकः पुत्रो, जनकत्वमपि स्पृशेत् ॥११८५॥

दयिता स्वसृतां याति, दयितात्वमपि स्वसा ।
इत्यादि च लोकतत्त्वं, भावयेद् भव[भ]ग्नधीः ॥११८६॥

इत्थं स्मरति यो लोकतत्त्वं तत्त्वविचारकः ।
वामपादं प्रदत्ते स, भावारीणां गले द्रुतम् ॥११८७॥ [लोकः-७]

अङ्गी प्रतिक्षणं योग-कषाय-विषयादिभिः ।
कर्माऽऽस्रवति कैवल्यावाप्तिविघ्ननिबन्धनम् ॥११८८॥

कषायादिविषद्रूणां, कटुकं फलमन्वहम् ।
जानन्नपि जनो मूढो, धिक् तानेव निषेवते ॥११८९॥

एवं विततवैराग्यो, रङ्गदास्रवभावनः ।
सर्वक्लेशकुरङ्गेषु, क्रमात् पञ्चाननायते ॥११९०॥ [आश्रवः-८]

मनो-वाक्काययोगानां, कर्माश्रवविधायिनाम् ।
तिसृभिर्गुप्तिभी रोधं, विदध्याद्विबुधाग्रणीः ॥११९१॥

कषाया विनिगृह्यन्ते, महोदग्राः क्रुदादयः ।
क्षमादिभिर्गुणैर्मन्त्रैः, सुप्रयुक्तैरिवोरगाः ॥११९२॥

जिनोपदिष्टचारित्रपरिपालनतत्परैः ।
विषया विनिरुध्यन्ते, नयवद्भिरिवाऽनयाः ॥११९३॥

मार्गबाधकदोषाणां, संस्मरन्निति संवरम् ।
न शक्यः कर्मभिः स्प्रष्टुमप्यर्क इव कौशिकैः ॥११९४॥ [संवरः-९]

कर्मणां निर्जरा तीव्रतपसा स्याच्छरीरिणाम् ।
मार्त्तण्डकिरणौघेन, प्रलयस्तमसामिव ॥११९५॥

बाह्याभ्यन्तरभेदेन, कुर्वाणो द्विविधं तपः ।
द्विधा करोति हृदयं, महामोहरिपोः प्रधीः ॥११९६॥

अनशनमौनोदर्यं, वृत्तिसङ्क्षेप-लीनते ।
रसत्यागो वपुःक्लेशः, स्याद् बाह्यं षड्विधं तपः ॥११९७॥

प्रायश्चित्तं तथोत्सर्गः, सद्ध्यानं विनयोऽपि च ।
स्वाध्यायो वैयावृत्त्यं चेत्येतत् षोढाऽऽन्तरं तपः ॥११९८॥

तपोविभावसुर्ज्ञानपवनप्रेरितोऽधिकम् [१] ।
दीप्तः करोति संसारकान्तारं भस्मसात् क्षणात् ॥११९९॥

तपसा कृशयन्नात्मवर्ष्माऽमर्षविवर्जितः ।
कृशयत्येव दुष्कर्म, सत्त्वः सत्सत्त्वशेवधिः ॥१२००॥

सज्ज्ञानामृतकासारो, निर्जराभावनामिति ।
भावयन्निर्जरस्वामिनम्यतां लभते कृती ॥१२०१॥ [निर्जरा-१०]

नारीं वारीसमां मत्वा, त्यक्त्वा च नरकुञ्जराः ।
येऽर्हन्मते वने स्वैरं, रमन्ते नौमि तान् मुदा ॥१२०२॥

गुर्वास्यकुण्डसम्भूतां, जरामृत्युनिवृत्तये ।
ये धयन्त्यागमसुधां, त एव श्लाघ्यताजुषः ॥१२०३॥

संसारचारकान्मुक्तिमिच्छवोऽर्हन्तवेदिताम् [२] ।
क्रियां कुर्वन्ति ये नौमि, तान्निर्ग्रन्थशिरोमणीन् ॥१२०४॥

---

१. अग्निः । २. अर्हत्कथिताम् ।

तारुण्यभीषणारण्यवर्त्तिनो मुषिता न ये ।
हृषीकतस्करैर्दुष्टैस्तान् स्तुवे सत्त्वशालिनः ॥१२०५॥

इत्युत्तमगुणांश्चित्ते, चिन्तयंश्चेतनान्वितः ।
तैरेवाऽऽश्रीयते प्रेम्णा, सुहृद्भिरिव मित्रयुः ॥१२०६॥ [उत्तमगुणः-११]

सुलभं सार्वभौमत्वं, सुलभा नाकनाथता ।
अस्मिन् संसारपाथोधौ, बोधिरत्नं तु दुर्लभम् ॥१२०७॥

तथाहि –

पुद्गलानां परावर्त्ताननन्तान् संसृताविह ।
मिथ्यात्वप्रत्ययं जीवा, भ्रमणं तन्वतेऽन्वहम् ॥१२०८॥

यथाप्रवृत्तकरणात्, सप्तानां कर्मणां स्थितौ ।
अन्तर्वार्द्धि[कोटि]कोटिशेषायां सञ्जिजन्तवः ॥१२०९॥

रागद्वेषपरीणामरूपं दृढतरं किल ।
दुरुच्छेदं प्राप्नुवन्ति, ग्रन्थिं पूर्वमपाटितम् ॥१२१०॥ युग्मम् ॥

भाविभद्रतरः कश्चिदपूर्वकरणेन तम् ।
भित्त्वाऽनिवृत्तिकरणं, प्रविष्टः शुध्यमानकः ॥१२११॥

उदीर्णे मिथ्यात्वे क्षीणेऽनुदीर्णे शान्तिभाजि च ।
प्राप्नोत्यन्तर[कर]णाद्, बोधिमत्यन्तदुर्लभाम् ॥१२१२॥ युग्मम् ॥

ग्रन्थिदेशमपि प्राप्ता, ग्रन्थिभेदाऽक्षमाः परे ।
सङ्क्लेशाद् भूय उत्कृष्टां, स्थितिं बध्नन्ति कर्मणाम् ॥१२१३॥

अनन्तशो ग्रन्थिदेशमभव्या अपि लेभिरे ।
तत्पाटनं तु निर्मातुं, न शक्तास्ते कदाचन ॥१२१४॥

चारित्रमपि सम्प्राप्ता, अभव्या बोधिवर्जिताः ।
आग्रैवेयकमुत्पादं, लभन्ते न तु निर्वृतिम् ॥१२१५॥

सर्वे भावाः प्राप्तपूर्वाः, सर्वजीवैरनन्तशः ।
नाप्ता तु जातुचिद् बोधिर्भवभ्रान्तिविलोकनात् ॥१२१६॥

सम्प्राप्तबोधयो जीवा, विरक्ता भीषणाद् भवात् ।
विमुक्तममता मुक्तिमार्गमेव भजन्ति वै ॥१२१७॥

सम्प्राप्तं नाशयन् बोधिरत्नमीप्सुरनागतम् ।
प्रमादी हा ! कथङ्कारं, पुनस्तल्लप्स्यते जडः ॥१२१८॥

एवं स्वचेतसि ध्यायन्, बोधेर्दुर्लभतां भृशम् ।
विप्रमादपङ्कमग्नं, स्वमुद्धरत्येकबुद्धिमान् ॥१२१९॥ [बोधिः-१२]

इत्थं द्वादशभेदेयं, भावना भाविता बुधैः ।
क्लेशलेशं विनाऽप्येकक्षणान्नयति निर्वृतिम् ॥१२२०॥

इति केवलिनस्तस्य, देशनां मोहनाशिनीम् ।
श्रुत्वा प्रवव्रजुः केऽपि, श्राद्धत्वं केऽपि शिश्रियुः ॥१२२१॥

त[त]श्च सा सुरी जैनी, क्षपकांश्चतुरोऽपि तान् ।
उवाच 'स्वात्मनश्चास्य, चान्तरं पश्यतर्षयः !' ॥१२२२॥

तेऽथ पश्चात्तापपरा, रङ्गद्वैराग्यबन्धुराः ।
संसारसिन्धुतरणिं, चिन्तां चक्रुरिमां समाम् ॥१२२३॥

सर्वज्ञशासनाभिज्ञैरप्यज्ञैरिव वैरिणाम् ।
अवकाशः कषायाणामस्माभिर्धिग् ददे हृदि ॥१२२४॥

यवीयानप्यसौ ज्यायान्, क्षमयैव व्यराजत ।
ज्यायांसोऽपि यवीयांसः, कोपाटोपाद् वयं पुनः ॥१२२५॥

कोपोऽनेन विजिग्ये यस्तेन चेद्विजिता वयम् ।
तदस्माभिः कथं नाम, काङ्क्ष्यते गौरवं वृथा ॥१२२६॥

हीलितः क्रोधविधुरैरस्मकाभिरसौ शिशुः ।
सहमानः शमावासो, वासवाभ्यर्च्यतां ययौ ॥१२२७॥

इति भावयतां तेषामपि ज्ञानमभूद्वरम् ।
भावनाकामगौः सर्वकार्यसिद्धिकरी खलु ॥१२२८॥

ततः पञ्चाऽपि भव्यौघं, सुचिरं प्रतिबोध्य ते ।
सिद्धिनारीपरीरम्भं, चक्रिरे चिरकाङ्क्षितम् ॥१२२९॥

अतन्वतस्तन्वतां च, तस्य तेषां च सत्तपः ।
केवला भावनैवाऽऽसीत्, केवलज्ञानकारणम् ॥१२३०॥

वैरादीन् प्रत्यनीकान् स्फुरदतुलबलान् क्लेशकोटिप्रदांश्चेज्-
जित्वा सत्त्वा[द]तर्का[द]भिलषसि यशस्तारपिण्डावदातम् ।
प्रेक्षावन्मुख्य ! बाढं जिनवरसमयस्फारशाणाधिरोपात्,
तीव्रां पार्श्वे कृपाणीं कुरु विमलतरां तर्हि सद्भावनाख्याम् ॥१२३१॥

[स्रग्धरावृत्तम्]

—● भावनायां कूरगडुकमुनिकथा । ग्रं. २०१ ●—

अमुं चतुर्विधं धर्मं, श्रीजिनोक्तं जनेश्वर ! ।
आराध्य स्वर्गसिद्धिश्रीसङ्गिनः स्युः शरीरिणः ॥१२३२॥

यथा देवेषु देवेन्द्रश्चक्रवर्त्ती नरेषु च ।
वृक्षेषु कल्पविटपी, तपनश्च प्रतापिषु ॥१२३३॥

गुणेषु सर्वेष्वौचित्यं, भूधरेषु च मन्दरः ।
तथा सर्वेषु धर्मेषु, जैनो धर्मः प्रशस्यते ॥१२३४॥

इति सचिवमुखाब्जोद्भूतमत्यन्तसारं,
वचनरसमुदारं भूपमुख्या निपीय ।
अलिन इव बभूवुर्बाढमानन्दपूर्णाः,
प्रतिकलमतुलोद्यद्विस्मयास्तुष्टुवुश्च ॥१२३५॥ [मालिनीवृत्तम्]

इति श्रीपद्मप्रभाचार्यचरणराजीवचञ्चरीकश्रीदेवानन्दसूरिविरचिते **श्रीअजितप्रभुचरिते** आनन्दाङ्के महाकाव्ये **मङ्गलकलस-चम्पकमाला-नागकेतु-कूरगडुक**र्षिदृष्टान्ताविर्भावितफलदान-शील-तपो-भावनास्वरूप-चतुर्विधधर्मप्ररूपणो नाम प्रथमः सर्गः । ग्रन्थाग्रम् १२४२ अ. २४ पदस्था ।

• • •

द्वितीयः सर्गः

अथाऽजल्पद्धराधीशः, स्फुरद्दन्तद्युतिच्छलात् ।
अन्तःपरिणतं मूर्त्तमिव धर्मं प्रदर्शयन् ॥१॥

'मन्त्रिमुख्य ! प्रसादात्तेऽभूवं विच्छिन्नसंशयः ।
अज्ञासि धर्ममुन्मीलत्सम्यग्ज्ञानविलोचनः ॥२॥

त्वद्भारतीसुधापूरे, [ये] तन्वन्त्याप्लवं जनाः ।
तेषां भवदवोदग्रतापो निर्वाति निश्चितम् ॥३॥

मन्ये त्वत्तः परो विश्वे, न कश्चित् करुणाकरः ।
न वाग्मी न च शास्त्रज्ञो, न प्राज्ञो न हितावहः ॥४॥

निष्कलङ्कं धर्मतत्त्वं, वक्तुं कस्त्वां विना क्षमः ? ।
नैशं तमोऽतिनिचितं, को भिनत्त्यपरो रवेः' ॥५॥

सचिवोऽवोच[त] ततः, 'सम्पूर्णं सुकृतक्रमम् ।
वक्तुं मन्दमतिः शक्तः, क्ष्मापते ! मादृशः कथम् ? ॥६॥

सर्वसङ्गपरित्यक्ताः, सदाभ्यस्तजिनागमाः ।
निर्ममा निरहङ्कारा, निर्विकारा भवन्ति ये ॥७॥

त एव गुरवः कृत्स्नं, धर्मतत्त्वं जिनोदितम् ।
बुध्यन्ते सम्यगाख्यान्ति, कुर्वते च निरन्तरम् ॥८॥

तेषां मुखारविन्दाद्यो, धर्मः क्ष्माप ! मया श्रुतः ।
तस्य लेशोऽयमम्भोधेर्वार्बिन्दुवददर्शि ते' ॥९॥

भूपोऽभाषिष्ट 'मन्त्रीश !, तान् गुरून् मम दर्शय ।
कृतार्थः स्यामहं धर्मं, श्रुत्वा तेषां मुखाद्यथा' ॥१०॥

आचष्ट सचिवाधीशो, 'मूर्त्ताः कल्पमहीरुहः ।
गुरवः समवाप्यन्ते, न ते सर्वत्र सर्वदा ॥११॥

पूर्वोपार्जितसत्कर्मोदयशालिभिरङ्गिभिः ।
तेषां सङ्गतिरासन्ने, कल्याणे खलु लभ्यते ॥१२॥

भवान् सद्धर्मनिर्माणस्फुरत्स्फारमनोरथः ।
लप्स्यते नियतं सङ्गं, गुरूणामपि भूपते !' ॥१३॥

इति मन्त्रिगिरा प्रीतस्तदादि वसुधाधवः ।
वर्द्धिष्णुमन्वहं चित्ते, बिभ्राणो धर्मवासनाम् ॥१४॥

सुमहत्स्वपि भोगेषु, वैराग्यं कलयन् परम् ।
आचकाङ्क्ष क्षुधा क्षाम, इवान्नं गुरुदर्शनम् ॥१५॥ युग्मम् ॥

चिन्तयन् वार्द्धिकल्लोलचपलां कमलां कृती ।
वदान्यग्रामणीरेषोऽवपत् क्षेत्रेषु सप्तसु ॥१६॥

शीलजीवितसंहारोरगीषु रमणीषु च ।
रतिं शिथिलयामास, भववासपराङ्मुखः ॥१७॥

प्रतिक्षणोल्लसच्छुद्धभावस्तपसि चान्वहम् ।
चक्रे दुष्कर्मजीमूतप्रचण्डपवने मनः ॥१८॥

अथाऽन्यदा निशाशेषे, प्रबुद्धस्य नरेशितुः ।
सद्भावना बभूवैवं, महानन्दपदप्रदा ॥१९॥

अस्मिन्नसारे संसारे, सारं धर्मः सतां मतः ।
न बुध्यन्ते न तन्वन्ति, तं तु मोहहताशयाः ॥२०॥

शैशवे चेतनाशून्यास्तारुण्ये गर्वपर्वताः ।
वार्द्धके शक्तिविकला, मुधा कालं नयन्त्यहो ! ॥२१॥

अङ्गुलीविवरभ्रस्यदञ्जल्युदकसोदरम् ।
जीवितं को विदन्नङ्गी, कोविदोऽत्र प्रमाद्यति ॥२२॥

नानाजन्मसहचरोऽनन्तदुःखखनिर्हहा ! ।
न कदापि प्रमादो मां, दुर्वयस्य इवोज्झति ॥२३॥

सर्वेषां विद्यते मृत्युर्नियतो जन्मिनामिह ।
जीर्यन्तं स्वं च पश्यन्ति, बुध्यन्ते न तु दुर्द्धियः ॥२४॥

लवसप्तमगीर्वाणा, अपि ते निपतन्ति चेत् ।
विद्वांसो ! विमृशन्त्वन्तस्तत् स्थेयत्वं [भ]वे भवेत् ? ॥२५॥

आपातमधुरैः प्रान्तविषमैर्विषयैरहो ! ।
विचेतना विनाश्यन्ते, किम्पाकद्रुफलैरिव ॥२६॥

दुःखास्पदमपि स्वात्मत्यागभीत इवाऽन्वहम् ।
संसारः क्षणिकैः सौख्यैः, प्रलोभयति देहिनः ॥२७॥

जात्यन्धा इव जायन्ते, जन्तवः श्रीमदाकुलाः ।
उन्मार्गगास्ततश्चाशु, पतन्ति नरकावटे ॥२८॥

स्वजनस्नेहनिगडाः, सुदुर्भेदा अमी खलु ।
चिरं संसारकारायां, स्थिरं जन्तुं वितन्वते ॥२९॥

अपारभवपाथोधिमहावर्त्तप्रपातिनाम् ।
कण्ठबद्धशिलाकारा, दारा इति विनिश्चयः ॥३०॥

जननी-जनक-भ्रातृ-बन्धवः प्रेमसिन्धवः ।
क्षमन्ते रक्षितुं नैव, पतन्तं दुर्गदुर्गतौ ॥३१॥

सञ्जातसुकृतद्रोहस्तन्मोहस्तेषु को मम ।
परलोकाध्वनीनं मामनुयास्यन्त्यमी न यत् ॥३२॥

ध्यात्वेति प्रातःकृत्यानि, विधाय विधिवन्नृपः ।
अलञ्चक्रे सदः सेवायातभूपालभूषितम् ॥३३॥

तदोद्यानभुवं प्राप्तं, नामतोऽरिन्दमं गुरुम् ।
कल्पद्रुमिव भूभर्त्रे, शशंसोद्यानपालकः ॥३४॥

हर्षोत्कर्षोल्लसद्रोमहर्षस्तं भूपतिस्ततः ।
स्वीयसर्वाङ्गसंसर्गिभूषणैः पर्यतोषयत् ॥३५॥

अथ नन्तुं मुनिं हस्तिमल्लाभं हस्तिनं श्रितः ।
छत्रचामरचारुश्रीः, सामन्तशतसंयुतः ॥३६॥

सिन्धुरैरङ्गनक्ष्माध्रबन्धुभिर्बन्धुरप्रभः ।
वाजिभिः स्वर्णपर्याणभाजिभिर्भ्राजितान्तिकः ॥३७॥

रथैर्व्यर्थीकृताऽस्वप्नविमानैः[१] परिवेष्टितः ।
प्रभुप्रसत्तिसोत्साहैः, पत्तिभिः सेवितोऽभितः ॥३८॥

वर्यमङ्गलतूर्याणां, निनदैर्नादयन् दिशः ।
सूतैस्तारस्वरं स्तूयमानोद्दामगुणावलिः ॥३९॥

सारशृङ्गारवारस्त्रीपरीतः प्रस्थितः क्षणात् ।
समवाप तदुद्यानं, नन्दनश्रीविडम्बकम् ॥४०॥ पञ्चभिः कुलकम् ॥

उत्तीर्य च गजस्कन्धाद्भवबन्धादिव द्रुतम् ।
सिद्धिद्रङ्गमिवोद्यानं, तद्विवेश विशांपतिः ॥४१॥

---

१. व्यर्थीकृताऽमरविमानैः ।

सोमसौम्याकृतिं धर्मरत्नरोहणभूधरम् ।
मोहान्धतमसादित्यं, गाम्भीर्यजितसागरम् ॥४२॥
कषायतीव्रदावाग्निविध्यापनघनाघनम् ।
रागद्वेषमहासर्पदर्पापहृतिकाश्यपि[म्] ॥४३॥
हितोपदेशपीयूषकुण्डं खण्डितमन्मथम् ।
प्रमादकरिशार्दूलं, पापामयमहौषधम् ॥४४॥
स्वाध्यायनिरतैः पापविरतैः सत्क्रियादृतैः ।
साधुभिर्वरिवस्यांहिं, तत्रादर्शच्च तं गुरुम् ॥४५॥ चतुर्भिः कलापकम् ॥
धर्मलाभाशिषा श्रेयोद्रुमालीबीजभूतया ।
आन[न्द]यद्वन्दमानं, नृपं गुरु**रिन्दमः** ॥४६॥
भूपोऽप्यवग्रहभुवं, मुक्त्वा स्मितमुखाम्बुजः ।
न्यषदद्विषद्वर्वसर्वस्वं संहरन् श्रिया ॥४७॥
अथो मुनिपतिर्भव्यसत्त्वानुग्रहकाम्यया ।
धर्मोपनिषदं प्रादुश्चकार करुणार्द्रहृत् ॥४८॥
'भो भव्या ! भाग्यतो लब्धे, दुर्लभे मानवे भवे ।
मोहं स्पष्टाऽघसन्दोहं, हित्वा धत्ताऽऽत्मनो हितम् ॥४९॥
लक्ष्म्यां बन्धुषु नारीषु, विषयेषु शरीरके ।
जडा मुह्यन्ति न त्वेषां, विन्दते दारुणान्तताम् ॥५०॥
बध्यते नैव बुद्ध्या श्री, रूपेण रमते न च ।
नाक्रम्यते विक्रमेण, न कुलेनाऽनुकुल्यते ॥५१॥

वार्द्धिकल्लोलसौभ्रात्रादिव लक्ष्मीश्चलाचला ।
एकत्र कुत्रचित् स्थाने, नैव बध्नात्यवस्थितिम् ॥५२॥

सस्नेहं लाल्यमानाऽपि, महायत्नेन धिग् रमा ।
रामेव स्वैरिणी जन्तून्, क्षणात् त्यक्त्वाऽपगच्छति ॥५३॥

दृष्टान्तं **श्रीपतेः** स्पष्टमाकर्णयत कोविदाः ! ।
इन्दिरामोहनाशाय, प्रोल्लासाय च सन्मतेः ॥५४॥

तथाहि–

समस्ति **भरते** भूरिभूरि[1]राशिभिरुज्ज्वलैः ।
दिदृक्षयाऽऽगतैर्मेरुशृङ्गैरिव विराजिता ॥५५॥

लक्ष्मीपतिकृतावासा, सरस्वन्मध्यभूरिव ।
दक्षिणस्यां दिशि पुरी, **मथुरा** नाम विश्रुता ॥५६॥ युग्मम् ॥

अशोकदत्तनामाऽऽसीद्वाणिजस्तत्र यः श्रियः ।
देशे देशे प्रापणेनाऽपूरि चापलकौतुकम् ॥५७॥

श्रेष्ठी **समृद्धिदत्ता**ख्योऽन्य**दोदङ्मथुरा**स्थितिः ।
व्यवसायवशात् प्राप, पण्यान्यादाय तां पुरीम् ॥५८॥

पण्यस्याऽऽदानदानाभ्या**मशोकस्य** सहाऽमुना ।
रवेः पद्मवनेनेव, सौहृदं समजायत ॥५९॥

उचितालापवस्त्रादिदानैः प्रेम तयोर्मिथः ।
दिनापरार्द्धच्छायेव, व्यवर्द्धिष्टाऽधिकाधिकम् ॥६०॥

तदजर्यं[2] स्थिरीकर्त्तुमिति तौ प्रत्यपद्यताम् ।
एकस्याऽङ्गजयाऽन्यस्य, विवाह्यो धर्ममङ्गजः ॥६१॥

---

१. स्वर्णराशिभिः । २. मित्रताम् ।

दिनैः कतिपयैर्मित्रमापृच्छ्याऽतुच्छसम्मदः ।
समृद्धिदत्तः स्वपुरीं, [प्रति] प्रातिष्ठतोन्मनाः ॥६२॥

क्षेमेण स्वपदं चाप्तो, वसुसम्भारभासुरः ।
स्वजनांस्तोषयामास, कोकानिव दिवाकरः ॥६३॥

परस्परं लेखहस्तान्, पुरुषान् सुहृदाविमौ ।
हृदयप्रीतये शश्वत्, प्रजिघ्यतुरयोजितौ ॥६४॥

अशोकदत्तोऽथान्येद्युः, सुते जाते स्वमन्दिरे ।
आनन्दिताशेषलोकं, महामहमचीकरत् ॥६५॥

पात्रापात्राविचारेणा**ऽशोकदत्त**स्तदा श्रियम् ।
ववर्षाऽऽषाढपर्जन्य, इवाखण्डमखण्डधीः ॥६६॥

श्रीदानप्रीणितैर्लोकैरयं बालः श्रियः पतिः ।
यदूचे तेन तातोऽपि, तं नाम्ना **श्रीपतिं** व्यधात् ॥६७॥

अशोकप्रहितैः पुंभिः, पुत्रोत्पत्त्या तया रयात् ।
वर्द्धितः **समृद्धिदत्त**श्चित्ते बाढममोदत ॥६८॥

अकारयन्महद्ध्यां च, स्वसद्मनि महामहम् ।
मित्र[स्य] हि सुतोत्पत्तिं, बुधाः स्वस्यैव मन्वते ॥६९॥

दध्यौ च धीरधीः पूर्वसुकृतैरद्भुतैर्मम ।
रमा रत्नाकरस्येव, जायते यदि नन्दना ॥७०॥

तत्तया मित्रपुत्रं तं, स्वीकृत्य पुरुषोत्तमम् ।
भजाम्येष कृतार्थत्वं, चिरकालेष्टसिद्धितः ॥७१॥

अथो **समृद्धिदत्तस्य**, गते काले कियत्यपि ।
तनया नयनानन्ददायिनी समजायत ॥७२॥

कृत्वा जन्ममहं पुत्र्याः, पुत्रस्येव प्रमोदतः ।
समृद्धिदत्तोऽशोकस्याऽजिज्ञपत् स्वनरैर्द्रुतम् ॥७३॥

तत**श्चाशोकदत्तो**ऽपि, दधन्मोदमनुत्तरम् ।
पुत्रीजन्ममहं स्वौकस्यातनोद् दानलालसः ॥७४॥

अध्यासीच्चाऽनया वध्वा, तनूजो मम भास्यति ।
कल्पद्रुः कल्पवल्ल्येव, कौमुद्येव सुधारुचिः ॥७५॥

ततस्तौ प्राक्प्रतिज्ञातपुत्रोद्वाहस्पृहां हृदि ।
सततं दधतौ वर्षान्, पञ्चषान् समतीयतुः ॥७६॥

कार्यमेवैषमः कार्यमेतदित्यात्ममानसे ।
निश्चित्यैतौ विवाहाय, चक्रतुः सज्जतामथ ॥७७॥

दूरे देशादपि तदा, प्रेष्य मङ्गलपत्रिकाः ।
आह्वायिताः समाजग्मुः, स्वजनाः सुन्दराशयाः ॥७८॥

अत्रान्तरे**ऽशोकदत्त**देहेऽजनि महाज्वरः ।
कुर्वाणो दारुणं दाहं, दूतः प्रेतपतेरिव ॥७९॥

उपचारैरुपकारैरिव नीचे विनिर्मितैः ।
ज्वरेऽस्मिन् कलयामासे, कलयाऽपि गुणो न हि ॥८०॥

पुत्रस्याऽऽवेद्य सर्वस्वं, निर्भीको मृत्युतः कृती ।
अशोकः शोकतो बन्धून्, सद्विवेको न्यवारयत् ॥८१॥

पर्यन्ताराधनां चाऽऽशु, कृत्वाऽद्रिस्थिरमानसः ।
विपद्य सुरलोलाक्षीलोचनानन्दकोऽजनि ॥८२॥

चक्रन्दुर्बन्धवस्तारस्वरं बाष्पविवर्षणाः ।
अकाण्डमृत्युशल्येन, तस्याऽतिव्यथिता हृदि ॥८३॥

और्ध्वदेहिकमाधाय, विहाय शुचमुल्वणाम् ।
श्रीपतिं स्थापयन्ति स्म, स्वजनाः स्वपितुः पदे ॥८४॥

मनोरथे विवाहस्य, मन्दीभूतेऽथ शोकतः ।
सर्वेऽपि स्वजनाः स्थानं, प्रयान्ति स्म निजं निजम् ॥८५॥

येन सार्धं प्रेमदार्ढ्यमिष्टं तस्यैव मृत्युतः ।
अधात् **समृद्धिदत्तो**ऽपि, मान्द्यमुद्वाहकर्मणि ॥८६॥

अथ भाग्यरवावस्तं, **श्रीपते**र्याति सर्वतः ।
क्रूरैश्चौरैरगृह्यन्त, स्थलमार्गगताः श्रियः ॥८७॥

श्रियोऽनशङ्गलाध्वस्था, बोहित्थब्रुडनादिभिः ।
भाण्डशालागता ग्रस्ताः, क्षुधितेनेव वह्निना ॥८८॥

अन्येद्युः **श्रीपति**र्हैममासनं स्नातुमाश्रितः ।
पुरः स्फुरत्पयः पूर्णहैमभृङ्गारकुण्डिकम् ॥८९॥

भृङ्गारो रिक्ततां यो यस्तस्य स्नानादशिश्रियत् ।
उड्डीय नभसाऽयासी[त्], स स पक्षीव वेगतः ॥९०॥

स्नानादनन्तरं तद्वत्, सौवर्णासनकुण्डिके ।
जग्मतुर्नभसा चित्रं, तन्वत्यौ **श्रीपते**र्हृदि ॥९१॥

देवान् वन्दितुमायातो, देवापवरकं ततः ।
दुःस्थागारमिवादर्शच्छून्यं प्रवरवस्तुभिः ॥९२॥

भोक्तुं प्रचक्रमे सोऽथ, खिन्नविस्मितमानसः ।
सौवर्णे भाजने रत्नकच्चोलावलिशालिनि ॥९३॥

भुञ्जानस्याऽस्य कच्चोलं, यद्यद्रिक्तमभूत्तदा ।
तत्तदप्यम्बरेणाऽऽशूड्डीनं भाग्यविपर्ययात् ॥९४॥

भोजनान्ते स्थालमपि, यावदुड्डीय गच्छति ।
तावद्दधार हस्तेन, **श्रीपतिः** स्वाग् हठेन तत् ॥९५॥

स्थालस्य [तस्य] यातस्य, बलात् खण्डमवास्थित ।
त्रुटित्वा **श्रीपते**र्दैवचेष्टितध्यायिनः करे ॥९६॥

अथ चित्रीयितस्वान्तः, सदसत्संशयातुरः ।
पुरातननिधानानि, व्यैक्षताऽसौ समुत्सुकः ॥९७॥

तान्यप्यङ्गारसर्पालिस्वरूपाणि विलोकयन् ।
अमन्यत स आत्मानं, निष्पुण्यानां धुरि स्थितम् ॥९८॥

तदा च चिन्तयाऽऽक्रान्तः, पुंसा केनाऽप्यभाष्यत ।
'त्वत्पित्राऽग्राहि मे द्रव्यलक्षं धीमंस्तदर्पय' ॥९९॥

अथैष दध्यौ मत्पित्रा, लभ्यमेवाऽभवद्धनम् ।
ननु देयं ततः किञ्चिदिदं दुर्दैवनाटकम् ॥१००॥

ध्यात्वेत्यूचे च तं 'नास्ति, कोशाध्यक्षोऽत्र साम्प्रतम् ।
श्वः समेहि यथालेख्यं, समस्तं वीक्ष्य दीयते' ॥१०१॥

एवमुक्त्वा प्रहित्यैनमवदज्जननीमसौ ।
'मातः ! सर्वाऽपि सद्यः श्रीर्मां समन्तुमिवाऽमुचत् ॥१०२॥

श्रित्वा मुधोत्तमर्णत्वं, याचन्ते मां धनं जनाः ।
तदत्राऽहं सुखं स्थातुं, न लप्स्ये भाग्यवर्जितः ॥१०३॥

तत् साम्प्रतं[१] साम्प्रतं[२] मे, गन्तुं देशान्तरे रयात् ।
स्त्रीति त्वामुत्तमर्णोऽपि, कोऽपि नो याचिता धनम्' ॥१०४॥

---

१. अधुना । २. योग्यम् ।

इत्यापृच्छ्यैष जननीं, स्थालखण्डं तदन्तिके ।
कुतूहलाद्धरन् पुर्या, निर्गतोऽध्वनि दध्यिवान् ॥१०५॥

चपलाचपलामेतां, श्रियमर्जयितुं मम ।
मनो नोत्सहते हन्त, **का रतिर्दृष्टदूषणे ?** ॥१०६॥

केदारमिव लूनान्नं, कासारमिव निर्जलम् ।
निर्लक्ष्मीकं च मां कश्चिन्न श्रयिष्यति सर्वथा ॥१०७॥

तत् किं कार्यं जीवितेन, निर्भाग्यस्य ममेति सः ।
मुमूर्षुः शैलतः पातात्, सखेदः पुरतोऽचलत् ॥१०८॥

प्रतिमास्थं पुरः साधुमवधिज्ञानधारिणम् ।
वीक्ष्य चाऽवन्दताऽऽनन्दादुदयच्छुद्धवासनः ॥१०९॥

पारयित्वा मुनिरपि, कृपालुः **श्रीपतिं** जगौ ।
'वत्स ! किं लोलतां लक्ष्म्या, दृष्ट्वोद्विग्नोऽसि जीवितात् ॥११०॥

रमा रामाश्च जानीहि, प्रकृत्यैवाऽनवस्थिताः ।
रक्तान् गुणनिधींश्चापि, त्यजन्त्येताः क्षणेन यत् ॥१११॥

के के कांस्कानुपायान्न, वितन्वन्ति श्रियः कृते ।
कानि कानि च दुःखानि, न सहन्ते हताशयाः ॥११२॥

तथापि श्रीर्न तानेति, समेताऽपि कथञ्चन ।
स्थैर्यमालम्बते नैव, रक्षिताऽपि महादरात् ॥११३॥

तदेतन्मानसे दुःखं, वृथैव भवता धृतम् ।
न च स्यान्मृत्युना दुःखस्यान्तो दुष्कर्मजन्मनः ॥११४॥

जन्मान्तरेऽपि चेद्भद्र !, दुःखस्यान्तं विधित्सति ।
तज्जैनीं प्रतिपद्यस्व, दीक्षामक्षामसौख्यदाम्' ॥११५॥

श्रुत्वेति स प्रवव्राज, निर्व्याजहृदयः कृती ।
सामाचारीं च साधूनां, समस्तां सम्यगग्रहीत् ॥११६॥

त्यक्तसङ्गोऽपि तत् स्वर्ण्णस्थालखण्डं तु सन्निधौ ।
गुप्तं स बिभरामास, समासन्नमहोदयः ॥११७॥

विविधाभिग्रहग्राही, तप्यमानः परं तपः ।
अरज्यन् भवभावेषु, नश्वरेषु निसर्गतः ॥११८॥

स्पृहयन् सततं सिद्धिसौख्या[नि] प्रतिपातिते ।
देहेऽपि निर्ममश्चारुचारित्रं स यतिर्दधौ ॥११९॥ युग्मम् ॥

गुरोरनुज्ञयाऽन्येद्युश्चरन्नेकाकिचर्यया ।
उदीच्यमथुरामेष, साधुर्भिक्षाकृतेऽविशत् ॥१२०॥

प्राप्तः **समृद्धिदत्तस्य**, मन्दिरं लसदिन्दिरम् ।
दम्भोज्झितो धर्मलाभं, वदति स्म विदां वरः ॥१२१॥

तत्र कार्त्तस्वरमयैस्तैस्तैर्मणिमनोहरैः ।
आत्मीयैः कुण्डिकापीठभृङ्गारैः कृतमज्जनम् ॥१२२॥

तत्रैव कनकस्थाले, स्वीये खण्डितकर्णके ।
कच्चोलेष्वपि तेष्वेव, सद्यो निर्मि[त]भोजनम् ॥१२३॥

मायूरपिच्छव्यजनप्रष्ठपेशलहस्तया ।
सुतया वीजितं स्फारलावण्यप्लुतगात्रया ॥१२४॥

पश्यन् **समृद्धिदत्ता**ख्यं, श्रेष्ठिनं विस्मयाञ्चितः ।
लब्धभिक्षोऽपि सुचिरं, तस्थिवान् मुनिपुङ्गवः ॥१२५॥ चतुर्भिः कलापकम् ॥

---

१. **स्वर्णमयैः** ।

श्रेष्ठ्यप्यूचे 'मुने ! दृष्ट्या, दृढं निश्चलया भवान् ।
बालां वा स्वर्णस्थालादि, वस्तु वेदं निरीक्षते ॥१२६॥

कस्मिन्नप्यथवा मृष्टे, भोज्ये ते मनसः स्पृहा ।
आत्तभिक्षोऽपि यत् स्थैर्यमवलम्ब्याऽवतिष्ठसे' ॥१२७॥

साधुरभ्यधित 'ज्ञातजिन[त]त्त्वस्य मे मतिः ।
न सम्मुह्यति बालासु, कीलासु भवजागृवेः ॥१२८॥

स्पृहां कुर्वन्ति किं क्वापि, साधवो मृष्टभोजने ।
व्रणलेपादिदृष्टान्तैर्यात्रामात्रान्नभोजिनः ॥१२९॥

एषोऽर्थसार्थः सौवर्ण्णः, समभूत्तव मन्दिरे ।
कुतो दिनात् प्रभृत्येतत्, प्रष्टुं तिष्ठामि कौतुकात्' ॥१३०॥

श्रेष्ठ्यब्रूत 'पुराणं मे, समस्तमपि वस्त्विदम्' ।
व्रत्यपृच्छत् 'कथं भुङ्क्ते, भवान् खण्डितभाजने ?' ॥१३१॥

समृद्धिदत्तोऽप्यादत्त, वाचं 'वाचंयमोत्तम ! ।
योज्यमानं यत्नतोऽपि, स्वर्णं स्थालेऽत्र नाऽलगीत्' ॥१३२॥

साधुना स्थालखण्डं तदथाऽऽकृष्य कटीतटात् ।
तत्रासञ्जितमात्रं द्रागलगीद्विधिवल्गितात् ॥१३३॥

अथ विस्मितचित्तेन, श्रेष्ठिना मन्दिरान्मुनिः ।
निर्गच्छंस्तिष्ठ तिष्ठेति, वदता वन्दितो द्रुतम् ॥१३४॥

अपृच्छ्यत च यत्नेन, किमिदं भगवन्निति ।
प्रत्नं वस्तु तवेदं तत्, किं ब्रवीमीति सोऽप्यवक् ॥१३५॥

आचष्ट श्रेष्ठिराट् 'साधो !, मृषोक्तं क्षम्यतां मम ।
इदं मदीयं नो वस्तु, शृणु वच्मि यथा तथा ॥१३६॥

पूर्वं वर्षाष्टकात् स्नातुमेकदा मयि सोद्यमे ।
अकस्मादेव सम्प्राप्तं, नभसा कुण्डिकादिकम् ॥१३७॥

धूपभाजन-घट्याद्यमेतद्रत्नमयं पुनः ।
मम पूजयितुं देवान्निष्ठस्याऽऽप्तं [च] तत्पुरः ॥१३८॥

भोजनावसरे चेदं, भाजनादि मनोहरम् ।
सम्प्राप्तं मां मुनिपतेऽन्यच्चापि द्रविणं बहु ॥१३९॥

आरभ्य तद्दिनात् प्राज्यं, विभवं धारयाम्यहम् ।
तद् ब्रूहि वेत्सि चेत् साधो !, किमिदं प्राज्यचित्रकृत् ॥१४०॥

तत[श्च] चरितं स्वीयं, सर्वं साधुर्न्यवेदयत् ।
श्रुत्वा श्रेष्ठ्यपि रोमाञ्चोपचिताङ्गोऽब्रवीदिति ॥१४१॥

'**श्रीपते** ! तनया जातमात्रेयं तव कल्पिता ।
मन्मन्दिरे च माद्यन्ति, तवैवैताः समृद्धयः ॥१४२॥

तदेनां तनयां तूर्णं, परिणीय कुरुष्व मे ।
मनोरथद्रुमं चित्तालवालस्थं फलेग्रहि[म्] ॥१४३॥

मधुरे मध्यमेऽमुष्मिन्, वयस्यनुचितं तपः ।
विहाय विलस स्वैरं, धीमन्नाभिर्विभूतिभिः ॥१४४॥

अमून् कौतुकिनः कामं, श्यालकान्नर्मभाषितैः ।
साम्प्रतं प्रीणय प्राज्ञ !, वार्द्धके व्रतमाचरेः' ॥१४५॥

अथ संवेगनिर्वेदबन्धुरां मधुरां गिरम् ।
श्रीपतिश्चारुचारित्रलसद्रतिरलासयत् ॥१४६॥

'पश्यतामपि यास्तूर्णमपुण्यपवनेरिताः ।
यान्त्युडुीय तृणप्रख्याः, श्रियस्ता न हरन्ति माम् ॥१४७॥

महामोहाहिगरलप्रसरध्वस्तचेतनः ।
कथञ्चन प्रबुद्धोऽस्मि, सिद्धान्तामृतलाभतः ॥१४८॥

अधुनैव कथङ्कारं, कामिनीं विषवल्लरीम् ।
भेजे रिरक्षिषुर्यत्नादहं संयमजीवितम् ॥१४९॥

वयसि क्वाप्यनौचित्यं, न तपः प्रचिकीर्षतः ।
अप्रस्तावोऽमृतस्यापि, पाने किं कोऽपि सम्मतः ॥१५०॥

जलबुद्बुदसङ्काशे, जीवितेऽत्र सचेतसाम् ।
धर्महेतोर्वार्द्धकस्य, प्राप्तौ को नाम निर्णयः ? ॥१५१॥

भाग्यभाजो जनास्तस्मात्, सन्त्यज्य विषयस्पृहाम् ।
यतन्तेऽनुत्तरं सौख्यं, लिप्सवस्तपसेऽनिशम्' ॥१५२॥

एवं संवेगसाराणि, तस्य वाक्यानि जल्पतः ।
अवधिज्ञानमुत्पेदे, क्षयोपशमशालिनः ॥१५३॥

अथ ज्ञानान्मुनिस्तस्य, स्वस्य च प्राग्भवं विदन् ।
इत्यवादीज्ज्ञापयितुं, धर्माधर्मफलं स्फुटम् ॥१५४॥

'कृतं मनस्तनुभ्यां यत्, फलं तस्य किमुच्यते ? ।
धर्मद्विष्टं दुरन्तं स्याद्, गिरा कृतमपि ध्रुवम् ॥१५५॥

तथाहि **श्रीपुरे**ऽभूतां, **पद्माकर-गुणाकरौ** ।
वयस्यौ शस्यकर्माणौ, शान्तचित्तौ स्वभावतः ॥१५६॥

तावन्यदा गुरोर्वक्त्राद्धर्ममाकर्ण्य निर्मलम् ।
प्रबुद्धौ देशविरतिं, भेजाते भवभीरुकौ ॥१५७॥

धर्म्यं विशुद्धसम्यक्त्वौ, विदधानावनारतम् ।
कृशयामासतुः पापसंहतिं तौ कृपापरौ ॥१५८॥

कदाप्यशिक्षयद्दक्षमुख्यः कश्चन कञ्चन ।
कुर्यादकार्यं नो धीरस्तच्छ्रीसंहारि यद् भवेत् ॥१५९॥

तन्निशम्याऽविमृश्यैव, सहसाऽऽह **गुणाकरः** ।
किमकृत्ये कृते याति, श्रीरुड्डीयापि पश्यताम् ॥१६०॥

श्रुत्वेति तद्वचो भूरिर्लोकोऽकृत्याद्भियं जहौ ।
पद्माकरस्त्वशान्मित्र !, किं ब्रूषेऽनर्थदण्डकृत् ॥१६१॥

गुणाकरोऽपि शोचंस्तद्वचः सख्या समं सदा ।
धर्मकर्मठतां दध्रे, प्रयतो जीवितावधि ॥१६२॥

अनालोच्य प्रमादेन, तां गिरं स **गुणाकरः** ।
मृत्वाऽभूवमहं शुद्धधीस्तु **पद्माकरो** भवान् ॥१६३॥

पश्यतोऽपि ममोड्डीना, तादृग् लक्ष्मीर्विहायसा ।
त्वां च भेजे स्फुटं पश्य, विपाकं कर्मणामहो ! ॥१६४॥

एवं श्रुत्वा स्मृतप्राच्यजातिः संवेगमागतः ।
श्रेष्ठी **समृद्धिदत्तो**ऽस्मात्, साधोर्व्रतमुपाददे ॥१६५॥

साऽपि च श्रेष्ठिनः पुत्री, **कुलस्त्रीणां पतिर्गतिः** ।
निशिश्राय [श्री]जैनेन्द्रीं, दीक्षामंहःक्षतिक्षमाम् ॥१६६॥

चापलेन श्रियस्तेन, साक्षाद्दृष्टेन तौ मुनी ।
विरक्तौ भवतोऽभूतां, समुद्युक्तौ व्रते भृशम् ॥१६७॥

क्रमाद् ध्यानाग्निना दग्धकर्मेन्धनसमुच्चयौ ।
मुक्तिश्रिया धृतोत्कण्ठं, वृतौ ज्ञानकलाभृतौ ॥१६८॥

निशम्य ***श्रीपते****र्वृत्तमिदमात्महितार्थिनः ! ।*
लक्ष्म्यां मोहं परित्यज्य, रज्यध्वं सत्पथे सदा ॥१६९॥

नानाक्लेशगणं विषह्य सततं, कृष्यादिभिर्याऽर्ज्यते,
कृच्छ्राद् भूप-मलिम्लुचा-ऽनल-जलादिभ्यश्च या रक्ष्यते ।
या बन्धादिनिबन्धनं क्षितितले, साक्षाच्च संवीक्ष्यते,
तस्यां कः करिकर्णचापलभृति, प्राज्ञः श्रियां रज्यति ॥१७०॥

[शार्दूलविक्रीडितवृत्तम्]

—● लक्ष्मीदुरन्ततायां **श्रीपतिकथा** । ग्रं. १२३ अ. १२ ●—

श्रीसतत्त्वमिदं[1] प्रोक्तं, सतां वैराग्यकारणम् ।
स्वरूपमथ बन्धूनां, शृणुताऽवहिता जनाः ! ॥१७१॥

मातापित्रादिषु प्रेम, चिन्तयन्ति सुनिर्भरम् ।
न त्वेवं मूढमतयो, विचारं कुर्वते हृदि ॥१७२॥

निरादिकेऽत्र संसारे, भ्राम्यन्तो भवकोटिषु ।
मातापित्रादितां सर्वेऽप्यङ्गिनो लेभिरे ध्रुवम् ॥१७३॥

सर्वेऽपि प्राप्नुवन्ति स्म, वैरितामप्यनन्तशः ।
परस्परं ततः कोऽत्र, मातापित्रादिनिर्णयः ? ॥१७४॥

न च निर्मितपापानां, पततां नरकावनौ ।
मातापित्रादिभिस्त्राणं, जायते देहिनां क्वचित् ॥१७५॥

सर्वेऽपि बन्धवः पूर्वं, भूत्वा सत्प्रेमसिन्धवः ।
किञ्चिन्निबन्धनं प्राप्य, प्रयान्ति विकृतिं क्षणात् ॥१७६॥

अत्रार्थे निजसोदर्यदुश्चेष्टितनिरीक्षणात् ।
बुद्धस्याऽऽकर्ण्यतां **कीर्त्तिचन्द्र**भूमिपतेः कथा ॥१७७॥

---

१. लक्ष्म्याः स्वरूपम् ।

'अस्त्याद्यद्वीप**भरत**भूषणं दूषणोज्झिता ।
चम्पाभिधा पुरी स्वीयशोभया कम्पिताऽलका ॥१७८॥

पूर्णचन्द्रावदातोद्यत्कीर्त्तिशुभ्रितविष्टपः ।
कीर्त्तिचन्द्राभिधानस्तामपालयदिलापतिः ॥१७९॥

जज्ञे **समरविजय**नामाऽस्य लघुसोदरः ।
यौवराज्यरमाकेलिपद्मं पद्मसमाननः ॥१८०॥

भुञ्जानयोस्तयोः प्राज्यं, साम्राज्यं प्रीतचित्तयोः ।
समयः समतीयाय, बहुर्बद्धसुखोदयः ॥१८१॥

अन्यदा कुनृपेणेव, ग्रीष्मेण तापितां भुवम् ।
स्वस्थां विधातुं सम्प्राप्तस्तपात्ययनरेश्वरः ॥१८२॥

यः शक्रचापनिर्यातधाराबाणैर्वियोगिनाम् ।
हृन्दि भिन्नानि नो वेति, विद्यु[द्]द्योतान्निरैक्षत ॥१८३॥

घनाघना यस्य भटा, भङ्क्त्वा ग्रीष्मस्मयं भृशम् ।
सम्प्राप्तयशसो विश्वे, गर्जन्तः परितोऽभ्रमन् ॥१८४॥

यो महीमात्मसङ्गेन, नवोद्भूतैस्तृणाङ्कुरैः ।
चकार स्फाररोमाञ्चोदञ्चत्तनुमिवाभितः ॥१८५॥

यत्रोपकारानपेक्षं, ददतो जीवनं घनाः ।
शिक्षयन्ति जनान् कर्त्तुं, निर्निमित्तामुपक्रियाम् ॥१८६॥

जीमूतो यत्र पान्थानां, गतिरोधाय सर्वतः ।
व्याजेनाऽम्बुप्रवाहानामाज्ञारेखामिवाऽकृत ॥१८७॥

एवं प्रसृत्वरे बाढं, स्तनयित्नुसमागमे ।
सौधमूर्धस्थितोऽपश्यन्नद्यां पूरं धराधिपः ॥१८८॥

ततः सोदर-सामन्त-सचिवाद्यैः समन्वितः ।
कुतूहलाकुलस्तस्याः, सरितस्तटमासदत् ॥१८९॥

केलये चारुरोह द्राक्, सोदरेण समं तरीम् ।
तरीः पौराः पराश्चान्ये, सामन्ताद्या अशिश्रियन् ॥१९०॥

एवं यदृच्छया तेषु, केलिं कुर्वत्सु हर्षतः ।
ववर्षोपरि देशेऽब्दः, पूरश्चावर्द्धताऽधिकम् ॥१९१॥

महावेगात् कृष्यमाणास्तेन पूरेण नाविकैः ।
निपुणैरपि नो नावो, दध्रिरे कर्मशक्तिवत् ॥१९२॥

अथाऽस्याः सरितो मध्ये, तीरे चावस्थितैर्भृशम् ।
पूत्कृते मिलिता विष्वगातुरा लक्षशो जनाः ॥१९३॥

पश्यतामपि लोकानां, नृपस्याऽन्तर्दधे तरीः ।
योजनान्यतिचक्राम, प्रभूतानि च वेगतः ॥१९४॥

लग्ना **दीर्घतमाला**ख्याटव्यां नौः क्वापि शाखिनि ।
ततस्तीरे समुत्तीर्णः, क्षमानाथः कथञ्चन ॥१९५॥

ससोदरः कतिपयैर्जनैर्युक्तः श्रमातुरः ।
विश्राम्यन् वाहिनीनीरखाततट्या बिलान्तरे ॥१९६॥

नृपोऽद्राक्षीन्निधिं द्योतमानं रत्नकरोत्करैः ।
उत्थाय च परीवारावृतस्तस्यान्तिकं ययौ ॥१९७॥ युग्मम् ॥

स्वयं दृष्ट्वा च सस्नेहं, निजभ्रातुरदीदृशत् ।
सादरं तं निधिं क्षोणीपतिः प्राञ्जलमानसः ॥१९८॥

क्रूरः **समरविजयो**, जातदुष्टमतिस्ततः ।
नृपं हत्वा निधिममुं, राज्यं च न किमाददे ? ॥१९९॥

इति ध्यायन् कृपाण्या द्राग्, दुष्टो घातममुञ्चत ।
भूपश्चाऽवञ्चयद् दक्षो, बाहौ धृत्वाऽभ्यधाच्च तम् ॥२००॥ युग्मम् ॥

'किमिदं चेष्टितं वत्स !, भवता किंनिमित्तकम् ।
कोऽपि नाऽस्मत्कुलेऽकार्षीत्, कर्मेदृक्षं सुदारुणम् ॥२०१॥

अस्ति प्रयोजनं ते चेद्राज्येन द्रविणेन वा ।
तत्त्वमेव गृहाणाऽऽशु, प्रतिपत्स्ये त्वहं तपः' ॥२०२॥

एवं सुमधुरं भूपे, वदत्यपि दुराशयः ।
बाहुं विमोच्य सोऽनश्यद्, द्वेषं निष्कारणं वहन् ॥२०३॥

राजा व्यचिन्तयद्धिग् धिक्, प्राच्यदुष्कर्मचेष्टिताः ।
यद्वाचापि न वाच्यं तद्धेलयैव प्रकुर्वते ॥२०४॥

इत्थं चलन्ति चेतांसि, यत्कृते तेन किं मम ।
निधानेनेति तत् त्यक्त्वा, निजं प्राप निकेतनम् ॥२०५॥

स तु दुष्टाशयः पुण्यहीनत्वात्तत्र तं निधिम् ।
अपश्यन् भूमिनाथेन, गृहीतं हृद्यमन्यत ॥२०६॥

अथ देशं सोदरस्य, चरटीभूय लुण्टयन् ।
कदाचन स सामन्तैर्बद्ध्वाऽग्राहि नृपान्तिके ॥२०७॥

न्यमन्त्यत नरेशेन, राज्यदानाद्दयालुना ।
चक्रे मिथ्याभुजादर्पोन्मत्तः स त्ववहेलनाम् ॥२०८॥

भुजाबलेन साम्राज्यं, ग्राह्यं दत्तं तु नामुना ।
इत्याकू[तं] धरन् भूपमन्दिराच्च विनिर्ययौ ॥२०९॥

एवं मुहुर्मुहुर्जातमन्तुतो विधृतोऽपि सः ।
मोचितो नरनाथेन, राज्येनाऽभ्यर्थितोऽपि च ॥२१०॥

लोका बभाषिरे 'हन्ताऽनयोः सोदरयोरपि ।
दृश्यतामन्तरं हस्तिमल्ल-वालेययोरिव ॥२११॥

पीयूषात् सारमादाय, विधात्रा सुजना ध्रुवम् ।
विनिर्मिता जगत्यस्मिन्, कालकूटात्तु दुर्जनाः ॥२१२॥

तान् स्तुमो दुर्जनान् येभ्य, आदरः सत्सु जायते ।
भवेत् कस्य स्पृहोद्द्योते, ध्वान्ताभावे हि सर्वथा ? ॥२१३॥

खलः कृतोपकारेऽपि, न स्निह्यति कथञ्चन ।
दशेद् दुग्धस्य दातारमपि किं न सरीसृपः ? ॥२१४॥

उपकारिणि कुर्वन्ति, जनाः सर्वेऽप्युपक्रियाः ।
नृरत्नं त्वेष भूमीश, उपकार्यपकारिणि' ॥२१५॥

इति स्तुत्याऽपि लोकस्याऽनुत्सिक्तोऽवनिवासवः ।
स्मारं स्मारं भ्रातृवृत्तं, संसृतेर्मुहुरुद्विजन् ॥२१६॥

अरज्यन् राज्यसौख्येषु, मुख्यः प्रेक्षावतां दिनान् ।
निनाय द्वेषहेतुं तं, जिज्ञासुर्गुरुसङ्गमात् ॥२१७॥ युग्मम् ॥

प्राप्तः **प्रबोध**नामाऽथ, केवली भाग्ययोगतः ।
[रा]ज्ञा गत्वा ववन्दे च, सन्देहध्वान्तभानुमान् ॥२१८॥

देशनारसमापीय, प्रस्तावे पृथिवीभुजा ।
पृष्टः स्वसोदरक्रौर्यहेतुं मुनिपतिर्जगौ ॥२१९॥

'अस्यैव **जम्बुद्वीपस्य,** वर्षे **विदेह**नामके ।
समस्ति शस्तसदनं, विजयो **मङ्गलावती** ॥२२०॥

सुगन्धिपुरवास्तव्यस्तत्राऽभून्**मदनो** वणिक् ।
तस्यैकः **सागरः** सूनुः, **कुरङ्ग**ाख्यः परः पुनः ॥२२१॥

तौ क्रमाद् व्यक्तचैतन्यावध्यैषातां कलाः कलाः ।
यौवनस्थौ पितृभ्यां च, सोत्साहं परिणायितौ ॥२२२॥

प्रवरं पुरुषार्थेषु, समस्तेष्वर्थमेव तौ ।
मन्वानौ चक्रतुस्तस्याऽर्जने नानामनोरथान् ॥२२३॥

परिग्रहग्रहग्रस्तौ, प्राज्योपायपरायणौ ।
कृत्याकृत्यविभागं तौ, नैवाजगणतां क्वचित् ॥२२४॥

कुरङ्गस्तु विशेषेणोत्क्रूरतां कलयन् हृदि ।
मुग्धानपातयत् पाशे, कुरङ्गानिव लुब्धकः ॥२२५॥

कदाचि[द्] दध्यतुरिमौ, देशान्तरगतिं विना ।
लभ्यतेऽर्थः कथं नाम, चेतसा परिचिन्तितः ॥२२६॥

पुमान् द्रव्यौजसा हीनोऽवज्ञां प्राप्नोति सर्वतः ।
विध्यातः पावकः पद्भ्यां, किमु नाक्रम्यते जनैः ? ॥२२७॥

यस्याऽर्थास्तं श्रयन्ते द्राग्, जनाः स्वादुप्रपञ्चिनः ।
पूर्णं सरन्ति कासारं, विहङ्गाः सर्वतोऽपि हि ॥२२८॥

अर्थादेव विलीयन्ते, विपदो निखिला अपि ।
सुसिद्धाद् गारुडान्मन्त्रादिवोदग्रा विषोर्मयः ॥२२९॥

अर्थाच्चेतोमता भोगाः, प्रभवन्ति शरीरिणाम् ।
कीर्त्तिः सञ्जायते चार्थाच्छशाङ्ककिरणोज्ज्वला ॥२३०॥

तस्माद्देशान्तरं यावो, द्रव्योपार्जनहेतवे ।
इति सञ्चिन्त्य पितरावापृच्छेतां जवेन तौ ॥२३१॥

निषेधतोरपि तयोर्भाण्डं चादाय पुष्कलम् ।
प्रस्थितौ विभवोद्भूतिमनोरथशताकुलौ ॥२३२॥

यियासितस्य देशस्य, सन्निकर्षं गतौ च तौ ।
अकस्माच्चाप्तया क्रूरचौरधाट्या प्रमूषितौ ॥२३३॥

प्रलापैः करुणैः पाटच्चराणामपि तावथ ।
चिल्लाविव पयःपूरैर्जनयामासतुः कृपाम् ॥२३४॥

दीनाराणां सहस्रस्य, भाण्डं प्रत्यर्प्य चैतयोः ।
शेषं सर्वं समादाय, जग्मुस्ते पारिपन्थिकाः ॥२३५॥

तावथो **धवलपुरं**, तेन भाण्डेन संयुतौ ।
गतावापणमेकं च, गृहीत्वा तत्र तस्थतुः ॥२३६॥

वाणिज्यमनयोर्बाढं, कुर्वतोश्च कथञ्चन ।
दीनाराणां सहस्रे द्वे, सञ्जाते जातहर्षयोः ॥२३७॥

लाभाल्लोभे परां प्रौढिं, व्रजत्यथ महोद्यमौ ।
लाक्षानीलीप्रभृत्येतौ, गृह्णीतो वस्तु सन्ततम् ॥२३८॥

प्रवर्त्तेते निष्करुणं, यन्त्रपीडनकर्मणि ।
वृद्धौ[1] धनं दशैकादशादिवृद्ध्या च यच्छतः ॥२३९॥

कृषीषु क्षेत्रमुख्यानि, दुष्कर्माण्यपराण्यपि ।
तयोर्विदधतोरासन्, दीनारा अधिकाधिकाः ॥२४०॥

अधिकाधिकवित्तस्य, लाभात्तावधिकाधिकम् ।
यतमानौ च दीनारलक्षाशीतिं प्रचक्रतुः ॥२४१॥

दीनारकोटिनिर्माणवाञ्छयाऽथ विडम्बितौ ।
अकृत्येषु समस्तेषु, प्रावर्त्तेतामनारतम् ॥२४२॥

१. कलान्तरे, 'व्याज' इति भाषायाम् ।

उष्ट्रा-ऽश्वतर-चक्रीवदुक्षगन्त्र्यादिवाहनात् ।
देशान्तरेभ्यो द्रविणं, स्वीचक्राते श्रमोज्झितौ ॥२४३॥

वहनान्यब्धिमार्गेण, वाहयामासतुः सदा ।
पट्टकेन च शुल्कादिस्थानानि ललतुर्नृपात् ॥२४४॥

पोषयामासतुर्दासीस्तुरगीश्चापि सद्मनि ।
दन्त-चर्म-विषास्त्रादिवणिज्यामपि चक्रतुः ॥२४५॥

त्यजन्तौ धर्मनामापि, पापादीषदबिभ्यतौ ।
सन्तोषं प्लोषयन्तौ चाऽनिर्विण्णौ दुःखकोटितः ॥२४६॥

नानोपायपरौ कोटिमप्यपूरयतां तकौ ।
रत्नकोट्यर्जने काङ्क्षां, धृतवन्तौ ततो हृदि ॥२४७॥ [युग्मम्]

अथाऽखिलं धनं पोते, स्थापयित्वाऽतिलोभतः ।
प्रतस्थाते महोत्साहौ, प्रति रत्नवसुन्धराम् ॥२४८॥

पाथोधौ वहने तस्मिन्नध्वानं लङ्घयत्यथ ।
व्यमृश्यत **कुरङ्गेण**, क्रूरताक्रान्तचेतसा ॥२४९॥

सागरे **सागर**ममुं, क्षिप्त्वा द्रविणभागिनम् ।
निःसपत्नमिदं सर्वं, करोमि धनमात्मसात् ॥२५०॥

बान्धवा धनयुक्तानामपरेऽपि भवन्ति हि ।
विटाधिका एव पुनर्बन्धवोऽपि धनोज्झिताः ॥२५१॥

तद्यावन्मद्वदेषोऽपीदृक्षबुद्धिर्न सम्भवेत् ।
विश्वस्तं तावद् ह्येनं द्राग्, हत्वाऽऽप्नोमि कृतार्थताम् ॥२५२॥

ध्यात्वेत्यसौ लोकदृष्टिं, वञ्चयित्वा कुधीधनः ।
सागरं पोतपर्यन्ते, निविष्टं क्षिप्तवाञ्जले ॥२५३॥

असुंभध्यानसंयुक्तो, नीरान्मृत्वाऽथ **सागरः** ।
तृतीयभुवि सम्भूतो, नारकः परमायुषा ॥२५४॥

कुरङ्गोऽपि क्षणं स्थित्वा, मायाकोलाहलं व्यधात् ।
मृतकार्यं च विदधे, मोदमानः स्वमानसे ॥२५५॥

ततो यावत् कियद्दूरं, गतस्तावदभाग्यतः ।
तद्यानपात्रं दुर्वातवशात् प्रालीयत द्रुतम् ॥२५६॥

मग्नः परिजनः सर्वो, भाण्डं च निखिलं गतम् ।
स्वयं तु फलकप्राप्त्याऽम्भोधेस्तुर्येऽह्नि निर्गतः ॥२५७॥

किञ्चिन्महापुरं प्राप्याऽर्जयिष्यामि घनं धनम् ।
ततो भोगानहं भोक्ष्ये, इत्यादिस्वविकल्पनैः ॥२५८॥

क्षणं तुष्यन् क्षणं रुष्यन्, क्षणं मूर्च्छन् क्षणं रटन् ।
परिभ्राम्यन् वने क्वापि, दृप्तकेसरिणा हतः ॥२५९॥ [युग्मम्]

रौद्रध्यानगतो मृत्वा, महापातकपूरितः ।
प्राप **धूमप्रभामे**ष, पञ्चमीं नरकावनिम् ॥२६०॥

अथोद्धृत्य नरकतो, नानारूपधराविमौ ।
भवं भ्रान्त्वाऽञ्जनगिरौ, दैवात् सिंहत्वमागतौ ॥२६१॥

तत्राप्येकगुहाकार्ये, मिथो युद्ध्वा विपद्य च ।
चतुर्थं नरकं प्राप्तावुद्धृत्याऽऽप्तौ च सर्पताम् ॥२६२॥

तत्राप्येकनिधानार्थे, युद्ध्वा मृत्वा च नारकौ ।
पञ्चम्यामवनौ जातौ, ततो भ्रान्तौ भवं बहुम् ॥२६३॥

---

१. **'काण्डे शरः शुभं क्षेमे, शारः शबलवातयोः ।**
किंशुकश्च शुकश्चाऽपि, स्मृतास्तालव्य-दन्त्ययोः' ॥ इति शब्दप्रभेदे ॥१।१२८॥

ततो धनिन एकस्य, कलत्रत्वमवापतुः ।
तत्र पुत्रोद्भवश्चासीद्, द्वयोरपि पृथक् पृथक् ॥२६४॥

मृते पत्यावतीवाऽर्थनिमित्तं कलहोऽजनि ।
राजाद्यैरपि तद्वादो, न पुनर्निरधार्यत ॥२६५॥

ततोऽन्यदाऽतिरोषेण, शस्त्रैर्युद्ध्वा परस्परम् ।
मृत्वा षष्ठ्यां नरकोर्व्यामुत्पेदाते ततोऽपि च ॥२६६॥

भूरिजन्मात्ययेऽभूतां, सुतौ कस्यापि भूपतेः ।
तत्रापि तौ राज्यहेतोरयुध्येतां पितुर्मृतौ ॥२६७॥

रौद्रचित्तौ मिथो घातात्, सप्तमं निरयं गतौ ।
सर्वोत्कृष्टं प्रपूर्याऽऽयुर्भवमभ्रमतां पुनः ॥२६८॥

ततः परिग्रहस्यार्थे, नानास्थानेषु सन्ततम् ।
पुनरप्यापदस्ताभ्यां, लेभिरे जीवितान्तदाः ॥२६९॥

स्वयं तु बुभुजे नैव, जातुचित् स परिग्रहः ।
केवलं कष्टकोटीनां, जज्ञेऽयं प्राप्तिकारणम् ॥२७०॥

राजन् ! पूर्वभवे कृत्वाऽज्ञानकष्टं तथाविधम् ।
अभूतं तौ भवेऽत्रापि, युवामेवं सहोदरौ ॥२७१॥

प्रद्वेष्टि त्वां **कुरङ्गो**ऽयं, प्राग्भवाभ्यासतस्ततः ।
अद्यापि चैकदा बाधां, दुर्द्धीस्तव विधास्यति ॥२७२॥

तृतीये सेत्स्यति भवे, भवानाराधको नृप ! ।
भ्रमिष्यति पुनर्भ्राता, तवाऽनन्तं भवाम्बुधिम्' ॥२७३॥

श्रुत्वेति केवलिमुखात्, संवेगं परमं वहन् ।
भवस्वरूपं भूपालो, ध्यायन्नत्वा व्यजिज्ञपत् ॥२७४॥

अबोधि भगवन् ! युष्मद्वाक्याद्भवविषद्रुमः ।
बन्धुस्ने[ह]स्फुरन्मूलो, नानादुःखफलोच्चयः ॥२७५॥

मोहितोऽहमियत्कालमज्ञानादमुमाश्रितः ।
प्रसद्य सद्य उच्छेत्तुं, देहि दीक्षाकुठारिकाम् ॥२७६॥

ततोऽयं **हरिसिंहा**ख्यभागिनेयाय सत्वरम् ।
दत्तराज्यो मुनीन्द्रेण, दीक्षादानात् कृतार्थितः ॥२७७॥

नवपूर्वधरस्त्यक्तममत्वः स्वेऽपि वर्ष्मणि ।
रागद्वेषौ न भेजे स, इष्टानिष्टेषु वस्तुषु ॥२७८॥

पाणिपात्रधरश्चाथ, जिनकल्पं समाश्रितः ।
रजोहृतिमुखाच्छादमात्रोपकरणान्वितः ॥२७९॥

तपसा शोषयन् गात्रममात्रगुणवारिधिः ।
एकाकी व्यहरत् सर्वोपसर्गसहनोद्यतः ॥२८०॥ ॥ युग्मम् ॥

गतो **गजपुरो**द्यानमन्येद्युर्मुनिकुञ्जरः ।
कायोत्सर्गस्थितोऽध्यायद्, ध्यानं भूधरनिश्चलः ॥२८१॥

पापः **समरविजयो**, दैवाद् भ्राम्यन्निहाऽऽगतः ।
अनगारं निरीक्ष्याऽमुं, दीप्रक्रोधानलोऽजनि ॥२८२॥

यमजिह्वाकरालेन, करवालेन निर्दयम् ।
ददौ घातं [स] तस्यर्षेः, कन्धरायां नराधमः ॥२८३॥

वेदनार्त्तो भृशं मिथ्या, मे दुष्कृतमिति ब्रुवन् ।
यतिः पपात भूपीठे, छिन्नमूलो यथा तरुः ॥२८४॥

अचिन्तयच्च रे जीव !, यत् परिग्रहमूर्च्छया ।
व्यधा दुष्कर्म तस्यैतत्, फलशेषमुपस्थितम् ॥२८५॥

भुङ्क्ष्व मा स्म विधाः क्रोधं, रोधं दुष्कर्मणामयम् ।
तन्वन् **समरविजयो**, बाढं ते परमः सुहृत् ॥२८६॥

मैत्रीं विधेहि सत्त्वेषु, प्रमोदं धार्मिकेषु च ।
दुःखितेषु कृपालुत्वं, माध्यस्थं दुर्जनेषु च ॥२८७॥

भावयन्निति मृत्वाऽसौ, **सहस्त्रारे** सुरोऽजनि ।
च्युत्वोत्पद्य **विदेहेषु**, समवाप्स्यति निर्वृतिम्' ॥२८८॥

कीर्त्तिचन्द्रकथामेतां, भवनिर्वेदकारिणीम् ।
निशम्य धर्ममर्मज्ञाः, कथं मुह्यन्ति बन्धुषु ॥२८९॥

माता- वप्ता- सहजनिकरो, वल्लभा नन्दनाश्च,
स्वार्थासक्ता दृढतरमहो, प्रेम ये दर्शयन्ति ।
किञ्चिद् दृष्ट्वा हृदनभिमतं, मत्सरापूर्णचित्ताः,
सञ्जायन्ते खलु सुमहतेऽनर्थसार्थाय तेऽपि॥२९०॥ [मन्दाक्रान्तावृत्तम्]

—● बन्धुदुरन्ततायां **कीर्त्तिचन्द्र-समरविजय**कथा । ग्रं. १२१ अ. ४ ●—

नारीष्वनुत्तरं प्रेम, चिन्तयन्ति विचेतनाः ।
व्यक्तानपि निरीक्षन्ते, तासां दोषान् पुनर्न हि ॥२९१॥

मदिरायाः स्वसा ज्येष्ठा, तरलाक्षीति निर्णयः ।
यच्चैतन्यं हरत्याद्या, पानात् दर्शनतोऽपरा ॥२९२॥

यस्याः कृते न जननीं, न तातं स्वजनान्न च ।
न जीवितं न विभवं, न जातिं न कुलं तथा ॥२९३॥

गणयन्ति जडात्मानः, साऽपि हेतोः कुतश्चन ।
विकृता विषवल्लीवाऽनर्थाय स्यान्नितम्बिनी ॥२९४॥ ॥ युग्मम् ॥

कन्दः सर्वकलङ्कानां, नृशंसत्वस्य मन्दिरम् ।
निबन्धनमनर्थानां, छद्मानां बीजमङ्गना ॥२९५॥

स्त्रियो रक्ता विरक्ताश्च, नियतं दुःखकारणम् ।
मुखे विषधरस्य स्याद्विषस्यैव हि सम्भवः ॥२९६॥

अद्भुतप्रेमपात्राणामपि स्त्रीणां सुदारुणम् ।
दृष्ट्वा विलसितं प्राज्ञा, बुध्यन्ते**ऽगडदत्त**वत् ॥२९७॥

तथाहि '**भरत**क्षेत्रे**ऽवन्तिदेश**विभूषणम् ।
अवन्तीत्यस्ति पूर्ऋद्ध्या, न्यक्कुर्वाणाऽमरावतीम् ॥२९८॥

तत्र नाम्नाऽ**जितशत्रु**र्भूपः सच्चक्रमोदकः ।
विनिद्रकमलः स्फूर्जत्प्रतापोऽजनि भानुवत् ॥२९९॥

विक्रमी वाजिशिक्षादिदक्षो युद्धनियुद्धवित् ।
अमोघरथ इत्यासीत्, क्षत्रियस्तस्य सारथिः ॥३००॥

सह पत्न्या **यशोमत्या**, तस्य वैषयिकं सुखम् ।
भुञ्जानस्य क्रमाज्जज्ञे**ऽगडदत्ता**भिधः सुतः ॥३०१॥

व्यपादि जनकस्तस्य, शिशोरेव विधेर्वशात् ।
पदं च तस्य भूजानिरन्यस्मै प्रवितीर्ण्णवान् ॥३०२॥

पतिनाशात् पतिपदस्याऽन्यत्र गमनादपि ।
दूना दीनाननाऽभीक्ष्णं, विललाप **यशोमती** ॥३०३॥

कालेन व्यक्तचैतन्यो**ऽगडदत्तो**ऽथ मातरम् ।
क्रन्दन्तीं वीक्ष्य शुग्हेतुमन्यदाऽपृच्छदच्छधीः ॥३०४॥

ततोऽम्बा न्यगदद्बाष्पक्लिन्नभूः सुवदक्षरम् ।
निर्भाग्या वत्स ! किं वच्मि, यच्छिशोस्ते पिता मृतः ॥३०५॥

कलासु निःसपत्नेन, स[द्]यत्नेनेशसेवने ।
सत्पौरुषेण पित्रा ते, श्रीरसौ प्रवराऽर्जिता ॥३०६॥

अकाण्डेऽपि स दैवेन, हताशेन हतो हहा ! ।
भवान् कलासु नाऽद्यापि, विदुरश्च शिशुत्वतः ॥३०७॥

पिता ते यदि नाऽकाण्डेऽमरिष्यत्तर्हि सत्कलः ।
अभविष्यस्ततोऽयास्यत्, कुतस्तस्य पदं रिपौ ॥३०८॥

त्वत्तातस्य पदं भूपात्, प्राप्तवन्तं परं पुरः ।
दृक्शल्याभं प्रपश्यन्त्या, बाष्पौघो मे न शाम्यति' ॥३०९॥

अथाऽगडोऽपि सङ्क्रान्तमातृदुःखोऽवदत् कृती ।
'मातः ! क्वचन कोऽप्यस्ति, मां शिक्षयति यः कलाः ॥३१०॥

अचिरेण कलाः प्राप्य, सवित्रि ! स्वपितुः पदम् ।
स्वीकरिष्ये न्यक्करिष्ये, विपक्षान् मा स्म खिद्यथाः ॥३११॥

जातेन तेन किं स्वाम्बायौवनध्वंसहेतुना ।
यस्मिन् सत्यपि तातस्य, भूमिरन्यैर्विलुप्यते ॥३१२॥

यदुक्तम्–

यैर्वृद्धिं नीयते वंशो, बन्धुवर्गो धनं यशः ।
पितुस्त एव पुत्राः स्युर्वैरिणः स्वैरिणः परे ॥३१३॥

न म्लापितान्यखिलधामवतां मुखानि,
नास्तं तमो न च कृता भुवनोपकाराः ।
सूर्यात्मजोऽहमिति केन गुणेन लोकान्,
प्रत्याययिष्यसि शने ! शपथैर्विना त्वम्' ॥३१४॥ [वसन्ततिलकावृत्तम्]

प्रसूरूचेऽथ 'वत्सेयं, शेमुषी ते शुभा परम् ।
खलापूर्णे पुरेऽमुष्मिन्, कस्त्वामध्यापयिष्यति ? ॥३१५॥

कौशाम्ब्यां तु सहाध्यायी, त्वत्तातस्य परः सुहृत् ।
नाम्ना **दृढप्रहारी**ति, विद्यते तत्र तद् व्रज ॥३१६॥

गणयन् पितृसौहार्दं, त्वां पुत्रीयन् पवित्रधीः ।
स मूर्धन्यः सतां नूनं, यत्नादध्यापयिष्यति' ॥३१७॥

ततस्तां जननीवाचं, तथेति प्रतिपद्य सः ।
प्रस्थितः प्राप्य **कौशाम्बीं**, प्राणंसीत् सुहृदं पितुः ॥३१८॥

एनं सोऽपि ससन्मानं, स्वागतप्रश्नपूर्वकम् ।
कौ[त]स्कुतोऽसि को हेतुरागतेरिति पृष्टवान् ॥३१९॥

यथातथं स्ववृत्तान्तं, जल्पता सूतसूनुना ।
तोषितश्चावदत् प्रीतिप्रकर्षविकसन्मनाः ॥३२०॥

'त्वं मे नन्दनदेशीयः, सुखं तिष्ठाऽत्र मन्दिरे ।
चिन्तां कामप्यकुर्वाणः, शिक्षस्व सकलाः कलाः' ॥३२१॥

तथेति प्रतिपन्नोऽसौ, स्थिरात्मा शोभनेऽहनि ।
विद्या ग्रहीतुमारेभे, सुप्रसन्नाद् गुरोस्ततः ॥३२२॥

कलाः स[ङ्]कलयामास, सततं स यथा यथा ।
तथा तथा चन्द्र इव, सर्वेषां मुदमैदिधत् ॥३२३॥

सोऽविध्यच्चलवेध्यानि, शस्त्रीमभ्रमयत्तराम् ।
वाजिनो वाहयामास, दमयामास च द्विपान् ॥३२४॥

अवकाशं न निद्राया, अप्यदत्त स शस्तधीः ।
अहर्निशं प्रियतमां, विद्यामेवानुकूलयन् ॥३२५॥

महोत्साहं गृहारामेऽभ्यस्यन्तं सततं कलाः ।
देहदीधितिसन्दोहन्यत्कृतोत्तप्तकाञ्चनम् ॥३२६॥

तं समीपस्थसदनवातायनमधिष्ठिता ।
काऽपि त्रस्तकुरङ्गाभलोचना विन्यभालयत् ॥३२७॥ युग्मम् ॥

विस्मेरनेत्रराजीवपुटाभ्यां रूपसम्पदम् ।
तस्याऽऽपिबन्ती युवतिः, साऽऽप तृप्तिं कदापि न ॥३२८॥

नित्यं तद्रूपपीयूषं, धयन्ती निर्निमेषदृक् ।
अगण्यलावण्यनिधिः, सा जिगाय सुरस्त्रियः ॥३२९॥

अमुया लीलया क्षिप्तः, पाणिना पुष्पकन्दुकः ।
तस्य देहेऽलगत् कामेरितो यन्त्रोपलः किल ॥३३०॥

इमा**मगडदत्तो**ऽपि, वीक्ष्य पीनपयोधराम् ।
शशाङ्कवदनां कामोन्मादिनीं पद्मलोचनाम् ॥३३१॥

चिन्तयामास किमियं, नागकन्याऽथवा सुरी ? ।
आरामदेवता किं वा ?, किन्नरी वाऽथ मानुषी ? ॥३३२॥ युग्मम् ॥

निमेषकर्मणा प्राज्ञमूर्द्धन्यस्तां च मानुषीम् ।
निश्चिकाय स्वकीयद्युज्जितचम्पककोरकाम् ॥३३३॥

अन्वहं दर्शनात्तस्यां, प्रादुर्भूतमपि प्रधीः ।
गूढमेव दधौ रागमसौ स्वगुरुशङ्कया ॥३३४॥

साऽपि लोलेक्षणा कामतप्ता विरहविह्वला ।
न दिने न निशायां च, रतिं लेभे मनागपि ॥३३५॥

मृदुपल्लवसत्क्लृप्तसंस्तरे शयिताऽपि सा ।
देहे दाहं दधौ *तीव्रं, कारीषाग्निगता किल ॥३३६॥*

चन्दनाञ्चितदेहा सा, मृणालीजालमञ्जुला ।
मुहुर्मुहुर्जलैः सिक्ताऽप्यधिकं तापमासदत् ॥३३७॥

वदनेन पराभूतः, शशी तस्यास्तनुं भृशम् ।
करैः सन्तापयामास, सम्प्राप्याऽवसरं निजम् ॥३३८॥

तया स्मरदशामेवं, दुःसहां समवाप्तया ।
तं प्रति प्रहिता दूती, गत्वा द्रुतमभाषत ॥३३९॥

'शृणु हे सुभगोत्तंसाऽभ्यर्णैतद्भवनेशितुः ।
यक्षदत्तगृहपतेः, **सामदत्ता**[1]भिधा सुता ॥३४०॥

विवाहिताऽत्र पुरे [सा], विरक्ता कुप्रियात्ततः ।
निरीक्ष्य त्वां दृढं रक्ता, मन्मुखेन वदत्यदः ॥३४१॥

वीरावतंस ! मारेण, दारुणैः सायकैर्दृढम् ।
हन्यमानामरक्षन् मां, निर्दयेष्वग्रणीरसि ॥३४२॥

तन्मां त्रायस्व त्रायस्व, शरण्य ! शरणागताम् ।
उपेक्षिता त्ववाप्स्यामि, स्मरस्य दशमीं दशाम्' ॥३४३॥

श्रुत्वेति वाचिकं तीव्रानुरागां तां विदन्नपि ।
अगडो देशकालज्ञो, धीरधीरभ्यधादिदम् ॥३४४॥

'अहं **विशाला**वास्तव्योऽगडदत्तेति विश्रुतः ।
कलाभ्यासं कर्तुकाम, इह प्राप्तोऽस्मि सुस्मिते ! ॥३४५॥

---

१. प्राकृतभाषारचिते वसुदेवहिण्डिग्रन्थे श्रेष्ठिपुत्र्याः 'सामदत्ता' इति नाम दर्शितम्, अगडदत्तरासमालायां च पीठबन्धान्तर्गते तुलनात्मकसम्प्रेक्षणे पू. तीर्थभद्रविजयगणिना 'श्यामदत्ता' इत्यभिधानं दर्शितम्, वसुदेवहिण्डिग्रन्थस्य गुर्जरानुवादेऽपि तदेव नाम दर्शितम्, अतोऽत्र 'श्यामदत्ता' इति समीचीनमाभाति, एवं सर्वत्र ज्ञेयम् ।

कला अभ्यस्य निखिला, गच्छाम्यात्मपुरे यदा ।
तदा मया सहाऽऽयातु, भद्रे ! तव सखी द्रुतम् ॥३४६॥

भवत्या स्थाप्यतां सुस्था, स्वसखी कतिचिद्दिनान् ।
धीमतामपि सिध्यन्ति, कार्याण्यौत्सुक्यतो न हि' ॥३४७॥

इत्युक्त्वा कृतसत्कारा, विसृष्टा दूतिका ययौ ।
स्वयं पुनः कलाशेषमभ्यस्यंस्तस्थिवान् सुखम् ॥३४८॥

अन्येद्युर्भूपसदसि, गुर्वनुज्ञामवाप्य सः ।
दर्शयामासिवान् सारं, कलौघं विगतश्रमः ॥३४९॥

चक्र-मुद्गर-निस्त्रिंश-दण्डाद्यैः श्रममुल्वणम् ।
तन्वन्नेष सदस्यानां, चिरं चक्रे चमत्कृतिम् ॥३५०॥

तं ते शश्लाघिरे धूतमूर्धानोऽथ मुहुर्मुहुः ।
पृथ्वीनाथः सुवाङ्मात्रेणापि तुष्टाव तं न हि ॥३५१॥

सोऽभ्यधत्त ततो भूपं, 'प्रसादस्तेऽस्तु दूरतः ।
साधुवादोऽपि नो देव !, मयाऽवापि कुतो वद' ॥३५२॥

भूपोऽभाषिष्ट 'भो भद्र !, चित्रमात्रफलां तव ।
वीक्षमाणाः कलां चित्रीयन्ते तत्त्वबहिर्मुखाः ॥३५३॥

अस्मादृशास्त्वर्हदुक्ततत्त्वज्ञाः स्तुवते कृतिन् ! ।
एकां धर्मकलामेव, प्रष्ठां सर्वकलास्वपि ॥३५४॥

आजीविकामात्रकृता, तव किं कलयाऽनया ।
लोकोत्तरामिहाऽमुत्र, हितदां शृणु मे कलाम् ॥३५५॥

अभूदत्रैव **कौशाम्ब्यां, हरिषेण**महीपतेः ।
सुबुद्धिनामा सद्बुद्धिशेवधिर्मन्त्रिपुङ्गवः ॥३५६॥

सिंहलीकुक्षिभूस्तस्याऽऽनन्द इत्याख्यया सुतः ।
यौवने जग्रसे कुष्ठव्याधिना राहुणेन्दुवत् ॥३५७॥

तस्याऽत्यन्तपूतिगन्धेः, स्वजनैस्त्यक्तसन्निधेः ।
मक्षिकौघपरीतस्य, दिना दुःखमया ययुः ॥३५८॥

जहुस्तमगदङ्काराः, कृतनानोपचारकाः ।
कञ्चिद् गुणमपश्यन्तः, पिशुनं पण्डिता यथा ॥३५९॥

कुतोऽपि कार्यतोऽन्येद्युर्**यवनद्वीप**शासिता ।
प्रजिघाय निजं दूतं, **कौशाम्बी**भूधवं प्रति ॥३६०॥

हरिषेणनृपस्याऽसौ, सदः प्राप्तो महामतिः ।
सम्प्राप्तगौरवो राजकार्यं सर्वं न्यवेदयत् ॥३६१॥

अथोत्थितो गृहं नीत्वा, सच्चक्रे मन्त्रिणा भृशम् ।
तत्राऽऽविष्टञ्च त्वग्दोषवन्त**मानन्द**मैक्षत ॥३६२॥

कोऽयमित्यथ दूतेन, पृष्टोऽमात्योऽश्रुपूर्णदृक् ।
स्माहा'ऽसौ मे सुतो रोगी, भग्नन्यक्षभिषग्मदः' ॥३६३॥

दूतः कृतिशिरोरत्नं, विज्ञातानेकभेषजः ।
मन्त्रिभक्तिभराद् बाढं, प्रीतचित्तोऽब्रवीदिति ॥३६४॥

'असौ जात्यकिशोरस्य, शोणिते विहिताप्लवः ।
क्षणादुल्लाघतां यायादिति मा संशयं कृथाः' ॥३६५॥

मन्त्री तन्त्रमिति श्रुत्वा, हृष्टो द्रुतं विसृज्य तम् ।
अध्यायत् सुष्ठ्वयं लब्ध, उपायः पुत्ररोगहृत् ॥३६६॥

राज्ञा ममौकसि प्राणवल्लभः सर्वलक्षणः ।
एकः किशोरो मुक्तोऽस्ति, विश्वासाद्रक्षितुं पुरा ॥३६७॥

तस्य देहे सिरावेधादुद्गतेनाऽसृजा शुभम् ।
संस्नाप्योल्लाघमाश्वेव, विधास्ये कुलदीपकम् ॥३६८॥

किशोरोऽपि च पीनाङ्गो, भविता वृष्यसेवया ।
इति ध्यात्वा सिरां तस्य, मन्त्री दुरुदघाटयत् ॥३६९॥

तद्रक्ते मन्त्रिपुत्रोऽस्नान्नीरुक् च समजायत ।
सिरा पुनरसृग्वान्ता, व्यरंसीत् संवृताऽपि न ॥३७०॥

निःशोणितो विपेदेऽश्वस्तज्ज्ञात्वा क्ष्मापतिः क्षणात् ।
मन्त्रिणः सकुटुम्बस्य, वधमादिक्षदुग्ररुट् ॥३७१॥

क्ष्मापादेशं वितन्वत्सु, भूपभृत्येषु मन्त्रिसूः ।
क्षिप्रं झम्पां खातिकायां, प्रदाय प्रपलायत ॥३७२॥

केनाप्यलक्षितो गच्छन्, पुरः स्वत्राणबद्धधीः ।
पर्णवाटमवापाऽसौ, तद्भर्त्रा च निरैक्ष्यत ॥३७३॥

कोऽसि भद्रेति सोमालगिरा पृष्टोऽमुनाऽखिलम् ।
स्ववृत्तं दीनवदनो, जगाद सचिवाङ्गभूः ॥३७४॥

कृपालुना ततस्तेन, नीत्वा स्वगृहमञ्जसा ।
बन्धु-श्रीभ्रंशसन्तप्त, आश्वास्य स्थाप्यते स्म सः ॥३७५॥

अन्येद्युस्तद्गृहायातसाधुभ्यां प्रणमन्नसौ ।
विच्छायास्यः सवात्सल्यं, दुःखहेतुमपृच्छ्यत ॥३७६॥

तेनापि सास्रुणाऽशेषे, स्ववृत्तान्ते निवेदिते ।
साधुभ्यां धर्म एवैकोऽवादि दुःखामयौषधम् ॥३७७॥

मुनिवाक्यात् परिज्ञाय, सम्यग्धर्मं द्विधा ततः ।
आनन्दः स्फुरदानन्दः, श्राद्धधर्ममशिश्रियत् ॥३७८॥

आराध्य च विशुद्धात्मा, विपन्नोऽत्रैव पुर्यभूत् ।
हरिषेणमहीशस्य, सोऽङ्गजो गुरुभाग्यभाक् ॥३७९॥

जितशत्रुरिति ख्यातः, सोऽस्म्यहं मेदिनीपतिः ।
जातजातिस्मृतिर्वीक्ष्य, पुरान्तश्चारिणौ यती ॥३८०॥

तदवाप्तोऽस्मि साम्राज्यं, श्रीभरोद्भासुरं यया ।
सैवाऽलङ्कुरुते धर्मकलैका मानसं मम ॥३८१॥

कलाः स्युर्नृत्त-गीताद्या, अपि केकि-पिकादिषु ।
तत्ताः स्तुत्याः कथं नाम, सारधर्मकलाविदाम्' ॥३८२॥

एवं सम्भाषमाणोऽस्ति, यावदेनं धराधिपः ।
तावत् पौराः समाजग्मुर्गुरुप्राभृतपाणयः ॥३८३॥

वेत्रिणा ज्ञापिता भूपादेशात्तेऽथ प्रवेशिताः ।
ढौकितप्राभृता राज्ञा, पृष्टाः कारणमागतेः ॥३८४॥

तेषामेकोऽव[द]द् वाग्मी, 'देव ! पौरांस्तवाऽधुना ।
दुःखाकरोति सर्वस्वहरणात् कोऽपि तस्करः ॥३८५॥

प्रतापभास्वति क्ष्माप !, त्वयि सत्यपि दस्युना ।
प्रालेयेनेव पद्मिन्यो, गतपद्याः प्रजाः कृताः' ॥३८६॥

अथ क्रुद्धो नृपोऽजल्पत्, तलारक्षमरे ! वद ।
अनाथामिव मुष्णाति, पश्यतस्तव कः पुरीम् ?' ॥३८७॥

तलाध्यक्षोऽप्यभाषिष्ट, 'स्वामिंस्तस्य ग्रहे कृताः ।
उपाया विविधाः स्तेनो, न त्वसौ ददृशे क्वचित् ॥३८८॥

तस्याऽहं निग्रहं कर्त्तुमसमर्थोऽस्मि सर्वथा ।
ममैव निग्रहं रुष्टः, कुरुतां दस्युवत् प्रभुः' ॥३८९॥

सस्मितं नृपतिः प्रोचे, 'वक्तीदं भद्र ! किं भवान् ।
नान्यस्य वारके ह्यन्यः, कृतान्तेनापि नीयते' ॥३९०॥

अथ साहसिनां श्रेष्ठोऽगडदत्तोऽवदन्नृप ! ।
आदेशं देहि तं चौरं, त्वत्पादान्तमुपानये ॥३९१॥

दिनसप्तकमध्ये तं, नाहरे चेत् कदाचन ।
ज्वलिते ज्वलने देव !, तत् पतामि पतङ्गवत्' ॥३९२॥

इत्याधाय दृढां सन्धां, सोत्साहो भूभुजा स्तुतः ।
विस्मितैर्वीक्षितो लोकैर्निर्ययौ सदसोऽन्तरात् ॥३९३॥

अथोद्यान-नदी-कूप-गञ्जा-गीर्वाणसद्मसु ।
द्यूतस्थानेषु वेशेषु, चत्वरेषु मठेष्वपि ॥३९४॥

वीक्षमाणः परिभ्राम्यंश्चौरचिह्नमनाप्नुवन् ।
दिवसानतिचक्राम, विक्रमैकधनः स षट् ॥३९५॥ [युग्मम्]

सप्तमे दिवसे त्वेवं, दध्यौ नो तस्करः क्वचित् ।
लेभे न चास्य वार्त्ताऽपि, समायासीच्छ्रवःपथम् ॥३९६॥

तद् व्रजामि विदेशं किं ?, किं वाऽद्मि विषमं विषम् ? ।
हत्वा तां कामिनीं किं वा, यामि क्वचन दुर्गमे ? ॥३९७॥

अयुक्तं कर्त्तुमेतद्वा, निर्मलान्वयजन्मिनाम् ।
स्वजिह्वया प्रतिज्ञातो, नार्थः कार्यो मयाऽन्यथा ॥३९८॥

चलेच्चूलाऽपि हेमाद्रेर्गच्छेत् पातालमुर्व्यपि ।
उत्तमानां प्रतिज्ञातं, कल्पान्तेऽपि चलेन्न च ॥३९९॥

सन्धानिर्वाहसम्भूतकीर्त्तिगौरा नरोत्तमाः ।
मृता अपि हि जीवन्ति, जीवन्तोऽपि मृताः परे ॥४००॥

इति सञ्चिन्त्य चित्तेनाऽपराह्णे नगराद् बहिः ।
भ्राम्यन्नेकस्य वृक्षस्य, तले श्रान्तो निषेदिवान् ॥४०१॥

इतश्चायातवांस्तत्र, परिव्राट् कुण्डिकाकरः ।
काषायसिचयो मुण्डमस्तकः कर्त्रिकां वहन् ॥४०२॥

तं विलोक्याऽगडोऽध्यासीन्नियतं परिमोष्यसौ ।
मुनेः करे कथङ्कारं, कर्त्रिकासम्भवः किल ॥४०३॥

परिव्राट् तं ततोऽवादीद्, 'हंहो भद्र ! कुतो भवान् ? ।
कथमेकः ? कथं शून्यचेतस्क इव वीक्ष्यसे ?' ॥४०४॥

अगडः समयज्ञोऽथ, सत्प्रज्ञोऽजल्पदल्पकम् ।
'भगवन् ! पर्यटाम्येष, दौःस्थ्याद् दुःखी यते ततः' ॥४०५॥

परोऽवादीदथो 'खेदं, माऽऽत्मचित्ते मुधा विधाः ।
अद्रवत्तव दारिद्र्यं, यन्मां दद्रष्ठ शिष्टधीः' ॥४०६॥

स्मित्वाऽवक् सोऽपि 'लप्स्येऽहं, प्रभो ! त्वत्तः श्रियं ध्रुवम् ।
कल्पपादपवीक्षा हि, व्यर्थीभवति नाऽङ्गिनाम्' ॥४०७॥

इतश्चास्तं गते भानौ, तमसि प्रसृतेऽभितः ।
अगडेन समं चौरः, प्रविवेश द्रुतं पुरम् ॥४०८॥

दस्युराडथ कस्याऽपि, धनाढ्यस्य निकेतने ।
दत्त्वा क्षात्रं रथिभुवाऽवाहयद् द्रविणोच्चयम् ॥४०९॥

रथिकस्तस्करादेशाद्वाहं वाहं महोद्यमः ।
शून्यौकसि व्यधाच्छैलशृङ्गाभं द्रविणोत्करम् ॥४१०॥

---

१. चौरः । २. दर्शनम् ।

गत्वा स्तेनस्ततोऽधन्यान्, सुप्तान् देवकुले क्वचित् ।
लोभयित्वा धनेनोच्चैर्भारोद्वाहार्थमानयत् ॥४११॥

भारमुत्पाट्य तैरेष, नगर्या निर्ययौ बहिः ।
सध्र**ङ्ङ्गगडदत्तो**ऽपि, चेतस्येवं व्यकल्पयत् ॥४१२॥

इदानीं हन्म्यमुं दस्युं, तीव्रेण तरवारिणा ।
अथवा क्षत्रवंश्यस्य, न मे युक्तश्छलाद्वधः ॥४१३॥

अथ चौराग्रणीः पुर्यास्त्यक्त्वा भूमिं दवीयसीम् ।
तान् सस्नेहमिवाभाणीद्भारिकान् कपटे पटुः ॥४१४॥

'अद्यापि बहुला रात्रिर्भारोद्वहनकर्मणा ।
श्रमातुरा भवन्तस्तच्छेरतां क्षणमेककम्' ॥४१५॥

एवं निर्भरविश्वासा, भारवाहा अशेरत ।
भेजतुश्छद्मनिद्रां तु, धूर्त्तौ रथिकतस्करौ ॥४१६॥

क्षणान्तरे समुत्थाय, स्रस्तराद्रथिसत्तमः ।
किञ्चित् काष्ठं निजस्थाने, निधाय परतः स्थितः ॥४१७॥

अथैकागारिकः सोऽपि, जवादुत्थाय भारिकान् ।
विश्वस्तं शयितान् खड्गेनाऽवधीन्निर्घृणावधिः ॥४१८॥

सारथेः स्रस्तरेऽथ द्राक्, सम्प्राप्तस्तरवारिणा ।
काष्ठे दत्त्वा वृथा घातं, विलक्षो यावदस्ति सः ॥४१९॥

तावत् कृपाणमुद्यम्य, सत्क्रोधं तेन हक्कितः ।
रे रे ! प्राप्तोऽसि कीनाशवक्त्रं विश्वस्तघातक ! ॥४२०॥

स्मरेष्टां देवतामेवमुक्त्वा तीव्रासिघाततः ।
पातितः पृथिवीपीठे, कण्ठप्राप्ताऽसुरभ्यधात् ॥४२१॥

'तुष्टस्त्वद्विक्रमाच्छिष्ट !, मां जानीहि मलिम्लुचम् ।
भुजङ्गं नाम लोकानां, भुजङ्गमिव भीषणम् ॥४२२॥

आस्ते भद्र ! श्मशानेऽस्मिन्न्यग्रोधस्य तरोरधः ।
महद्भूमिगृहं नानालोप्त्रैः शश्वन्मया भृतम् ॥४२३॥

तत्र स्वसाऽस्ति मे साक्षादमरीव भुवं गता ।
सा शब्दिता भटोत्तंस !, द्वारमुद्घाटयिष्यति ॥४२४॥

सङ्केतार्थममुं चासिं, तस्याः कोविद ! दर्शयेः ।
ततो हृष्टाऽखिलं द्युम्नं, तव सा कथयिष्यति ॥४२५॥

विवाह्य तां स्वसारं मे, सारं स्वीकृत्य चाद्भुतम् ।
दारिद्र्यस्य जलं दत्त्वा, विलस स्वेच्छया कृतिन् !' ॥४२६॥

एवं जल्पन्नसौ प्राणैर्मुमुचेऽथ नियन्तृभूः ।
तद्दिष्टवर्त्मनाऽऽत्तासिर्भूम्योकोद्वारमीयिवान् ॥४२७॥

शब्दे विनिर्मिते द्वारं, सा सुभ्रूरुदघाटयत् ।
तं च वीक्ष्य कुतः कोऽसाविति बाढं विसिष्मिये ॥४२८॥

खड्गदर्शनतो गूढशोका बाह्यप्रमोदभृत् ।
सा निनाय ससम्मानं, रथिरं मन्दिरान्तरे ॥४२९॥

मुखात्तस्याऽखिलं भ्रातुर्वृत्तान्तमवबुध्य च ।
प्रोवाच 'भवदायत्ता, इमे प्राणा इदं धनम् ॥४३०॥

प्राणनाथ ! प्रसद्येमां, शस्यां शय्यामलङ्कुरु ।
आगच्छामि गृहीत्वाऽहं, भवदर्थं विलेपनम्' ॥४३१॥

इत्युक्त्वा निर्गतायां द्राक्, तस्यां शय्यामधिष्ठितः ।
अगडो ध्यातवानेवं, शुद्धबुद्धिनिवासभूः ॥४३२॥

माया-ऽनृत-नृशंसत्व-चापल्यजनिभूमिषु ।
निसर्गादेव विश्वासो, विदुषां स्त्रीषु नोचितः ॥४३३॥

विशेषाच्च द्विषज्जामौ, विस्रम्भोऽस्यां न युज्यते ।
सर्पिणीं खेदितां बाढमङ्के न्यस्यति नाम कः ? ॥४३४॥

इत्येष स्वप्रतिच्छन्दं, शय्यायां न्यस्य शस्यधीः ।
तस्या दिदृक्षुश्चरितं, स्वयं दूरेऽवतस्थिवान् ॥४३५॥

न्यस्ताऽस्ति तत्र तल्पोद्धर्वं, तन्मानैका पुरा शिला ।
सा तया यन्त्रतो मुक्ता, तत्र ध्रुसिति पेतुषी ॥४३६॥

सा बुद्ध्वा चूर्णितममुं, हृष्टाऽभाषिष्ट दुष्टधीः ।
'गतोऽसि मामकभ्रातुर्मार्गं मदनगर्दभ !' ॥४३७॥

श्रुत्वेति कुपितः सोऽपि, केशेष्वादाय तां जगौ ।
'कः प्रौढपौरुषोऽप्युर्व्यां, हन्तुं शक्नोति मामरे !' ॥४३८॥

तां तल्लक्ष्मीमिवादाय, ततो राज्ञः पुरो गतः ।
समस्तं दास्यवं वृत्तमयमाचष्ट चित्रकृत् ॥४३९॥

भूपस्तां स्तेनभगिनीं, भोगिनीं विदधे बुधः ।
भूमिसद्म वटाधस्तन्नीतश्च रथिसूनुना ॥४४०॥

रत्न-स्वर्णादिवस्त्वोघं, तत्र पश्यन् सविस्मयम् ।
आहूय नागरान् भूपो, यथास्वं सर्वमार्पयत् ॥४४१॥

भूमीधवेन पौरैश्च, श्लाघितोत्तमपौरुषः ।
ततोऽस्थाद् रथिकः पुर्यां, तत्रैव कतिचिद्दिनान् ॥४४२॥

इतश्च श्रेष्ठिनः पुत्र्या, भृशमातुरया रयात् ।
सध्रीची प्रहिताऽभ्येत्य, सोपालम्भं तमब्रवीत् ॥४४३॥

'पुण्यलावण्यतां श्रेष्ठितनयां प्रबलारतिम् ।
उपेक्षसे किमद्यापि, त्वत्सङ्गैकमनोरथाम्' ॥४४४॥

प्रातर्**विशालां** यास्यामि, स्वसखीं शशभृन्मुखीम् ।
प्रगुणीकुरु भद्रे ! द्रागित्युक्त्वा व्यसृजत् स ताम् ॥४४५॥

सामदत्ता सखीवक्त्रात्तच्छ्रुत्वा प्रेयसो वचः ।
सुधासिक्तेव तत्कालं, परं सम्मदमासदत् ॥४४६॥

ततः समग्रसामग्रीं, निर्मायोन्मुद्रितरागभृत् ।
आयताक्षी समायाता, सदेश**मगडस्य** सा ॥४४७॥

रथिसूनुरथ प्रेप्सु[र]**वन्तीं** सज्जितायुधः ।
त्वरापास्तानिले न्यास्थत्तां रथाङ्गस्तनीं रथे ॥४४८॥

याम्येष **सामदत्तां** भो !, अपहृत्य जवादहम् ।
अहंयुरस्ति यः कश्चित्, सुभटोऽस्त्री[१] पुरोऽस्तु सः ॥४४९॥

इति घोषन्नस्खलितः, केनचित् सुभटाग्रणीः ।
अतिचक्राम कियतीमपि भूमिमपास्तभीः ॥४५०॥

ततश्च सरसि क्वापि, स्थित्वा बन्धुवियोगतः ।
रुदतीं[२] तां स्फुरच्चाटु, प्रसाध्याऽभोजयत् प्रियाम् ॥४५१॥

ततोऽध्वानं लङ्घमानः, क्वचन ग्रामसीमनि ।
महान्तं जनसङ्घातं, स्थितमेष निरैक्षत ॥४५२॥

तस्मान्नृयुगलेनैत्य, कुत आगाः ? क्व यास्यसि ? ।
इति पृष्टोऽथ **कौशाम्ब्या, अवन्त्यामि**त्यवोचत ॥४५३॥

---

१. धनुर्धारी । २. 'रुदन्ती' मिति पु.प्रे. ।

प्रोचे पुनर्नराभ्यां 'चेदनुजानासि तत्तव ।
साहाय्यादटवीमेतां, सार्थोऽयमपि लङ्घते ॥४५४॥

अरण्यान्यामिहोन्मत्तो, मातङ्गोऽहिश्च दृग्विषः ।
पापो द्वीपी तथा स्तेनसेनानीरस्ति दुर्द्धरः' ॥४५५॥

नटप्रष्ठस्ततोऽवादीदकुतोभीतयो जनाः ! ।
आगच्छन्तु समग्रेभ्यः, प्रत्यूहेभ्योऽस्मि रक्षिता' ॥४५६॥

ताभ्यां ज्ञापितवृत्तान्तास्ततः सार्थजना अमुम् ।
अनुजग्मुर्महोत्साहा, विनेया इव सद्गुरुम् ॥४५७॥

भासितो भंसितेनोच्चैर्जटाजूटविभूषणः ।
शिष्यैर्वृतस्तदा कश्चिदेको लिङ्गी समापतत् ॥४५८॥

सार्थलोकान् बभाणाऽसौ, बाढं पेशलया गिरा ।
'तीर्थयात्राकृतमतिर्याताऽस्म्युज्जयिनीं पुरीम् ॥४५९॥

यद्यनुज्ञा भवेत्तर्हि, सार्थमेतं श्रयामि वः ।
नैकाकी विकटामीशे, प्रयातुमटवीमिमाम्' ॥४६०॥

अनुज्ञातोऽथ तैः कूटदीनारान् दर्शयञ्जगौ ।
'देवार्चार्थमिमे दत्ताः, कृतिनैकेन मे पुरा ॥४६१॥

तन्निरीक्ष्योच्यतां सत्याः, कूटा वाऽमी' ततश्च तैः ।
अभाणि 'कूटदीनारैः, केनचिद्वञ्चितोऽसि भोः !' ॥४६२॥

तच्छ्रुत्वा ताडयन् वक्षः, क्रन्दंश्चैष स्फुरत्कृपैः ।
तैरूचे 'तापसाधीश !, धीरतां धेह्यलं शुचा ॥४६३॥

---

१. भस्मना ।

दीनाराः सन्ति नः सार्थे, बहवोऽपि तवैव ते' ।
श्रुत्वेति स विदन् सार्थसार्थं प्रमुमुदेतराम् ॥४६४॥

अगडोऽप्यर्थितोऽनुज्ञां, सहयाने तदाऽमुना ।
निरचैषीद्धियांधाम, क्रूरतां तस्य लक्षणैः ॥४६५॥

आगच्छतु मया स्थेयमप्रमत्तेन वर्त्मनि ।
इति चिन्तयताऽकृत्याऽनुज्ञातोऽसौ सहाऽचलत् ॥४६६॥

समस्तापायरक्षायां, क्षमेण क्षत्रसूनुना ।
सनाथः स क्रमात् सार्थो, व्यतीयाय बहुं भुवम् ॥४६७॥

मध्याह्नेऽथ क्वचित् सान्द्रविविधाऽनोकहाकुले ।
नदीतटे स्थितं सार्थं, लिङ्गी सप्रश्रयं जगौ ॥४६८॥

'पाकश्रमं जना ! मा स्म, कृढ्वं यन्निकटस्थिते ।
गोकुलेऽस्मिश्चतुर्मासीं, व्यधामेतामहं सुखम् ॥४६९॥

मयाऽस्य गोकुलस्येशो, दानधर्मं प्रबोधितः ।
अध्वगेभ्यो ददात्युच्चैर्भोज्यं दधिपयोऽन्वितम् ॥४७०॥

तस्मादुपानयिष्यामि, निमन्त्र्येति' स दम्भिकः ।
व्रजं गत्वा समादाय, भोज्यं द्रुतमुपाययौ ॥४७१॥

रथिकेन कृपाढ्येनाऽसकृद् भ्रूसञ्ज्ञया जनाः ।
निषिद्धा अपि धीशून्यास्तदगृह्णत लोलुपाः ॥४७२॥

रथिकाय ततो दातुं, भोज्यं प्रावर्त्ताऽसकौ ।
अनेनाऽप्यद्य पर्वाहं ममेत्युक्त्वा न्यषिध्यत ॥४७३॥

अथ सार्थजनान् भोज्यं, तद् भुक्त्वा विषयुग् जवात् ।
द्रुच्छाये शयितान् मूर्च्छागतानेषोऽसिनाऽवधीत् ॥४७४॥

उद्यम्याऽसिं ततोऽनात्मविदयं निर्दयाग्रणीः ।
धावन् स्वसम्मुखं जघ्नेऽगडेन तरवारिणा ॥४७५॥

हतो मर्मण्यधर्मात्मा, पतितः पृथिवीतले ।
सोऽथ प्रोचे 'कृतिन् ! स्तेनो, धनपुञ्जाभिधोऽस्म्यहम् ॥४७६॥

इयत्कालं महासत्त्व !, च्छलितोऽहं न केनचित् ।
त्वत्प्रेक्षावत्तया त्वद्य, रञ्जितोऽस्मितमां हृदि ॥४७७॥

परासोर्मम दारूणि, देया दाक्षिण्यसुन्दर ! ।
अन्यच्च शृणु कान्तारेऽमुष्मिन् विष्वग् द्रुमादृते ॥४७८॥

उभयोः सरितोर्मध्येऽस्त्युत्तुङ्गं देवतागृहम् ।
विभागे तस्य पाश्चात्ये, चतुरस्रा शिलाऽस्ति च ॥४७९॥ [युग्मम्]

तामुत्पाट्य पटुप्रज्ञ !, गच्छेर्भूमिगृहान्तरम् ।
ममाऽस्ति प्रेयसी तत्र, स्वापतेयं च पुष्कलम् ॥४८०॥

तत् सर्वं त्वमुपादाय, विधेहि स्वोचितां क्रियाम्' ।
इत्युक्तवान् परं लोकं, प्राप पाटच्चरः क्षणात् ॥४८१॥

तादृक्षस्याऽथ दत्त्वाऽग्निं, रथी भूमिगृहं गतः ।
प्रवृत्तः प्रेक्षितुं चौरकान्तां तां स्निग्धया दृशा ॥४८२॥

ततः कोपारुणदृशा, नितान्तं सामदत्तया ।
उपालभ्यत सासूयमसौ सुपरुषाक्षरैः ॥४८३॥

'त्वत्कृते तत्यजे धृष्ट !, पुरं पुरमिवाऽऽत्मनः ।
पितरौ बन्धवश्चापि, हा हा त्वं पुनरीदृशः' ॥४८४॥

इति श्रुत्वा दृढीभूतप्रेमभङ्गभयादयम् ।
अचालीन्निर्व्यलीकात्मा, त्यक्त्वा तां द्रविणं च तत् ॥४८५॥

अध्वानमथ वेगेनाऽतिक्रामन् सुभटोत्तमः ।
बलवद्गवलाकीर्णां, प्रणदद्गवयव्रजाम् ॥४८६॥

स्फुरच्छार्दूलदुःशब्दां, भल्लूकरवभीषणाम् ।
विकटामटवीमाट, रटत्कौशिकसङ्कुलाम् ॥४८७॥ युग्मम् ॥

तत्र कल्पान्तसौन्दर्यं, जङ्गमक्ष्माधरप्रभम् ।
यमदोर्दण्डदेशीयशु[ण्डा]ताण्डवकारिणम् ॥४८८॥[1]

सरन्तं पुरतो व्यालं, भाण्डागारं भियामिव ।
शरैः कुम्भव्यधं तन्वन्निरास्थद्वीरशेखरः ॥४८९॥ युग्मम् ॥

अग्रतः स्फारफूत्कारः, समागच्छन् भुजङ्गमः ।
अर्द्धचन्द्रेषुणा चक्रे, विशिरा भटचक्रिणा ॥४९०॥

पुरश्च लोललोलस्य, द्वीपिनो भीषणध्वनेः ।
निनाय पञ्चभिर्बाणैर्व्यात्तं वक्त्रं निषङ्गताम् ॥४९१॥

एवं स्फोरयतो वीरवृत्तिं रथिकजन्मनः ।
पुरस्ता[द्] दुर्द्धरतरं, पुलिन्दानीकमापतत् ॥४९२॥

रुद्धो विष्वक् शरासारकारिभिर्मलिनात्मभिः ।
पुलिन्दैरम्बुदैरर्कवन्महस्वी भटोत्तमः ॥४९३॥

एकोऽप्यथ महावीर्यः, पुलिन्दानां पताकिनीम्[2] ।
समीरवत्तुषश्रेणीं, समन्तादुदडाययत् ॥४९४॥

पल्लीशोऽर्जुननामाऽथ, पश्यंस्त्रस्यन्निजं बलम् ।
उत्साहयन्महोत्साहस्तेन योद्धुमढौकत ॥४९५॥

---

१. 'युगदोर्दण्ड' इति पु.प्रे. । २. सेनाम् ।

घ्नतोर्निष्कृपमन्योन्यं, कुर्वतोर्घातवञ्चनाम् ।
जयश्रीकाङ्क्षिणोर्जज्ञे, तयोर्घोरं रणं चिरम् ॥४९६॥

अगडोऽचिन्तयच्छक्त्या, न जय्योऽसौ महाबलः ।
छलादप्यबलेनाऽरिर्बली जेय इति स्थितिः ॥४९७॥

अथो रथाग्रे व्यामोहहेतोस्तां प्राणवल्लभाम् ।
न्यास्थन्मदनजीवातुं, जिगीषुः पल्लिनायकम् ॥४९८॥

पल्लिनाथोऽद्भुताकारां, तां प्रति प्रेरयन् दृशम् ।
तेन च्छलविदाऽघानि, हृदि मर्माविधेषुणा ॥४९९॥

विशिखेन न ते भिन्नः, किन्त्वहं पुष्पधन्वनः ।
इति ब्रुवंश्च भूपीठे, लुठितो मृत्युमाप सः ॥५००॥

इत्थं साधितदुःसाधो, निराबाधं विशुद्धधीः ।
अध्वशेषं समुल्लङ्घ्य, प्रापाऽवन्तीं प्रवेतृभूः ॥५०१॥

यशोमती परिज्ञाय, सवधूकं तनूद्भवम् ।
समायातं सम्मदाढ्याऽभ्याययौ स्वजनैः सह ॥५०२॥

भक्तितः प्रणमन्तं च, [तं] विनीतशिरोमणि[म्] ।
समानन्दयदाशीभिरुद्वेलस्नेहवारिधिः ॥५०३॥

प्रणमन्तीं **सामदत्ताम**प्याशास्य प्रशस्यधीः ।
महामहेन तनयं, नगरान्तरवीविशत् ॥५०४॥

जनन्याः स्वजनानां च, पृच्छतां पुरतोऽखिलम् ।
यथावृत्तं व्यतिकरमसौ स्वीयमचीकथत् ॥५०५॥

अन्येद्युः [१]सोपदो नन्तुमायातो [२]मेदिनीभुजा ।
ज्ञातवृत्तेन सानन्दं, न्यवेशि स पितुः पदे ॥५०६॥

---

१. सोपायनः । २. नृपेण ।

मातृभक्तिं वितन्वानो, धिन्वानः स्वजनव्रजम् ।
कृण्वानो दुर्नयं भूरीन्, वर्षान् सोऽथात्यवाहयत् ॥५०७॥

इतश्च—

माकन्दमञ्जरीस्वादस्वादुकोकिलकूजितः ।
वासयन् ककुभः पौष्पै, रजोभिर्मधुरापतत् ॥५०८॥

मलयस्पर्शनस्पर्शोद्दुषिताङ्ग्यो मृगीदृशः ।
मानेन सह यत्राऽधुर्नीवीबन्धं श्लथं भृशम् ॥५०९॥

यत्राऽलिनो मृदुपदन्यासाः सुमनसां मधु ।
धयन्तस्तरुणान् स्त्रीषु, मार्द्दवं किल शासति ॥५१०॥

रोलम्बा यत्र मधुरारावाः स्मरमहीपतेः ।
गायना इव गायन्ति, त्रिजगज्जित्वरान् गुणान् ॥५११॥

गुरुवद्यत्र सुमनःस्तोमोल्लासिनि सर्वतः ।
अभव्यजातिवज्जातिर्नैकाऽधात् सुमनःस्थिति[म्] ॥५१२॥

वियुक्तकामिनां यत्र, चन्द्राद्यास्तादृशोऽपि हि ।
दाहं वितेनिरे मिथ्यादृशामिव जिनोक्तयः ॥५१३॥

भूपस्तत्र वसन्तर्त्तौ, सावरोधोऽपि खेलितुम् ।
उद्यानं प्रापदन्येऽपि, नागरा **अगडो**ऽपि च ॥५१४॥

तत्र प्रेङ्खा-गीत-नृत्त-कुसुमावचयादिभिः ।
लोकाः प्रमुदिताः क्रीडां, चक्रुः प्रणयिनीयुजः ॥५१५॥

खेलित्वा सुचिरं क्ष्मापो, ययौ सायं पुरान्तरम् ।
रथिकोऽप्यात्मसदनं, गन्तुं रथमसज्जयत् ॥५१६॥

अत्रान्तरे **सामदत्तां,** माधवीवल्लिमण्डपे ।
प्रेङ्खासक्तां ददंशाऽहिः, कृतान्त इव मूर्त्तिमान् ॥५१७॥

प्राणेश ! रक्ष रक्षेति, रटन्ती विरसस्वरम् ।
विषेण ग्लप्यमानाङ्गी, रथिनोऽङ्के पपात सा ॥५१८॥

पाञ्चालिकेव निश्चेष्टा, कष्टां लेभे दशामियम् ।
द्रागुन्मीलन्महादुःखो, रथिकोऽपि मुमूर्च्छ च ॥५१९॥

अवाप्तचेतनो नाना, विलप्य विरहातुरः ।
एनां परेतां जानानोऽचिन्तयच्चेति चेतसा ॥५२०॥

मदर्थं क्षणतस्त्यक्तजननी-तात-बान्धवाम् ।
विना प्राणप्रियामेनां, जीवितुं मे न युज्यते ॥५२१॥

सहाऽनया प्रवेक्ष्यामि, तच्चितां ज्वलितानलाम् ।
ज्ञातव्यतिकरा त्वम्बा, निश्चितं प्रतिषेत्स्यति ॥५२२॥

ध्यात्वेति परिवारस्य, यत्नतः प्रतिषेधतः ।
दीप्ते चितानले यावदुद्विग्नो विशति द्रुतम् ॥५२३॥

तावद्विद्याधराभ्यां खादुत्तीर्ण्याभ्यां कृपाभरात् ।
प्रोचे 'भोस्त्रपसे किं न, वनितार्थे त्यजन्नसून् ॥५२४॥

प्रेमपात्रं कलत्रं ते, विधास्यावो विषोज्झितम् ।
मा मुञ्च जीवितं भद्र !, केयं विषबिभीषिका ?' ॥५२५॥

इत्युक्त्वा त्रिर्जलेनेमामभिषिच्य सचेतनाम् ।
तयोरेको व्यधान्**मन्त्रमहिमा हि महाद्भुतः** ॥५२६॥

सुप्तोत्थितेव सोत्तस्थौ, संवृण्वाना वपुर्लताम् ।
किमिदं किमिदं स्वामिन्निति पेशलगीर्द्रुतम् ॥५२७॥

रथी यावदपश्यत्तां, दयितां गुरुसम्भ्रमः ।
तावत् खेटौ तिरोधत्तां, भीतौ प्रत्युपकारतः ॥५२८॥

अथो परिजनं सर्वं, विसृज्य रथिकोत्तमः ।
सप्रियो देवतागारे, प्राविशत् सविधस्थिते ॥५२९॥

सूचीभेद्ये तमःस्तोमे, बिभ्यतीं चाब्रवीत् प्रियाम् ।
'मा भैर्भीरु ! द्रुतं वह्निमुद्द्योतार्थं समानये' ॥५३०॥

उक्त्वेति गत्वा लात्वाऽग्निं, यावदागात् सुरौकसि ।
विद्युज्जात्कृतिवत्तावत्तत्रोद्द्योतं निरैक्षत ॥५३१॥

प्रियेऽत्र कथमुद्द्योतः, साशङ्कमिति भाषिते ।
सस्मितं साऽवदत् 'स्वामिंस्त्वत्पाण्यसे(ग्ने)रियं द्युतिः' ॥५३२॥[1]

ततस्तस्याः कृपाणं सोऽर्पयित्वा स्वकराम्बुजा[त्] ।
अवनिन्यस्तजानुः सन्, यावद्धमति पावकम् ॥५३३॥

तावद्विकोशो निस्त्रिंशः, सशब्दं तत्करान्तरात् ।
पुरतः पृथिवीपीठे, महाशनिरिवापतत् ॥५३४॥

सम्भ्रान्तोऽपृच्छदेनां स, स्वभावसरलाशयः ।
कथं पपात खड्गोऽसौ, कान्ते ! कोशपरिच्युतः ? ॥५३५॥

सोचे 'नाथ ! महामोहादधः कोशो मया धृतः ।
तदेष तरवारिर्मे, सस्रंसे करकुड्मलात्' ॥५३६॥

ततोऽसौ विगताशङ्कः, प्रज्वाल्य ज्वलनं जवात् ।
रजनीमतिचक्राम, विविधैः सुरतोत्सवैः ॥५३७॥

---

१. अग्रे ५७१ तमे श्लोके त्वत्करस्थितपावकात् ।

प्रातश्च स्वजनौघेन, हर्षाद्विहितमङ्गलः ।
पुरं प्राणप्रियायुक्तोऽविक्षदक्षतभाग्यभाक् ॥५३८॥

अन्येद्युर्भूभुजा प्रैषि, पुरे **दशपुरा**भिधे ।
दौत्ये***ऽरिदमन***क्षोणीपतेरेष *विदां वरः* ॥५३९॥

गतस्तत्र च विज्ञप्तकार्यो धात्रीधवार्पिते ।
सौधे दिनानि कतिचित्तस्थौ स्थैर्यैकमन्दिरम् ॥५४०॥

परेद्यवि च मध्याह्ने, देहद्युज्जितकाञ्चनम् ।
शमागारं मुनिद्वन्द्वं, सौधप्राप्तमवन्दत ॥५४१॥

प्रासुकैर्वस्तुभिस्तेन, श्रद्धया प्रतिलाभिते ।
गते तस्मिन् परं तादृगेवाऽऽगान्मुनियामलम् ॥५४२॥

तथैव सत्कृते भक्त्या, तस्मिन्नपि विनिर्गते ।
तादृगागात् परं साधुद्वन्द्वं निर्द्वन्द्वसंयमम् ॥५४३॥

तदपि प्रतिलाभ्योच्चैरेषणीयैर्मनीषिराट् ।
विममर्श कथङ्कारं, त्रिरायाताविमौ मुनी ॥५४४॥

ऋद्धेऽप्यत्र पुरे दानानभिज्ञाः किं समे जनाः ?।
यद्वा सदृशसौधालीजातमोहाविंहागतौ[१] ॥५४५॥

ततः पप्रच्छ वन्दित्वा, युवां पूज्यौ क्व तिष्ठथः ।
उद्यान इति तावुक्त्वा, ययतुर्यतिपुङ्गवौ ॥५४६॥

रथिधुर्योऽपराह्णेऽथ, गतो मुनिनिनंसया ।
उद्याने षड् व्यलोकिष्ट, मिथस्तुल्याकृतीन् यतीन् ॥५४७॥

---

१. **'वमूद्गजू' इति पु.प्रे.** ।

दध्यौ च कंटरे[१] सर्वेऽप्यमी धन्या महर्षयः ।
एषां साधारणाकृत्या, व्यभ्राम्यमहमप्यहो ! ॥५४८॥

नत्वाऽथ विस्मयानन्दभक्तिप्राग्भारपूरितः ।
तान् पप्रच्छाऽमलं धर्मं, शर्मदानैकलग्नकम् ॥५४९॥

तेषां ज्येष्ठो व्रतिश्रेष्ठो, दयामूलमनुत्तरम् ।
अज्ञाप[य]ज्जिनोपज्ञं, धर्मं तं रथिपुङ्गवम् ॥५५०॥

पप्रच्छाऽथ रथी 'पूज्याः !, सदृशी वः किमाकृतिः ?।
यौवनेऽपि किमीदृक् च, मतिस्तपसि दुस्तपे ?' ॥५५१॥

अथोवाच कृपावारिराशिर्वाचंयमोत्तमः ।
'शृणु **विन्ध्यगिरौ** पल्ली, विद्यतेऽमृतसुन्दरा ॥५५२॥

अजय्यः क्षत्रवंशाब्धिशशाङ्कोऽर्जुननामकः ।
भिल्लैः सेव्यक्रमः पल्लीं, तां पपौ वरविक्रमः ॥५५३॥

कोऽप्यन्यदा रथी कान्तान्वितः पल्लीं समाययौ ।
सार्द्धं तेन महायुद्धमकरोत् पल्लिनायकः ॥५५४॥

स पल्लीशं बलाज्जेतुमसमर्थश्छलैकधीः ।
रथाग्रे स्थापयामास, प्रेयसीं सुभगाकृतिम् ॥५५५॥

तद्रूपदर्शनव्यग्रनयनस्तीक्ष्णपत्रिणा ।
हतो मर्मणि तेनाथ, पल्लीशः पञ्चतां ययौ ॥५५६॥

तस्याऽनुजा वयं मङ्क्षु, क्षीणन्यक्षपराक्रमाः ।
तदा नष्टा जीवनाशं, स्वमन्दिरमुपेयिम ॥५५७॥

---

१. आश्चर्यद्योतकोऽव्ययः ।

जनयित्र्या **प्रजावत्या**, चापि निर्भरदुःखतः ।
कातरङ्कारमाक्रुष्टास्तं हन्तुं धाविताः पुनः ॥५५८॥

तद्रथाध्वानुसारेण, क्रमात् **पुंष्पकरण्डिनीम्**[१] ।
ययिमाऽवापिम केऽपि, न पुनस्तद्वधक्षणम् ॥५५९॥

दन्दशूकवदुद्दामाश्छलान्वेषणतत्पराः ।
ततस्तस्थिम तत्रैव, मन्युदष्टाधराश्चिरम् ॥५६०॥

कदाचित् स वसन्तेऽरिरुद्याने क्रीडितुं ययौ ।
तं तत्रैकाकिनं हन्तुं, वयमथाऽनुजग्मिम ॥५६१॥

तस्य च क्रीडतः प्राणप्रिया प्रेङ्खोलने रता ।
दष्टाऽहिना कृपालुभ्यां, खेटाभ्यां द्राक् च सज्जिता ॥५६२॥

ततोऽसौ देवतासद्म, पार्श्वस्थं सप्रियोऽविशत् ।
तन्मध्ये छन्नदीपोऽस्मद्भ्राता चैकः पुराप्यभूत् ॥५६३॥

रथिकोऽपि ततो ध्वान्तभीतामाश्वास्य वल्लभाम् ।
गतः कृशानुमानेतुमालोककरणेच्छया ॥५६४॥

सोऽस्माकं सोदरस्त्वत्रान्तरे छन्नं प्रदीपकम् ।
आविश्चकार मदनाकारं तं च ददर्श सा ॥५६५॥

तस्मिंश्च तन्वती तन्वी, दृशं प्रीतितरङ्गिताम् ।
अवाप तापमसमं, स्मरसायकबाधिता ॥५६६॥

तं बभाण च 'भो भद्र !, त्वदङ्गालिङ्गनोत्सुकम् ।
ममाऽङ्गं व्यथतेऽत्यर्थं, सुभगाग्र्य ! प्रसीद तत्' ॥५६७॥

---

१. उज्जयनीम् ।

स स्माह 'किमिदं वक्षि ?, पद्माक्षि ! प्राणनाशनम् ।
ज्ञाता चेद्वल्लभस्तेऽदस्तत् कुतः क्षेममावयोः ?' ॥५६८॥

तयोचे 'भद्र ! मा भीरुसुलभां भीरुतां कृथाः ।
जानीहि मृतमेवाऽमुं, मद्दयितमसंशयम्' ॥५६९॥

रथिरोऽप्याजगामाऽथ, क्षणादेवाऽऽत्तपावकः ।
अस्माकं सोदरोऽप्याशु, तं दीपं निरवापयत् ॥५७०॥

एतत्तेजः कुतः कान्ते !, प्रससर्पेति भाषिणम् ।
प्रियं प्रत्यवदत् साऽपि, त्वत्करस्थितपावकात् ॥५७१॥

सोऽथाऽवक् '[तर]वारिं मे, प्रतीच्छ हृदयेश्वरि ! ।
तिमिरौघविभेदाय, ज्वलयाम्यनलं यथा' ॥५७२॥

इत्युक्ता साऽपि निस्त्रिंशं, प्रतीष्याऽऽकृष्य कोशतः ।
धमन्तमनलं कान्तं, प्रहर्त्तुं यावदुद्यता ॥५७३॥

तावद्विचित्रं स्त्रीवृत्तं, भवोद्वेगनिबन्धनम् ।
तद्विचारयता बाढं, करुणासार्द्रचेतसा ॥५७४॥

भ्रात्रा नस्त्वरितं तस्या, लोलाक्ष्याः पाणिपल्लवात् ।
आहत्य स्वकरेणोच्चैः, कृपाणः पातितो भुवि ॥५७५॥ युग्मम् ॥

प्रिये ! किमिदमित्युक्तवन्तं वल्लभमेषिका ।
दुर्द्धीः प्रत्याययन्मोहो, ममाऽभूदिति भाषिणी ॥५७६॥

ततो निर्गत्य सोदर्योऽप्यस्माकं तद् दृगीक्षितम् ।
निखिलं न्यगदत् सर्वेऽप्यथाऽध्यासिष्म मानसे ॥५७७॥

विश्वस्मिन्नपि विश्वेऽस्मिन्नुपायः कोऽपि नास्ति सः ।
नियन्त्र्यतेतरां येन, चलं चेतो मृगीदृशाम् ॥५७८॥

योषिच्चेतो विदधतो, धातुर्ये ह्यणवश्च्युताः ।
करिकर्णतडिन्मुख्या, भावास्तैरभवन्ननु ॥५७९॥

हृदयेन धरन्त्यन्यं, पश्यन्त्यन्यं दृशा पुनः ।
दत्त्वाऽन्यस्मै च वचनं, रमन्तेऽन्येन धिक् स्त्रियः ॥५८०॥

अहो ! यस्याः शुचा चित्यां, प्राविविक्षदसौ रथी ।
तस्या विश्वासघातित्वमीदृशं धिग् निरीक्ष्यते ॥५८१॥

प्रेयस्योऽपि च यद्येवं, विघटन्ते क्षणादपि ।
ध्रियते प्रेम किं छेकैरितरेषु जनेषु तत् ॥५८२॥

विदुषां युज्यते प्रीतिरकृत्रिमसहोदरे ।
कल्याणकोटिदानैककल्पद्रौ धर्म एव हि ॥५८३॥

ही वयं शात्रवं भ्रातुर्वृथा हन्तुं समुद्यताः ।
स्वस्यैव शात्रवान् हन्मो, न मोहमदनादिकान् ॥५८४॥

अनादौ च भवे शत्रु-मित्रतां निखिलाङ्गिषु ।
मिथो गच्छत्सु कः शत्रुः, किं वा मित्रं समर्थ्यते ? ॥५८५॥

ध्यात्वेति गुरुसंवेगा, भोगाभोगपराङ्मुखाः ।
प्रतिपेदिमहे दीक्षां, **दृढधृत्य**भिधाद् गुरोः ॥५८६॥

दृढधर्मा धर्मरुचिर्धर्मदासश्च सुव्रतः ।
दृढव्रतो धर्मप्रिय, इत्यस्मान् गुरुराहूतः ॥५८७॥

अन्तरङ्गरिपुस्तोमातङ्केनेव ततो वयम् ।
विहरामः समवेता, एवैते धरणीतले' ॥५८८॥

इति श्रुत्वाऽखिलं वृत्तं, स्वमेवर्षिमुखाद्रथी ।
ज्ञातस्वकान्तादौरात्म्यो, भवोद्विग्नो व्यचिन्तयत् ॥५८९॥

तादृगाविष्कृतस्नेहा, प्राणेभ्योऽपि प्रिया च या ।
तस्या अपीदृशं हन्त, चेष्टितं शिष्टगर्हितम् ॥५९०॥

वशाः स्युर्नो वशा दानान्न मानान्न पराक्रमात् ।
न कलाभ्यो न गुणेभ्यो, न स्नेहान्न कुलादपि ॥५९१॥

रुदतीभिर्हसन्तीभिः, सुदतीभिर्बुधा अपि ।
के के न हि प्रतार्यन्ते, पिकीभिः काकवत् क्षितौ ॥५९२॥

सन्ध्यावत् क्षणरागिण्यो, नीचगा जलपूरवत् ।
व्यालीव कुटिला वर्ज्या, नार्यो नरककारणम् ॥५९३॥

इमां वाममतिर्वामामत्यर्थं वामचेष्टिताम् ।
स्ववामलोचनातुल्यां, धिक् सकामो व्यचिन्तयम् ॥५९४॥

इति ध्यायन् विरक्तात्मा**ऽगडदत्तो**ऽवदत् 'प्रभो ! ।
यद्वृत्तमेतत् सोऽस्म्येष, युष्मद्भ्रातृविघातकः ॥५९५॥

भृशं बिभेमि नारीभ्यो, भुजङ्गीवदतः परम् ।
सद्यः प्रसद्य तद्दीक्षां, देहि तद्दमनौषधी[म्] ॥५९६॥

युष्माकमग्रजं हत्वा, यदात्मा मलिनीकृतः ।
अधुना शोधनीयस्तद्विमलेन तपोऽम्भसा' ॥५९७॥

इति ब्रुवन्नसौ तेन, करुणारससिन्धुना ।
साधुनाऽदीक्षि निखिलं, साध्वाचारमशिक्षि च ॥५९८॥

यथोदितं च चारित्रं, समाराध्य विरम्य सः ।
अलब्ध सुगतिं शुद्धभावन्यत्कृतदुष्कृतः ॥५९९॥

इमा**मगडदत्तस्य**, कथां कर्णसुधायिताम् ।
निधाय मानसे धीराः, सन्तु स्त्रीषु विरागिणः ॥६००॥

वामाक्षीर्वर्ष्मभासा जितकनकरुचो दर्शितर्जुस्वभावा,
दृष्ट्वा मुह्यन्ति जाल्माः स्फुरदुरुमदनोदग्रपत्रिप्रभिन्नाः ।
बुद्ध्वा केचित्तु शश्वत् स्रवदतुलमलापूरितास्ताः कृपाणी-
कल्पस्वान्ता नितान्तं विजहति सपदि प्रोज्ज्वलप्रज्ञयाऽऽढ्याः ॥६०१॥
[स्रग्धरावृत्तम्]

—● इति स्त्रीदुरन्तताया**मगडदत्त**कथा । [ग्रन्थाग्रम्] ३१३ ●—

विषयान् वाञ्छितान् प्राप्य, मोदन्ते मूढबुद्धयः ।
एतान् विषान्वितस्वादुभोज्याभान्न पुनर्विदुः ॥६०२॥

सौख्यं प्रपञ्च्य पञ्चापि, विषयाः स्वल्पमात्रकम् ।
नरकेऽनन्तदुःखेऽस्यन्त्यङ्गिनः प्राप्य पञ्चताम् ॥६०३॥

विषयेभ्यः सुखं मोहाद्यदिच्छन्ति शरीरिणः ।
तदम्भो मृगतृष्णाभ्यस्तद्धनेभ्योऽथवा धनम् ॥६०४॥[१]

दाशो मांसलवैर्मीनान्, सुगीतैर्लुब्धको मृगान् ।
शौनिकोऽवीन् घासलवैर्मृदुवाग्भिः शठो जनान् ॥६०५॥

यथा तथा मुखे रम्यैः, परिणामेऽतिदारुणैः ।
विषयैर्देहिनो मोहः, कष्टकोटिं नयत्यहो ! ॥६०६॥ युग्मम् ॥

विषाभैर्विषयैस्तूर्णं, घूर्णिताः प्राणिनो ध्रुवम् ।
सच्छिक्षामवमन्यन्ते, [मन्यन्ते] न हिताहितम् ॥६०७॥

---

१. कृपणेभ्यः ।

विषयैरसकृत्प्राप्तैर्न तृप्ता जन्तवः क्वचित् ।
कृ[१]पीटयोनिवत् काष्ठैरापगाभिः पयोधिवत् ॥६०८॥

सुखं सर्षपसङ्काशं, दुःखं मन्दरसन्निभम् ।
विषयेषु मधुबिन्द्वा[स्वा]दकस्य निदर्शनात् ॥६०९॥

तथाहि—

कोऽपि सार्थः प्रभूतार्थपूर्णः कान्तारमाविशत् ।
कीनाशदासप्रतिमास्तस्करास्तत्र चापतन् ॥६१०॥

सार्थलोका निजप्राणत्राणैकमतयो द्रुतम् ।
दिशो दिशि पलायन्त, त्यक्तद्रविणसञ्चयाः ॥६११॥

कश्चिदेकः पुमांस्त्रस्तः, सार्थाद् भ्रष्टोऽभ्रमद् भृशम् ।
श्रान्तः क्षुधा-तृषाक्रान्तो, दीनवक्त्रो महाटवौ ॥६१२॥

क्रौर्यशिक्षागुरुः प्रेतपतेरप्युग्रगर्जितः ।
मूर्त्तिमानिव विन्ध्याद्रिः, प्रश्च्योतन्मदनिर्झरः ॥६१३॥

क्रोधताम्राननः पादप्रपातैः कम्पयन् धराम् ।
उद्धुरः सिन्धुरो वन्यो, मत्तस्तं प्रत्यधावत ॥६१४॥ युग्मम् ॥

'त्र[२]स्तः स हस्ति'संस्पर्शगोचरं गतवान् पुमान् ।
पुरः पुरः पलायिष्ट, भयाधिष्ठितमानसः ॥६१५॥

दृष्ट्वा कूपं तृणच्छन्नं, ध्रुवमृत्योर्गजाद्भिया ।
सन्दिग्धमरणे तत्र, द्रुतं झम्पां ददावयम् ॥६१६॥

निपटंश्चाऽवटतटोद्भूतन्यग्रोधशाखिनः ।
प्ररोहेऽन्तर्लम्बमाने, विलग्याऽतिष्ठदन्तरा ॥६१७॥

---

१. अग्निवत् । २. 'सस्ति हस्त' इति पु.प्रे. ।

दृशं कूपतले न्यस्यन्, पादावष्टम्भलिप्सया ।
ददर्शाऽजगरं चैष, निर्भाग्यानां धुरन्धरः ॥६१८॥

वाहसोऽपीक्षमाणस्तं, चिकीर्षुः कवलोपमम् ।
कूपान्तः प्रतिकूपाभं, व्याददाद्वदनं निजम् ॥६१९॥

दृशौ न्यस्यंस्ततो दिक्षु, चतसृष्वपि भीषणान् ।
सोऽद्राक्षीच्चतुरो मृत्योर्यामिकानिव भोगिनः ॥६२०॥

उत्फणान् स्फारफूत्कारान्, जिघत्सून् विनिरीक्ष्य तान् ।
अकम्पत तनुस्तस्य, समीरधुतवल्लिवत् ॥६२१॥

स्वस्याऽवलम्बनीभूतं, प्ररोहं तं च मूषिकौ ।
सिताऽसितावविरतमच्छित्सातां श्रमोज्झितम् ॥६२२॥

परितोऽपि परिभ्राम्यन्नप्युपादातुमक्षमः ।
अस्प्राक्षीत् पुष्करेणोच्चैर्मूर्द्धनि तं [नरं] द्विपः ॥६२३॥

तदप्राप्त्या चातिक्रुद्धो, विद्ध्वा तीक्ष्णै रदैर्वटम् ।
उत्पाटयन्निव हठादधुना[द्] दुर्धरः करी ॥६२४॥

उड्डीना वटशाखाग्रवर्त्तिनो मधुमण्डकात् ।
मक्षिका व्यलगन्नस्य, शरीरे तोमराननाः ॥६२५॥

लोहसन्दंशसङ्काशैर्जीवाकृष्टिपरैरिव ।
तुण्डैरस्थिषु विश्रान्तैः, सरघा अदशन्नमुम् ॥६२६॥

मधुमण्डान्मधुबिन्दुर्गलित्वाऽस्याऽलिकस्थले ।
निपपात लुठित्वाऽथाऽविशदास्यं मुहुर्मुहुः ॥६२७॥

आसादिततदास्वादस्तादृक्प्राप्तदशोऽपि सः ।
सुखिनं स्वं पङ्कशैत्याद्, गर्त्ताकोल इवाऽबुधत् ॥६२८॥

अथ व्योमपथक्रोडे, कोऽपि विद्याधरश्चरन् ।
नुन्नो दयितया क्रष्टुममुं बन्धुरिवाययौ ॥६२९॥

तस्मिन् प्रदत्तहस्तेऽपि, मधुबिन्दुप्रलुब्धधीः ।
निर्गन्तुमीहते नासौ, हा मूढात्मा हताशयः ॥६३०॥

भावार्थः पुनरेतस्य, दृष्टान्तस्य निशम्यताम् ।
यः **पुमान्** स **भवी जन्तुर्याऽटवी संसृति**स्तु सा ॥६३१॥

यो **दन्ती** स पुन**र्मृत्यु**र्यः **कूपो नरजन्म** तत् ।
यः **शयुर्नरकः** सोऽत्र, ये**ऽहय**स्ते **क्रुदादयः** ॥६३२॥

न्यग्रोधद्रुप्ररोहो यस्तदायु**र्मूषकौ** पुनः ।
शुक्ल-कृष्णौ परिज्ञेयौ, **पक्षावा**युर्विभेदकौ ॥६३३॥

या **मक्षिका आमया**स्ते, **मधुबिन्दुः** पुनर्यकः ।
तकत् **सुखं वैषयिकं**, देहिनां प्रीतिहेतुकम् ॥६३४॥

यस्तु **विद्याधरः** क्रष्टा, स **गुरु**र्भवतारकः ।
प्रेयसी त्वस्य **करुणा**, निर्निमित्तोपकारिणी ॥६३५॥

गुरुणा कृष्यमाणोऽपि, प्राप्तक्लेशोच्चयोऽपि धिक् ।
निर्यियासति नैवाऽङ्गी, तुच्छसौख्यविमोहितः ॥६३६॥

एवं सुखं वैषयिकं, बुद्ध्वा क्षुल्लं विनश्वरम् ।
यतध्वं मोक्षसौख्यायाऽदभ्रायाऽप्रतिपातिने ॥६३७॥

अमरसदनवर्त्ती जन्तुरेषोऽमरीभिः,
पटुचटुमयवाग्भिर्बाढमाराध्यमानः ।

बहुसमयमनैषीन्नाऽऽप तृप्तिं तथापि,
तदिह तनुनि[1] सौख्ये मानुषे कोऽनुबन्धः ॥६३८॥ [मालिनीवृत्तम्]

—● इति विषयतुच्छत्वे **मधुबिन्दु**कथा । ग्रन्थाग्रम् ३७ अ. २८ ●—

अहो ! देहकृते मूढा, अकृत्यानि वितन्वते ।
विचारयन्ति चित्तेन, सतत्त्वं[2] तस्य नो पुनः ॥६३९॥

श्रेष्ठाऽऽहार-गन्ध-माल्य-वस्त्राद्यैः सत्कृतोऽपि सन् ।
देहो न शौचं न स्थैर्यमपि धत्ते कदाचन ॥६४०॥

शीता-ऽऽतपा-ऽऽमयादेर्यद्यत्नेन बहुनाऽव्यते[3] ।
नैव नारकदुःखाब्धिपाते तद्वर्ष्म नाव्यते[4] ॥६४१॥

किं रक्षन्ति मुधा देहं, गेहं सर्वापदां सदा ।
एकं धर्मं तु रक्षन्तु, निदानं सर्वसम्पदाम् ॥६४२॥

अशाश्वतात् परवशात्, समलादन्तकादतः ।
ध्रुवं स्वतन्त्रममलं, सुकृतं गृह्णते बुधाः ॥६४३॥

दुर्गतिं **शशि**वत् प्राप्नोत्यङ्गलालनलालसः ।
श्रेयस्तु **सूर**वत् पुण्यहेतोरङ्गविशोषकः ॥६४४॥

तथाहि—

पत्तनं **पाटलीपुत्र**मस्ति शस्तैकमन्दिरम् ।
स्वर्वधूस्मयहृद्रूपवधूराजिविराजितम् ॥६४५॥

जितारिर्जगतीजानिस्तत्राऽभूद्दोषहानिकृत् ।
खानिः सन्नयरत्नानां, मानिताशेषकोविदः ॥६४६॥

---

१. अल्पे । २. स्वरूपम् । ३. रक्ष्यते । ४. नौरिवाचरति ।

भूपतेस्तस्य तनुजौ, **शशि-सूरप्रभा**भिधौ ।
पौरुषाक्रान्तजगतीचक्रौ पालयतः प्रजाः ॥६४७॥

आगात्तत्र चतुर्ज्ञानी, भव्यकैरवचन्द्रमाः ।
मुनि**र्विजयघोषा**ख्यः, पारदृश्वा श्रुताम्बुधेः ॥६४८॥

नन्तुमेनं मुनिं पौरा, अहम्पूर्विकया ययुः ।
कलयेदलसत्वं को, भाग्यलभ्ये हि वस्तुनि ? ॥६४९॥

शशि-सूरावपि प्राप्तौ, नत्वा तं मुनिपुङ्गवम् ।
यथास्थानं न्यषदतामापातुं देशनामृतम् ॥६५०॥

त्रिजगद्गुरुणाऽऽदिष्टमाचष्ट स्पष्टमेव सः ।
मुनिर्धर्मं दयामूलं, शूलं मोहरिपोर्भिदे ॥६५१॥

लघुकर्मा लघुः **सूरो**, बोधं लेभे गुरोर्गिरा ।
न पुनर्गुरुकर्मत्वाद्, गुरुभ्राता **शशिप्रभः** ॥६५२॥

अवाप्य सौधं सपदि, कनिष्ठो ज्येष्ठमभ्यधात् ।
'सर्वसङ्गं परित्यज्य, भ्रातर्नौ युज्यते व्रतम्' ॥६५३॥

अथो **शशिप्रभः** कर्महतधर्मप्रभोऽवदत् ।
'जडस्त्वमिव नैवाहं, स्वार्थभ्रंशविधौ यते ॥६५४॥

ऐहिकं सुखमुत्सृज्य, काङ्क्षन्नामुष्मिकं कुधीः ।
उभयभ्रंशं लब्धासे, सृगाल इव तद्यथा ॥६५५॥

सृगालः कश्चिदास्यस्थं, मांसं मुक्त्वा सरित्तटे ।
उपादानाय मीनस्य, दधावे त्वरितैः पदैः ॥६५६॥

मीनोऽविशज्जलेऽगाधे, गृध्रो मांसमपाहरत् ।
ततोऽसावुभयभ्रष्टः, परं खेदमशिश्रियत् ॥६५७॥

तद्वद्राज्यमिदं लक्ष्मीमिमां लोलेक्षणा इमाः ।
सर्वं दृष्टमदृष्टार्थे, त्यक्त्वा बाढं तमिष्यसि ॥६५८॥

असन्दिग्धाः श्रियः प्राप्ताः, परित्यज्य सचेतनः ।
को हि सन्दिग्धलाभासु, तासु धत्ते महोद्यमम् ?' ॥६५९॥

सूरप्रभः प्रत्युवाच, 'मेदं गादीः सहोदर ! ।
सर्वज्ञोपज्ञधर्मो न, व्यभिचारी फलं [प्रति] ॥६६०॥

जितरागद्वेषमोहा, निर्निमित्तोपकारिणः ।
नान्यथावादिनः सर्वविदः क्वापीति निश्चिनु ॥६६१॥

त्रसरेणूपमं सौख्यं, किञ्चेदं बहु मन्यसे ।
न मन्यसे पुनः प्रान्ते, पर्वतोपमदुःखदम् ॥६६२॥

य एव सुन्दरा भावा, वीक्ष्यन्ते वपुरादयः ।
काले त एव बीभत्सा, भवेयुर्दुर्विधेर्वशात् ॥६६३॥

तत्तेषु हृदयालूनां, प्रतिबन्धो न युज्यते ।
कूटकार्षापणे नैव, रज्य[न्ते] सुपरीक्षकाः ॥६६४॥

सर्वाद्धासम्भवं[1] देवसौख्यमेकत्र पिण्डितम् ।
अनन्तगुणितं चापि, नाप्नुयाद्यत् सुखोपमाम् ॥६६५॥

तत्र मुक्तिसुखे जैनप्रव्रज्याकष्टलेशतः ।
सुप्रापे किं प्रमाद्यन्ति, प्रबुद्धज्ञानलोचनाः ?' ॥६६६॥ युग्मम् ॥

इत्यादि बहुधाऽप्युक्तो, न **शशी** प्रत्यबुध्यत ।
नैवाप्यते शुभं यस्माद्दुष्कर्मोदयसङ्गतैः ॥६६७॥

---

१. सर्वकालसम्भवम् । 'अद्धा' अयं कालवाची देश्यशब्दः ।

सूरप्रभः पुनर्गाढतरं संवेगमुद्वहन् ।
द्रुतं प्रव्रज्य निर्व्याजं, तपस्तेपे सुदुस्तपम् ॥६६८॥

देहेऽपि निर्ममः शीता-ऽऽतपादिसहनोद्यतः ।
असौ नाऽजगणत् कष्टं, भवकष्टानि भावयन् ॥६६९॥

काले गृहीतानशनश्चतुःशरणमाश्रितः ।
विपद्य द्युतिमान् **ब्रह्मकल्पे**ऽभून्निर्जरोत्तमः ॥६७०॥

शशिप्रभः पुनर्भोगेषूद्वहन् गृद्धिमुल्वणाम् ।
यद्यदङ्गस्य सौख्याय, सिषेवे तत्तदुद्यमात् ॥६७१॥

दुष्प्रापा हि मया भोगा, अमी पुनरिति स्मरन् ।
भृशमासक्तिमेतेषु, तेने स धरणीधवः ॥६७२॥

हंसरोमावलिमयीं, तूलिकां श्रितवान् रसात् ।
शिरीषसुकुमाराङ्गीराश्लिक्षत् सुन्दरीरसौ ॥६७३॥

सारैर्भोज्यैः सुधातुल्यैः, पेयैर्देहस्य निर्वृतिम् ।
शश्वच्चकार भूभर्त्ता, धर्मकर्मपराङ्मुखः ॥६७४॥

कर्पूरा-ऽगरु-कस्तूरी-चन्दनैः कुसुमैरपि ।
सौरभं बिभरामास, शरीरे राट् **शशिप्रभः** ॥६७५॥

नाट्येषु चित्रशालासु, लीलासु च मृगीदृशाम् ।
अन्येष्वपि च दृश्येषु, स्वीचक्रेऽसौ दृशोः फलम् ॥६७६॥

कामिनीभिः सकामाभिः, सोत्कण्ठं कृतचाटुभिः ।
गीतैर्वाद्यैश्च श्रवसोः, **शशी** साफल्यमानशे ॥६७७॥

एवं विविधभङ्गीभिर्भुञ्जानो विषयानसौ ।
कृतार्थं मानुषं जन्म, मेने मोहवशङ्गतः ॥६७८॥

सदाऽप्यतृप्तो भोगानां, योगनामाऽप्यसंस्तुवन् ।
कालधर्मं गतः प्राप, तृतीयां नरकावनिम् ॥६७९॥

सूरदेवोऽपि सोदर्ये, प्रतिबन्धं परं वहन् ।
तद्बोधाय द्रुतं श्वभ्रमध्यमागात् त्रिविष्टपात् ॥६८०॥

ज्ञापयित्वा तं चात्मानमस्मै धर्म्यं वचोऽवदत् ।
'भ्रातर्मया प्रणुन्नोऽपि, भोगेषु त्वमगृध्यथाः ॥६८१॥

यद्देहस्य कृतघ्नस्य, लालनामकरोर्मुधा ।
ईदृक्षे दुस्तरेऽनेन, महादुःखार्ण्णवेऽपतः' ॥६८२॥

तन्निशम्य विभङ्गेन, विदन् स्वं प्राच्यजन्म तत् ।
दुःसहाभिरनन्ताभिरर्दि[तो] नरकार्त्तिभिः ॥६८३॥

भ्रातुस्तां वैबुंधीमृद्धिं, पश्यन् गाढानुतापभाक् ।
द्विषन्नात्मवपुः **सूरं**, **शशी**ति प्रत्यवोचत ॥६८४॥ युग्मम् ॥

'भ्रातर्मय्यनुकम्पस्व, याहि सद्यो मयोज्झितम् ।
तद्वपुः कण्टकैः क्षारैः, कशाभिर्भृशमर्दय ॥६८५॥

तद्बाधाभीरुणा पूर्वं, न चक्रे मयका तपः ।
प्रोद्भावयाऽधुनाऽप्याशु, तद्वपुःपीडनात्तपः' ॥६८६॥

देवः **सूरप्रभो**ऽवादीच्छरीरे चेतनोज्झिते ।
कदर्थितेऽपि को नाम, गुणो मन्दमतेऽधुना ॥६८७॥

अयातयिष्यश्चेद्देहं, तपोभिर्विविधैः पुरा ।
नाऽलप्स्यथास्तदीदृक्षनरकोद्भववेदनाः ॥६८८॥

---

१. दैवीम् ।

न च देहार्दनामात्रं, तपः प्रोक्तं महर्षिभिः ।
एवं ह्यापद्यते नारकाणामपि तपस्विता ॥६८९॥

प्रसज्यते चाऽविरतिरर्हच्छ्रीभोगतोऽर्हताम् ।
तपसस्तन्न सर्वज्ञैर्भणिता दुःखरूपता ॥६९०॥

किञ्च–

रत्नत्रयात्मकं भावे, क्षायोपशमिके तपः ।
साता-ऽसातात्मिका द्वेधा, वेदनौदयिके पुनः ॥६९१॥

तस्मान्न वेदना विज्ञैस्तपस्त्वेन निगद्यते ।
किन्तु कर्मक्षतेर्हेतुः, संवरः प्रशमोत्तरः[१] ॥६९२॥

तन्निमित्तं च सद्ब्रह्म-लोच-षष्ठा-ऽष्टमादिकम् ।
सर्वं बाह्यं तपः प्रोक्तं, न वपुर्यातनाकृते ॥६९३॥

विचेतनाय देहाय, मा स्म कुप्यस्ततोऽधुना ।
कुप्य त्वं बन्धहेतुभ्यो, ददद्भ्यो दुःखसन्ततिम् ॥६९४॥

कर्माण्यादत्ते मिथ्यात्वा-ऽविरतिभ्यां निरन्तरम् ।
प्रमादेन कषायैश्च, योगैश्चापि शरीरवान्' ॥६९५॥

इत्थं **शशिप्रभं** देवोऽनुशिष्य स्वतपोर्जिताम् ।
दिवं गत्वा महासौख्यान्यभुक्त प्रभुतानिधिः ॥६९६॥

वृत्तं **शशिप्रभस्येदं**, देहपोषणदूषकम् ।
निशम्य शमशालीनाः, कुरुध्वं हितमात्मनः ॥६९७॥

---

१. 'अओ पसमाइगब्भो संवरो पहाणो कम्मक्खयहेऊ' इति उपदेशमालायां २५५ श्लोकस्य टीकायाम् ।

देहो वै परिकर्मभिर्बहुविधैः, स्थेयान् भवे नो भवे-
दातङ्काः कफ-मा[1]यु-वायुजनिताः, क्षिण्वन्त्यमुं सन्ततम् ।
नामुत्र प्रचुरोपकारकमपि, [2]क्षेत्रज्ञमन्वेत्यसौ
तस्मात्तीव्रतरैस्तपोभिरमुतः, श्रेयो बुधा गृह्णते ॥६९८॥ [शार्दूलविक्रीडितवृत्तम्]

—● देहलालनवैफल्ये **शशिप्रभ**दृष्टान्तः । ग्रं. ६१ अ. १२ ●—

श्रीपतेः कीर्त्तिचन्द्राख्यनृपतेरगडस्य च ।
मधुबिन्दोः शशिनश्च, दृष्टान्तैः स्फुटतां गतम् ॥६९९॥

[3]वैरस्यमिन्दिरा-बन्धु-वधू-विषय-वर्ष्मणाम् ।
विज्ञाय मोहमुज्झाऽऽशु, राजन् ! **विमलवाहन** ! ॥७००॥ युग्मम् ॥

श्रुत्वेत्य**रिन्दम**गुरोर्देशनामवनीविभुः ।
पीतपीयूषगण्डूष, इवाऽधान्निर्वृतिं पराम् ॥७०१॥

राज्ञो दुष्टमहामोहप्रत्यनीकं जिघांसतः ।
वैराग्यास्त्रं गुरुवचःशाणेनाऽऽप निशाततताम् ॥७०२॥

ततो विनयनम्राङ्गो, नत्वाऽवादीन्नृपो वचः ।
हृदावालस्थतत्त्वद्रुसुमसौरभसन्निभम् ॥७०३॥

'संसारसागरममुं, जन्ममृत्युजलाकुलम् ।
विविधाऽऽमयदुर्यादोदारुणं वीक्षते जनः ॥७०४॥

तथापि नैवोद्विजते, लोलुपः क्षणिके सुखे ।
तत्तारुण्येऽपि वो ब्रूत, किं निमित्तं व्रतादृतौ ?' ॥७०५॥

मुनिर्जजल्प 'पृथ्वीश !, सावधानमनाः शृणु ।
निवेदयाम्यमूदृक्षकष्टानुष्ठानकारणम् ॥७०६॥

---

१. पित्तम् । २. आत्मानम् । ३. विरसत्वम् ।

समस्त्यतीवविस्तीर्णमनन्तजनसङ्कुलम् ।
पुरं नाम्ना **भवावर्तं**, विविधाद्भुतपूरितम् ॥७०७॥

अहं कौटुम्बिकस्तत्राऽभूवं राजन् ! महर्द्धिकः ।
सर्वं ममैव सोदर्यैर्वसति स्म पुरं च तत् ॥७०८॥

अन्यदा च वयं सर्वेऽप्येकेन महताऽहिना ।
कालिन्दीजलकालेन, दष्टास्तीव्रविषाशिषा[१] ॥७०९॥

ते सर्वेऽप्यथ मूर्च्छन्ति, मीलयन्तितरां दृशः ।
शिथिलाङ्गा भवन्त्युच्चैः, कार्याकार्यं न जानते ॥७१०॥

मुह्यन्ति गुरुदेवेषु, न शृण्वन्ति हिता गिरः ।
स्वं न जानन्ति तन्वन्ति, प्रतिपत्तिं च नोचिताम् ॥७११॥

नाऽऽलपन्ति प्रणयिनः, पदन्यासे स्खलन्ति च ।
परैः कृतानुपचारान्न विदन्ति मनागपि ॥७१२॥

तदा केचिच्च तस्योग्रगर[ल]स्यानुभावतः ।
अत्यन्तं काष्ठवच्चेष्टाशून्यत्वमलभन्त धिक् ॥७१३॥

अव्यक्तध्वनयश्चान्ये, पृथ्व्यां लोलन्ति सर्वतः ।
अपरे शून्यहृदयाश्चेष्टन्ते निष्फलं पुनः ॥७१४॥

[इ]तरेषां पुनस्तीव्रविषदाहाऽभिभूतितः ।
अङ्गानि विदलन्त्युच्चैर्लोचनानि स्फुटन्ति च ॥७१५॥

किं बहूक्त्या ? महादुःखव्यथितानामनारतम् ।
दृग्निमीलनमात्रस्याऽप्येषां सौख्यस्य नोदयः ॥७१६॥

---

१. तीव्रविषम् आशिषि-दंष्ट्रायां यस्य सः = तीव्रविषाशीस्तेन, 'दंष्ट्राऽऽशीः' (अभि. चिन्ता. श्लो. १३१५)।

परे त्वव्यक्तनिनदैर्विरसैरारसन्त्यहो ! ।
अशक्ता जातुचिद् व्यक्तैर्वचनैर्हन्त भाषितुम् ॥७१७॥

अन्ये क्वचित् स्खलन्त्युच्चैः, प्रपतन्तितमां क्वचित् ।
मुहुः क्वचन मूर्च्छन्ति, शेरते निर्भरं क्वचित् ॥७१८॥

क्षणं जाग्रति भूयोऽपि, भूयोऽपि बहु शेरते ।
अपरे शेरते नित्यं, न तु जाग्रति जातुचित् ॥७१९॥

विषवेदनया चैवमभिभूते पुरेऽखिले ।
एको महागारुडिकः, प्राप्तः शिष्यावलीवृतः ॥७२०॥

तत्पुरं तादृशं दृष्ट्वा, सञ्जातकरुणश्च सः ।
सर्वाल्लोँकानभाषिष्ट, वाचा पीयूषकल्पया ॥७२१॥

'भो भो ! अस्या विषोत्थाया, वेदनायाः क्षणेन वः ।
मोचयामि क्रियां गुर्वीं, मन्नि[र्दि]ष्टां विधत्थ चेत्' ॥७२२॥

तेऽवोचन् 'सा क्रिया कीदृक् ?', प्रोचे गारुडिकोऽप्यथ ।
'यादृक्षो मम शिष्याणां, वेषो धार्यो हि तादृशः ॥७२३॥

स्वप्राणान्तेऽपि यत्नेन, रक्ष्याः सर्वेऽपि जन्तवः ।
सत्यमेव च वक्तव्यमपि कण्ठगतासुभिः ॥७२४॥

दत्तमेव ग्रहीतव्यं, धर्त्तव्यं ब्रह्म निर्मलम् ।
स्वदेहेऽपि ममत्वं न, कार्यं भोज्यं च नो निशि ॥७२५॥

वस्तव्यं च श्मशाना-ऽद्रि-काननेषु भयोज्झितैः ।
स्वप्यं भुवि विभूषायां, वर्त्तितव्यं न जातुचित् ॥७२६॥

भोगस्त्याज्यो विकृतीनामवमोदरतायुतैः ।
रूक्षवृत्त्या नु स्थातव्यं, प्रणीतात्यशनोज्झिभिः ॥७२७॥

उपयुक्तैर्हिण्डितव्यं, वक्तव्यं निरवद्यकम् ।
भोक्तव्यं द्वाचत्वारिंशद्दोषमुक्तं सदाऽशनम् ॥७२८॥

पीठाद्यादाननिक्षेपौ, कार्यौ वीक्ष्य प्रमृज्य च ।
उत्सृज्यं कफमूत्रादि, निर्जन्तुजगतीतले ॥७२९॥

दुश्चिन्ताया मनो वार्यं, त्यक्तव्या विकथा अपि ।
नित्यं गुप्तेन्द्रियैः स्थेयं, तप्यं च विविधं तपः ॥७३०॥

विहर्त्तव्यमनियतचारेणैव च सर्वदा ।
त्याज्यो दूराद्कल्याणमित्रयोगोऽपि सन्ततम् ॥७३१॥

सङ्गः कुगारुडिकानां, न कर्त्तव्यः कदाचन ।
सोढव्याः क्षुत्तृषा-शीता-ऽऽतपाद्याश्च परीषहाः ॥७३२॥

देव-तिर्यग्-नरोद्भूतैरुपसर्गैरकम्पता ।
धार्या सर्वंसहैर्भाव्यं, पृथ्वीवत् सर्वदाऽपि च ॥७३३॥

शश्वदस्मिन्ननुष्ठाने, प्रमादपरिवर्जितैः ।
जापो मदुपदिष्टस्य, कार्यो मन्त्रस्य यत्नतः ॥७३४॥

एवं सर्वा निवर्त्तन्ते, पूर्वोक्ता विषवेदनाः ।
उन्मीलत्यमला बुद्धिः, किं वदामोऽथवा बहु ? ॥७३५॥

समस्तवेदनामुक्तमुपमापरिवर्जितम् ।
महानन्दसुखमपि, प्राप्यते क्रियया‌ऽनया' ॥७३६॥

तस्य गारुडिकस्येदं, वचः कैश्चिन्महीपते ! ।
निश्चेष्टतां गतैस्तीव्रविषात्त्यां नापि शुश्रुवे ॥७३७॥

यैरश्रावि पुनस्तेष्वप्येके बाढं हसन्ति तत् ।
अवजानन्ति चान्येऽन्ये, निन्दन्ति क्रूरवृत्तयः ॥७३८॥

इतरे तु प्रतिघ्नन्ति, नानाक्लृप्तकुयुक्तिभिः ।
अन्ये लकुट-लेष्ट्वाद्यैस्तस्मिन् ही [प्रं]हरन्त्यपि ॥७३९॥

श्रद्दधाना अपि परे, न भजन्ति प्रमादतः ।
श्रद्धालवो महाभागा, अनुतिष्ठन्ति कत्यपि ॥७४०॥

राजंस्ततोऽहमप्येष, हन्तुं तां विषवेदनाम् ।
श्रित्वा तद्वाचमभ[ज]ममुं वेषं तदर्पितम् ॥७४१॥

एतां महाक्रियां चापि, तद्वाचैवाऽऽयतौ हिताम् ।
दुष्करामपि भूमीश !, प्रतिपन्नोऽस्मि यत्नतः' ॥७४२॥

एवमुक्त्वा स्थिते साधौ, परं विस्मयमुद्वहन् ।
भूपो विमलबुद्धिं स्वं, मन्त्रिपुङ्गवमूचिवान् ॥७४३॥

'अहो ! न जातुचिद् दक्षमुख्याः साधव ईदृशाः ।
असम्बद्धं प्रजल्पन्ति, प्रतारणविवर्जिताः ॥७४४॥

इदं चाऽसम्बद्धमिवाऽऽभाति मे मानसेऽखिलम् ।
तथाहि चेद्भवावर्त्तं, पुरं तादृग् महत्त्वभाक् ॥७४५॥

तत्सोदर्यैः कथं कृत्स्नमपि हन्त व[स]त्यदः ? ।
कथं चैकेन सर्पेण, दष्टस्तावान् जनोऽखिलः ? ॥७४६॥

एको महागारुडिको, लोकस्यैतावतः कथम् ।
आरोग्यकरणं चापि, तूर्णमभ्युपगच्छति ? ॥७४७॥

कथं च विधिरीदृक्षो, विषनिर्घातने मतः ? ।
अहो ! [हि] महती कापि, गिरां दुरवबोधता' ॥७४८॥

मन्त्री स्मित्वा ततोऽवोचद्देवाऽमुष्य महामुनेः ।
लोकोत्तरमिदं विद्धि, वचो भवविरागकृत् ॥७४९॥

१. 'अण्णे लिडुलउडाइएहिं पहरंति' इति पुष्पमालायां १० तमस्य श्लोकस्य वृत्तौ ।

न ह्यमीषां मुनीनां गीः, प्रकृतानामिव स्फुरेत् ।
तदन्तरङ्गभावार्थमस्या राजन् ! शृणु ब्रुवे ॥७५०॥

भवानां नरकादीनामावर्त्त इह यत्नतः ।
संसारोऽयं **भवावर्त्त**पुरमौच्यत साधुना ॥७५१॥

सर्वेषां जनकः **कालपरिणत्या** समन्वितः ।
यतः **कर्मपरीणामः**, सोदरास्तत् समेऽङ्गिनः ॥७५२॥

अनन्तास्ते च सर्वेऽपि, वसन्तोऽत्र पुरेऽहिना ।
दष्टा एकेन येनाऽहो !, तं व्याचक्षे शृणु प्रधीः ! ॥७५३॥

मदाष्टकस्फुटो लेश्यालसज्जिह्मः सदारुणः ।
कुवासनाकृष्णदेहो, रागद्वेषोग्रलोचनः ॥७५४॥

माया-गृद्धिलसद्दाढः, क्रुन्[1]महाविषकण्टकः ।
[2]नोकषायोत्क[र]रदो, ज्ञानावृत्यादिडिम्भयुक् ॥७५५॥

मिथ्यात्वघोरहृदयः, कृतचित्तबिलस्थितिः ।
जगद्दशति निःशेषं, मोहो विषधरो महान् ॥७५६॥ विशेषकम् ॥

तेन दष्टाश्च मूर्च्छाला, इव नात्महितं विदुः ।
मीलयन्ति दृशोऽलीकसौख्यानुभवगर्वतः ॥७५७॥

धार्यन्ते सेवकैश्चैते, श्लथाङ्गाः सादरं करैः ।
भक्ष्याऽभक्ष्य-पेयाऽपेयविभागमपि नो विदुः ॥७५८॥

---

१. 'कोपमहाविषकण्टकविकरालो' इति धर्मरत्नप्रकरणे १९ तमश्लोकवृत्तौ पुरन्दरकथायाम् । 'कोवमहाविषकंठयवियरालो' इति पुष्पमालायां १० तमश्लोकवृत्तौ सर्पगारुडिकघटनायाम् । २. 'नो युषयोत्करदो' इति पु.प्रे. । 'नवनोकसायदसणो' इति पुष्पमालायां १० तमश्लोकवृत्तौ ।

देवान् गुरूंस्तदितरान्न विचि[न्त]न्ति बालिशाः ।
गुरूपदिष्टं शृण्वन्ति, हितमप्येडवन्न च ॥७५९॥

कोऽहं ? युक्तमयुक्तं वा, किं ममेति स्वमप्यहो ! ।
न जानते न तन्वन्ति, गुर्वादेर्विनयौचितीम् ॥७६०॥

नाऽऽलपन्ति परं मूकवच्च बाढं पदे पदे ।
स्खलन्त्येव न बुध्यन्ते, कृता उपकृताः परैः ॥७६१॥

तत्र तीव्रविषावेगान्निश्चेष्टत्वं च काष्ठवत् ।
ये प्राप्तास्तान् विबुध्यस्व, जीवानेकेन्द्रियान्नृप ! ॥७६२॥

पृथ्व्यां लोलन्ति चाव्यक्तं, रसन्तो विकलेन्द्रियाः ।
शून्यहृत्त्वेन चेष्टन्तेऽङ्गिनः पुनरसञ्ज्ञिनः ॥७६३॥

दाहादिकं महादुःखं, लभन्ते नारकाङ्गिनः ।
दष्टास्ते यदसाताख्यसर्पडिम्भेन निर्भरम् ॥७६४॥

एवं यथोचितं दंशनानात्वं विविधाङ्गिषु ।
विचारयेर्यतो मोहसर्पो बहुपरिच्छदः ॥७६५॥

अव्यक्तं विरसन्त्युच्चैः, करभाद्या नरेश्वर ! ।
नृणां नु धर्माः स्खलन-पतनाद्या उदीरिताः ॥७६६॥

ते च जाग्रति सम्प्राप्ता, विरतिं विषलाघवात् ।
भूयश्च शेरते त्यक्त्वा, विरतिं विषवेगतः ॥७६७॥

देवाः स्वपन्त्यविरतिनिद्रयाऽनारतं पुनः ।
एवं मोहाहिविषतः, सर्वे जीवा विसंस्थुलाः ॥७६८॥

तत्र गारुडिकस्तीर्थकरो यतिजनोचिताम् ।
क्रियां दिशन् मोहविषं, हन्तुमेकोऽपि शक्तिमान् ॥७६९॥

विश्वैकबन्धुना तेनोपदिष्टां बिभ्रतः क्रियाम् ।
सिद्धान्तमन्त्रजापैकतानाः स्युर्निर्विषा ध्रुवम् ॥७७०॥

राजन्नमुं मुनिगिरो, भावार्थं लेशतोऽभ्यधाम् ।
उक्तानुसारतः शेषं, स्वयं विद्या[द्] विचक्षणः' ॥७७१॥

इति श्रुत्वा विशामीशः, संवेगरससम्भृतः ।
शिरस्यञ्जलिमायोज्य, प्रोवाच मुनिपुङ्गवम् ॥७७२॥

'सत्यं सत्यमिदं स्वामिन् !, युष्माभिर्विनिवेदितम् ।
ईदृक्प्रबोधगर्भा गीः, कुतो युष्मान् विना भवेत् ? ॥७७३॥

प्रभो ! मोहाहिना तीव्रविषेणाऽनेन निर्भरम् ।
दष्टा इयच्चिरं किञ्चिन्नाऽचेतिष्म हहा वयम् ॥७७४॥

अधुना तु भवद्वाक्यपीयूषरसपूरतः ।
उपशान्तविषावेगाश्चेतनां बिभृमो मुने ! ॥७७५॥

निःशेषविषघाताय, तन्मां कारय तां क्रियाम् ।
वेषं चार्पय तं सर्वदुरितापहृतिक्षमम् ॥७७६॥

राज्ये कुमारमारोप्य, जवाद्यावदुपैम्यहम् ।
तावदत्रैव तिष्ठन्तु, गुरुपादा ! कृपालवः' ॥७७७॥

गुरुर्न्यगददिच्छाऽसौ, साधु साधु महाशय ! ।
केनाप्यद्भुतभाग्येन, भाविभद्रस्य तेऽजनि ॥७७८॥

ज्ञाततत्त्वः पुराऽपि प्राग्जन्मसंस्कारतो ह्यसि ।
हेतुमात्रं गुरूणां तु, देशना ते महात्मनः ॥७७९॥

अर्हत्त्वस्यापि हेतुः स्याद्, दीक्षोपात्ता भवादृशैः ।
आरामिकविशेषेण, किं नारामः फलर्द्धिभाक् ? ॥७८०॥

स्थिता एव वयं राजंस्त्वन्मनीषितसिद्धये ।
भूमौ चरामो हि वयं, भव्यानु[प]चिकीर्षवः' ॥७८१॥

इति क्षमापतेर्वाचं, समाकर्ण्य क्षमापतिः ।
नत्वोत्थायाऽविशत्तीव्रसंवेगो नगरान्तरम् ॥७८२॥

अलङ्कृतासनो मन्त्रिपुङ्गवानथ वेगतः ।
आहूय पुरुहूतश्रीः, ससन्मानमवोचत ॥७८३॥

'पारम्पर्याद्यथा स्मोऽस्मिन्, मन्दिरे पार्थिवा वय[म्] ।
तथा यूयं राज्यभारधौरेया मन्त्रिसत्तमाः ॥७८४॥

मेदिनीसाधने युष्मच्छेमुषी हेतुरग्रिमः ।
गौणस्त्वस्मद्भुजोद्भूतविक्रमः समजायत ॥७८५॥

युष्माभिरेव भूमीयं, दध्रे धीनिधिभिः सदा ।
अहं तु वि[ष]यासक्त, एवाऽतिष्ठं प्रमद्वरः ॥७८६॥

अभुत्सि पुनरद्याऽमुं, प्रमादं गुरुवाक्यतः ।
स्थेयसौख्यपयोराशिलोपामुद्रापतिप्रभम्[1] ॥७८७॥

अदान्तकरणग्रामः, कषायकलुषाशयः ।
इयच्चिरं मुधाऽऽत्मानमज्ञानात् खल्ववञ्चयम् ॥७८८॥

मया साधयता भूमिपीठं प्रत्यर्थिपार्थिवाः ।
दुर्मदा निजदोर्वीर्याऽनले निघ्नीकृताः कति ॥७८९॥

प्रयुञ्जानेन षाड्गुण्यमतन्यत वचः कियत् ।
असत्यं नित्यमेवोच्चैर्न हि स्वहितवर्जिना ॥७९०॥

---

१. स्थिरसुखसागराऽगस्तितुल्यम् ।

हठाद्राज्यानि भूपानां, सदाप्याऽऽछिन्दतो मम ।
अदत्ता[दा]नमेवाऽभूदाजन्म च्छद्मसद्मनः ॥७९१॥

सुरनारीरूपगर्वहारिणीर्हरिणीदृशः ।
रसेन रसयन्नन्वतिष्ठमब्रह्म चान्वहम् ॥७९२॥

वारिणा वारिधिरिव, दारुणा दमुना[1] इव ।
जातु श्रिया न तृप्तोऽहं, दृप्तारिमहिषध्वजः ॥७९३॥

हिंसादयोऽमी पञ्चाऽपि, दुर्गदुर्गतिहेतवः ।
अज्ञानादेवाऽसेव्यन्ताऽविरतेन चिरं मया ॥७९४॥

अथाऽहं सर्वविरतिं, प्रपित्सुर्जातचेतनः ।
निधास्यामि कुमारेऽदो, राज्यं प्राज्यर्द्धिभासुरम् ॥७९५॥

सेव्यो मद्वत् कुमारोऽयमुदारचरितोज्ज्वलः ।
प्रकृत्या विबुधानां वः, शिक्षां दत्त्वाऽथवा खलु' ॥७९६॥

मन्त्रिणः स्माहुरुर्वीश !, पूर्वजैर्दर्शितेऽध्वनि ।
साधु सञ्चरसि प्रत्यासन्नसिद्धिपदोऽसि तत् ॥७९७॥

देवो बभार भूभारं, विक्रमाच्छक्रसन्निभः ।
अस्माभिस्तत्र शोभैवाऽभूद्रम्भास्तम्भवद् गृहे ॥७९८॥

साम्राज्यं तदिदं देवः, परिपाल्य नयाध्वना ।
जिघृक्षति परिव्रज्यां, नेयं काचिदनौचिती ॥७९९॥

शस्त्र-शास्त्रप्रवीणोऽसौ, कुमारो मारसुन्दरः ।
क्षमाभारं समुद्वोढुं, क्षम एव महोक्षवत् ॥८००॥

---

१. अग्निः ।

दीक्षां मोक्षफलां कामं, गृह्णातु स्वेच्छया विभुः ।
भुवमेतां कुमारोऽपि, शास्तु शस्तगुणोच्चयः' ॥८०१॥

ततो नृपेण तुष्टेनाऽऽह्वायितो वेत्रधारिणा ।
सत्वरं समुपेयाय, कुमारो **हरिवाहनः** ॥८०२॥

प्रणम्य पत्तिवत् स्फारविनयो नयभासुरः ।
निषण्णश्च यथास्थानं, राज्ञा सानन्दमौच्यत ॥८०३॥

'वत्स ! स्वच्छमते ! भूपा, अस्मद्वंश्या अगृध्नवः ।
भुवं पात्वा क्षमीभूतेष्वङ्गजेषु न्यवेशयन् ॥८०४॥

स्वयं तु नश्वरं मत्वा, विश्वं विश्वं मनीषिणः ।
अनश्वराऽनन्तसुखेच्छया चक्रुरुपक्रमम् ॥८०५॥

मद्वत् कालमियन्तं तु, गार्हस्थ्यं कोऽपि नाऽन्वभूत् ।
प्रमादनिद्रया सुप्तश्चिराज्जागरितोऽस्म्यहम् ॥८०६॥

अस्माभिः सुचिरं भूमिभारमूढं वहोद्वह ! ।
वयं संयमभारं तु, साम्प्रतं स्मो विवक्षवः' ॥८०७॥

पितुर्गिरमिति श्रुत्वा, हिमाहतसरोजवत् ।
म्लाननानो बाष्पपूर्णदृक् कुमारोऽभ्यधादथ ॥८०८॥

'मया मन्तुर्महा[न्] कश्चिद्विदधे [म]न्दमेधसा ।
अथवा प्रापदुदयमभाग्यमुरु किञ्चन ॥८०९॥

पदातिपरमाणौ [यत्], यः प्रसादपरो मयि ।
त्यागाकूतमकाण्डेऽपि, प्रभुराविरभावयत् ॥८१०॥

किमृद्धेनाऽपि राज्येन, तातपादैर्विना मम ।
किं पूर्णेनाऽपि नलिनहीनेन सरसाऽलिनः ? ॥८११॥

तत्तातपादा अत्रार्थे, मा दिक्षन्मामतः परम् ।
प्रायश्चित्तं चरिष्यामि, गुर्वाज्ञालङ्घनैनसि' ॥८१२॥

स्वाज्ञालोपि स्फुरत्सत्त्वं, सूनोस्तद्वचनं नृपः ।
समाकर्ण्य विषण्णश्च, प्रसन्नश्चेत्थमूचिवान् ॥८१३॥

'वत्स ! त्वमसि मेधावी, विवेककलितोऽपि च ।
किं भाषसे स्नेहमूलादज्ञानादविचारितम् ? ॥८१४॥

यदा च त्वय्यनाशृण्वत्यपि विश्वम्भरामहम् ।
मोक्षैककामो मोक्ष्यामि, कुमार ! स्फारसद्गुण ! ॥८१५॥

तदाऽप्यस्वामिकामेनां, धर्त्ता शुद्धमते ! भवान् ।
भवितैनोऽधिकं पूज्यादेशातिक्रमतश्च ते ॥८१६॥

मा धा विमर्शक्लेशेन, विधुरं तन्निजं मनः ।
भक्तिप्राग्भारभाक्षक्षीकुरु मद्वचनं द्रुतम्' ॥८१७॥

मन्त्रिणोऽप्येवमाहुः स्म, 'कुमार ! भवताऽखिलम् ।
युक्तमेव न्यगादीदं, धिषणोपमधीजुषा ॥८१८॥

परं यदादिशन्ति त्वां, देवपादाः कुरुष्व तत् ।
सुपुत्राणां ह्यनुल्लङ्घ्यं, सर्वदाऽपि पितुर्वचः' ॥८१९॥

अथो कथञ्चनाऽप्योमित्युक्तवान् गद्गदस्वरम् ।
कुमारोऽध्यास्यत प्रीत्याऽभिषेकासनि भूभुजा ॥८२०॥

मङ्गलातोद्यमालाया, निनदे दिक्प्रसर्पिणि ।
स्वयं भूपोऽभ्यषिञ्चत्तं, पावनैस्तीर्थवारिभिः ॥८२१॥

परेऽपि वसुधाधीशा, अभिषिच्य [स]सम्मदम् ।
पञ्चाङ्गस्पृष्टभूपीठास्तं नेमुरतिभक्तितः ॥८२२॥

धृतदिव्यांशुकः स्फारालङ्का[रा]ढ्यः स नव्यराट् ।
पित्राऽथ शिक्षयामासे, गिरा माधुर्यसारया ॥८२३॥

'वत्स ! त्वया न मोक्तव्यो, नयाध्वा पूर्वजाश्रितः ।
अनये हि प्रवृत्तानामयः स्यात् सविधे कुतः ? ॥८२४॥

शिष्टात्मानः प्रयत्नेन, माननीया मनीषिणा ।
दुष्टात्मानस्तु निग्राह्या, नीतेस्तत्त्वमिदं परम् ॥८२५॥

पूर्या मनोरथाः शश्वन्निजानामनुजीविनाम् ।
न हि स्वार्थं विना कोऽपि, वरिवस्यति नायकम् ॥८२६॥

स्त्रीषु श्रीषु च विश्वासो, न विधेयः कदाचन ।
इहाऽमुत्र च दुःखौघप्रदा ह्येताः शरीरिणाम् ॥८२७॥

सप्तदुर्गतिभीतेन, सदा व्यसनसप्तकम् ।
मोक्तव्यं व्यक्तदोषौघमघसङ्घातकारणम् ॥८२८॥

मदो गुणद्रुमारामदावाग्निरिति चेतसि ।
बुद्ध्वा तं रूपसाम्राज्यविषयं सर्वथा त्यजेः ॥८२९॥

त्रिवर्गं शुभसंसर्गमिच्छुः स्वच्छमते ! सदा ।
यथाकालं भजेर्बाधामतन्वानः परस्परम्' ॥८३०॥

अनुशिष्येति दीक्षायामुत्को **विमलवाहनः** ।
उत्थितो नवभूपेन, विनीतेनाऽन्वगम्यत ॥८३१॥

सुगन्धवारिभिः स्नातः, शुभश्चन्दनचर्चया ।
संवीतदिव्यवसनो, धृतसर्वाङ्गभूषणः ॥८३२॥

मोचिताखिलकारास्थसत्त्वः सत्त्वमहोदधिः ।
चैत्येष्वर्चितसर्वज्ञप्रतिमोऽप्रतिमो गुणैः ॥८३३॥

श्रितो नरशतोद्वाह्यां, शिबिकां छत्रशोभितः ।
चामरैर्वीजितः स्तूयमानो मङ्गलपाठकैः ॥८३४॥

पदे पदे प्रमोदेन, पौरीभिः कृतमङ्गलः ।
वर्ण्यमानगुणग्रामो, मुहुर्गन्धर्वपेटकैः ॥८३५॥

विष्वग् मङ्गलतूर्येषु, वदत्सु कृतिनां वरः ।
राजमार्गेऽथ सोऽचालीदचलाचलमानसः ॥८३६॥ पञ्चभिः कुलकम् ॥

हहा वात्सल्यसदनं, विभुरस्मान् झटित्यपि ।
मुक्त्वा निर्ममतां बिभ्रद्, व्रजति व्रतकाङ्क्षया ॥८३७॥

पुनर्भाग्येन केनाहो !, दृश्य इत्यस्रुवर्षिभिः ।
पृष्ठतः पार्श्वतोऽग्रे च, स्थितैः पौरैर्निरीक्षितः ॥८३८॥

प्राप्याऽनवद्यमुद्यानं, गुरुपादपवित्रितम् ।
उत्ततार [१]चकोराक्षः, शिबिकाया धराधवः ॥८३९॥ त्रिभिर्विशेषकम् ॥

प्रविश्य पादचारेण, त[दु]द्यानं महोद्यमः ।
देहादुत्तारिताऽशेषभूषो भवविरक्तधीः ॥८४०॥

गुरुदत्तं धरन् साधुवेषं हर्षप्रकर्षभृत् ।
पञ्चमुष्ट्युद्धृतकचः, प्रपञ्चौघपराङ्मुखः ॥८४१॥

तत्त्वविद्भिर्मुहुः श्लाघ्यमानसत्त्वगुणोदयः ।
सर्वसावद्ययोगानां, प्रत्याख्यानं ततो व्यधात् ॥८४२॥ विशेषकम् ॥

प्रदक्षिणात्रयं दत्त्वा, वन्दित्वा विनयानतम् ।
पुरःस्थितमथो राजऋषिं तमशिषद् गुरुः ॥८४३॥

१. 'चकार' इति पु. प्रे. ।

अस्मिन् संसारकान्तारे, भ्राम्यद्भिः शश्वदङ्गिभिः ।
कृष्णचित्रकवत्कृच्छ्राल्लभ्यते मानवो भवः ॥८४४॥

तत्रापि दुर्लभो जैनो, धर्मोऽभीष्टफलप्रदः ।
अम्भोनिधौ यथा द्वीपो, मरौ सुरतरुर्यथा ॥८४५॥

धर्मे लब्धेऽपि कस्यापि, कृतिनो लघुकर्मणः ।
जायेत सर्वविरतावीहा संसारदाहभित् ॥८४६॥

लब्ध्वा च सर्वविरतिं, धन्याश्चिन्तामणीसमाम् ।
यत्नतः परिरक्षन्ति, काङ्क्षन्तोऽनुत्तरं सुखम् ॥८४७॥

ये तु स्वीकृत्य तां मूढा, अशुभवासना[वशात्] ।
भवन्त्यविरतेर्वश्या, न शस्यास्ते विपश्चिताम् ॥८४८॥

जिनपालितवत्त्याज्या, दूरेणाऽविरतिः सदा ।
जिनरक्षितवन्नैव, स्वीकार्या कार्यसिद्धिहृत् ॥८४९॥

तथाहि–

अङ्गदेशविभूषाकृदभङ्गसुकृतक्रमा ।
चम्पाख्याऽस्ति पुरी त्राता, **जितशत्रु**महीभुजा ॥८५०॥

माकन्दीत्यभिधो द्युम्नमन्दीकृतधनेश्वरः ।
प्रसादपात्रं भूपस्य, श्रेष्ठी तत्र व्यराजत ॥८५१॥

भद्राकुक्षिभुवौ तस्याऽजायेतां तनयावुभौ ।
जिनपालित इत्येकोऽपरस्तु **जिनरक्षितः** ॥८५२॥

तौ मिथः स्निग्धहृदयौ, सम्प्राप्तौ मध्यमं वयः ।
पित्रोर्दृक्कैरवोल्लासं, चन्द्राविव वितेनतुः ॥८५३॥

उत्साहसाहसावासौ, वारानेकादशाऽम्बुधौ ।
निर्विघ्नमेव तौ यात्राश्चक्राते सद्विधेर्वशात् ॥८५४॥

अर्थतृष्णापराधीनावदीनौ तौ नदीपतौ ।
द्वादशीमप्यथो वेलां, यात्रां निर्मातुमीषतुः ॥८५५॥

पितरं चोचतुर्युष्मत्प्रसादादर्जितुं धनम् ।
आवां रत्नाकरं तूर्णं, भजिष्यावोऽभियोगतः ॥८५६॥

सखेदं न्यगदच्छ्रेष्ठी, 'वत्सौ ! स्वच्छाशयाविदम् ।
युवाभ्यां न पुनर्वाच्यं, बाधाकृत् कर्णयोर्मम ॥८५७॥

भवद्भ्यामर्जितो द्रव्यसञ्चयश्चाऽतिपुष्कलः ।
प्राक्तनोऽप्यस्ति तल्लोभभूतः किं बाधतेऽधिकम् ? ॥८५८॥

यात्रारम्भोऽम्बुधौ चन्द्र, इवाऽसौ द्वादशः खलु ।
अश्रेयःकारणमपि, वत्सौ ! जायेत कर्हिचित् ॥८५९॥

मातापित्रोः प्रमोदं तत्, कुर्वाणौ सततं सुतौ ! ।
कदाग्रहं पयोराशियात्राविषयमुज्झतम् ॥८६०॥

इहैव व्यवसायेन, गतापायेन यत्नतः ।
परिपूरयतं पुत्रौ !, द्रव्यार्जनमनोरथम्' ॥८६१॥

ऊचतुस्तनयौ 'तात !, तव पादप्रसादतः ।
पूर्वैकादशयात्रावदत्राऽपि शिवमावयोः ॥८६२॥

यत्र तत्रापि च भवेद्भाव्यं भवभृतां खलु ।
साशङ्कानां तु रङ्कानां, श्रियो न स्युः कदाचन ॥८६३॥

आवां तदनुजानीहि, तात ! मा खेदमुद्वह ।
मनोरथतरुश्चित्तालवालस्थः स्तात् फलेग्रहिः' ॥८६४॥

प्रतिषिद्धौ परं खेदं, धास्यतो मनसीति सः ।
श्रेष्ठिराट् सागरे गन्तुं, तनयावन्वमन्यत ॥८६५॥

ततस्तौ मुदितौ पण्यैरगण्यैर्वहनं द्रुतम् ।
सम्पूर्याऽऽपृष्टस्वजनौ, प्रतस्थाते शुभेऽहनि ॥८६६॥

अनेकानि सहस्राणि, योजनानां व्यलङ्घयत् ।
नुन्नं सुवायुना यानपात्रं तत् स्वल्पवासरैः ॥८६७॥

अन्यदा वारिधिमध्ये, तडित्त्राट्कारभैरवः ।
घनाघनो घनं गर्जन्, भापयामास नौजनान् ॥८६८॥

अध ऊर्द्धं च नौर्नीयमाना चण्डनभस्वता ।
चकासामास दोलेव, कालरात्रेश्चलाचला ॥८६९॥

कल्लोलैः परितः स्वेच्छाचारिभिः पवनोद्धुरैः ।
तरीः सुरक्षिताऽप्येषा, नीता व्याकुलतां रयात् ॥८७०॥

अश्रान्तविगलद्बाष्पो, बाष्पानां व्याजतो जनः ।
त्रातुं स्वजीवितं वार्द्धेः, सर्वस्वं प्रददाविव ॥८७१॥

चक्रन्दुः कातरास्तारस्वरं मरणभीभृतः ।
धीरा धर्मधनाः स्वेष्टदेवताः सस्मरुः पुनः ॥८७२॥

क्वापि शैले समास्फल्य, जनानां सुकृतैः समम् ।
दुर्दैवोदयतोऽथैतद्यानपात्रमभिद्यत ॥८७३॥

फलकं प्राप्य **माकन्दीपुत्रा**वह्नि तृतीयके ।
क्षुधितौ तृषितौ **रत्नद्वीप**मासदतामिमौ ॥८७४॥

तत्राऽऽरामेषु दिव्येषु, प्राप्तैः सुमधुरैः फलैः ।
जलैश्च स्वास्थ्यमासाद्य, क्वाप्यासीनौ तरोस्तले ॥८७५॥

दध्यतुश्च धिगावाभ्यां, तातस्यादेशमुज्ज्वलम् ।
अतियद्भ्यामियं लेभे, कीदृशी विषमा दशा ॥८७६॥

क्व सा श्रीरावयोर्मन्दीकृतसुत्रामवैभवा ।
अप्रार्थिताऽऽगताऽकस्मादसकौ दुर्दशा क्व च ॥८७७॥

चिन्तयन्ति जना अन्यदन्यच्च स्याद्विधेर्वशात् ।
स्वपन्त्यन्यैर्हहा जाग्रत्यन्यैरेव मनोरथैः ॥८७८॥

सहित्वा तीव्रदुःखौघमर्जयन्ति श्रियं नराः ।
जहात्येकपदे सा तु, हन्त तान् विमुखे विधौ ॥८७९॥

अनयोर्ध्यायिनोरेवं, दुराचारा दुराशया ।
स्वामिनी तस्य द्वीपस्य, **रत्नादेवी**[१]ति विश्रुता ॥८८०॥

कम्पयन्ती करेणोच्चैः, करवालं सुदारुणम् ।
आयासीदवधिज्ञानपरिज्ञाततदागमा ॥८८१॥ युग्मम् ॥

ऊचे च 'रे ! युवां भोगान्, भोक्ष्येथे चेन्मया समम् ।
तर्हि प्राणिष्यथो नैवाऽन्यथा मम करौ गतौ' ॥८८२॥

अवोचतामिमौ कम्प्रशरीरौ 'देवि ! मा कुपः ।
तवाऽऽदेशकरावेव, यदावां किङ्करावि्व' ॥८८३॥

ततः सा तोषभाक् साररत्नसम्भारनिर्मिते ।
तौ निनाय महासौधे, मनोनयनहारिणि ॥८८४॥

अशुभान् पुद्गलान् हृत्वा, शुभान्न्यास्थत्तदङ्गयोः ।
रेमे च निर्भरं नानाविलासैः सा प्रमोदभाक् ॥८८५॥

---

१. पु.प्रे. बहुलतया 'रत्नदेवी' इति पाठोऽस्ति, अग्रे ८९८ तमे श्लोके 'रत्नादेवी' इति पाठोऽस्ति । अस्माभिः सर्वत्र 'रत्नादेवी' इति नाम दर्शितम् ।

भोज्यैः सुधोपमैर्दिव्यैरलङ्कारैर्विलेपनैः ।
तयोपचरितौ चारु, तौ सुखं तत्र तस्थतुः ॥८८६॥

अन्यदा स्माह सा 'कान्तौ !, वास्तोष्पतिनिदेशतः ।
सुस्थितो लवणाम्भोधिनाथो मामेवमादिशत् ॥८८७॥

अभवत् कश्मलोऽम्भोधिस्तृण्या-काष्ठ-शवादिभिः ।
तदेकविंशतिं वारान्, शोधनीयोऽयमादरात् ॥८८८॥

प्रियौ ! मम लगिष्यन्ति, कतिचित् तत्र वासराः ।
स्थेयं भवद्भ्यां खेलद्भ्यां, सौधेऽमुष्मिन् मनोरमे ॥८८९॥

कदाचिन्न रतिर्वां स्यात्, सौधे तत् पूर्वदिक्स्थितम् ।
श्रयणीयं वनं प्रावृट्-शरद्भ्यां सुन्दरान्तर[म्] ॥८९०॥

तत्रापि चेतसः स्वास्थ्यं, यदि नाम न जृम्भते ।
उदीच्ये तद्वने गम्यं, हेमन्त-शिशिराश्रये ॥८९१॥

तथाप्यरतिसम्पर्के, गन्तव्यं पश्चिमे वने ।
सम्मदं तत्र सुरभि-निदाघौ वां विधास्यतः ॥८९२॥

वने तु दक्षिणे नैव, गम्यं यत्तत्र विद्यते ।
प्रवाह इव कालिन्द्याः, कृष्णसर्पोऽतिदारुणः ॥८९३॥

यद्युद्धततया चैतदवमत्य हितं वचः ।
यास्यथस्तत्र तन्नाशं, प्राप्स्यथो दृग्विषात्ततः ॥८९४॥

मृतौ च युवयोः प्राणप्रिययोर्मे मृतिर्ध्रुवा ।
यतः प्रभापतेरस्ते, प्रभा तिष्ठेत् कियच्चिरम्' ॥८९५॥

इति प्रपन्नशिक्षौ तावापृच्छ्यैषा सुरी द्रुतम् ।
स्वप्रभोः **सुस्थितस्या**ज्ञां, निर्मातुं नभसाऽगमत् ॥८९६॥

ततोऽद्राष्टां क्रमादेतौ, देव्यादिष्टं वनत्रयम् ।
ऋतुभिः षड्भिरानन्ददायि स्फुरितकौतुकौ ॥८९७॥

याम्यकाननसञ्चारमावयोर्निषिषेध किम् ।
रत्नादेवीति तौ यत्नात्, प्रस्थितौ तद्दि[दृ]क्षया ॥८९८॥

विशन्तौ तद्वनं वेगात्, पश्यन्तौ परितोऽपि तौ ।
अपीड्येतां भृशं विष्वग्, दुर्गन्धेन प्रसर्पता ॥८९९॥

पिधाय शिङ्घिनीं चेलाञ्चलेन च पुरो गतौ ।
कर[1]ङ्कनिकरं भूमौ, लुठितं वीक्ष्य बिभ्यतुः ॥९००॥

दध्यतुश्च किमा[2]घातस्थानं प्रेतपतेरिदम् ।
अथवा सागराकृष्टनृशवक्षेपणास्पदम् ॥९०१॥

अमुष्या एव वा दुष्टाकूतायाः किञ्चनाऽप्यदः ।
सम्भाव्यतेऽतिगहनं, दुर्बोधं कूटनाटकम् ॥९०२॥

ध्यायन्ताविति तावग्रे, क्रन्दन्तं करुणस्वरम् ।
शूलाप्रोतं नरं कण्ठगतप्राणमपश्यताम् ॥९०३॥

अपृच्छतां च तं 'भद्र !, तवेदृग् दुर्दशा कुतः ? ।
किं चेदं भीषणं स्थानं, लुठच्छवशताकुलम् ?' ॥९०४॥

सोऽपि तद्दर्शनाद् बाढं, दुःखितोऽवददाः ! कथम् ।
युवामपि नृशंसायास्तस्याः प्राप्तौ करान्तरम् ॥९०५॥

एषा हि रा[3]क्षसीदेश्या, भग्नपोतां नरावलीम् ।
भापयित्वा प्रियीकृत्य, दोषे स्वल्पेऽपि हन्ति हा ॥९०६॥

---

१. खर्परसमूहम्, 'खोपरी' इति भाषायाम् । २. वधस्थानम् । ३. राक्षसीतुल्या ।

काकन्दीनगरीवासी, भग्नपोतोऽहमम्बुधौ ।
दैवात् फलकमासाद्य, द्वीपमेतं समागमम् ॥९०७॥

विरहस्याऽसहा पोषयन्ती वर्याऽशनादिभिः ।
भोगानभुक्त देव्येषा, क्रूरा सह मया चिरम् ॥९०८॥

अन्येद्युरागसो लेशं, कञ्चिल्लब्ध्वा क्षणादियम् ।
शूलायां मां निचिक्षेप, विलपन्तं कृपोज्झिता ॥९०९॥

तदीदृशी दशा मन्ये, युवयोरपि भाविनी ।
एतन्निवर्त्तनोपायः, किन्त्वेकोऽस्ति महाशयौ !' ॥९१०॥

ततः ससम्भ्रमं ताभ्यामवादि 'करुणाम्बुधे ! ।
वदोपायं यथापायपारमावामवाप्नुवः' ॥९११॥

नरः प्राह 'समस्तीह, प्राचीनवननायकः ।
शेलकाख्यो महायक्षो, दयालुः सोऽश्वरूपभृत् ॥९१२॥

अष्टम्यां च चतुर्दश्यां, पौर्णमास्यमयोस्तथा ।
कं तारयामि ? कं पालयामीत्याह महाध्वनिः ॥९१३॥ युग्मम् ॥

तमाराधयतं यत्नाद्यदि प्राणेतुमिच्छथः ।
अन्यः कश्चन नोपायो, विद्यते वार्धिलङ्घने ॥९१४॥

नाऽऽराधि मयका गार्द्ध्य-मौग्ध्यादिवशगेन सः ।
अत्रार्थे कोविदौ ! कार्या, युवाभ्यां त्वप्रमत्तता' ॥९१५॥

श्रुत्वेति तौ द्रुतं पूर्ववनं प्राप्य जिजीविषू ।
स्नात्वा वाप्यां स्मिताब्जैस्तं, यक्षमानर्चतुस्तराम् ॥९१६॥

प्राप्तेऽथ समये यक्षः, प्रत्यक्षः स तथा ब्रुवन् ।
ताभ्यां विनम्रमूर्द्धभ्यां, सप्रश्रयमभाष्यत ॥९१७॥

'आवां कारुण्यपाथोधे !, तूर्णं तारय पालय ।
त्वामेव जीवितोपायापेतौ यच्छरणं श्रितौ' ॥९१८॥

यक्षोऽगदद् 'युवां नेष्ये, परं पारं पयोनिधेः ।
किन्त्वेषा दुःसुरी ज्ञातवृत्ताऽन्वेष्यति सत्वरम् ॥९१९॥

वक्ष्यति स्नेहसाराणि, वचांसि कपटे पटुः ।
स्नेहस्तस्यां तु पापायां, न विधेयो मनागपि ॥९२०॥

तस्यां हृदाऽपि रक्ष्येथे, द्रक्ष्यथस्तां दृशाऽपि वा ।
स्वपृष्ठतस्तदुत्क्षिप्य, क्षेप्स्यामि द्रुतमम्बुधौ ॥९२१॥

तस्या दुरात्मनो वाक्यैर्न भेतव्यं भयावहैः ।
मत्पृष्ठस्थौ युवां शक्रोऽप्यपकर्त्तुं न हि क्षमः' ॥९२२॥

ओमिति प्रतिपेदानौ, तौ तुरङ्गमरूपभृत् ।
यक्षः स्वपृष्ठमारोप्य, मध्येवारिधि चेलिवान् ॥९२३॥

कृत्वाऽथ **सुस्थिता**देशं, स्वसौधं द्रुतमागता ।
अवीक्ष्य तौ **रत्नादेवी**, विलुलोके वनत्रिके ॥९२४॥

तत्राप्यवीक्ष्य विज्ञायाऽवधिना तीव्रकोपभृत् ।
करेण निशितं खड्गं, धुन्वानाऽथो अधावत ॥९२५॥

निकटं प्राप्य चाऽवोचद्रे रे पापौ ! शठाशयौ ! ।
स्नेहार्द्रां वञ्चयित्वा मां, साम्प्रतं क्व नु यास्यथः ? ॥९२६॥

वलेथां प्रतिपद्येथां, मामेव शरणं ततः ।
नो चेच्छिरो लविष्यामि, कृपाणेनाऽमुना क्षणात्' ॥९२७॥

'युवां मत्पृष्ठमारूढौ, मा स्म भैष्टं यमादपि' ।
इति यक्षगिरा तौ तु, दृढचित्तौ बभूवतुः ॥९२८॥

रत्नादेवी त्ववधिना, तौ विबुध्य तथाविधौ ।
अपप्रथत् प्रेमगर्भं, प्रपञ्चचतुरा वचः ॥९२९॥

'सागसोऽपि परित्यागः, स्वीकृतस्य न युज्यते ।
नाथौ ! विशेषतः स्वस्या, दास्याः पुनरनागसः ॥९३०॥

प्रियौ ! प्रेमवती कान्ता, भक्ता सरलमानसा ।
न युज्यते वियोगाग्नौ, क्षेप्तुं वां करुणार्द्रयोः ॥९३१॥

तज्जल्पितं तद्धसितं, तत् क्रीडितमपि क्षणात् ।
विस्मृत्य मन्तुना केनाऽप्रसादोऽद्य विधीयताम् ॥९३२॥

स्मरामि स्वकृतं किञ्चिन्नाऽऽगो वैराग्यकारणम् ।
कृतं वा क्षम्यतां **कोपः, प्रणामान्तः सतां** यतः ॥९३३॥

नाथौ ! कथं धरिष्यामि, जीवितव्यं युवां विना ।
क्षिप्रं नैष्ठुर्यमुत्सृज्याऽनुगृह्णीतं स्वकिङ्करीम्' ॥९३४॥

'मायाविन्या वचस्यस्याः, प्रत्येतव्यं न पेशलौ !' ।
इति **शेलक**वाक्येन, स्थिरौ चुक्षुभतुर्न तौ ॥९३५॥

अथो मुखेऽतिमधुरा, कालकूटोग्रहृत् सुरी ।
प्राक्रंस्त भेदमुद्दामं, दम्भाद् भेदविशारदा ॥९३६॥

'**जिनरक्षित** ! विश्वासभूरभूर्[१] दोषसन्ततेः ।
भूरिप्रेमनिधिस्तोषप्रदस्त्वं मे सदाऽप्यभूः ॥९३७॥

त्वद्भ्रातृत्ववशाज्जाल्मोऽप्यसद्भूतहृदप्ययम् ।
मया सम्भाषयामासे, वृथैव **जिनपालितः** ॥९३८॥

१. 'अस्थानभूत ! दोषराशेः' दोषरहित इति भावार्थः ।

असौ प्रतिवचो नो चेद्दत्ते मा दात् प्रभो ! पुनः ।
तव शश्वत्प्रसादैकपरस्यैवं न युज्यते ॥९३९॥

विरहात्तव चित्तं मे, स्फोटतीदं झटित्यपि ।
रक्ष रक्ष वधूहत्यापापपात्रं स्म मा भवः ॥९४०॥

रे रे हृदय ! मा स्फोटीः, स्फुटमेष दयानिधिः ।
करिष्यत्येव मे प्रेयान्, प्रसादं सरलाशयः' ॥९४१॥

इत्थमुक्तमपि ज्ञात्वा, तमस्निग्धं सुरिब्रुवा ।
पुनः स्माह 'न चेत् स्नेहं, धत्से मा धा हृदीश्वर ! ॥९४२॥

किन्त्विमां किङ्करीं कान्त !, सम्भावय सकृद् दृशा ।
येनेयं स्वस्थतां प्राप्ता, प्राणान् वार्द्धौ विमुञ्चति ॥९४३॥

अभाग्योदयतो वाऽस्मिन्, भवे मां वीक्षसेऽपि न ।
भवान्तरेऽपि तद्भूयाः, प्राणनाथस्त्वमेव मे' ॥९४४॥

इत्युक्त्वा साऽम्बुधौ यावज्जम्पां दातुं प्रचक्रमे ।
तावदेतन्मन्यमानोऽलीकमप्यनलीकवत् ॥९४५॥

शूलाप्रोतनरादिष्टं, तद्विस्मृत्याऽखिलं क्षणात् ।
अवमत्य यक्षशिक्षां, तामायतिहितामपि ॥९४६॥

विषमेषुशराघातविह्वलः प्रेममञ्जुलाम् ।
व्यापारयद् दृशं तस्यां, जडधी**र्जिनरक्षितः** ॥९४७॥ त्रिभिर्विशेषकम् ॥

धुत्वा पृष्ठं ततो यक्षेणाऽब्धौ क्षिप्तः सकोऽपि तत् ।
'अरे दास ! पुरस्तान्मे, साम्प्रतं क्व नु गच्छसि ? ॥९४८॥

मृतोऽसीति' प्रजल्पन्त्या, सुर्या शूलेन कीलितः ।
खण्डीकृत्य च खड्गेन, क्षिप्रं चक्रे दिशां बलिः ॥९४९॥ युग्मम् ॥

तुष्टचेतास्ततोऽप्यन्वागत्याऽऽशु **जिनपालितम्** ।
मधुरैर्वचनै **रत्नादेवी** सैवमवोचत ॥९५०॥

'अयं दायादवत् प्रेयंस्तव सौख्यविभागभाक् ।
अनिष्टत्वान्मयाऽलीकवाग्भिः प्रत्याय्य संहृतः ॥९५१॥

असाधारणमेवाऽथ, सुखं वैषयिकं मुदा ।
मया स्वायत्तया सार्धं, निष्प्रत्यूहं भज प्रिय !' ॥९५२॥

'लघुबन्धोर्गतिं मा गा, अमुष्याः प्रतियन् वचः' ।
इति यक्षगिरं मन्यमानोऽबहु न सोऽक्षुभत् ॥९५३॥

ततः सुरी परिश्रान्ता, व्याघुट्याऽगान्निजास्पदम् ।
यक्ष**श्चम्पा**पुरोद्यानेऽमुञ्चच्च **जिनपालितम्** ॥९५४॥

आपृच्छ्याऽन्तर्हिते यक्षे, स्वगेहं **जिनपालितः** ।
प्राप्तस्ताताय तं सर्वं, वृत्तान्तं विन्यवेदयत् ॥९५५॥

पितृभ्यां प्रेतकार्याणि, परासोः सूनुजन्मनः ।
कृत्वा न्यस्तो गृहस्वाम्ये, सो प्राभुक्त चिरं सुखम् ॥९५६॥

कदाचित् सुगुरोर्वाचं, निशम्याऽतिविरागवान् ।
श्रितवांश्चारुचारित्रं, चतुराणां शिरोमणिः ॥९५७॥

पठित्वैकादशाऽङ्गानि, मृत्युं लब्ध्वा समाधिना ।
सागरद्वितयायुष्कः, **सौधर्मे**ऽथाऽभवत् सुरः ॥९५८॥

च्युत्वा ततो **विदेहेषु**, लब्धोत्तमकुलः कृती ।
आत्तव्रतो धुताऽशेषकर्मा निर्वृतिमाप्स्यति ॥९५९॥

आख्यानस्याऽस्य गम्भीरार्थस्याऽथोपनयं स्फुटम् ।
आकर्णय मुने ! स्फारबुद्धे ! **विमलवाहन** ! ॥९६०॥

यथा लाभार्थिनावेतौ, वणिजौ भविनस्तथा ।
सुखार्थिनो भवाम्भोधिं, परिभ्राम्यन्ति भीषणम् ॥९६१॥

रत्नद्वीपो यथाऽम्भोधौ, तथा मर्त्यभवो भवे ।
रत्नादेवी यथा क्रूरा, तथैवाऽविरतिः पुनः ॥९६२॥

इयं हि मधुरा पूर्वं, प्रान्तेऽनर्थनिबन्धनम् ।
मृगतृष्णोपमैः सौख्यैः, प्रलोभयति देहिनः ॥९६३॥

यथा ताभ्यां च शूलास्थः, पुमानैक्षि तथाऽङ्गिभिः ।
धर्मवक्तेक्ष्यते दृष्टाऽविरत्युत्थविडम्बनः ॥९६४॥

रत्नादेव्या यथा घोरं, वृत्तं क्लेशैककारणम् ।
यक्षराजाच्च तन्मोक्षं, कृपालुः स नरोऽवदत् ॥९६५॥

तथैवाऽविरतेर्नानावेदनानां निदानताम् ।
चारित्रान्निवृत्तिं च [स], ब्रूते धर्मानुशासकः ॥९६६॥

यथा यक्षेशपृष्ठं तावाश्रितौ तस्य शिक्षया ।
तथाऽऽश्रयन्ति चारित्रं, धर्मशास्त्रगिराऽङ्गिनः ॥९६७॥

सुरीवाग्भिर्यथा चैको, विमूढः क्लेशभागभूत् ।
तथा जीवा दुःखभाजो, भवन्त्यविरतेर्वशाः ॥९६८॥

यथाऽन्यो यक्षपृष्ठस्थः, सुरीवाग्भिरकम्पितः ।
तीर्त्वाऽब्धिं स्वपुरीं प्राप्तः, परमां मुदमासदत् ॥९६९॥

तथा श्रिताः सुचारित्रं, दूरिताऽविरतिक्रमाः ।
भवं मुक्त्वाऽङ्गिनः सिद्धिं, सम्प्राप्ताः स्युः सुखास्पदम् ॥९७०॥

—● इत्यविरतिपरिहारे **जिनपालित-जिनरक्षित**दृष्टान्तः । ग्रं. १२७ ●—

सारं सोदरयुग्मस्याऽऽख्यातमेतन्महामुने ! ।
निशम्याऽविरतिं दूरे, त्यजेश्चारित्रमाश्रितः ॥९७१॥

इति शिक्षां हितां राजऋषि**र्विमलवाहनः** ।
तथेति प्रतिपेदानो, व्यहार्षीद् गुरुभिः सह ॥९७२॥

सज्ज्ञानमेकमासाद्य, योगं सावद्यमेककम् ।
विवर्जयन् शमिष्वेकः, शुशुभे स महामुनिः ॥९७३॥

माध्यस्थ्यऋष्टिना राग-द्वेषाख्यौ द्वौ भटौ जयन् ।
द्विविधस्यापि मोहस्याऽभवदेष भयङ्करः ॥९७४॥

अशल्यितस्त्रिभिः शल्यैस्त्रिभिर्दण्डैरदण्डितः ।
स रत्नत्रितयं धीरः, सञ्चिकाय शुभायतिः ॥९७५॥

चतुर्गतिभवात् क्लेशराशेर्बिभ्यदयं यतिः ।
कषायांश्चतुरोऽमुञ्चच्चतस्रो विकथा अपि ॥९७६॥

रतः पञ्चविधाचारे, यियासुः पञ्चमीं गतिम् ।
इन्द्रियाणि स पञ्चापि, निजग्राह समाहितः ॥९७७॥

षोढा जीवनिकायं स, स्वात्मवत् परिचिन्तयन् ।
प्रत्येकं षड्विधं बाह्यमान्तरं च तपोऽतनोत् ॥९७८॥

श्रयन् पिण्डैषणाः सप्त, सप्त पानैषणा अपि ।
सप्तानां दुर्गतीनां स, द्वारश्चक्रे दृढार्गलाः ॥९७९॥

मुक्तोऽष्टभिर्मदैरष्टकर्मनिर्मूलनोद्यतः ।
अष्टौ प्रवचनमातृर्मुनिः शश्वदपोषयत् ॥९८०॥

नवाऽपि ब्रह्मगुप्तीः स, हीनसत्त्वैः सुदुर्द्धराः ।
निधिवद्धारयामास, तपनीयगुणोच्चयः ॥९८१॥

त्रिदशस्तुत्यचारित्रो, दशधा धर्ममुत्तमम् ।
बिभ्राणः शुभ्रयामा[स], यशसाऽसौ दिशो दश ॥९८२॥

एवं निर्मलचारित्रगुणः सद्गणसंस्तुतः ।
[समस्तां] पेठिवानेकादशाङ्गीं मुनिपुङ्गवः ॥९८३॥

स भक्तोऽर्हत्सु[1] सिद्धेषु[2], जिनप्रवचने[3] तथा ।
गुरुषु[4] स्थविरेषूच्चैः[5], श्रुतभृत्सु[6] तपस्विषु[7] ॥९८४॥

उद्युक्तः[8] सदा ज्ञाने, विधृतोज्ज्वलदर्शनः[9] ।
विशुद्धविनयो[10] दोषवर्जितावश्यकक्रियः[11] ॥९८५॥

निरतीचारसच्छीलव्रतमण्डनमण्डितः[12] ।
अप्रमादी[13] क्षणलवप्रभृतावप्यनेहसि ॥९८६॥

तपःपरायणो[14] द्रव्यभावत्यागोल्लसन्मतिः[15] ।
वैयावृत्त्ये[16] महोत्साहो, गुर्वादिषु[17] समाधिकृत् ॥९८७॥

अपूर्वज्ञानसङ्ग्राही[18], श्रुतभक्तिपवित्रितः[19] ।
प्रभावयन्[20] प्रवचनं, तीर्थकृन्नाम बद्धवान् ॥९८८॥ पञ्चभिः कुलकम् ॥

एकावलि-रत्नावलि-कनकावलिनामकैः ।
सिंहनिष्क्रीडिताद्यैश्च, तपोभिः कृशयंस्तनुम् ॥९८९॥

उपसर्गान् सहमानस्तिर्यग्नृसुरनिर्मितान् ।
स लब्ध्वाऽनेकसल्लब्धीर्विजहार वसुन्धराम् ॥९९०॥ युग्मम् ॥

बुद्ध्वाऽथ स्वायुःपर्यन्तं, कृतसंलेखनाद्वयः ।
पर्यन्ताराधनामेवं, सोऽकार्षीद् गुरुसाक्षिकम् ॥९९१॥

ज्ञान-दर्शन-चारित्र-तपोवीर्यात्मको मया ।
अत्यचारि य आचारस्तत्र मिथ्याऽस्तु दुष्कृतम् ॥९९२॥

व्रतान् भवद्रुमोच्छित्त्यै, पर्शुवत्तारतीव्रकान् ।
अतीचारोज्झितान् शुद्धमानसः सततं श्रये ॥९९३॥

स्थावरान् भू-पयो-वह्नि-वायु-वृक्षभिदोऽङ्गिनः ।
त्रसान् द्वीन्द्रियप्रभृतीन्, क्षमयाम्यस्तमत्सरः ॥९९४॥

प्राणिघातादिकान्यष्टादश पापास्पदान्यपि ।
मोक्षाध्वरोधकारीणि, व्युत्सृजामि त्रिधा त्रिधा ॥९९५॥

सन्तु मे शरणं तीर्थकृतः सिद्धाः सुसाधवः ।
जैनो धर्मश्च चत्वारोऽप्येते भवभयापहाः ॥९९६॥

रागद्वेषवशोऽकार्षं, यत् किञ्चि[द्] दुष्कृतं क्वचित् ।
तन्निन्दामि पुनर्नैव, विधास्यामीति निश्चितम् ॥९९७॥

ज्ञानादिगोचरं किञ्चित्, सुकृतं यत् पुनर्व्यधाम् ।
क्लेशसंहतिविध्वंसि, तत् सर्वमनुमोदये ॥९९८॥

कश्चिन्न मे नाऽहमपि, कस्यचिद्भैरवे भवे ।
इत्युल्लसितसद्भावो, भजे निर्ममतां सदा ॥९९९॥

तृप्तिर्न जातु जाता यं, भुक्त्वा भवशतेष्वपि ।
त्रिधा चतुर्विधाहारं, प्रत्याख्यामि भवेऽत्र तम् ॥१०००॥

श्रुतसारं नमस्कारं, पञ्चानां परमेष्ठिनाम् ।
ध्यायाम्यदीनहृदयः, सर्वकल्याणकारणम् ॥१००१॥

इत्थमाराधनां कुर्वन्, समाधिं परमं श्रितः ।
देहं त्यक्त्वा स राजर्षिर्विमानं **विजयं** ययौ ॥१००२॥

तत्राऽसौ हस्तमानाङ्गोऽहमिन्द्रो निरहङ्कृतिः ।
शारदेन्दुप्रभाशुभ्रश्चारुभूषणभूषितः ॥१००३॥

किञ्चिन्न्यूनां लोकनाडीं, पश्यन्नवधिसम्पदा ।
कल्पातीतः सुखं सिद्धिसुखकल्पमशिश्रियत् ॥१००४॥ युग्मम् ॥

सप्तधातुविमुक्ताङ्गः, सुखशय्यामधिष्ठितः ।
स त्रयस्त्रिंशतं तत्राऽत्यगात् क्षणवदम्बुधीन् ॥१००५॥

प्राक् षण्मास्याश्च्यवनसमयं, नाकिनोऽन्येऽल्पपुण्या,
मा[ला]म्लानिप्रभृतिभिरहो !, दुर्निमित्तैर्विदन्ति ।
गीर्वाणोऽसौ पुनरसमभाः, प्रोद्यदानन्दपूरो,
ज्ञानेनैवाऽबुधदवधिनाऽभ्यर्ण्णसिद्धत्वलब्धिः ॥१००६॥ [मन्दाक्रान्तावृत्तम्]

इति श्रीपद्मप्रभाचार्यचरणराजीवचञ्चरीकश्रीदेवानन्दसूरिविरचिते

श्रीअजितप्रभुचरिते

आनन्दाङ्के महाकाव्ये

लक्ष्मी(१)-बन्धु(२)-स्त्री(३)-विषय(४)-शरीरवैरस्यसूचक**श्रीपति**(१)-**कीर्त्तिचन्द्र**(२)-**अगडदत्त**(३)-**मधुबिन्दु**(४)-**शशिप्रभा**ऽऽख्यानाऽविरतिस्वरूपनिरूपक**जिनपालित**-**जिनरक्षित**दृष्टान्तगर्भितभगवन्पूर्वभववर्णनो नाम द्वितीयः सर्गः ॥छा॥

॥ ग्रं. १०१३ अ. २८ ॥

॥ सर्गद्वये ग्रं. २२५६ अ. २० ॥

● ● ●

तृतीयः सर्गः

अस्ति रत्नमयेनोच्चैर्जम्बूवृक्षेण शोभितः ।
जम्बूद्वीपाभिधो द्वीपः, सम्पूर्णशशिसन्निभः ॥१॥

सप्तवर्षोऽपि यश्चित्रं, वर्ण्यतेऽनादिमान् बुधैः ।
श्लिष्यत्युच्चैः श्रियं यश्च, मन्दरागभृदप्यहो ॥२॥

तत्र दक्षिणवाद्‌र्ध्यन्तेऽधिज्यकार्मुककान्तिभृत् ।
वर्षं **भारत**नामाऽस्ति, शस्तानामेक आश्रयः ॥३॥

वैताढ्येनाऽन्तरस्थेन, दलितस्याऽस्य दक्षिणे ।
दले सम**स्त्ययोध्ये**ति, नगरी पीवरी श्रिया ॥४॥

यस्यां जैनालयोत्क्षिप्तधूपधूमालिमुद्वराम् ।
पश्यन्तः केकिनो नित्यं, नृत्यन्त्यम्भोदशङ्कया ॥५॥

यस्यामृद्धिभरापास्ताऽलकायां खिद्यते खलु ।
अर्थिनोऽनाप्नुवन् यत्नादपि दातृजनोऽनिशम् ॥६॥

द्रव्येण भारभूतेन, क्रीणते यत्र सद्धियः ।
धर्मरत्नं परलोकदीर्घवर्त्मन्यभारकृत् ॥७॥

तस्या**मृषभ**नाथस्य, सिद्धिप्राप्तेरनन्तरम् ।
सिद्धिं सर्वार्थसिद्धिं च, सङ्ख्यातीतेषु राजसु ॥८॥

गतेष्विक्ष्वाकुवंश्येषु, तदन्वयविभूषणम् ।
जज्ञे नाम्ना च धाम्ना च, **जितशत्रु**र्महीपतिः ॥९॥ युग्मम् ॥

स गम्भीरोऽब्धिवत् स्वर्ण्णशैलवत् स्थैर्यराजितः ।
सिंहवत् पौरुषागारं, ह्लादकोऽभूत् सुधांशुवत् ॥१०॥

बाह्यानरीन् स शस्त्रेण, यथाऽजैषीन्महीपतिः ।
मात्राधिकेन तेनैव, तथैवाऽभ्यन्तरानपि ॥११॥

रविर्यस्य प्रतापेन, शशाङ्को यशसाऽपि च ।
स्पर्द्धां कुर्वन्नचक्षुष्यः, कलङ्की चाऽभवद् ध्रुवम् ॥१२॥

यो राज्यमदनिर्मुक्तो, विषयैरविडम्बितः ।
कल्पशाखी सेवकानां, मूर्त्तो धर्म इवाऽशुभत् ॥१३॥

तस्य राज्ञो लघुर्भ्राता, समभूदलघुर्गुणैः ।
सुमित्रविजयो नाम, युवराजपदं दधत् ॥१४॥

जितशत्रुनृपस्याऽऽसीदसीमगुणमेदिनी ।
नामतो **विजयादेवी,** दयि[ता] दक्षतानिधिः ॥१५॥

यस्या अनुत्तरं रूपं, वीक्ष्य तत्सुषमोज्जिताः ।
मन्ये देव्यो न निद्रान्ति, खेदसम्भृतमानसाः ॥१६॥

यदास्येन पराभूतश्चन्द्रोऽपि क्षीयतेऽनिशम् ।
जिनानां महतां काचित्, क्षतिर्नेति च वर्द्धते ॥१७॥

यस्याः सलीलया गत्या, मृद्वा वाचा च वारला ।
हतदर्पभरा नूनं, विपिने सेवते सरः ॥१८॥

तस्याः सर्वान् गुणान् शीलगुणो भृशमशोभयत् ।
लक्षणानि समग्राणि, सत्त्वमेकमिवाऽङ्गिनाम् ॥१९॥

नृपः प्राज्येऽपि शुद्धान्ते, तस्यां प्रेम परं दधौ ।
सुमनोनिवहे यद्वज्जात्यामेव शिलीमुखः ॥२०॥

इतश्च शुक्लवैशाखत्रयोदश्यां निशाकरे ।
चित्रा[1]धिष्ण्यगते च्युत्वा, विमाना**द्विजया**ह्वयात् ॥२१॥

जीवो **विमल**भूपस्य, ज्ञानत्रयविराजितः ।
श्रीमत्या **विजयादेव्याः**, कुक्षिदेशमशिश्रियत् ॥२२॥ युग्मम् ॥

गर्भवासमुपेतस्य, प्रभोस्तस्य प्रभावतः ।
अपि नारकजन्तूनामुदपादि क्षणं सुखम् ॥२३॥

तस्या एव निशस्तुर्ये, यामे प्रवरतल्पगा ।
अद्राक्षी**द्विजयादेवी**, महास्वप्नांश्चतुर्दश ॥२४॥

[1]गजो [2]वृषो [3]मृगारातिरभिषेकः [4]श्रियस्तथा ।
[5]दामाऽमृत[6]करो [7][8]भानुर्ध्वजः [9]पूर्णघटोऽपि च ॥२५॥

[10]पद्मरम्यं सरोऽम्भो[11]धिर्वि[12]मानं [13]रत्नसञ्चयः ।
[14]निर्धूमश्चाऽग्निरित्येतान्, स्वप्नान् वीक्ष्य व्यबोधि सा ॥२६॥ युग्मम् ॥

तस्मिन्नेव क्षणे जातासनकम्पा जिनेशितुः ।
आद्यं कल्याणकं ज्ञात्वाऽवधिज्ञानेन वासवाः ॥२७॥

गत्वा पदानि सप्ताऽष्टान्युन्मुखं तीर्थकृद्दिशः ।
ववन्दिरे महाभक्त्या, शक्रस्तवपुरःसरम् ॥२८॥ युग्मम् ॥

प्रमोदमेदुराश्चाथ, **जितशत्रु**नृपौकसि ।
आगत्य **विजयादेवीं**, प्रणिपत्येति तुष्टुवुः ॥२९॥

---

१. राधशुक्लत्रयोदश्यां, रोहिणीधिष्ण्यगे विधौ । ज्ञानत्रयधरः पुत्ररत्नत्वेनोपपद्यत ॥ त्रिषष्टि० ।२।२।१९। 'वैसाहसुद्धतेरसीए चित्ताणक्खत्ते विजयाए कुच्छिंसि पुत्तत्ताए उववण्णो' इति चउप्पन्नमहापुरिसचरियम्मि ।

प्रत्युवाच नृपः 'स्वप्ना, देव्याऽप्यद्यैत एव हि ।
निरैक्षिषत राज्यश्रीभोगकीर्त्तिसुखप्रदाः' ॥४१॥

सुस्वप्नानामथैतेषां, विशेषात् फलमद्भुतम् ।
द्रुतमाह्वाय्य प्रष्टव्याः, स्वप्नशास्त्रविशारदाः ॥४२॥

अथोर्वीनाथनिर्देशादाहूता वेत्रिणा जवात् ।
नैमित्तिकाः कृतस्नानाः, संवीतश्वेतवाससः ॥४३॥

अनर्घ्यस्वल्पालङ्काराः, समागत्य महीभुजम् ।
आनन्द्याऽऽशीर्भिः प्राग्न्यस्तासनेषु समुपाविशन् ॥४४॥ युग्मम् ॥

आसयित्वा जवनिकान्तरे जायां वधूमपि ।
फलपुष्पकरोऽपृच्छत्तान् स्वप्नानां फलं नृपः ॥४५॥

अथो मिथो विचार्यैते, निश्चितार्थाः स्फुरन्मुदः ।
भूमीश्वराय स्वप्नार्थमित्याख्यन् क्षोभवर्जिताः ॥४६॥

'स्वप्ना द्वासप्ततिः प्रोक्तास्त्रिंशत्तेष्वपि सत्तमाः ।
महास्वप्नाः पुनः क्ष्माप !, तेष्वप्येते चतुर्दश ॥४७॥

अर्हतश्चक्रिणो वाऽम्बा, तस्मिन् गर्भं समाश्रिते ।
स्फुटास्फुटानिमान् पश्येन्, महास्वप्नांश्चतुर्दश ॥४८॥

सप्तेक्षते महास्वप्नानेषां मध्यात् प्रसूहरिः ।
चतुरस्तु बलस्याऽम्बा, मातैकं मण्डलेशितुः ॥४९॥

अर्हन्तौ नैककालं द्वौ, न च स्तश्चक्रिणावपि ।
अर्हन् पुत्रस्तदेकस्या, अपरस्याश्च चक्रभृत् ॥५०॥

जिनागमे श्रूयते च, **जितशत्रु**नृपाङ्गजः ।
द्वैतीयीको जिनाधीशश्चक्रभृत्तु **सुमित्र**भूः ॥५१॥

प्रत्युवाच नृपः 'स्वप्ना, देव्याऽप्यद्यैत एव हि ।
निरैक्षिषत राज्यश्रीभोगकीर्त्तिसुखप्रदाः' ॥४१॥

सुस्वप्नानामथैतेषां, विशेषात् फलमद्भुतम् ।
द्रुतमाह्वाय्य प्रष्टव्याः, स्वप्नशास्त्रविशारदाः ॥४२॥

अथोर्वीनाथनिर्देशादाहूता वेत्रिणा जवात् ।
नैमित्तिकाः कृतस्नानाः, संवीतश्वेतवाससः ॥४३॥

अनर्घ्यस्वल्पालङ्काराः, समागत्य महीभुजम् ।
आनन्द्याऽऽशीर्भिः प्राग्न्यस्तासनेषु समुपाविशन् ॥४४॥ युग्मम् ॥

आसयित्वा जवनिकान्तरे जायां वधूमपि ।
फलपुष्पकरोऽपृच्छत्तान् स्वप्नानां फलं नृपः ॥४५॥

अथो मिथो विचार्यैते, निश्चितार्थाः स्फुरन्मुदः ।
भूमीश्वराय स्वप्नार्थमित्याख्यन् क्षोभवर्जिताः ॥४६॥

'स्वप्ना द्वासप्ततिः प्रोक्तास्त्रिंशत्तेष्वपि सत्तमाः ।
महास्वप्नाः पुनः क्ष्माप !, तेष्वप्येते चतुर्दश ॥४७॥

अर्हतश्चक्रिणो वाऽम्बा, तस्मिन् गर्भं समाश्रिते ।
स्फुटास्फुटानिमान् पश्येन्, महास्वप्नांश्चतुर्दश ॥४८॥

सप्तेक्षते महास्वप्नानेषां मध्यात् प्रसूहरिः ।
चतुरस्तु बलस्याऽम्बा, मातैकं मण्डलेशितुः ॥४९॥

अर्हन्तौ नैककालं द्वौ, न च स्तश्चक्रिणावपि ।
अर्हन् पुत्रस्तदेकस्या, अपरस्याश्च चक्रभृत् ॥५०॥

जिनागमे श्रूयते च, **जितशत्रु**नृपाङ्गजः ।
द्वैतीयीको जिनाधीशश्चक्रभृत्तु **सुमित्र**भूः ॥५१॥

तज्ज्ञेयो **विजयादेव्याः**, सूनुरर्हन् जगन्नुतः ।
वैजयन्त्यास्तु षट्खण्डभरतक्षोणिनायकः' ॥५२॥

श्रुत्वेति राज्ञा प्रीतेन, पारितोषिकदानतः ।
सन्तोषिता विसृष्टास्ते, ययुः स्वं स्वं निकेतनम् ॥५३॥

विजया-वैजयन्त्यावप्यथाऽऽगारं निजं निजम् ।
प्राप्ते गर्भं निराबाधं, बिभरामासतुर्मुदा ॥५४॥

जिनेन्द्रमातुरावासप्राङ्गणावनिमादरात् ।
कल्याणीभक्तयो वायुकुमार्योऽमार्जयन् सदा ॥५५॥

अभ्यषिञ्चन्त तामब्दकुमार्यो गन्धवारिभिः ।
अकिरंस्तत्र सुमनःप्रकरानृतुदेवताः ॥५६॥

ज्योतिष्कललनास्तीर्थपतेर्मा[तु]रदर्शयन् ।
रत्नादर्शं यथाकालं, प्रकाशं च वितेनिरे ॥५७॥

किन्नर्यो मधुरं गीतं, जगुः श्रुतिसुखं पुरः ।
व्यन्तरस्त्रिय आदेशं, प्रतीच्छन्ति स्म चानिशम् ॥५८॥

पुरन्दरनिदेशेन, स्वभक्त्या च सुरीजनैः ।
इत्थं सा **विजयादेवी**, सिषेवे हर्षपोषतः ॥५९॥

अन्यच्च **विजया** शारैः, क्रीडन्ती प्रेयसा समम् ।
पुण्यगर्भानुभावेन, जयमेव समासदत् ॥६०॥

दध्यौ नृपः प्रभावोऽसौ, गर्भस्यैव तदङ्गजे ।
जाते वाच्योऽय**मजित**, इति सान्वयसञ्ज्ञया ॥६१॥

प्रभोर्गर्भाश्रितस्यापि, प्रभावात् क्षितिमण्डले ।
उल्लसन्ति स्म श्रेयांसि, शस्यानीव सुवाततः ॥६२॥

पलायाञ्चक्रिरे क्षुद्रोपद्रवा निखिलास्तदा ।
खेलन्ति मत्तमातङ्गाः, किं केसरिसमागमे ? ॥६३॥

एवं जगत्तुष्टिकरं, जगन्नाथं जिनेश्वरम् ।
गर्भेऽम्बा बिभ्रती जातु, नाप क्लेशकणामपि ॥६४॥

वैजयन्त्यपि गर्भस्थं, बिभ्राणा चक्रवर्त्तिनम् ।
सुसखीशिक्षया पथ्याहारादिविधिमादधौ ॥६५॥

गीर्वाण-नरनाथाभ्यां, पूरिताखिलदोहदे ।
विजया-वैजयन्त्यावित्यभार्ष्टां गैरभौ[1] सुखम् ॥६६॥

अथाऽर्द्धाष्टमघस्रे च, मासानां नवके गते ।
माघमाससिताष्टम्यां, रोहिणीधिष्ण्यगे विधौ ॥६७॥

जात्यकाञ्चनदीप्राङ्गमूरुस्थद्विरदध्वजम् ।
असूत **विजया** पुत्रं, कल्पद्रुं मेरुभूमिवत् ॥६८॥ युग्मम् ॥

भुवनत्रितयेऽप्यासीत्, कोऽप्युद्द्योतस्तदा क्षणम् ।
सद्य आविरभूच्छर्म, नारकाङ्गभृतामपि ॥६९॥

दिशः प्रसन्नतां प्रापुरनुकूलो ववौ मरुत् ।
पुष्पवर्षोऽभवद्विष्वग्, नेदुर्दुन्दुभयोऽम्बरे ॥७०॥

अथाऽऽसनप्रकम्पात् षट्पञ्चाशद्दिक्कुमारिकाः ।
ससम्भ्रमा अवधिना, जिनस्य विविदुर्जनिम् ॥७१॥
मुक्त्वाऽऽसनान्यनु जिनदिशं दत्त्वा पदानि च ।
सप्ताऽष्टान्यनमन् शक्रस्तवोच्चारपुरःसरम् ॥७२॥

---

१. गर्भौ ।

ताभिस्ततोऽर्हतो जन्ममहाय भरतावनिम् ।
यियासुभिः समादिष्टा, आभियोगिकनिर्जराः ॥७३॥

क्षणाद् योजनमानानि, विमानानि महोद्यमाः ।
रत्नद्युतिभरापूर्णदिङ्मुखानि व्यकुर्वत ॥७४॥ युग्मम् ॥

तत्र चाऽष्टावधोलोकवास्तव्या दिक्कुमारिकाः ।
दिव्याङ्गरागनेपथ्यशालिन्यः स्फारकान्तयः ॥७५॥

भोगङ्करा[1] भोगवती[2], सुभोगा[3] भोगमालिनी[4] ।
तोयधारा[5] विचित्रा[6] च, पुष्पमालाऽप्यनिन्दिता[7][8] ॥७६॥

प्रत्येकं सामानिकानां, चत्वारिंशन्मितैः शतैः ।
महत्तराभिर्महर्द्धिकाभिश्चतसृभिस्तथा ॥७७॥

अनीकैः सप्तभिस्तेषां, नाथैरपि च सप्तभिः ।
सहस्रैरात्मरक्षाणामपि षोडशभिः पुनः ॥७८॥

अन्यैश्च व्यन्तरैर्देवैर्देवीभिरपि भूरिभिः ।
युताः स्वस्वविमानानि, समारुह्य समुत्सुकाः ॥७९॥

वैक्रियसमुद्घातेन, रूपमुत्तरवैक्रियम् ।
बिभ्राणा देवगत्या द्राग्, जिनजन्मोक आययुः ॥८०॥ षड्भिः कुलकम् ॥

तत् त्रिः प्रदक्षिणीकृत्य, विमानैः स्वैः सुभक्तयः ।
तास्तानि स्थापयामासुः, पूर्वोदीच्यां हरित्यथ[2] ॥८१॥

प्रविश्य सूतिकागारं, सजिनां जिनमातरम् ।
त्रिश्च प्रदक्षिणीकृत्य, प्रणत्यैवं बभाषिरे ॥८२॥

---

१. दिक्कुमारिकाः । २. दिशि ।

'जय स्वामिनि ! रामासु, मूर्द्धन्ये ! जगदुत्तमे ! ।
विश्वप्रदीपो विश्वार्च्यस्त्वयाऽयं सुषुवे सुतः ॥८३॥

[दिक्]कुमार्यो वयं मातरधोलोकस्थितालयाः ।
जिनजन्ममहं कर्त्तुमायाता मा कृथा भयम्' ॥८४॥

इत्युक्त्वा व्यधुरैशान्यां, दिशि स्तम्भसहस्रभाक् ।
प्राङ्मुखं सूतिसदनमेताश्चिन्तनमात्रतः ॥८५॥

परितः सूतिकागेहमायोजनमथ क्षणात् ।
अपजह्रुः संवर्त्तकवातादशुचिपुद्गलान् ॥८६॥

ततः संहृत्य पवनं, तस्थुस्तास्त्रिजगत्प्रभोः ।
अद्रवीयसि मङ्गल्यगीतगानपरायणाः ॥८७॥

नन्दनोद्यानकूटस्था, ऊर्द्धलोकगता अथ ।
दिक्कुमार्यः पूर्वरीत्या, परिवारविराजिताः ॥८८॥

मेघङ्करा[1] मेघवती[2], सुमेघा[3] मेघमालिनी[4] ।
सुमित्रा[5] वत्समित्रा[6] च, वारिषेणा[7] बलाहका[8] ॥८९॥

इत्यष्टौ प्राप्य सूत्योको, जिनमम्बां प्रणम्य च ।
ज्ञापयित्वा स्वमह्वाय, स्तनयित्नून् विचक्रिरे ॥९०॥

आयोजनं भुवं शान्तपांशुं गन्धाम्बुवर्षतः ।
पुष्पाकीर्णां च कृत्वा ता, गायन्त्यस्तस्थुरन्तिके ॥९१॥

अथ **नन्दोत्तरा[1]-नन्दे[2], आनन्दा[3]-नन्दिवर्द्धने[4] ।**
विजया[5] वैजयन्ती[6] च, जयन्ती[7] चाऽपराजिता[8] ॥९२॥

---

१. अनतिदूरे । २. 'सुवत्सा वत्समित्रा च' इति त्रिषष्टि. २।२।१८९।

इमाः प्राग्रुचकाद्रिस्थाः, पूर्ववत् सपरिच्छदाः ।
एत्य साम्बं जिनं नत्वा, तस्थुः प्राच्यां सदर्पणाः ॥९३॥

समाहारा[1] सुप्रदत्ता[2], सुप्रबुद्धा[3] यशोधरा[4] ।
लक्ष्मीवती[5] शेषवती[6], चित्रगुप्ता[7] वसुन्धरा[8] ॥९४॥

एता अपाच्यरुचकादागत्य सपरिच्छदाः ।
प्राग्वत् प्रणम्य गायन्त्योऽपाग् भृङ्गारभृतः स्थिताः ॥९५॥

इलादेवी[1] सुरादेवी[2], पृथिवी[3] पद्मवत्यपि[4] ।
एकनासा[5] नवमिका[6], भद्रा[7] सीते[8]त्यमूः पुनः ॥९६॥

प्रत्यग्रुचकवास्तव्या, एत्य तावत्परिग्रहाः ।
नत्वा गानपरास्तस्थुः, प्रत्यग् व्यजनपाणयः ॥९७॥

अलम्बुसा[1] मिश्रकेशी[2], पुण्डरीका[3] च वारुणी[4] ।
हासा[5] सर्वप्रभा[6] ह्रीः[7] श्रीरि[8]त्यष्टौ दिक्कुमारिकाः ॥९८॥

उदीच्यरुचकस्थानाः, पूर्वप्रोक्तपरिच्छदाः ।
एत्य प्रणम्य गायन्त्य, उदक् तस्थुः सचामराः ॥९९॥

विदिग्रुचकवास्तव्याश्चतस्रो दिक्कुमारिकाः ।
चित्रा[1] चित्रकनका[2] सतेरा[3] सौदामनी[4] तथा ॥१००॥

एत्य प्रभुं प्रभोश्चाम्बां, वन्दित्वा दीपिकाकराः ।
गायन्त्यः स्वस्वविदिशि, तस्थुः सुस्थिरभक्तयः ॥१०१॥

रुचकद्वीपमध्यस्थाश्चतस्रो दिक्कुमारिकाः ।
रूपा[1] रूपांशिका[2] चैव, सुरूपा[3] रूपकावती[4] ॥१०२॥

---

१. 'सतेरा सौत्रामणी तथा' इति त्रिषष्टि० ।१।२।२९९।

प्राग्वत् परिजनोपेताः, समेताः सूतिसद्म तत् ।
नत्वा स्वामिनमम्बां च, स्वस्वरूपं न्यवेदयन् ॥१०३॥

छित्त्वा प्रभोर्नाभिनालं, चतुरङ्गुलवर्जितम् ।
क्ष्मायां निखन्य खातं तद्रत्नपूरैः प्रपूर्य च ॥१०४॥

तास्तदूर्द्ध्वं च दूर्वाभिः, पीठं बद्ध्वा सुबुद्धयः ।
प्रागपागुदगाशासु, रम्भासद्मत्रयं व्यधुः ॥१०५॥ युग्मम् ॥

ततो जिनं जिनाम्बां च, दक्षिणकदलीगृहम् ।
नीत्वा सिंहासने दिव्ये, चतुःशालस्थिते न्यधुः ॥१०६॥

शतपाकादिभिस्तैलैरभ्यङ्गमथ तास्तयोः ।
चक्रिरे गन्धद्रव्यैस्तूद्वर्त्तनं सुमनोहरैः ॥१०७॥

ततः प्राक्कदलीवेश्मचतुःशालस्थितासने ।
न्यस्य तौ स्नपयित्वा चाऽभूषयन् वस्त्रभूषणैः ॥१०८॥

नीत्वाऽथोदीच्यरम्भौकश्चतुःशालान्तरे स्थिते ।
सिंहासने प्रभुं देवीं, चासयन् वासनाञ्चिताः ॥१०९॥

आनाय्य क्षुद्रहिमवत्पर्वतादाभियोगिकैः ।
गोशीर्षचन्दनैर्धांसि, मथितारणिदारुजे ॥११०॥

वह्नौ हुत्वा जगच्छान्तिकृतोऽपि परमेशितुः ।
बबन्धुस्ता[1]जीतमिति, रक्षापोट्टलिकां करे ॥१११॥ युग्मम् ॥

पर्वतायुर्भवेत्युक्तिपराः कर्ण्णान्तिके प्रभोः ।
मिथोऽथाऽऽस्फालयामासुर्माणिक्योपलगोलकौ ॥११२॥

---

१. व्यवहारः ।

ततो जिनं जिनाम्बां चानीय ताः सूतिमन्दिरे ।
शय्यायां न्यस्य गायन्त्योऽभ्यासे तस्थुर्यथोचितम् ॥११३॥

तदैव कल्पे **सौधर्मे**, **सुधर्मा**भिधपर्षदि ।
सामानिकानां सहस्रैरशीत्या चतुरग्रया ॥११४॥

त्रयस्त्रिंशत्त्रायस्त्रिंशैश्चतुर्भिर्लोकपालकैः ।
परिवारसमेताभिर्महिषीभिस्तथाऽष्टभिः ॥११५॥

तिसृभिः परिषद्भिश्च, महानीकैश्च सप्तभिः ।
सप्तभिश्चानीकनाथैस्तथा प्रतिदिशं स्थितैः ॥११६॥

प्रत्येकं चतुरशीत्या, सहस्रैरात्मरक्षकैः ।
परैरप्यमरैर्नैकैः[1] सेवितांऽघ्रिसरोरुहः ॥११७॥

शक्रस्य सहसा सिंहासनं कम्पमवाप्नुवत् ।
नृत्यं प्रादुश्चकारेव, जिनजन्मप्रमोदतः ॥११८॥ पञ्चभिः कुलकम् ॥

कोऽयं मुमूर्षुः पीठं मेऽचकम्पदिति कोपतः ।
धूतवज्रं हरिं प्रोचे, **नैगमेषी** चमूपतिः ॥११९॥

'प्रभो ! कं प्रत्ययं कोपाटोपादुल्लाल्यते पविः ।
आज्ञापय यथा हन्ति, जनोऽयं तव विद्विषम्' ॥१२०॥

प्रयुज्याऽथाऽवधिं बुद्धजिनजन्मा दिवस्पतिः ।
द्राग् मिथ्या दुष्कृतं दत्त्वा, सिंहासनममुञ्चत ॥१२१॥

अभि प्रभुदिशं दत्त्वा, सप्ताष्टानि पदानि च ।
शक्रस्तवेन वन्दित्वा, भूयो भेजे स्वविष्टरम् ॥१२२॥

---

१. अनेकैः ।

अथ सेनान्यमाहूय, पुरुहूतः प्रकर्षभाक् ।
आदिक्षदाह्वय सुरान्, कर्त्तुं जन्मोत्सवं प्रभोः ॥१२३॥

तथेति प्रतिपद्याऽसौ, पाकशासनशासनम् ।
अताडयत् **सुघोषां** त्रिर्घण्टां योजनमण्डलाम् ॥१२४॥

तस्याः प्रसृत्वरं नादमनु नेदुः परा अपि ।
घण्टा एकोनद्वात्रिंशल्लक्षसङ्ख्यविमानगाः ॥१२५॥

घण्टानां युगपन्नादाच्छब्दाद्वैते प्रसर्पति ।
सुराः प्रमादिनः सर्वेऽवहितत्वमशिश्रियन् ॥१२६॥

नूनं कोऽप्यद्य शक्रस्य, निर्देशोऽस्तीति नाकिषु ।
ध्यायत्स्वाघोषयन्नैगमेषी तारस्वरं यथा ॥१२७॥

विबुधा ! **जम्बू**द्वीपस्य, **भरते**ऽर्हज्जनुर्महे ।
हरिर्गन्ता महद्ध्यां तत्तत्रैत द्रुतमेत भोः ! ॥१२८॥

ततो देवा अमन्दोद्यत्प्रमोदाः सपरिच्छदाः ।
त्यक्ताशेषान्यकार्यौघाः, सारालङ्कारबन्धुराः ॥१२९॥

गजा-ऽश्वादीनि यानानि, विविधानि समाश्रिताः ।
प्रापुः सर्वेऽपि सौधर्मनायकस्य पुरः क्षणात् ॥१३०॥ [युग्मम्]

आभियोगिकदेवोऽथ, हरिणा **पालका**भिधः ।
आदिष्टो विचकाराऽऽशु, विमानं **पालका**भिधम् ॥१३१॥

पञ्चयोजनशत्युच्चं, लक्षयोजनविस्तृतम् ।
मणिस्तम्भशताकीर्णं, शालभञ्जीगणान्वितम् ॥१३२॥

---

१. इन्द्राज्ञाम् ।

चञ्चत्सौवर्णकलशं, पताकालिमनोहरम् ।
पञ्चवर्ण्णमणीकान्तिक्लृप्तशक्रधनुःशतम् ॥१३३॥

स्फुरद्भिः किङ्किणीक्वाणैर्मधुरैस्त्रिदशान् किल ।
जिनजन्ममहं कर्त्तुमाकारयदिदं व्यभात् ॥१३४॥ त्रिभिर्विशेषकम् ॥

वासवोऽनुपमं बिभ्रद्रूपमुत्तरवैक्रियम् ।
आरुह्य तदलञ्चक्रे, रत्नसिंहासनं महत् ॥१३५॥

सामानिका महिष्यश्च, सामाजिका[१] [अ]नीपकाः ।
आत्मरक्षाश्चासनानि, शिश्रिवांसो यथोचितम् ॥१३६॥

नाट्यानीकेन गन्धर्वानीकेन च शचीपतेः ।
चेतः कौतुकपाथोधौ, मीनकल्पमकल्पत ॥१३७॥

अष्टाऽष्टमङ्गलान्यासन्, पुरुहूतस्य चाग्रतः ।
सत्पूर्णकुम्भ-भृङ्गार-च्छत्राद्यं च तदन्वभूत् ॥१३८॥

महेन्द्रध्वजो योजनसहस्रो[च्च]स्ततोऽभवत् ।
पञ्चाऽनीकेश्वराश्चाऽधाऽऽभियोगिकसुरास्ततः[२] ॥१३९॥

ततोऽप्यनन्तरं सर्वऋद्धिसम्भारराजिताः ।
सौधर्मवासिनो देवा, देव्यश्च प्रस्थिताः पुरः ॥१४०॥

नदद्विविधवाद्येन, विमानेनाऽमुना हरिः ।
उदतारीदुत्तरेण, सौधर्मात्तिर्यगध्वना ॥१४१॥

अन्येऽपि नानायानस्थास्त्रिदशा अनुवासवम् ।
चेलुः कोलाहलव्याप्तनभसः सम्भ्रमस्पृशः ॥१४२॥

---

१. त्रिपर्षद्देवाः । २. 'अथ' इत्यर्थः ।

द्वीपाम्भोधीनसङ्ख्यातानुल्लङ्घ्य क्षणमात्रतः ।
प्राप **नन्दीश्वरं** द्वीपं, तद्विमानं बिंडौजसः ॥१४३॥

तत्र दक्षिणपूर्वस्मिन्, गिरौ **रतिकरे** हरिः ।
सञ्चिक्षेप विमानं तं, ग्रन्थार्थमिव सत्कविः ॥१४४॥

सद्यश्चैवं विमानेन, सङ्क्षिप्तेन क्रमा[त्] क्रमात् ।
प्रभोर्जन्मगृहं प्राप्य, तिस्रोऽदत्त प्रदक्षिणाः ॥१४५॥

अथैशान्यां विमानं तन्मुक्त्वा गेहान्तरं गतः ।
आलोकेऽपि प्रभुं मातृयुतं नत्वेदमब्रवीत् ॥१४६॥

'नमस्तुभ्यं त्वया मातर्जगत्त्रयविभूषणम् ।
जनयन्त्या पुत्ररत्नं, स्त्रीजातिरुदकृष्यत ॥१४७॥

अहं **सौधर्म**कल्पेन्द्रस्त्वत्सूनोस्त्रिजगद्गुरोः ।
एतो जन्ममहं कर्तुं, न हि भेतव्यमम्ब ! तत्' ॥१४८॥

इत्युक्त्वा स्वापिनीं[1] मातुर्दत्त्वा मुक्त्वा च सन्निधौ ।
प्रतिच्छन्दं प्रभोः शक्रः, पञ्चरूपोऽभवत् स्वयम् ॥१४९॥

दध्रे तत्रैकया मूर्त्या, गोशीर्षरसलेपतः ।
सुगन्धिनि करद्वन्द्वे, तीर्थनाथं सुरेश्वरः ॥१५०॥

आतपत्रं पुनर्मूर्त्त्यैकया द्वाभ्यां च चामरे ।
एकया तु पुरः क्षिप्रप्रतीष्टं कुलिशं दधौ ॥१५१॥

एवं शक्रो व्रजन् स्वर्णशैलं प्रति सुधासनैः ।
सामानिकादिभिर्विष्वक्, परिवव्रे ससम्भ्रमम् ॥१५२॥

---

१. इन्द्रस्य । २. 'दत्त्वाऽसौ स्वापिनीं देव्या, मुक्त्वात्र प्रतिमां प्रभोः' इति वासुपूज्यचरित्रे - ३।२२८। एतदाख्यां निद्राम् ॥

सुरसङ्घट्टसङ्कीर्णमार्गेण नभसा वृषा ।
प्राप मन्दरचूलायाः, स्थितां दाक्षिणतः शिलाम् ॥१५३॥

अतिपाण्डुकम्बलाख्या, कुमुदोदरपाण्डुरा ।
अर्हतां भरतोत्थानामभिषेकशिला हि सा ॥१५४॥

तस्यां सिंहासनं रत्नमयं पूर्वककुम्मुखः ।
समाश्रयत् सुनासीरः, स्वोत्सङ्गस्थापितप्रभुः ॥१५५॥

तदै**वेशान**कल्पेशप्रमुखा अपि वासवाः ।
त्रिषष्टिः पीठकम्पेन, प्रयुक्तावधिसंविदः ॥१५६॥

स्वस्वपत्तिचमूनाथैः, स्वस्वघण्टासमाहतेः ।
प्रबोधितैः सुरैर्युक्ताः, स्वस्वाभियोगिकामरैः ॥१५७॥

विकृतानि विमानानि, समारूढाः सुराचलम् ।
समेत्य नततीर्थेशास्तस्थुः स्थाने यथोचिते ॥१५८॥ विशेषकम् ॥

तथाहि-

ईशानेन्द्रः शूलपाणिर्महावृषभवाहनः ।
लघुपराक्रमाभिख्यसेनानाथप्रकाशितात् ॥१५९॥

महाघोषाख्यघण्टाया, निनादाज्जातजागरैः ।
वृतो वैमानिकामर्त्यैर्लक्षाष्टाविंशतिप्रमैः ॥१६०॥

विमानं **पुष्पकं** नामाऽध्यारुह्यैशानकल्पतः ।
तिर्यग्दक्षिणमार्गेणोत्तीर्य **नन्दीश्वरं** श्रितः ॥१६१॥

यानमुत्तरपूर्वस्मिन्, शैले **रतिकरा**भिधे ।
सङ्क्षिप्य क्रमतः स्वर्गस्वामिनमितमानमत् ॥१६२॥

चतुर्भिः कलापकम् ॥

आगा[द्] द्वादशभिर्लक्षैर्वृतो वैमानिकामरैः ।
सनत्कुमारः सुमनोविमानेन पुरः प्रभोः ॥१६३॥

माहेन्द्रस्तु विमानेशां, युतो लक्षाभिरष्टभिः ।
श्रीवत्साख्यविमानस्थः, पार्श्वं प्राप जगत्पतेः ॥१६४॥

ब्रह्मेशोऽपि विमानेशचतुर्लक्षसमन्वितः ।
नन्द्यावर्त्ताभिधं यानं, श्रित्वा प्रापाऽन्तिकं प्रभोः ॥१६५॥

पञ्चाशता विमानेशसहस्रैः सह सत्वरम् ।
लान्तकेशः कामगवविमानस्थः समागमत् ॥१६६॥

चत्वारिंशद्विमानेशसहस्रपरिवारभाक् ।
शुक्र[**शंक्र**]**ः प्रीतिगम**यानेनाऽऽप जिनान्तिकम् ॥१६७॥

सहस्रारहरिः षष्टिविमानशतनायकैः ।
वृतः प्राप प्रभोः पार्श्वं, **मनोरम**विमानगः ॥१६८॥

विमानेशां शतैर्युक्तश्चतुर्भिरनमत् प्रभुम् ।
विमलाख्यविमानस्थ, **आनतप्राणते**श्वरः ॥१६९॥

आरणाऽच्युतसुत्रामा, विमानेशशतैस्त्रिभिः ।
अन्वितः **सर्वतोभद्र**विमानेनाऽऽगम[द्] द्रुतम् ॥१७०॥

सौधर्मः सनत्कुमारो, ब्रह्म शुक्रश्च प्राणतः ।
एषां पञ्चानां कल्पेशां, **नैगमेषी** चमूपतिः ॥१७१॥

घण्टा **सुघोषा**ऽन्येषां तु, पञ्चानां परिकीर्त्तिता ।
घण्टा **महाघोषा** सेनानाथो **लघुपराक्रमः** ॥१७२॥

इति वैमानिकेन्द्रा दश ॥छ॥

---

१. **'शुक्रशक्रः प्रीतिगमविमानेन जिनान्तिक' मिति वासुपूज्यचरित्रे ।३।२४२।**

भवनेशनिकायेषु, **चमरो**ऽसुरवासवः ।
हताया **द्रुम**सेना**न्यौघस्वरा**या निनादतः ॥१७३॥

मिलितैरसुरैर्युक्तः, समं सामानिकादिभिः ।
योजनार्द्धलक्षमानं, विमानं समधिष्ठितः ॥१७४॥

प्राप्तो **नन्दीश्वरं** शक्र, इव सङ्क्षिप्य तत् क्रमात् ।
मेरुमूर्द्धनि तीर्थेशपादान्तं समुपागमत् ॥१७५॥ विशेषकम् ॥

महाद्रुमाहत**महौघस्वरा**नादसङ्गतैः ।
युक्तोऽसुरै**र्बलीन्द्रो**ऽपि, तद्वदागाद्विमानगः ॥१७६॥

नाग-विद्युत्-[सु]पर्णा-ऽग्नि-वायु-मेघ-सरस्वताम् ।
द्वीपानां च **दिशां** चेन्द्रा, दक्षिणश्रेणिगाः क्रमात् ॥१७७॥

धरणेन्द्रो हरिर्वेणुदेवश्चा**ऽग्निशिख**स्तथा ।
वेलम्बः सुघोषो जलकान्तः पूर्णोऽमितोऽपि च ॥१७८॥

उदक्श्रेणेस्त्वमी **भूतानन्दो हरिशिख**स्तथा ।
वेणुदारी तथा चाऽ**ग्निमाणव**श्च **प्रभञ्जनः** ॥१७९॥

महाघोषो जलप्रभोऽवशिष्टोऽमितवाहनः ।
सर्वेऽमी स्वस्वघण्टानां, नादैर्जागरिताऽमराः ॥१८०॥

विस्तृतानि यो[ज]नानां, सहस्रान् पञ्चविंशतिम् ।
विमानानि समारूढा, आजग्मुः प्रभुसन्निधौ ॥१८१॥ पञ्चभिः कुलकम् ॥

नागादिकानां भवनपतीनां पक्षयोर्द्वयोः ।
क्रमा**न्मेघस्वरा क्रौञ्च-हंस-मञ्जुस्वरा**स्तथा ॥१८२॥

नन्दिस्वरा नन्दिघोषा, सुस्वरा मधुरस्वरा ।
मञ्जुघोषा चेति घण्टा, ज्ञातव्या अभिधानतः ॥१८३॥

सेनान्यो **भद्रसेना**ख्या, घण्टाः सन्ताडयन्त्यमूः ।
नवानां धरणादीनां, परेषां **दक्ष**सञ्ज्ञकः ॥१८४॥

पञ्चयोजनशत्युच्चोऽसुरभर्त्रोर्महाध्वजः ।
तदर्द्धमानो धरणादीन्द्राणां तु समन्ततः ॥१८५॥

इति भवनपतीन्द्रा विंशतिः ॥छ॥

कालादयोऽपि द्वात्रिंशद्व्यन्तराणामधीश्वराः ।
दक्षिणोत्तरपङ्क्तिस्थाः, प्रबुद्धाः पीठकम्पतः ॥१८६॥

क्रमान्**मञ्जुस्वरां मञ्जुघोषां** स्वैः स्वैर्बलेश्वरैः ।
घण्टामास्फाल्य सम्मील्य, स्वस्वान् व्यन्तरनिर्जरान् ॥१८७॥

समारूढा विमानानि, विकृतान्याभियोगिकैः ।
प्रभुजन्ममहं कर्त्तुं, महद्ध्र्या समुपाययुः ॥१८८॥ विशेषकम् ॥

चन्द्राऽऽदित्यावसङ्ख्यातौ, ज्योतिष्काणामधीश्वरौ ।
आयातौ मेरुशिखरे, समस्तात्तपरिच्छदौ ॥१८९॥

चन्द्रार्काणामपाच्यानां, घण्टाः स्युः **सुस्वरा**भिधाः ।
तथा **सुस्वरनिर्घोषा**, उदीच्यानां प्रकीर्त्तिताः ॥१९०॥

योजनानां[1] सहस्रं तु, विमानानि पृथुत्वतः ।
व्यन्तरज्योतिष्केन्द्राणां, सपादं च शतं ध्वजाः ॥१९१॥

इति द्वात्रिंशद् व्यन्तरेन्द्रा ज्योतिष्केन्द्रौ च ॥ श्री ॥

एवं सर्वसुरेन्द्रेषु, मिलितेष्**वच्युतेश्वरः** ।
स्नात्रोपकरणाहृत्यै, निदिदेशाऽऽभियोगिकान् ॥१९२॥

---

१. अस्य श्लोकस्य अन्वयो निम्नोक्तरीत्या कर्तव्यः-व्यन्तर-ज्योतिष्केन्द्राणां तु विमानानि पृथुत्वतो योजनानां सहस्रम्, ध्वजाश्च सपादं (योजनानां) शतम् ।

तैरथोत्तरपूर्वस्यां, दिश्यपक्रम्य वैक्रियम् ।
समुद्घातं विधायोच्चैः, कुम्भाः सद्यो विचक्रिरे ॥१९३॥

सौवर्णा राजता रात्नाः, स्वर्णरूप्यमया अपि ।
स्वर्णरत्नमयाश्चापि, रूप्यरत्नमया अपि ॥१९४॥

स्वर्णरूप्यरत्नमयास्तथा मृत्स्नामया अपि ।
अष्टाग्रसहस्रसङ्ख्याः, प्रत्येकमभवन्नमी ॥१९५॥

तैस्तथा स्थाल-भृङ्गार-पात्री-रत्नकरण्डकाः ।
दर्पणाः पुष्पचङ्गेर्यः, सुप्रतिष्ठाः कृतास्तति ॥१९६॥

क्षीराब्धौ पुष्कराब्धौ च, **गङ्गा**दिषु नदीषु च ।
मागधादिषु तीर्थेषु, **पद्मादिषु** [1]नदेष्वपि ॥१९७॥

गत्वा तेऽथ सुराः स्वैरं, सलिलैरतिनिर्मलैः ।
कुम्भानपूरयन् मृत्सामम्बुजान्यप्यगृह्णत ॥१९८॥ युग्मम् ॥

कुलाद्रिभ्यो वक्षारेभ्यो, वैताढ्येभ्यश्च सर्वतः ।
विजयेभ्यः सुराद्रिस्थवनेभ्योऽपि च ते सुराः [2] ॥१९९॥

गन्धान् पुष्पाणि सिद्धार्थांस्तुवराणि तथौषधीः ।
मेलयित्वा क्षणान्मेरुशिखरं समुपाययुः ॥२००॥ युग्मम् ॥

अथ प्रमोदमसमं, वहन्नच्युतवासवः ।
उत्थाय स्वीयसामानिकादिभिः परितो वृतः ॥२०१॥

उत्तरासङ्गवान् दिव्यैर्भौमैश्चापि सुमैर्वरैः ।
उत्क्षिप्ताऽगरुकर्पूरो, [मुमोच] कुसुमाञ्जलिम् ॥२०२॥

---

१. ह्रदेषु । २. मेरुस्थवनेभ्यः ।

वादित्रनिनदैः पूर्णे, रोदसीविवरेऽखिले ।
सुरीजनेषु नृत्यत्सु, गीतध्वनिमनोहरम् ॥२०३॥

देवमागधसन्दोहे, गुणौघं पठति प्रभोः ।
चामरेष्वभितोऽप्युद्धूयमानेषु सुरासुरैः ॥२०४॥

जलैः सर्वौषधीमिश्रैश्चन्दनादिसुगन्धिभिः ।
उन्निद्राम्भोजसंशोभिवक्त्रकुम्भावलिस्थितैः ॥२०५॥

सौधर्मवासवक्रोडगतस्य भुवनप्रभोः ।
स्नात्रं श्रेयःश्रियां पात्रं, निर्ममे निर्मलाशयः ॥२०६॥ षड्भिः कुलकम् ॥

स्नात्रे प्रवर्तमाने च, पुरः सर्वेऽपि वासवाः ।
अतिष्ठंश्चामर-च्छत्र-फल-पुष्पादिपाणयः ॥२०७॥

अन्येऽपि देवा देव्यश्च, गीतैर्वाद्यैः प्रव(न)र्त्तनैः ।
फलपुष्पादिवर्षेण, निपातोत्पाततोऽपि च ॥२०८॥

हेषादिनादकरणात्, पाददर्दरयोगतः[१] ।
अन्याभिरपि चेष्टाभिर्भृशं प्रादीदृशन्मुदम् ॥२०९॥ युग्मम् ॥

मार्जयित्वा प्रभोः कायं, चन्दनेन विलिप्य च ।
सामोदैः कुसुमैः स्मेरैरानर्चाऽथा**ऽच्युताधिपः** ॥२१०॥

श्रीवत्स-स्वस्तिका-ऽऽदर्शा, नन्द्यावर्तः सुकुम्भयुक् ।
भद्रासनं वर्द्धमानो, मत्स्यश्चेत्यष्टमङ्गलीम् ॥२११॥

अखण्डै रजतमयैस्तण्डुलैश्च पुरः प्रभोः ।
आलिख्य धूपमुत्क्षिप्य, विहिताऽऽरात्रिकोऽस्तवीत् ॥२१२॥ युग्मम् ॥

---

१. पादघातयोगतः ।

इत्थं परेऽप्यनुज्येष्ठं, वासवा **अच्युतेन्द्र**वत् ।
स्वामिनं स्नपयामासुर्द्वाषष्टिः सपरिच्छदाः ॥२१३॥

अ**थेशानवृषा** पञ्चमूर्त्तीर्निर्माय शक्रवत् ।
श्रितासनः प्रभुं मूर्त्यैकया [1]क्रोडे समाददे ॥२१४॥

एकया विशदं छत्रं, द्वाभ्यां च चामरे दधौ ।
शूलमुल्लालयामास, स्थितोऽग्रे पुनरेकया ॥२१५॥
शक्रोऽथ स्नात्रसामग्रीं, विनिर्माप्याऽऽभियोगिकैः ।
स्फाटिकान् स्वामिनो दिक्षु, विकृत्य चतुरो वृषान् ॥२१६॥

तच्छृङ्गेभ्यो निर्यतीभिः, क्षीरधाराभिरष्टभिः ।
सम्भूय निपतन्तीभिर्मूर्ध्नि प्रभुमसिष्णपत् ॥२१७॥ युग्मम् ॥

ततः कल्पद्रुमादीनां, प्रसूनैर्जिनमार्चयत् ।
दिव्यवासो-मणि-स्वर्णाद्यलङ्कारैरभूषयत् ॥२१८॥

आलिख्य लेखनाथोऽथ, प्रभोरग्रेऽष्टमङ्गलीम् ।
विधायाऽऽरात्रिकं शक्रस्तवमुक्त्वेति चाऽस्तुत ॥२१९॥

'जय रत्नत्रयाधार !, जय ज्ञानत्रयोज्ज्वल ! ।
जय विश्वत्रयीपूज्य !, जय दोषत्रयान्तक ! ॥२२०॥

प्रभो ! कृत्वा तव स्नात्रं, निर्मलैस्तीर्थवारिभिः ।
अस्माभिर्भवदावाग्नितापोऽपास्यत कौतुकम् ॥२२१॥

द्वितीयस्तीर्थनाथस्त्व[म]द्वितीयः पुनर्गुणैः ।
अभूद् द्वितीयकल्याणपर्वणाऽद्य जगन्मुदे ॥२२२॥

---

१. उत्सङ्गे ।

सौरभाहूतरोलम्बकुलैर्नानाविधैः सुमैः ।
त्वामर्चयद्भिरस्माभिर्लेभेऽहो ! जगदर्च्यता ॥२२३॥

तेषां प्रशस्यं [खलु] जीवितव्यं, श्लाघ्यं च तेषां जननं भवेऽत्र ।
द्वितीयतीर्थाधिपते ! प्रमोदाद्यैः सेव्यसे सेवककल्पवृक्ष !' ॥२२४॥

[इन्द्रवज्रावृत्तम्]

इति स्तुत्वा हरिः प्राग्वत्, पञ्चमूर्त्तीः श्रयन् प्रभुम् ।
ईशानाङ्कादुपादाय, विनीतां नगरीं ययौ ॥२२५॥

संहृत्याऽर्हत्प्रतिबिम्बं, तथाऽवस्वापिनीमपि ।
सविधे **विजयादेव्याः**, स्वामिनं विन्यवेशयत् ॥२२६॥

उच्छीर्षे च विभोः कान्तिन्यक्कृतार्क-निशाकरम् ।
कुण्डलद्वन्द्वममलदू[ष्य]द्वन्द्वयुतं न्यधात् ॥२२७॥

प्रभोश्चाक्षिविनोदार्थमुल्लोचे मणिमण्डितम् ।
बबन्ध स्वर्ण्णप्राकाररम्यं श्रीदामगण्डकम् ॥२२८॥

हिरण्य-स्वर्ण-रत्नानां, कोटीर्द्वात्रिंशतं पृथक् ।
पृथग् द्वात्रिंशतं नन्दासन-भद्रासनान्यपि ॥२२९॥

अन्यच्च वस्त्रा-ऽलङ्कार-फल-पुष्पादि सुन्दरम् ।
शक्रादिष्टश्रीदवाचाऽवर्षन् विभुगृहे सुराः ॥२३०॥ युग्मम् ॥

प्रभोः प्रभुजनन्याश्च, योऽप्रियं चिन्तयिष्यति ।
सप्तधा भेत्स्यते तस्याऽर्जकमञ्जरिवच्छिरः ॥२३१॥

इत्युच्चैर्घोषणामाभियोगिकाः शक्रशासनात् ।
त्रिदशानां निकायेषु, चतुर्ष्वपि तदा व्यधुः ॥२३२॥

न ह्यर्हन्तः प्रसूक्षीरं, रसयन्तीति वृत्रहा ।
कराङ्गुष्ठे विभोर्न्यास्थत्, सुधां दिव्योल्लसद्रसाम् ॥२३३॥

ततो नत्वा विभुं व्योम्नोत्पत्य **नन्दीश्वरं** ययौ ।
अन्ये तु वासवा मेरोरेव तं प्रापुरुन्मुदः ॥२३४॥

तत्र **प्राच्याञ्जनगिरौ**, **सौधर्माधिपतिः** कृती ।
चकाराऽष्टाह्निकापूजामहं चैत्ये सनातने ॥२३५॥

तल्लोकपालाश्चत्वारोऽर्हतामष्टाह्निकोत्सवम् ।
वाप्यन्तःस्थ**दधिमुखशैले** चैत्येषु तेनिरे ॥२३६॥

उदीच्याञ्जनशैले तु, शाश्वतार्हन्निकेतने ।
ईशानवासवश्चक्रेऽष्टाह्निकोत्सवमुत्तमम् ॥२३७॥

लोकपालाश्च तस्यापि, प्राग्व**द्दधिमुखाद्रिषु** ।
चक्रुरष्टाह्निकापूजा**मृषभादि**ध्रुवार्हताम् ॥२३८॥

दक्षिणाञ्जनशैलेऽथाऽष्टाह्निकां **चमरो**ऽकरोत् ।
चतुर्षु त**द्दधिमुखाद्रिषु** तस्य तु लोकपाः ॥२३९॥

पश्चिमे **त्वञ्जनगिरौ**, **बलीन्द्रो**ऽष्टाह्निकां व्यधात् ।
तल्लोकपालाश्चत्वारः, पुन**र्दधिमुखाद्रिषु** ॥२४०॥

ततश्चाद्भुतपुण्येन, तेन नुन्ना इव द्रुतम् ।
सर्वे सुराऽसुरा देवभुवं भूरिसुखां ययुः ॥२४१॥

इतश्च रात्रौ तत्रैव, जिनजन्मक्षणादनु ।
वैजयन्त्यप्यसूताऽऽशु, तनयं द्युतिशालिनम् ॥२४२॥

ज्ञात्वाऽथ **विजयादेव्या, वैजयन्त्या**श्च तत्क्षणम् ।
पुत्ररत्नसमुत्पत्तिं, सम्मदापूर्णचेतसः ॥२४३॥

चेट्यो मिथः परां स्पर्द्धां, वहन्त्यो वेगवत्तराः ।
भूमिनाथं वर्द्धयितुमधावन्त समन्ततः ॥२४४॥ युग्मम् ॥

वर्द्धयसे वर्द्ध्यसे देव !, जन्मना पुत्ररत्नयोः ।
द्रुतमित्यूचुषी काचिल्लेभे रत्नचयं नृपात् ॥२४५॥

एवं निवेदयत्यङ्गजन्मजन्म परिच्छदे ।
ददद्दानं दधौ पूर्वापरभेदं न भूधनः ॥२४६॥

आरक्षपुरुषान् दक्षमुख्यो मुदितमानसः ।
पुत्रजन्मोत्सवं पुर्यां, विधातुं च समादिशत् ॥२४७॥

गन्धोदकच्छटाशान्तपांशुं कीर्णमणीवकाम् ।
प्रतिद्वारस्फुरत्स्वर्ण्णकुम्भतोरणसुन्दराम् ॥२४८॥

कृष्णागरुप्रभृत्युद्यद्धूपसद्गन्धबन्धुराम् ।
बद्धाऽऽनभःपताकौघसंशोभितचतुष्पथाम् ॥२४९॥

पदे पदे स्फुरद्गीतिगन्धर्वगणसङ्कुलाम् ।
पणस्त्रीविलसल्लास्यालोकनाक्षिप्तनागराम् ॥२५०॥

आविद्धमौक्तिकश्रेणिक्लृप्तस्वस्तिकसन्ततिम् ।
आरक्षास्ते क्षणाच्चक्रुस्तां पुरीं प्रवरश्रियम् ॥२५१॥ चतुर्भिः कलापकम् ॥

नार्य्यः सुराङ्गनारूपविजयिन्यः कराम्बुजैः ।
बिभ्राणाः पूर्णपात्राणि, प्राविशन्नृपमन्दिरम् ॥२५२॥

कूर्दमानैः[२] समं छात्रैः, पठतः सौ[३]ममातृकाम् ।
उपागतानुपाध्यायान्, सच्चक्रे सादरं नृपः ॥२५३॥

सामन्ताः क्षितिनाथाय, मङ्गलाचारकोविदाः ।

---

१. नृपः । २. खेलद्भिः । ३. जन्मपत्रिकाम् ।

तदा मुदा समानिन्युरुपायनपरम्पराम् ॥२५४॥
अनेकमन्तुकर्त्तारोऽप्यरयोऽपि च बन्धनात् ।
मोचिता भूभुजा जाते, भवबन्धविमोचके ॥२५५॥
अप्रीण्यन्ताऽर्थिनो द्रव्यैः, स्वान्यभेदाविवक्षया ।
पूजाश्चाऽर्हन्निकाय्येषु, प्रावर्त्त्यन्त महाद्भुताः ॥२५६॥
शशंसेव पुरी स्फूर्जन्मङ्गलातोद्यनिस्वनैः ।
जन्माऽर्हच्चक्रिणोर्विश्वत्रयाय सुखदायकम् ॥२५७॥
महोत्सवमयी सर्वसौख्योच्चयमयी पुरी ।
बभूवैवं दशाहानि, भूमीश्वरनिदेशतः ॥२५८॥
अथ भूपो द्वादशेऽह्नि, सम्मील्य स्वजनव्रजम् ।
आहारैर्भूषणैः पुष्पैस्ताम्बूलैः परितोष्य च ॥२५९॥

अक्षद्यूते मया जिग्ये, गर्भस्थस्याऽस्य न प्रसूः ।
इति स्वसूनो**रजित**, इति नाम विनिर्ममे ॥२६०॥ युग्मम् ॥

भ्रातुष्पुत्रस्य तु प्राज्यप्रमोदापूर्णमानसः ।
चकार **सगर** इति, नाम स्थामनिधिर्नृपः ॥२६१॥

पञ्चभिः शक्रनिर्दिष्टाऽप्सरोभि**रजितप्रभुः** ।
पाल्यमानो व्यवर्धिष्ट, विष्टपेश्वरपूजितः ॥२६२॥

सगरः पुनरुर्वीशादिष्टधात्रीभिरन्वहम् ।
लालितः कलयामास, वपुर्लावण्यमुज्ज्वलम् ॥२६३॥

द्वावप्यद्भुततेजस्कौ, स्फुरदद्वैतविक्रमौ ।
भूमीपतिर्निजोत्सङ्गेऽधारयत्तौ मुहुर्मुहुः ॥२६४॥

तनयाङ्गपरिष्वङ्गरङ्गन्निर्भरनिर्वृती ।
जनन्यावतितुच्छां तामममंसातां सुधामपि ॥२६५॥

धात्र्यो धर्त्तुं न यत्नात्तौ, शेकुः स्वच्छन्दचारिणौ ।
गतेः प्रस्खलयामासुस्ततश्चाटुप्रपञ्चनैः ॥२६६॥

तावासेचनकौ भूपाः, पश्यन्तः परमादरात् ।
सततं निजनेत्राणां, निनिन्दुः सनिमेषताम् ॥२६७॥

अङ्कादङ्कं नीयमानौ, महीपैः प्रेमपूरतः ।
तौ मरालाविवाऽम्भोजादम्भोजं रेजतुस्तराम् ॥२६८॥

सह विश्वप्रमोदेन, सार्द्धं वर्ष्मश्रियाऽपि च ।
उल्लासं बिभरामास, तयोर्बुद्धिर्दिने दिने ॥२६९॥

मति-श्रुता-ऽवध्यभिधैर्विज्ञानैः सहजन्मभिः ।
स्वयमेव कलाः सर्वा, अज्ञास्ताऽ**जित**तीर्थकृत् ॥२७०॥

सगरस्त्ववनीशस्य, निदेशेन शुभेऽहनि ।
आरेभे शुभधीः [शीघ्रं], कलाचार्यात् कलाग्रहम् ॥२७१॥

प्राच्यपुण्यचयोद्भूतप्रज्ञातिशयभासुरः ।
आनन्दयदुपाध्यायमयं गृह्णन् कलाः कलाः ॥२७२॥

पद-वाक्य-प्रमाणेषु, निष्णातत्वमवाप्य सः ।
धर्मा-ऽर्थ-कामशास्त्राणां, रहस्यानि व्यचारयत् ॥२७३॥

अलक्ष्यादानसन्धानकर्षमोक्षः शितैः शरैः ।
वेध्यानि विद्धवानेष, दूरसूक्ष्मचलान्यपि ॥२७४॥

छुरी-खड्ग-गदा-दण्ड-कुन्त-गोफण-पर्शुभिः ।
अपरैश्चापि शस्त्रैः सोऽजस्रमभ्यास्यदाहवम् ॥२७५॥

विनयाद्यैर्गुणैः सारैर्भूषणैरिव भूषितः ।
व्रियते स्म स सोत्कण्ठं, कलाभिः सुभगोत्तमः ॥२७६॥

श्रीमा**नजितनाथो**ऽपि, सुरैर्भक्तिपरैः सदा ।
पद्मखण्डो यथा हंसैः, सेव्यते स्म प्रयत्नतः ॥२७७॥

भृत्यभावं प्रभोर्मन्यमाना बहुसुरोत्तमाः ।
तृणाय मत्वा हित्वा च, स्वःसौख्यं द्रुतमाययुः ॥२७८॥

सवयोभूय चाऽजस्रं, प्रभूतप्रीतिबन्धुराः ।
नानाविधाभिः क्रीडाभिश्चिक्रीडुः प्रभुणा सह ॥२७९॥

प्रभोरादिशतः कामं, बद्धतृष्णाश्च सादरम् ।
पपुर्वचोऽमृतं चञ्चरीकाः पद्मकरन्दवत् ॥२८०॥

केचिदासन् प्रतीहाराः, केचिच्छत्रमधारयन् ।
अस्त्राण्यबिभरुः केऽपि, केचनाऽप्यधरन् स्थगीः ॥२८१॥

केचनोपानहौ स्वीयहस्ताभ्यामवहन् सुराः ।
धन्यम्मन्यास्त्रिभुवनेशितुः क्रीडां वितन्वते ॥२८२॥

सगरोऽपि कलाचार्याद्, ग्राहं ग्राहं कलावलीम् ।
दिने दिने**ऽजितेशाय**, व्यजिज्ञपदुदारधीः ॥२८३॥

सगरेणाऽऽदरात् पृष्टो, ज्ञानत्रयधरः प्रभुः ।
अभग्नान् पाठकेनापि, संशयानच्छिनत्तराम् ॥२८४॥

वाजिशिक्षां हस्तिशिक्षां, राधावेधाद्यपीतरत् ।
अभ्यस्तं दुर्घटं प्रादुश्चक्रे चक्री प्रभोः पुरः ॥२८५॥

कलासु **सगरस्या**ऽऽसीन्न्यूनं यत् किञ्चनापि तत् ।
अशिक्षयत् प्रभुस्तादृक्, शिक्षकस्तादृशस्य हि ॥२८६॥

अथ तौ बाल्यमुल्लङ्घ्य, सम्प्राप्तौ मध्यमं वयः ।
दस्राविव धरां प्राप्तौ, कस्य नो जहृतुर्मनः ? ॥२८७॥

श्रीवत्सलाञ्छितोरस्कावुष्णीषोद्भासिमस्तकौ ।
हेमद्युती समुत्तुङ्गौ, सार्द्धां चापचतुःशतीम् ॥२८८॥

आद्यं संस्थानमाद्यं चाश्रितौ संहननं वरम् ।
सल्लक्षणशतैर्जुष्टौ, तौ दृष्टौ मुदितैर्जनैः ॥२८९॥ युग्मम् ॥

दिने हीनद्युता स्फूर्जत्कलङ्केनेन्दुना कथम् ।
उपमेयं सदोद्द्योति, निष्कलङ्कं तयोर्मुखम् ॥२९०॥

तयोः कपोलौ रेजाते, रत्नादर्शाविवोज्ज्वलौ ।
नीलोत्फुल्लदलस्पर्शं, विदधाते अक्षिणी पुनः ॥२९१॥

नासिके तिलपुष्पाभे, विद्रुमाभौ रदच्छदौ ।
श्रवसी तु श्रियो दोले, इव व्यभ्राजतां तयोः ॥२९२॥

रेखात्रयाङ्कितः कण्ठस्तयोः कम्बुं व्यडम्बयत् ।
जिग्यतुर्भुजगाधीशं, पुनः पीनायतौ भुजौ ॥२९३॥

स्वर्णशै[लशि]लाकल्पं, व्यभाद्वक्षःस्थलं तयोः ।
गम्भीरा कूपवन्नाभिर्मध्यं तु पविसोदरम् ॥२९४॥

व्यराजतां तयोरूरू, करीन्द्रकरसन्निभौ ।
महास्तम्भोपमे जङ्घे, स्थलपद्मसमौ क्रमौ ॥२९५॥

वागीशेनापि नो वर्ण्यं, रूपं निरुपमं तयोः ।
तस्याऽप्येकरसज्ञत्वात्, क्रमोद्यत्वाच्च वाक्ततेः ॥२९६॥

विक्रमादिगुणै रूपेणापि नृष्वखिलेष्वपि ।
चक्र्युत्कृष्टोऽभवत् कल्पद्रुमः सर्वद्रुमेष्विव ॥२९७॥

अनुत्तरान्तदेवेभ्य, आहारकतनोरपि ।
गुणभृद्भ्योऽपि चोत्कर्षं, रूपेणाऽधत्त तीर्थकृत् ॥२९८॥

तौ कुमारौ कुलाधारौ, जितमारौ वपुःश्रिया ।
गुणोदारौ राजलक्ष्म्याः, सारौ हाराविवोज्ज्वलौ ॥२९९॥

जितशत्रुनृपः पश्यन्, हृल्लसत्प्राज्यसम्मदः ।
नेत्रे दधार पीयूषपूरिते इव शीतले ॥३००॥ युग्मम् ॥

तारुण्यालङ्कृतौ वीक्ष्य, तौ दध्युर्मृगलोचनाः ।
एतौ गृहीष्यतो यासां, पाणिं ताः स्त्रीषु[२] उत्तमाः ॥३०१॥

नृपोऽन्येद्युः सुधर्माभां, सभां सामन्तमन्त्रिभिः ।
वृतो विभूषयामास, द्यां कलाभृदिवोडुभिः ॥३०२॥

नर्त्तका नृत्तभङ्गीभिर्गाथकाश्चारुगीतिभिः ।
ततादिकचतुर्भेदवाद्यैर्वाद्यकलाविदः ॥३०३॥

कथाभिः सद्रसोल्लासरम्याभिः कथकास्तथा ।
चमत्कारकरैः काव्यैरुदारार्थैः कवीश्वराः ॥३०४॥

नर्मोक्तिभिर्नर्मकृतः, शिल्पैरपि च शिल्पिनः ।
यत्नात् सन्तोषयामासुस्तदानीं क्षितिनायकम् ॥३०५॥ त्रिभिर्विशेषकम् ॥

अथ बिभ्रत् करे वेत्रं, वेत्री विनयवामनः ।
आगत्य नृपतिं बद्धाञ्जलिरेवं व्यजिज्ञपत् ॥३०६॥

---

१. अनुत्तरवासिदेवेभ्यः । २. अत्र 'न सन्धिः' (सि. हे. श. ।१।३।५२।) सूत्रेण सन्ध्यभावः । यथा द्व्याश्रयमहाकाव्ये-'कण्ठलग्नाः सदा स्त्रीणाम् खेलन्ति इह षिङ्गकाः । विरामे न प्रवर्तन्ते कदाचित्सन्धयो यथा' ॥ १/११० ॥

देव ! कोऽप्यद्भुताकारो, नरः केकीव वारिदम् ।
त्वां द्रष्टुं भृशमुत्कण्ठाकलितो द्वारि वर्त्तते ॥३०७॥

द्रुतं प्रवेशयेत्युक्त्या, क्षितिनाथस्य वेत्रिणा ।
दर्शिताऽध्वा स आगत्य, नत्वाऽऽस्ते स्म यथोचितम् ॥३०८॥

दृशा प्रसन्नया वीक्ष्य, क्ष्मापेनाऽयमभाष्यत ।
'कुतः प्राप्तोऽसि कार्येण, केन वेति निवेदय' ॥३०९॥

अथाऽसावब्रवीद्देव !, **महासाला**भिधं पुरम् ।
विद्यतेऽवद्यनिर्मुक्तजनराजिविराजितम् ॥३१०॥

श्रीकीर्त्तिधवलस्तत्र, भूभर्त्ता सान्वयाभिधः ।
प्रजाः पालयति प्रास्तसमस्तारातिसन्ततिः ॥३११॥

तस्याऽस्ति तनया **चन्द्रकान्ता**कुक्षिसमुद्भवा ।
नाम्ना **मदनलेखे**ति, मदनोज्जीवनौषधिः ॥३१२॥

सा शैशवमतिक्रम्य, प्राप्तप्रौढकलावलिः ।
कलयामास तारुण्यं, कामकेलिनिकेतनम् ॥३१३॥

तस्या अनुत्तरं रूपं, मन्येऽजस्रं निरूपयन् ।
शिश्राय सुरसन्दोहो, नेत्राणामनिमेषताम् ॥३१४॥

तस्यां रूपपराभूतगीर्वाणमपि कञ्चन ।
अनिच्छन्त्यां नरं तातो, वरचिन्तार्णवेऽपतत् ॥३१५॥

कुलदेव्यन्यदा स्वप्ने, जगाद जगतीपतिम् ।
'मुधैव चिन्तयाऽऽत्मानं, क्लेशकोटौ क्षिपः स्म मा ॥३१६॥

यदमुष्या भवत्पुत्र्याः, प्राज्यपुण्यैकसद्मनः ।
जगत्स्तुत्यो जगच्चिन्तामणिर्भर्त्ता भविष्यति' ॥३१७॥

ततः प्रभृति भूभर्त्ता, सप्रियश्चिन्तयोज्झितः ।
निनाय समयं सौख्यमयं विगलितारतिः ॥३१८॥

कदाचन वसन्तर्त्तौ, सध्रीचीवृन्दवेष्टिता ।
सा कन्या नगरोद्यानमगमद् गजगामिनी ॥३१९॥

चम्पका-ऽशोक-माकन्द-तमाल-[ब]कुलादिकान् ।
सखीभिर्दर्शितान् वृक्षान्, पश्यन्ती तत्र साऽचलत् ॥३२०॥

तस्योद्यानस्य मध्येऽथ, श्रीनन्दननिकेतने ।
गीतं किन्नरनारीभिरार्याद्वयमदोऽशृणोत् ॥३२१॥

जयति विनीताभर्त्तु**र्जितशत्रो**र्नन्दनो जगद्वन्द्यः ।
श्रीमा**नजितस्वामी,** चामीकरजिततनूकान्तिः ॥३२२॥ [आर्या]

किं कार्यं स्वर्मणिना ?, किं वा कल्पद्रुमाऽमरगवीभ्याम् ? ।
सर्वार्थसिद्धिदश्चे**दजितेशः** सेवितुं लभ्यः ॥३२३॥ [आर्या]

श्रुत्वे**त्यजित**नाथस्य, गुणानन्त्यनिवेदकम् ।
आर्याद्वयमभूदेषा, विवशा मान्मथैः शरैः ॥३२४॥

अचिन्तयच्च चेन्नाथ**मजिते**शमवाप्नुयाम् ।
तदा मे मानुषं जन्म, सफलं जीवितं तथा ॥३२५॥

असारोऽप्येष संसारस्तत्सङ्गात् सारतां श्रयेत् ।
शशिसङ्गात् कुरङ्गः किं, भुवनोपरि न स्थितः ? ॥३२६॥

यदि मे मन्दभाग्याया, नाऽसौ स्यात् प्राणवल्लभः ।
जीवितेनाऽमुना नूनं, किमन्तर्गडुना ततः ॥३२७॥

जन्मन्यस्मिंस्तदेकोऽसौ, शरण्यः शरणं मम ।
अन्यथा मरणं दीप्तहव्यवाहनिषेवणात् ॥३२८॥

एवं विकल्पकल्लोलमालाभिः प्रेरितेव सा ।
अपतद्धरणीपीठे, झटित्येव विचेतना ॥३२९॥

ततः सखीजनैर्बाढं, व्याकुलैः सा सरोजदृक् ।
शिशिरैरुपचारैर्द्राक्, चैतन्यं समवाप्यत ॥३३०॥

तथापि दुर्लभजनानुरागवशतोऽधिकम् ।
दुःखं वहन्ती नाऽजल्पज्जल्पिताऽपि सहस्रधा ॥३३१॥

अथो कथञ्चिदाश्वास्य, सखीभिर्नृपसद्म सा ।
नीताऽपि निवृत्तिं प्रापद्विरहार्त्तिप्रपीडिता ॥३३२॥

दुःखसङ्घट्टिविच्छायमास्यं तस्या मृगीदृशः ।
तमोग्रस्तशशाङ्केनाऽनुहारमकरोत्तराम् ॥३३३॥

तत्सखीमुखतः सर्वं, तद्वृत्तं जज्ञिवान्नृपः ।
तामाश्वास्याऽऽशु सचिवं, मां त्वां प्रति विसृष्टवान् ॥३३४॥

जितशत्रुमहीनेतः !, किं बहूक्त्या ? तवाऽऽत्मजम् ।
यदि नाप्स्यति तद्बाला, सा विमोक्ष्यति जीवितम् ॥३३५॥

श्रुत्वेति **साकेत**पतिः, सस्मितं तमभाषत ।
'सचिवेन्दो ! युक्तियुक्तमदः कार्यं किमुच्यते ॥३३६॥

परमाजन्म भोगेभ्यो, विमुखस्तनयो मम ।
प्रपत्स्यते न वा प्राणिग्रहमेतन्न बुध्यते' ॥३३७॥

निशम्य तद्वचः कार्यविघ्नभूतं स धीसखः ।
मूर्ध्नि वज्राहत इव, हृदये दुदुवेतराम् ॥३३८॥

नृपः प्रोवाच 'भो मन्त्रिन् !, विषादं मुञ्च मानसात् ।
स्वीकार्यः सुत आवाभ्यां, विवाहमुपरोध्य वै' ॥३३९॥

अत्रान्तरेऽ**जितेशो**ऽपि, तेजसाऽतिनभोमणिः ।
आनन्दकत्वेनाऽतीन्दुर्दानेनाऽतिसुरद्रुमः ॥३४०॥

जनयन् विस्मयं सामाजिकानां रूपसम्पदा ।
भटैरनुगतो भक्त्या, सदसं तां समासदत् ॥३४१॥ युग्मम् ॥

महामुदा प्रदत्तं च, महार्हं विष्टरं श्रितः ।
पेशलैर्वचनैर्भूमिपालेनैवमभण्यत ॥३४२॥

'अतुच्छगुणरत्नाब्धे !, वत्स ! त्वां वच्मि किञ्चन ।
यदि मे नाऽवजानासि, वचश्चतुरशेखर ! ॥३४३॥

अथाऽब्रूताऽ**जितस्वामी**, 'निःशङ्कं भूपते ! वद ।
सुपुत्रैः खलु तातस्य, वचनं नैव लङ्घ्यते' ॥३४४॥

अथ विश्वम्भराधीशः, पुरस्ता**दजितेशितुः** ।
विज्ञप्तिं ताममात्यस्य, सविशेषां न्यवेदयत् ॥३४५॥

स्वामी भवविरक्तोऽपि, रक्तोऽपि च शिवश्रियाम् ।
विज्ञाताशेषतत्त्वोऽपि, भोगेभ्यो विमुखोऽपि च ॥३४६॥

अत्याग्रहवशाद् भोगफलकर्मोदयादपि ।
तत्तातवचनं मेने, पाणिपीडनगोचरम् ॥३४७॥ युग्मम् ॥

पितरौ स च मन्त्रीन्दुः, पौराः सुरवरा अपि ।
सम्मदं निर्भरं भेजुः, स्वीकृतोपयमे प्रभौ ॥३४८॥

ततो नृपेण बहुधा, सम्मान्याऽमात्यपुङ्गवः ।
विसृष्टः सत्वरं गत्वा, स्वस्वामिनमवर्द्धयत् ॥३४९॥

महानन्दप्रकर्षेण, रयाद्रोमाञ्चकञ्चुकम् ।
श्री**कीर्त्तिधवलो**ऽधत्त, सप्रियोऽपि तदा वपुः ॥३५०॥

कुमार्यपि श्रुताशेषवृत्तान्ता तोषपोषभाक् ।
दध्यौ धन्याऽस्मि यत् स्वामी, मां वाचाऽपि प्रपन्नवान् ॥३५१॥

कुतस्तन्मे पुनर्भाग्यं, येनाऽयं लभ्यते वरः ।
न हि सम्भाव्यते क्वापि, मरौ कल्पतरूद्भवः ॥३५२॥

तस्यैव वा पदद्वन्द्वध्यानोत्थैः सुकृतैर्मम ।
मनोरथोऽयमसमः, सिद्धिं प्राप्स्यति निश्चितम् ॥३५३॥

पीयूषनिर्मितमिव, कदाऽहस्तद्भविष्यति ।
यत्र द्रक्ष्यति मां दृष्ट्या, स्निग्धया जीवितेश्वरः ॥३५४॥

इति ध्यानसुधाध्वस्तसन्तापां तां पिताऽवदत् ।
'वत्से ! पुण्यैः प्रपूर्णस्ते, दुर्घटोऽपि मनोरथः' ॥३५५॥

अत्रान्तरे समायातः, कुमारीसुकृतोदयात् ।
दैवज्ञोऽवनिनाथेन, पप्रच्छे लग्नमुत्तमम् ॥३५६॥

विचार्य सोऽप्यभाषिष्ट, 'नरेश ! दशमेऽहनि ।
अस्त्यनेकगुणोद्भासि, लग्नं दोषकणोज्झितम्' ॥३५७॥

ततस्ततप्रमोदस्तं, विसृज्य नरनायकः ।
कर्तुं विवाहसामग्रीं, सचिवेशं समादिशत् ॥३५८॥

अज्ञापयच्च सेनान्यं, पृतनां प्रगुणीकुरु ।
ढक्कां वादय यात्रायै, स्वजनानपि मेलय ॥३५९॥

कन्यां गृहीत्वा **म[द]नलेखामे**तां स्वयंवराम् ।
साकेतं सत्वरं यामो, नेदीयो लग्नमेति यत् ॥३६०॥

तथाकृतेऽथ सेनान्या, सैन्यकम्पितभूतलः ।
वाद्यनिर्घोषनिचितदिग्भागः प्राचलन्नृपः ॥३६१॥

लग्नस्यासन्नभावेन, मितैरेव प्रयाणकैः ।
श्रीकीर्त्तिधवलः प्राप, **साकेतनगरा**न्तिकम् ॥३६२॥

तद्वृत्तं ज्ञापनायाऽऽशु, सम्प्राप्तान् प्रवरान्नरान् ।
सत्कृत्य सम्मुखोऽचाली**ज्जितशत्रु**नृपोऽप्यथ ॥३६३॥

रिपुमातङ्गहर्यक्षौ, वलक्षौ यशसा भृशम् ।
कलासु दक्षौ पद्माक्षौ, ततस्तौ मिलितौ नृपौ ॥३६४॥

गाढं मिथः समाश्लिष्य, कुशलप्रश्नतत्परौ ।
तावशिश्रियतामेकं, स्वर्णस्यन्दनमद्भुतम् ॥३६५॥

हृद्ये सौधे पुरासन्ने, **जितशत्रु**नृपस्ततः ।
श्रीकीर्त्तिधवलं भूपं, स्थापयामास सादरम् ॥३६६॥

विजया चन्द्रकान्ता च, राज्ञ्यौ सह सखीजनैः ।
कामं विवाहकार्येषु, वैयग्र्यं दधतुस्तदा ॥३६७॥

स्तम्भाग्रस्थापितानेकशालभञ्जीमनोहरः ।
मुक्ताप्रालम्बभृन्नानाचन्द्रोदयविराजितः ॥३६८॥

विशालतोरणस्तम्भस्फूर्जद्वन्दनमालिकः ।
कल्याणकलसोद्भासिद्युतिविद्योतिताम्बरः ॥३६९॥

अनेकद्युतिमद्रत्ननिकराबद्धभूतलः ।
लसद्ध्वजव्रजो रेजे, तत्र वीवाहमण्डपः ॥३७०॥ विशेषकम् ॥

अथ लग्ने समासन्नतरे तूर्णं कुलस्त्रियः ।
गायन्त्यो धवलान्युच्चैर्वर्णकोद्वर्णकस्थितिम् ॥३७१॥

---

१. 'धोळ' इति भाषायाम् ।

विधियुक्तां विनिर्माय, स्नपितालङ्कृतां कनीम् ।
नीत्वा मातृगृहे स्वर्णविष्टरे विन्यवेशयत् ॥३७२॥ युग्मम् ॥

अत्रान्तरे सुधर्मेशः, प्रभोरुद्वाहमङ्गलम् ।
विज्ञायाऽवधिज्ञाना[द्] द्रा[गा]गमत् सपरिच्छदः ॥३७३॥

प्रणम्य स्वामिनं शक्रः, स्नपयित्वा विलिप्य च ।
सदशश्वेतवासोभिर्भूषणैश्च व्यभूषयत् ॥३७४॥

प्रभुः कैलाशसङ्काशमथारूढोऽभ्रमुप्रियम् ।
धृतच्छत्रः शिरस्युच्चैश्चामरैर्वीजितोऽभितः ॥३७५॥

उत्तीर्यमाणलवणः, सुरीभिः पार्श्वयोर्द्वयोः ।
तोष्टूय्यमानः सोल्लासं, सुरासुरनरोत्करैः ॥३७६॥

विकाशिनेत्रपद्माभिस्तरुणीभिः सविभ्रमम् ।
दृश्यमानो दर्श्यमानो, विस्मितैर्नागरैर्मिथः ॥३७७॥

नृविमानस्थया मात्रा, सखीवृन्दपरीतया ।
वीक्षितास्यो मुहुः प्रीत्या, कलो[लू]लुविलासया ॥३७८॥

वारणाऽश्वादियानस्थैः, सामन्तानां शतैर्वृतः ।
जनकस्य पुरोगस्य, जनितामन्दसम्मदः ॥३७९॥

शक्रेण वेत्रिणोत्सारिताग्रेचरनरामरः ।
नादाद्वैते [मा]नवानां, मण्डपद्वारमासदत् ॥३८०॥ षड्भिः कुलकम् ॥

तत्र त्यक्तवतो यानं, शक्रहस्तावलम्बिनः ।
जगत्प्रभोर्ददावर्घं, श्वश्रूराचारकोविदा ॥३८१॥

सा ललाटं विभोरग्रजाग्रत्कौसुम्भवाससा ।
मन्थेन मुसलेनापि, त्रिरस्प्राक्षीत् प्रमोदभाक् ॥३८२॥

तयोत्तार्य पुरो मुक्तं, स्वामी सलवणानलम् ।
सरावसम्पुटं पादूयुक्तवामांह्रिणाऽभनक् ॥३८३॥

क्षिप्त्वा कण्ठेऽथ कौसुम्भं, वस्त्रमाकृष्य च प्रभुः ।
श्व[श्वा] मातृगृहं नीतो, न्यषदत् कनकासने ॥३८४॥

शक्रेण दक्षिणे पाणौ, बद्धकङ्कणयोरभूत् ।
वर-वध्वोरथाऽन्योन्यं, दर्शनं नूतनश्रियोः ॥३८५॥

पिष्ट्वा शमी-पिप्पलयोरेकत्रोद्गतयोस्त्वचौ ।
हस्तालेपं विदधिरे, वधूहस्तेऽथ सुस्त्रियः ॥३८६॥

समयः समयोऽस्तीति, स्फुरत्युच्चैर्ध्वनौ प्रभुः ।
शुभलग्ने वधूपाणिं, जग्राह निजपाणिना ॥३८७॥

ललितैर्धवलैः स्त्रीणां, तूर्याणां निनदैः परैः ।
बन्दिनां तारवाग्भिश्च, व्यानशे गगनं तदा ॥३८८॥

तारामेले ततो वृत्ते, शची-शक्रौ वधू-वरम् ।
बद्धाञ्चलं पृक्तपाणि, निन्यतुर्वेदमन्दिरम् ॥३८९॥

भ्राम्यते परितो वह्निं, प्रभवे प्रियया सह ।
हस्त्यश्व-रथ-पत्त्यादि, **श्रीकीर्त्तिधवलो** ददौ ॥३९०॥

चतुर्षु मङ्गलेष्वेवं, प्रवृत्तेषु महामहात् ।
वर-वध्वोर्व्यधाच्छक्रः, कराञ्चलविमोचनम् ॥३९१॥

स्वामिने **कीर्त्तिधवलः**, पाणिमोक्षणपर्वणि ।
ददावनुत्तरामोदो, महान्तं देशमेककम् ॥३९२॥

---

१. पादुकायुक्तवामपादेन । २. लग्नस्थानम् । 'मायरु' इति भाषायाम् ।

आविर्भूतमहोत्साहा, अनृत्यंस्त्रिदशस्त्रियः ।
किन्नर्य्यो मधुरध्वानं, जगुर्विश्वेशितुर्गुणान् ॥३९३॥

तां कन्यामुपयम्यैवं, तोषयन् भुवनत्रयम् ।
स्वसौधं प्रति विश्वेशः, प्रास्थितैरावणं श्रितः ॥३९४॥

श्रुत्वा मङ्गलतूर्याणां, रवं दिक्षु प्रसृत्वरम् ।
विमुच्याऽशेषकार्याणि, पौर्यो द्रष्टुं दधाविरे ॥३९५॥

धन्या **मदनलेखे**यमेकैव हरिणीदृशाम् ।
यया लब्धोऽ**जितस्वामी**, दिवस्पतिनतः पतिः ॥३९६॥

जन्माऽस्माकमपि श्लाघ्यं, यदयं भुवनोत्तमः ।
दृगानन्दकरो दृष्टः, प्रवृत्तोद्वाहमङ्गलः ॥३९७॥

इत्थमानन्दनिचिताः, पौरीणां प्रणया[द्] गिरः ।
शृण्वन् प्रभुः प्रियायुक्तोऽलञ्चकार स्वमन्दिरम् ॥३९८॥ विशेषकम् ॥

नत्वा प्रभुं समापृच्छ्य, **जितशत्रुं** च वासवः ।
सुरैर्वृतः क्षणादेव, समवाप त्रिविष्टपम् ॥३९९॥

स्वर्ण-मौक्तिक-माणिक्य-सद्वस्त्रादिप्रदानतः ।
वधूं **मदनलेखां** तां, सच्चकार प्रभोः पिता ॥४००॥

श्री**कीर्त्तिधवलो**ऽप्युच्चैः, स्वर्णाश्वेभ-रथांऽशुकैः ।
सत्कृत्य निजदेशाय, व्यसर्जि **[जि]तशत्रुणा** ॥४०१॥

परःशतानां कन्यानामन्यासामपि पार्थिवः ।
उपरोध्य जगन्नाथमुपयाममचीकरत् ॥४०२॥

भूभर्त्ता भूरयः कन्या, देवकन्योपमा मुदा ।
सादरं **सगरेणा**पि, व्यवाह्यन्त महामहात् ॥४०३॥

अजितेशो जिताशेषहृषीकोऽपि दवोपमम् ।
भवं नानाव्यथाज्वालाशताकीर्णं विदन्नपि ॥४०४॥

सिद्धिसङ्गोल्लसद्रागोऽप्युत्थितेर्भोग्यकर्मणा[म्] ।
रेमे **मदनलेखा**दिप्रेयसीभिः प्रमोदतः ॥४०५॥ युग्मम् ॥

कदाचन वरारामे, क्रीडाद्रिषु कदाचन ।
कदाचित् केलिवापीषु, कदाचित् सिन्धुरोधसि ॥४०६॥

सुरीभिरिव सुत्रामा, रामाभिः परितो वृतः ।
सगरः सादरं क्रीडा, नानारूपा विनिर्ममे ॥४०७॥ युग्मम् ॥

अन्येद्यु**र्विजयादेव्या,** विवृण्वत्या कचोच्चयम् ।
दर्शितपलितं वीक्ष्य, **जितशत्रु**रचिन्तयत् ॥४०८॥

अहो ! विपाककटुकविषयव्याकुलाशयः ।
इयच्चिरं स्थितो वेश्मन्यहं कापुरुषोऽभवम् ॥४०९॥

यतोऽस्माकं कुले पूर्वैरदृष्टपलिताङ्कुरैः ।
चारित्रं कर्मकक्षौघलवित्रं जगृहेऽखिलैः ॥४१०॥

जन्म-मृत्यु-जरा-ऽऽतङ्क-दारिद्र्यैर्दारुणं हहा ! ।
पश्यन्नपि भवं दुःखमयं नाऽङ्गी जिहासति ॥४११॥

तदहो मोहमुत्सृज्य, विवेकमवलम्ब्य च ।
अधुना मम निर्गन्तुं, युक्तं संसारचारकात् ॥४१२॥

ध्यात्वेति युवराजाय, **सुमित्राय** न्यवेदयत् ।
सोऽप्याह युक्तमेवैतदत्रार्थेऽनुचरोऽस्म्यहम् ॥४१३॥

ततस्ताभ्यां चिकीर्षुभ्याममुत्रहितमादरात् ।
सम्पूर्णाष्टादशपूर्वलक्षावित्युदितौ सुतौ ॥४१४॥

'हे पुत्रावयमावाभ्यां, भवो भीषणदुःखदः ।
मोक्ष्यते वृद्धकामाभ्यां, मोक्षसौख्ये सनातने ॥४१५॥

भजतं तद्युवां राज्यं, यौवराज्यं च वत्सकौ ! ।
दीक्षार्थमनुजानीतमावामद्याऽविलम्बितम्' ॥४१६॥

अजितेशोऽवदद्दीक्षां, शर्मारामैकसारणिम् ।
उपादित्सूंस्तातपादान्न निषेधामि सर्वथा ॥४१७॥

मोक्षार्थमुद्यतं तातं, यो भक्त्याऽपि निषेधति ।
स नूनं तनयव्याजाद्, द्विषन्नेव प्रकीर्त्तितः ॥४१८॥

तथाऽपि तात ! वच्मीदं, मनो मोदयितुं मम ।
लघुतातो भुवं शास्तु, निरस्तानयपद्धतिः' ॥४१९॥

सुमित्रोऽप्यभ्यधात् 'पूज्यपादान् मुञ्चे न कर्हिचित् ।
गरीयसी गुरूणां हि, सेवा चक्रिपदादपि ॥४२०॥

पूज्यपादा ! इदं राज्यं, ध्यात्वा दुःखैककारणम् ।
त्यजन्ति तत्र मे वाञ्छा, कथङ्कारं विवेकिनः' ॥४२१॥

अजितेशोऽथ तं स्माह, 'राज्यं चेन्न जिघृक्षसि ।
तात ! भावयतिर्भूत्वा, तिष्ठ प्रीत्यै तथापि नः ॥४२२॥

जितशत्रुरपि स्माह, 'बन्धो ! निर्बन्धकारिणम् ।
मा स्माऽवजीगणः सूनुमयं साक्षाद्धि तीर्थकृत् ॥४२३॥

तीर्थेऽस्य स्वेप्सितं कुर्या, गृह एव स्थितोऽधुना ।
प्रतिपद्यस्व भावेन, यतितां भवनाशिनीम्' ॥४२४॥

तद्वचः प्रतिपेदाने, **सुमित्रे** मेदिनीश्वरः ।
अजितस्वामिनं राज्येऽभ्यषिञ्चत् शुभवासरे ॥४२५॥

सदशान्यमृताम्भोधिडिण्डीरविशदान्यथ ।
वसनानि न्यवस्तेशो, रसेश्वरनिदेशतः ॥४२६॥

सर्वाङ्गीणमङ्गरागं, प्रभोर्वाराङ्गना व्यधुः ।
चन्द्रबिम्बात् समानीतैरमृतैरिव चन्दनैः ॥४२७॥

मौक्तिकाभरणैः स्वामी, विशेषेण व्यराजत ।
पूर्वजन्मसमाचीर्णैः, प्रस्फुटैः सुकृतैरिव ॥४२८॥

विभोर्मूर्द्धनि कोटीरं, भूपो माणिक्यभासुरम् ।
स्वयं न्यास्थन्निदाघाऽर्कवदुर्दर्शमरातिभिः ॥४२९॥

चान्दनस्तिलको राज्ञा, भर्त्तुर्भाले स्वयं कृतः ।
राज्यलक्ष्म्या निवेशाय, गंद्दिकानुकृतिं दधौ ॥४३०॥

हैमासनस्थः सर्वाङ्गसङ्गिभासुरभूषणः ।
मेरुशृङ्गस्थकल्पद्रुरिवाऽभाज्जगदीश्वरः ॥४३१॥

धृतच्छत्रश्चलच्चारुचामरः शुशुभे विभुः ।
पूर्वाद्रिरिव शृङ्गस्थेन्दुबिम्बः शुचिनिर्झरः ॥४३२॥

अथा**ऽजितो**ऽपि **सगरं**, यौवराज्ये न्यवेशयत् ।
उचितान्नैव कृतिनो, भ्रश्यन्ति हि कदाचन ॥४३३॥

तदैवा**ऽजितनाथेन**, कृतनिष्क्रमणोत्सवः ।
जितशत्रुः सदेवीकोऽप्यूरीचक्रे गुरोर्व्रतम् ॥४३४॥

पालयित्वा च चारित्रं, शुक्लध्यानं समाश्रितः ।
उत्पाद्य केवलज्ञानं, क्रमाल्लेभे परं पदम् ॥४३५॥

---

१. 'गब्दिकोऽनुकृति' मिति पु.प्रे. ।

अथाऽजितप्रभुर्नम्रैरनेकैः पत्तिमानिभिः ।
शेषासाम्येन शिरसि, विधृताज्ञो नरेश्वरैः ॥४३६॥

सुधाकरकरप्रख्ययशःपूरेण सर्वतः ।
दुर्भूपाऽपयशोम्लानमुखीर्विशदयन् दिशः ॥४३७॥

गीयमानगुणग्रामो, भक्तितः किन्नरीजनैः ।
वासवादिष्टदेवीभिर्दर्शिताद्भुतनाटकः ॥४३८॥

[स्व]प्रभावभरापास्तसमस्तोपप्लवां क्षितिम् ।
सलीलं पालयामास, दलिताशेषदुर्नयः ॥४३९॥ चतुर्भिः कलापकम् ॥

प्रभो राज्ये स्त्रियः सर्वाः, शीलेनाऽलङ्कृता व्यभान् ।
दधुराचारमात्रं तु, स्वर्णरत्नाद्यलङ्कृतीः ॥४४०॥

सर्वो जनः स्वदारेभ्यः, परस्मिन् प्रमदाजने ।
तदाऽम्बा-जामि-तनयाव्यवस्थितिमदीदृशत् ॥४४१॥

[म]नोहारिण्यपि द्रव्ये, परकीये ते तदा जनाः ।
विषोदग्रमहाघोरोरगबुद्धिं व्यतन्वत ॥४४२॥

केलीष्वपि तदा बालाः, कलहं न मिथो व्यधुः ।
पशवोऽपि न शृङ्गाद्यैर्बधन्ते स्म जनान् क्वचित् ॥४४३॥

रोगाः कस्यापि नो चक्रुरङ्गभङ्गं महोल्वणाः ।
व्यन्तराद्या अपि तदा, न व्यथाहेतवोऽभवन् ॥४४४॥

ववर्ष वारिदः काले, वारि नोनं न चाऽधिकम् ।
वसुधा च सकृत्सिक्ता, फलौघमसकृद्ददौ ॥४४५॥

भानुर्भानूच्चयं नाऽतितापधायिनमातनोत् ।
पान्थसार्थखिदाच्छेदाऽधिकं वातोऽपि नो ववौ ॥४४६॥

प्रभुप्रभावतो लोको, न्यायाध्वन्येव सञ्चरन् ।
मोघीचक्रे दण्डनीतिं, समन्तुषु धृंतोदयाम् ॥४४७॥

नरेन्द्राः स्वामिनं हस्ति-तुरगादीन्यनेकशः ।
उपायनान्युपानीय, भेजिरे बहुमानतः ॥४४८॥

प्रभुणा सुप्रसन्नेन, वीक्षितास्ते नरेश्वराः ।
प्राप्तत्रैलोक्यसाम्राज्यमिवाऽऽत्मानममंसत ॥४४९॥

इति पालयतः प्राज्यं, राज्यं त्रिजगदीशितुः ।
त्रिपञ्चाशत्पूर्वलक्षी, पूर्वाङ्गेणाऽधिकाऽगमत् ॥४५०॥

अन्यदाऽथ स्वयंबुद्धो, रहःस्थः परमेश्वरः ।
विज्ञानगर्भवैराग्यनिधिरेवमचिन्तयत् ॥४५१॥

धिग्दुर्धियः कालकूटमयमप्येतकं भवम् ।
तत्तद्विषयलाम्पट्याद्, गणयन्ति सुधामयम् ॥४५२॥

निखिला अपि संयोगा, वियोगान्ता ध्रुवं भवे ।
जनिश्च मरणान्तेति, जानन्नेनः करोति [कः] ॥४५३॥

परिग्रहग्रहग्रस्ताः, पातकाहितबुद्धयः ।
अर्थैषिणो निरीक्षन्ते, नाऽनर्थानाः परत्र हा ॥४५४॥

परिग्रहादुदीयेते, रागद्वेषौ हि देहिनाम् ।
ततश्च पयसः सेकाद्, द्रुरिव स्फायते भवः ॥४५५॥

श्लाघ्याः सम[स्त]विश्वेऽस्मिंस्तेषां च सफलं जनुः ।
निःसङ्गत्वे यतन्ते ये, भववासं जिहासवः ॥४५६॥

---

१. धृतामोघताम् । २. 'न अनर्थान् आः' इति सन्धिविश्लेषः ।

तदद्याऽपि कियन्मेऽस्ति, भोगकर्मेति चिन्तयन् ।
विश्वनाथोऽवधिज्ञानात्तत्क्षीणमवबुद्धवान् ॥४५७॥

अत्रान्तरे **ब्रह्मलोका**द्विज्ञातार्हद्व्रतक्षणाः ।
लोकान्तिकाभिधा देवाः, सत्सम्यक्त्वाः समागमन् ॥४५८॥

सारस्वतादयस्तेऽथ, नाथं नत्वा व्यजिज्ञपन् ।
सर्वजगज्जन्तुहितमीश ! तीर्थं प्रवर्त्तय ॥४५९॥

ततो गतेषु तेष्वर्हन्नुवाचाऽऽहूय चक्रिणम् ।
'वत्स ! राज्यं गृहाणेदं, वयं स्वीकुर्महे व्रतम्' ॥४६०॥

तच्छ्रुत्वा **सगरो** बाढं, विमनाः साश्रुरभ्यधात् ।
'अद्याऽप्रसादः किं देव !, सेवकेऽस्मिन् प्रकाश्यते ॥४६१॥

किमपश्यः क्वचिन्मन्दमेधसो मम दुर्नयम् ।
तद्वात्सल्यं विभो ! येन, क्षणतस्त्यक्तवानसि ॥४६२॥

दुर्नयं न स्मरामि स्वं, ज्ञानपाथोनिधे ! क्वचित् ।
यद्वा विहितमज्ञानात्तं क्षमस्व क्षमानिधे ! ॥४६३॥

त्वद्वियोगमहादुःखहेतुना जगतां पते ! ।
समृद्धेनाऽपि राज्येन, मम नास्ति प्रयोजनम् ॥४६४॥

प्रभो ! प्रोज्झितराज्यश्चेत्, प्रव्रज्यां प्रतिपद्यसे ।
तन्नाथाऽहमलीवाऽऽसेऽधुनैव त्वत्पदाब्जयोः ॥४६५॥

पूज्यपादपदाम्भोजवरिवस्यालसद्रसः ।
तरिष्यामि भवाम्भोधिमहमप्यमलक्रियः' ॥४६६॥

स्वामी प्रत्यूचिवान् 'वत्स !, युक्तमेवोक्तवानसि ।
प्रव्रज्याप्रतिपत्तेर्यन्नान्यत् सारं जगत्त्रये ॥४६७॥

किन्तु भोगफलं कर्म, प्राज्यं तेऽद्यापि विद्यते ।
तद् भुक्त्वा समये दीक्षां, कक्षीकुर्याः सदार्जव !' ॥४६८॥

इत्थं कथञ्चन स्वामी, **सगरं** गुरुयुक्तिभिः ।
प्रतिबोध्याऽवनीभारोद्धारायोमित्यभाणयत् ॥४६९॥

अथ रोदोन्तरे वाद्यनिर्घोषै[स्तन्]मये सति ।
प्रावृतत्तस्य राज्याभिषेकः प्रभुनिदेशतः ॥४७०॥

भूपाला मन्त्रिणः पौराः, प्राज्यप्रीत्युल्लस[द्]हृदः ।
प्रणेमुर्नूतनं भूपं, सुरर्ष[भ]समप्रभम् ॥४७१॥

भगवानथ निःशेषतीर्थङ्करमतं द्रुतम् ।
सांवत्सरिकमारेभे, दानं दातुं कृपाम्बुधिः ॥४७२॥

तदा च ग्राम-नगर-खेट-कर्वटभूमिषु ।
स्थितान्युद्यान-शून्यौकः-सानुमत्कन्दरेष्वपि ॥४७३॥

प्रत्नानि क्षीणस्वामीनि, क्षीणसेतूनि च द्रुतम् ।
निधानानि सुपर्वाण**स्तिर्यग्जृम्भक**नामकाः ॥४७४॥

शक्रादिष्टधनाधीशप्रेरितास्त्रिजगत्पतेः ।
दानं प्र[द]दतः शश्वत्, पूरयामासुरादरात् ॥४७५॥ त्रिभिर्विशेषकम् ॥

शृङ्गाटेषु चतुष्केषु, चत्वरेषु त्रिकेषु च ।
स्थानेष्वन्येष्वपि स्वामी, घोषणामित्यकारयत् ॥४७६॥

एत एत द्रुतं लोका !, अर्थजातं यदृच्छया ।
अहो गृह्णीत गृह्णीत, दत्तेऽसा**वजितप्रभुः** ॥४७७॥

एवं घोषणया प्राप्तानर्थिनो जगतां विभुः ।
कृतार्थान् सत्वरं चक्रे, जङ्गमः कल्पपादपः ॥४७८॥

समाहूताः प्रभोः कीर्त्या, दिगन्तेभ्योऽपि मार्गणाः ।
सम्प्राप्तार्था यथाकामं, प्रत्यावव्रुतिरे मुदा ॥४७९॥

सूर्योदयात् समारभ्य, प्रददौ भोजनावधि ।
प्रभुरेकां स्वर्ण्णकोटीं, साष्टलक्षीं दिने दिने ॥४८०॥

वर्षेण प्रददौ स्वामी, स्वर्णकोटिशतत्रयम् ।
अष्टाशीतिं तथा कोटीर्लक्षाशीतिसमन्विताः ॥४८१॥

अथ वार्षिकदानान्ते, पीठकम्पेन वासवाः ।
दीक्षाक्षणं विभोर्ज्ञात्वा, समाजग्मुः श्रितत्वराः ॥४८२॥

ततोऽ**च्युता**द्यैर्देवेन्द्रैर्नरेन्द्रैः **सगरा**दिभिः ।
तीर्थाहृतैर्जलैर्दीक्षाभिषेको विदधे प्रभोः ॥४८३॥

स्वामी धृताङ्गरागोऽथ, दिव्यवासांसि वा[सि]तः ।
स्वयं व्यभूषि शक्रेण, किरीटाद्यैर्विभूषणैः ॥४८४॥

सगरोऽथ प्रभोर्योग्यां, शिबिकां **सुप्रभा**भिधाम् ।
सुवर्ण-रत्न-माणिक्यैः, स्वशिल्पिभिरचीकरत् ॥४८५॥

शक्रेणापि निजैर्देवै, रत्नस्तम्भालिसुन्दरा ।
कारिता शिबिका तस्यामेवान्तरभवत्तदा ॥४८६॥

तां समारुह्य **सौधर्मा**धीशदत्तकरस्ततः ।
न्यषदत् प्राङ्मुखे सिंहासने दिव्येऽ**जितप्रभुः** ॥४८७॥

इन्दुदीधितिगौराभ्यां, चामराभ्यां जगत्प्रभुम् ।
वीजयामासतुर्भक्त्या, **सौधर्मेशान**वासवौ ॥४८८॥

मूर्त्तं शुक्लध्यानमिव, श्वेतमातपवारणम् ।
विरराज प्रभोर्मूर्ध्नि, मुक्तास्रक्श्रेणिसुन्दरम् ॥४८९॥

नराः सहस्रमुद्दामसारशृङ्गारशालिनः ।
कुलजाः क्ष्मापनिर्देशादूहुः प्राक् शिबिकामिमाम् ॥४९०॥

ततः सुरा-ऽसुराधीशा, अहम्पूर्विकयाऽऽकुलाः ।
उदस्यन्ति स्म तां चञ्चच्चलद्भूषणभासिनः ॥४९१॥

भुवनत्रितयस्यापि, मङ्गलोच्चयदायिनः ।
पुरस्तात् स्वामि[नो]ऽचालीत्, प्रवरं मङ्गलाष्टकम् ॥४९२॥

पुरोऽभवंस्ततः सुस्त्रीवर्गेण शिरसा धृताः ।
भृङ्गारपूर्णकुम्भादिसमूहाः प्रीतिदायिनः ॥४९३॥

वैजयन्त्यः पुरो मन्दमरुत्कम्प्राञ्चला बभुः ।
वीजयन्त्य इव स्वामिभक्त्या [भ]वदवार्दितान् ॥४९४॥

गजा-ऽश्व-रथ-पत्तीनामनीकैर्जगतां पतिः ।
पर्यव्रियत शीतांशुरिव तारैः समन्ततः ॥४९५॥

अभ्रंलिहः पञ्चवर्णैर्वृतोऽनेकैर्लु[लद्]ध्वजैः ।
छत्रातिछत्ररचनाऽऽविर्भूताऽद्भुतचारिमा ॥४९६॥

रत्नकिङ्किणिनिक्वाणसम्प्रीणितजनश्रवाः ।
महेन्द्रध्वजो गीर्वाणैरचाल्यत पुरः प्रभोः ॥४९७॥ युग्मम् ॥

पुरोऽनेके नराश्चेलुर्मङ्गल्यशतदर्शिनः ।
गुणस्तवपरा नर्मचतुरा द्विर्जयारवाः[1] ॥४९८॥

---

१. जयजयारावाः ।

अथोग्रादिकुलाश्चेलुर्भूपा हस्त्यादियानगाः ।
महर्द्धयस्ततो देवा, देव्योऽपि च विमानगाः ॥४९९॥

भेरीः शङ्खान् कांस्यतालान्, मृदङ्गान् झल्लरीरपि ।
वादयामासुरामोदान्मानवास्त्रिदशा अपि ॥५००॥

जगुर्गौरान् गुणान् केचिद्, गुणरत्नाम्बुधेः प्रभोः ।
हर्षमाणाः पुरः केचिन्ननृतुर्लोलपाणयः ॥५०१॥

पञ्चवर्णानि पुष्पाणि, गन्धाम्बु च पुरोऽध्वनि ।
ववृषुः केचन प्रोद्यद्भक्तयस्त्रिदशोत्तमाः ॥५०२॥

प्रभुर्नराणां नारीणामञ्जिलीन् प्राञ्जलात्मनाम् ।
प्रत्यैच्छद्दक्षिणेनोच्चैः, पाणिना भाववृद्धये ॥५०३॥

रागद्वेषौ महामल्लावत्यन्तं दुर्जयौ जय ।
यशो लभस्व विश्वेशाऽनन्यलभ्यं महोज्ज्वलम् ॥५०४॥

संसारिणामशेषाणां, दुःखसन्दोहदायकान् ।
कर्मशतान् विनिर्जित्य, जगत्तुष्टिकरो भव ॥५०५॥

अहानि पक्षान् मासांश्च, ऋतूनप्ययनानि च ।
संवत्सरान् बहूंश्चापि, धर्मो निर्विघ्नमस्तु ते ॥५०६॥

सम्प्राप्य केवलोद्द्योतं, पापध्वान्तदिवाकर ! ।
लोकान् मोहमहानिद्रासुप्तान् जागरय प्रभो ! ॥५०७॥

इत्याशीर्गर्भवचनैर्भूरिभक्तिसमन्विताः ।
शश्वत्तुष्टुविरे नाथं, मनुजाः ससुरासुराः ॥५०८॥ पञ्चभिः कुलकम् ॥

प्रासाद-वृक्ष-प्राकार-कुट्टिमाग्राणि संश्रितैः ।
मुहुर्मुहुरसन्तृप्त्याऽनेकैर्लोकैर्विलोकितः ॥५०९॥

इन्द्राणां नाट्यगन्धर्वानीकनिर्मलभक्तितः ।
बहुधा नाटकैर्गीतैः, ससम्भ्रममुपासितः ॥५१०॥

उत्कैः परिवृतः पौरैः, पृष्ठतः पार्श्वतोऽग्रतः ।
चक्रिणाऽनुगतो हर्षशोकमूढेन साश्रुणा ॥५११॥

सारपूर्णानि वेश्मानि, त्यक्त्वा शून्यानि सत्वरम् ।
पौरीभिरेत्य यत्नेन, विश्वसारमितीक्षितः ॥५१२॥

प्रक्लृप्तानि प्रतिपदं, मङ्गलानि पुरीजनैः ।
प्रतीच्छन्निःस्पृहोऽप्युच्चैस्तेषां तोषविवृद्धये ॥५१३॥

मध्याध्वना **विनीताया**, निर्गत्य गतमोहधीः ।
सहस्राम्रवणं नामोद्यानमीशः समासदत् ॥५१४॥ षड्भिः कुलकम् ॥

तत्र प्रविश्य चोत्तीर्य, शिबिकाया जगद्विभुः ।
मुमोचाऽलङ्कृतिं सर्वां, क्लेशश्रेणिमिवाङ्गिनीम् ॥५१५॥

सौधर्माधिपतिर्देवदूष्यं स्कन्धतटे विभोः ।
न्यवेशयन्महाभक्त्या, स्वीयचित्तमिवोज्ज्वलम् ॥५१६॥

माघस्य शुक्लनवमीदिने ब्राह्मीगते[1] विधौ ।
षष्ठेन तपसा सप्तच्छदनाम्नस्तरोस्तले ॥५१७॥

सायाह्ने विषयद्रूणामङ्कुरानिव कुन्तलान् ।
पञ्चभिर्मुष्टिभिर्विश्वनायकः प्रोदमूलयत् ॥५१८॥ युग्मम् ॥

---

१. रोहिणीगते ।

स्वोत्तरीयाञ्चलेनेन्द्रः, प्रतीष्य[1] चिकुरान् प्रभोः ।
नीत्वा क्षीरार्ण्णवजले, क्षिप्त्वा चाशु समागमत् ॥५१९॥

शक्रेण प्रतिषिद्धेऽथ, परितस्तुमुले विभुः ।
कृत्वा सिद्धनमस्कारं, पापकारस्करानलम् ॥५२०॥

प्रत्याख्याम्यखिलं योगं, सावद्यं जीवितावधि ।
इति प्रकटगीश्चारुचारित्रं प्रतिपन्नवान् ॥५२१॥ युग्मम् ॥

तदैव कृतसङ्केतमिव ज्ञानं तुरीयकम् ।
नरक्षोणीसञ्ज्ञिमनोभासकं प्रभुमासदत् ॥५२२॥

तदा क्षणं सुखं प्रापुरपि नारकदेहिनः ।
उद्द्योतश्च झटित्येवाऽविरभूद् भुवनत्रये ॥५२३॥

अनुतीर्थपति क्ष्मापाः, सहस्रं भक्तिशालिनः ।
उद्भूताद्भुतसंवेगावेगाद्दीक्षां प्रपेदिरे ॥५२४॥

देव-दानव-मर्त्यानामीशा योजितपाणयः ।
अथा**ऽजित**जिनाधीशं, नत्वाऽस्ताविषुरादृताः ॥५२५॥

'जय स्फुरच्चतुर्ज्ञान !, जय दोषाब्दमारुत[2] ! ।
जय विश्वत्रयीनाथ !, जय चारित्रमन्दिर ! ॥५२६॥

तीव्रेण ध्यानखड्गेन, दुर्मत्तं मोहवैरिणम् ।
विश्वसन्तापिनं हन्तुं, त्वमेव क्षमसे**ऽजितः** ॥५२७॥

रागादिवैरिभिः क्रूरैर्दुःखगर्त्ते प्रपातिनम् ।
इदं जगज्जगद्भर्तस्त्वयैव त्रास्यते ध्रुवम् ॥५२८॥

---

१. गृहीत्वा । २. दोषमेघसमीरण ! ।

तुभ्यं जितकषायाय, विषयाहिगरुन्मते ।
शमपीयूषकुण्डाय, देवदेव ! नमो नमः' ॥५२९॥

स्तुत्वेत्यजिततीर्थेशं, प्र[ण]म्य च पुरन्दराः ।
प्राग्वन्नन्दीश्वरे क्लृप्तोत्सवाः स्वं स्वं पदं ययुः ॥५३०॥

सगरोऽपि प्रभुं नत्वा, बाष्पक्लिन्नविलोचनः ।
स्खलद्गतिर्विवेशाऽथ, **विनीतां** सपरिच्छदः ॥५३१॥

नगर्यामथ तत्रैव, द्वितीयेऽह्नि समासदत् ।
पारणाय **ब्रह्मदत्त** भूपतेः सदनं प्रभुः ॥५३२॥

सोऽपि प्रभुं समायातं, वीक्ष्योद्यत्पुलकाङ्कुरः ।
अभ्युत्थाय मुदाऽनंसीच्चरणन्यस्तमस्तकः ॥५३३॥

हर्षाश्रुपूर्णनेत्रोऽसौ, जिनेशं पाणिभाजनम् ।
अचीकरत् कृतिप्रष्ठः, परमान्नेन पारणम् ॥५३४॥

तदा सद्यः सुराः सार्द्धस्वर्णद्वादशकोटिकाम् ।
वसुधारां तस्य गृहे, ववृषुर्विलसन्मुदः ॥५३५॥

पञ्चवर्णप्रसूनानां, वृष्टिं गन्धोदकस्य च ।
चेलोत्क्षेपं दुन्दुभेश्च, निर्घोषं ते वितेनिरे ॥५३६॥

ब्रह्मदत्त ! जय जय, श्लाघ्योऽसि पुण्यवानसि ।
महादानमदास्त्वं यत्तीर्थेशाय महाशय ! ॥५३७॥

अस्य दानस्य दाता स्यात्तत्क्षणं विपुलर्द्धिकः ।
सिध्येच्च कश्चिदत्रैव, भवे कश्चित्तृतीयके ॥५३८॥

एवं प्रमोदमुखरैः, सुरैर्जल्पद्भिरम्बरे ।
जातः कोलाहलः कोऽपि, व्यानशे सकला दिशः ॥५३९॥ विशेषकम् ॥

महीयसोत्सवेनैवं, विभुर्विहितपारणः ।
विजह्रेऽन्यत्र निर्मातुं, निर्जरां क्रूरकर्मणाम् ॥५४०॥

विश्वेशचरणन्यासपूता पारणमेदिनी ।
मोल्लङ्घ्यतां जनैरेवं, ध्यायन् विशदमानसः ॥५४१॥

रत्नैर्वरै**र्ब्रह्मदत्त**स्तत्र पीठं व्यधापयत् ।
अपूजयच्च श्रीखण्ड-पुष्पाद्यैरुपवैणवम् ॥५४२॥ युग्मम् ॥

स्वाम्यथो नगरा-ऽरण्य-नदी-पर्वतभूमिषु ।
विजहार गुणाधारः, सुरासुरनमस्कृतः ॥५४३॥

स्वर्णाद्रिरिव निष्कम्पः, शुद्धहृच्छारदाम्बुवत् ।
सर्वंसहः पृथिवीव, पञ्चानन इवाऽभयः ॥५४४॥

गुप्तेन्द्रियः कूर्म इव, दीप्ततेजा गभस्तिवत् ।
सौम्यलेश्यश्चन्द्र इव, तपसाऽग्निरिव ज्वलन् ॥५४५॥

वायुरिवाऽप्रतिबद्धो, निर्लेपः पद्मपत्रवत् ।
समुद्र इव गम्भीरः, शौण्डीरः सामयोनिवत् ॥५४६॥

निरञ्जनः शङ्ख इव, खड्गिशृङ्गमिवैककः ।
तीर्थीचकार स्वपदन्यासैः स्वामी वसुन्धराम् ॥५४७॥ कलापकम् ॥

प्रभुर्हेमन्ततुहिनैर्ग्रीष्मातपचयेन च ।
वर्षाजलभरेणाऽपि, दुर्मना न मनागभूत् ॥५४८॥

कायोत्सर्गस्थितः स्तम्भभ्रान्त्या विपिनसैरिभैः ।
उद्घृष्टोऽपि स्कन्धकण्डूच्छित्त्यै नाऽकम्पत प्रभुः ॥५४९॥

अष्टमासिकपर्यन्तं, खड्गधारोपमं तपः ।
कर्मारातिविघाताय, विदधे भुवनेश्वरः ॥५५०॥

स्थाने स्थाने विभुर्भव्यैरनामि प्रत्यलाभि च ।
अस्तावि चानुजग्मे च, स्वीयजन्मफलार्थिभिः ॥५५१॥

आर्यदेशेषु विहरन्नेवं सत्त्ववतां वरः ।
छाद्मस्थ्ये द्वादशाब्दानि, जगन्नाथोऽत्यवाहयत् ॥५५२॥

विनीतामथ सम्प्राप्तः, **सहस्राम्रवणे** जिनः ।
सप्तच्छदतरोर्मूले, तस्थौ प्रतिमया स्थिरः ॥५५३॥

अप्रमत्तगुणस्थानादपूर्वकरणं गतः ।
विश्वेशः स्थितिघातादीन्, पञ्चाऽपूर्वान् विनिर्ममे ॥५५४॥

श्रौतादर्थाद् व्रजन् शब्दं, शब्दादर्थं व्रजंस्तदा ।
नानात्वश्रुतवीचारं, शुक्लध्यानं प्रभुर्दधौ ॥५५५॥

अथो गुणस्थानमनिवृत्तिबादरनामकम् ।
ततः सूक्ष्मसंपरायं, क्षीणमोहं च भेजिवान् ॥५५६॥

क्षीणमोहान्त्यसमये, शुक्लध्यानं द्वितीयकम् ।
एकत्वश्रुतमा[प्याऽऽ]शु, [स] निर्वाणमनाः प्रभुः ॥५५७॥

अहन् ज्ञानावृतीः पञ्च, चतस्रो दर्शनावृतीः ।
विघ्नान् पञ्च च सद्योऽपि, योद्धेवाऽरीन् सुदुर्द्धरान् ॥५५८॥ युग्मम् ॥

पौषस्य शुक्लैकादश्यां, शशाङ्के रोहिणीगते ।
कृतषष्ठस्य नाथस्य, पूर्वाह्णेऽजनि केवलम् ॥५५९॥

तन्न कालत्रये लोकत्रयेऽप्यस्ति जगद्विभुः ।
सर्वज्ञः सर्वदर्शी यन्नाऽजानान्न निरैक्षत ॥५६०॥

प्रववुः सुखदा वाताः, प्रसन्नाः ककुभोऽभवन् ।
नारकाङ्गभृतोऽप्यन्वभूवन् सौख्यं तदा क्षणम् ॥५६१॥

अथाऽऽसनेषु कम्प्रेषु, प्रयुक्तावधयोऽबुधन् ।
स्वामिनः केवलोत्पत्तिं, सर्वेऽपि सुरनायकाः ॥५६२॥

उत्थायाऽऽसनतस्त्यक्त्वा, पादुके रत्ननिर्मिते ।
दत्त्वा पदानि सप्ताष्टानीशदिश्यनमन्नमी ॥५६३॥

ततोऽलङ्कृतपीठाः स्वं, स्वाक् सम्मील्य परिच्छदम् ।
महद्ध्यार्**ऽजितनाथस्या**ऽभ्यर्णमीयुः समुत्सुकाः ॥५६४॥

अथो नाथस्य समवसरणार्थं मरुत्सुराः ।
आयोजनमहीमस्तकश्मलप्रकरां व्यधुः ॥५६५॥

गन्धाम्बुवृष्ट्या स्तनितकुमाराः स्वात्मना समम् ।
तां भुवं शान्तरजसं, कुर्वन्ति स्म स्मिताननाः ॥५६६॥

बबन्धुः स्वर्ण-माणिक्य-रत्नैस्तां व्यन्तरामराः ।
जानुदघ्नीं[1] पुष्पवृष्टिं, चक्रुस्तत्र ऋतुश्रियः[2] ॥५६७॥

चत्वारस्तोरणास्तत्राऽभवन् व्यन्तरनिर्मिताः ।
चतुर्विधस्य धर्मस्य, प्रवेशद्वारसन्निभाः ॥५६८॥

---

१. जानुप्रमाणाम् । २. ऋत्वधिष्ठायिका देव्यः ।

शालभञ्जी-ध्वज-च्छत्र-मकरप्रकरान्विताः ।
मङ्गल्याष्टकवर्यास्ते, तोरणा रेजिरेतराम् ॥५६९॥

ससृजुस्तस्य भूपीठस्योद्धर्वं वैमानिकामराः ।
रत्नवप्रं मणिमयैः, कपिशीर्षैर्विराजितम् ॥५७०॥

परितस्तं द्वितीयं तु, वप्रं ज्योतिष्कनाकिनः ।
चक्रुः स्वर्णमयं रत्नकपिशीर्षालिमालिनम् ॥५७१॥

बहिस्ततोऽपि भवनवासिनः शुद्धमानसाः ।
वप्रं रूप्यमयं स्वर्णकपिशीर्षवरं व्यधुः ॥५७२॥

वप्रे वप्रे च चत्वारि, द्वाराणि प्रवितेनिरे ।
नीलाश्मदलनिर्माणतोरणानि सुरोत्तमैः ॥५७३॥

प्रतिद्वारं धूपघटीनिर्यद्धूमावलिच्छलात् ।
पलायामास पापौघो, धर्मेशाद् भीतिमानिव ॥५७४॥

द्वारे द्वारे सुवर्णाब्जशालिनी निर्मलाम्बुभृत् ।
मानसस्येव सोदर्या, वर्या पुष्करिणी व्यभात् ॥५७५॥

मध्ये सौवर्णवप्रस्य, प्रभुविश्रान्तिहेतवे ।
देवच्छन्दं द्युसद्मानः, पूर्वोदीच्यां दिशि व्यधुः ॥५७६॥

रत्नप्राकारमध्येऽथ, व्यन्तरैश्चैत्यपादपः ।
चतुःपञ्चाशदिष्वासशतोच्छ्रायो विनिर्ममे ॥५७७॥

तस्याधो विविधै रत्नैः, पीठं बद्ध्वा च ते सुराः ।
देवच्छन्दगतं सिंहविष्टरं प्राङ्मुखं व्यधुः ॥५७८॥

ज्ञानदर्शनचारित्रस्वामितां ब्रुवती विभोः ।
छत्रत्रयी तदूर्ध्वं तैर्विचक्रे वक्रतोज्झितैः ॥५७९॥

कृत्यं यदन्यदप्यत्र, चामरप्रभृति क्षणात् ।
चक्रुस्तद् व्यन्तराः स्वामिभक्तिव्यक्ततमोद्यमाः ॥५८०॥

एवं समवसरणे, निर्मिते निर्जरैर्जवात् ।
सुरा-ऽसुर-नृभिर्हर्षकोलाहलकलैर्वृतः ॥५८१॥

सुरसञ्चारितस्वर्णाऽरविन्दनवके क्रमौ ।
क्रमेण स्थापयन् पूर्वद्वाराऽविक्षज्जगत्पतिः ॥५८२॥ युग्मम् ॥

प्रदक्षिणितचैत्यद्रुः, प्राङ्मुखः सिंहविष्टरे ।
न्यषीददथ तीर्थाय, नम इत्युक्तगीर्जिनः ॥५८३॥

स्वामिनः प्रतिरूपाणि, परस्मिन् दिक्त्रये क्षणात् ।
त्रीणि सिंहासनस्थानि, विचक्रुर्व्यन्तरामराः ॥५८४॥

सुराः सर्वेऽङ्गुष्ठमात्रमपि रूपं विभोः क्षमाः ।
न विकर्तुं किन्तु तत्र, जयति प्रभुवैभवम् ॥५८५॥

किङ्किणीजालवाचालः, पुरो धर्मध्वजः प्रभोः ।
स्वर्णाम्भोजस्थितं धर्मचक्रं च विलसद्द्युति ॥५८६॥

गभस्तिमण्डलाकारं, पृष्ठे भामण्डलं तथा ।
दिवि दुन्दुभिनादश्च, प्रादुरासन् सपद्यपि ॥५८७॥ युग्मम् ॥

प्राग्द्वारा रत्नवप्रस्य, मध्यमासाद्य तीर्थपम् ।
साधु-वैमानिकी-साध्व्यो नेमुर्दत्तप्रदक्षिणाः ॥५८८॥

साधवो न्यषदन्नग्निदिशि तेषां च पृष्ठतः ।
वैमानिक्यस्तस्थुरूद्ध्वाः, साध्व्यस्तासां तु पृष्ठतः ॥५८९॥

अपाग्द्वारा भवनेश-ज्योतिष्क-व्यन्तरस्त्रियः ।
प्रविश्येशं प्रणम्योद्धर्वं, नैऋत्यां क्रमतः स्थिताः ॥५९०॥

प्रत्यग्द्वारा भवनेश-ज्योतिष्क-व्यन्तरामराः ।
एत्य नत्वा जिनं वायुककुभि न्यषदन् क्रमात् ॥५९१॥

समागत्योत्तरद्वारा, विधिनाऽऽनम्य नायकम् ।
ऐशान्यां न्यषदन् कल्पाऽमर-मानव-तत्स्त्रियः ॥५९२॥

द्वितीयस्य तु वप्रस्य, मध्ये सिंह-गजादयः ।
तिर्यञ्चो जातिविद्वेषमपि मुक्त्वा मुदा स्थिताः ॥५९३॥

तृतीयवप्रगर्भे तु, सम्मर्दा[द]प्यबाधितैः ।
सुरासुरनरेशानां, वाहनैः समवस्थितम् ॥५९४॥

नाऽऽसीन्नियन्त्रणा तत्र, विकथाऽपि च नावृतत् ।
नाऽधान्मात्सर्यमन्योन्यं, साध्वसं च न कश्चन ॥५९५॥

केचन त्रिदशास्तत्र, लास्यमुल्लासतो व्यधुः ।
केचिद्वादित्रनिर्घोषं, व्यतन्वन्नुरुभक्तयः ॥५९६॥

गायन्ति स्म गुणान् भर्तुः, केचिच्चन्द्रकरोज्ज्वलान् ।
केचित् क्ष्वेडामकुर्वंश्चाऽलिखन् केऽप्यष्टमङ्गलीम् ॥५९७॥

द्वाराण्युभयतः केचिन्मङ्गल्यानमुचन् घटान् ।
रत्नपुष्प[फ]लव्रातं, ववृषुः केऽपि हर्षतः ॥५९८॥

अत्रान्तरे भृशोद्भूताऽद्भुता आरामपालकाः ।
अवर्द्धयन् प्रभोर्ज्ञानोत्पत्त्या **सगर**चक्रिणम् ॥५९९॥

चक्रवर्त्ती स्फुरत्प्रीतिप्राग्भारः पारितोषिके ।
अर्द्धत्रयोदशाः स्वर्णकोटीस्तेभ्योऽदित द्रुतम् ॥६००॥

समुच्छ्रितध्वजां बद्धचारुवन्दनमालिकाम् ।
वादित्रनिनदपूर्णां, गीतव्यापृतगायनीम् ॥६०१॥

कुङ्कुमाम्बुसमासिक्तां, मौक्तिकस्वस्तिकाङ्किताम् ।
पुरीं महमयीं स्वीयनरैर्भूपो व्यधापयत् ॥६०२॥ युग्मम् ॥

ततश्च कृतमङ्गल्यो, दिव्यनेपथ्यभासुरः ।
ऐरावतमिवोत्तुङ्गमारूढो गन्धवारणम् ॥६०३॥

वृतो मुकुटबद्धानां, सहस्रैर्वसुधाभुजाम् ।
सङ्कटीकृतभूपीठो, गजा-ऽश्व-रथ-पत्तिभिः ॥६०४॥
आतोद्यनिःस्वनैर्बन्दितारवाग्भिश्च रोदसी ।
पूरयन् **सगरः** प्राप, **सहस्राम्रवणा**न्तिकम् ॥६०५॥ विशेषकम् ॥

दृष्ट्वा समवसरणं, द्विरदस्कन्धतो जवात् ।
उत्तीर्य राजचिह्नानि, छत्रादीन्यमुचन्नृपः ॥६०६॥

सन् त्यक्तपादुकः पद्भ्यां, चरन्ननुगतो नृपैः ।
उदग्द्वारेण समवसरणं प्राविशत्ततः ॥६०७॥

प्रदक्षिणात्रयीं दत्त्वा, प्रभुं नत्वा च भक्तितः ।
सगरश्चक्रभृत्तस्थौ, पृष्ठतः त्रिदशेशितुः ॥६०८॥

विनयावनमन्मौली, शक्र-चक्रधरौ ततः ।
प्रमोदनिचितावेवं, तुष्टुवाते जगत्प्रभुम् ॥६०९॥

'जयाऽप्रतिहतज्ञानविज्ञाताशेषविष्टप ! ।
जय जन्तुकृपारब्धदेशनोपक्रम ! प्रभो ! ॥६१०॥

सुदुर्वारमहामोहसानुमद्भिदुराय ते ।
जिनेश्वराय जगतीप्रवराय नमो नमः ॥६११॥

धन्यास्त एव सुग्राह्यनामधेयाश्च तेऽङ्गिनः ।
हसन्ति मानसे येषां, त्वत्पादा विश्ववन्दिताः ॥६१२॥

रसनां स्तुमहे तां या, महेश ! त्वद्गुणस्तुतौ ।
व्यापृता क्षालयत्येव, सावद्यं वचनार्जितम् ॥६१३॥

श्रवसी श्रेयसी देवदेव ! ते एव ये सदा ।
स्वं कृतार्थयतः स्वीयगोचरीकृत्य ते कथाम् ॥६१४॥

ते एव चक्षुषी श्लाघ्ये, पीत्वा रूपामृतं तव ।
याभ्यामप्रेक्ष्यप्रेक्षाऽहिविषावेगो निरस्यते ॥६१५॥

स्तुवीमहे ललाटं तत्, पादपीठस्पृशा प्रभो ! ।
ध्रियते ननु येन त्वत्पादरेणोर्विशेषकः[१] ॥६१६॥

येषां तव स्मृति-स्तोत्र-श्रुतीक्षणादिषु प्रभो ! ।
न व्यापृतिस्तकैः किं हृज्जिह्वा-श्रोत्रेक्षणान्तिकैः ॥६१७॥

अरक्ष्णानां रक्ष्णे भवभयभृतामच्युतरुचिः,
श्रियां सृष्ट्यै पद्मप्रभवमहिमांऽहस्ततिहरः ।

१. तिलकम् ।

सदैवानन्दश्रीप्रकटनकलाकौशलवतीं,
[द्विती]यस्तीर्थेशो निजचरणसेवां दिशतु मे' ॥६१८॥ [शिखरिणीवृत्तम्]

इति स्तुत्वा विरतयोः, सुरराट्-सार्वभौमयोः ।
भगवान् सर्वजन्तूनां, निर्निमित्तैकबान्धवः ॥३१९॥

सर्वभाषापरिणतामायोजनविहारिणीम् ।
पञ्चत्रिंशद्गुणोदारां, सारां व्यतत भारतीम् ॥६२०॥ युग्मम् ॥

'अहो ! अपारसंसारसागरोऽनन्तदुःखदः ।
त्यक्तुमेवोचितश्चञ्चच्चैतन्यानां महात्मनाम् ॥६२१॥

अनादौ हि भवेऽनादिजीवोऽनादिस्वकर्मतः ।
राशावव्यवहाराख्येऽवसत् कालमनन्तकम् ॥६२२॥

तद्यथा—

लोके गोला असङ्ख्याता, गोलोऽसङ्ख्यनिगोदकः ।
एकैकस्मिन्निगोदे च, सन्त्यनन्ताः शरीरिणः ॥६२३॥

युगपद्विहिताऽऽहार-नीहारास्ते च जन्तवः ।
समानपानास्तिष्ठन्ति, बाढं दुःखभराकुलाः ॥६२४॥

पुद्गलानां परावर्त्ताननन्तान् जन्मनाशभाक् ।
नयत्येवं निगोदेषु, जन्तुः सम्मर्दपीडितः ॥६२५॥

अकामनिर्जरायोगात्, तत्र कर्माणि कानिचित् ।
तुच्छीकृत्य व्यवहारराशिमाप्नोति कृच्छ्रतः ॥६२६॥

अत्यन्तस्थावरोऽप्यङ्गी, **मरुदेवे**व कश्चन ।
लघुकर्मा नृतां लब्ध्वा, भवे तत्रैव सिध्यति ॥६२७॥

प्रायेणाऽन्यस्तु सर्वोऽपि, देही कर्मवशो भवे ।
भ्राम्यत्यविश्रमं नानायोनिषु च कुलेषु च ॥६२८॥

वर्ण-गन्ध-रस-स्पर्शैः, समाना ये परस्परम् ।
उत्पत्तिस्थानभेदाः स्युः, सैका योनिर्विवक्ष्यते ॥६२९॥

भू-दका-ऽग्नि-समीरेषु, लक्षाः सप्त पृथक् पृथक् ।
दश प्रत्येकतरुषु, योनीनां समुदीरिताः ॥६३०॥

चतुर्दश पुनर्लक्षाः, साधारणवनस्पतौ ।
द्वे द्वे तु प्रत्येकं द्वि-त्रि-चतुरिन्द्रियदेहिषु ॥६३१॥

लक्षाश्चतस्रो निरये, चतस्रः सुरसद्मनि ।
स्युश्चतस्रश्च तिर्यक्षु, मनुष्येषु चतुर्दश ॥६३२॥

एवं चतुरशीतिः स्युर्योनिलक्षाणि संसृतौ ।
साम्प्रतं शृणुतैकाग्राः, कुलसङ्ख्यां मनीषिणः ! ॥६३३॥

इहैकयोनितो जाता, अपि नानाकुला मताः ।
कृमि-वृश्चिक-कीटाद्या, यद् दृष्टा एकगोमयात् ॥६३४॥

लक्षाणि कुलकोटीनां, भवेयुर्द्वादशाऽवनौ ।
जले सप्ताऽनले त्रीणि, सप्तैव च समीरणे ॥६३५॥

वनस्पतिषु चाष्टाविंशतिर्द्वयक्षेषु सप्त च ।
अष्टौ त्र्यक्षेषु नव च, चतुरक्षेषु देहिषु ॥६३६॥

चतुष्पदेषु दश च, भुजगेषु नवैव तु ।
दशोरगेषु द्वादश, सार्द्धान्युदकचारिषु ॥६३७॥

खचारिषु द्वादश च, निरये पञ्चविंशतिः ।
षड्विंशतिस्तु देवेषु, नरेषु द्वादशैव च ॥६३८॥

कोट्येका सप्तनवतिर्लक्षाः सार्द्धा इदं जिनैः ।
सर्वाग्रे कुलकोटीनां, सङ्ख्यानं समुदाहृतम् ॥६३९॥

इत्थं बहुविधा योनीः, कुलानि च शरीरभृत् ।
एकैकेऽनेकशोऽभ्राम्यत्, प्रत्येकं संसृताविह ॥६४०॥

इत्थं भ्राम्यन् भवी कश्चित्, क्लृप्तदुष्कर्मसन्ततिः ।
सत्क्षेत्र-सत्कुला-ऽऽरोग्योपेतं नृजनुराप्नुयात् ॥६४१॥

प्राप्तेऽपि तत्र न भवेद् गुरुप्राप्तिर्भवेच्च चेत् ।
श्रुतिस्तथापि दुष्प्रापा, तरीः संसारवारिधेः ॥६४२॥

तस्यां सत्यामपि श्रद्धोल्लसेत् कस्यचिदेव हि ।
तत्प्राप्तावपि वीर्यं तु, दुर्लभं धर्मगोचरम् ॥६४३॥

धर्मो हि सङ्गनिर्मुक्तैर्भोगतृष्णाविवर्जितैः ।
आराद्धुं शक्यते धीरैर्नेतरैः कातरैर्जनैः ॥६४४॥

तृष्णैव देहिनां धर्मविघ्नकृद्दुःखदायिनी ।
शत्रुरूपा न कुत्रापि, जन्मन्येषा व्यलीयत ॥६४५॥

स्वर्गभोगैरपि चिरं, भुक्तैरच्छेदि या न हि ।
छिद्यतेऽङ्गारकृद्वत् सा, मर्त्यभोगैः किमङ्गिनाम् ? ॥६४६॥

तथाहि कश्चिदङ्गारकारकोऽम्बुदूतिं गृहात् ।
गृहीत्वाऽगान्निदाघे तु, क्षीणवारिणि कानने ॥६४७॥

काननाभ्यन्तरानीतस्फारदारुसमुच्चयः ।
ततः स [क]र्तुमङ्गारान्, प्रावर्त्तिष्ट प्रयत्नतः ॥६४८॥

मध्याह्नार्ककरोदग्रवह्नितापसमुत्थया ।
पीपासया पीडितोऽसौ, दृतेः सर्वमधाज्जलम् ॥६४९॥

सुष्वाप क्वाप्यसौ बाढं, बाध्यमान उदन्यया[१] ।
स्वप्ने सद्मगतश्चाऽपान्निप-नन्दादिगा अपः ॥६५०॥

तैर्जलैरविलीनायां, तृष्णायां वज्रवह्निवत् ।
अधासीदन्धु-कासारादीनां पाथांस्यसौ क्षणात् ॥६५१॥

तैरपि क्षामतां नाऽगात्तस्य तर्षः प्रकर्षवान् ।
ततोऽम्बुधि-धुनीनीरमगलद् गलितावधि ॥६५२॥

तथाप्यसावनुच्छिन्नपिपासः पयसे मरुम् ।
गत्वा कूपेऽक्षिपद्रज्जुयन्त्रितं कुशपूलकम् ॥६५३॥

दूराम्भस्त्वेन कूपस्याऽन्तरे च प्रच्युताम्भसम् ।
तं समाकृष्य निश्चोत्य, बिन्दून् सोऽक्षिपदानने ॥६५४॥

या तृष्णा तस्य पाथोधिपाथोभिरपि नाऽत्रुटत् ।
सा तुच्छैः किं तु पूलाम्भश्रुणा(पृष)तैरन्तमाप्नुयात् ? ॥६५५॥

तद्वद्देवभवोद्भूतैरपि सौख्यैर्महाद्भुतैः ।
अतृप्तः किं कृशैर्भोगैरङ्गी तृप्यति मानुषैः ? ॥६५६॥

भो भव्या ! दुःखसन्दोहप्रदां भोगस्पृहां हृदः ।
परित्यज्य महानन्दप्रदं धर्मं भजेत तत् ॥६५७॥

---

१. तृषया ।

स तु धर्मो द्विधा ज्ञेयः, सर्वदेशविरामतः ।
अल्पेन भूयसा चानेहसा दुःखविमोक्षकृत् ॥६५८॥

तत्राद्यधर्मसम्पन्नः, सर्वसङ्गोज्झितो यतिः ।
दान्तपञ्चेन्द्रियो रुद्धकषायः सत्तपःपरः ॥६५९॥

परीषहगणं तीव्रं, सहमानः शुभाशयः ।
निर्ममः स्वशरीरेऽपि, प्रपन्नश्चतुरो यमान् ॥६६०॥

जरा-मृत्यु-वियोगादिन्यक्षदुःखोज्झितं पदम् ।
अष्टत्र्यैकभवैः प्राप्नोत्युपास्तेस्तारतम्यतः ॥६६१॥ त्रिभिर्विशेषकम् ॥

यस्तु नो सर्वविरतिं, स्वीकर्तुं क्षमतेऽङ्गभृत् ।
पारमीप्सुर्भवाम्भोधेः, स देशविरतिं श्रयेत् ॥६६२॥

तत्र सम्यक्त्वमूलानि, व्रतानि द्वादशाऽऽदरात् ।
स्थूलहिंसाविरत्यादिन्याश्रयेत् सुसमाहितः ॥६६३॥

पूजास्तीर्थेशचैत्येषु, विविधा निजशक्तितः ।
तन्वन् प्रभावनोद्युक्तः, सिध्यत्यष्टभवान्तरे' ॥६६४॥ युग्मम् ॥

इत्थं ज[ग]द्गुरोः पीत्वा, देशनाममृतोपमाम् ।
विदलन्मोहगरला, नरा नार्यश्च सत्वरम् ॥६६५॥

सर्वतो भेजिरे केचिद्विरतिं देशतोऽपरे ।
परे सम्यक्त्वमुररीचक्रुर्निर्मलमानसाः ॥६६६॥ युग्मम् ॥

पिता **सगर**भूजानेः, **सुमित्रो**ऽपि तदा मुदा ।
पुरा भावयतिः स्वामिपार्श्वे दीक्षामुपाददे ॥६६७॥

श्रीनाभेयजिनाधीशतीर्थाश्रितव्रता अपि ।
पुनः श्री**अजिता**धीशाद् व्रतानि प्रतिपेदिरे ॥६६८॥

अथाऽ**जित**प्रभुः स्वीयरूपलक्ष्म्या सुरानपि ।
न्यक्कुर्वतां **महीपाल**सचिवाद्यङ्गजन्मनाम् ॥६६९॥

तेजसा जितभानूनां, नवयौवनशालिनाम् ।
उपात्तगणभृन्नाम्नां, सुकृतश्रीकुलौकसाम् ॥६७०॥

सिंहसेनप्रभृतीनां, क्षपितप्राज्यकर्मणाम् ।
सङ्ख्यया पञ्चनवतेस्तदा त्वात्तव्रतश्रियाम् ॥६७१॥

भगवंस्तत्त्वं ब्रूहीति, वदतां विनयोज्ज्वलम् ।
उत्पाद-विगम-ध्रौव्यलक्षणां त्रिपदीं जगौ ॥६७२॥ चतुर्भिः कलापकम् ॥

निःशेषश्रुतबीजं तामनुसृत्य सुमेधसः ।
ते तदा द्वादशाङ्गानि, रचयाञ्चक्रिरे क्षणात् ॥६७३॥

तेभ्योऽनुयोग-गणयोगानुज्ञां दित्सतः प्रभोः ।
पुरस्तस्थौ दिव्यचूर्णस्थालपाणिः पुरन्दरः ॥६७४॥

अथोत्थाय प्रभुः सूत्रेणाऽर्थेनैत[द्]द्वयेन च ।
द्रव्यैर्गुणैः पर्ययैश्च, नयैश्च भवतामिदम् ॥६७५॥

अनुज्ञातं तीर्थमिति, निगदन् गणधारिणा[म्] ।
तेषां शिरस्सु चिक्षेप, दिव्यचूर्णचयं स्वयम् ॥६७६॥ युग्मम् ॥

तदा दुन्दुभिनिर्घोषे, प्रसर्पति ससम्मदाः ।
नरा नार्यः सुराः सुर्यस्तेषु वासान्निचिक्षिपुः ॥६७७॥

तेषां दत्त्वा गणमपि, भूयः स्वामी श्रितासनः ।
उचितां प्रददौ शिक्षामाद्याऽपूरि च पौरुषी ॥६७८॥

तदाऽऽढ्यैकमितैः[1] शालितन्दुलैर्भृशमुज्ज्वलैः ।
कारितः **सगर**क्षोणीभर्त्रोत्क्षिप्तो वरैर्नरैः ॥६७९॥

विशालस्थालगो नाकिन्यस्तसद्गन्धबन्धुरः ।
नारीभिर्मङ्गलान्युच्चैर्गायन्तीभिः समन्वितः ॥६८०॥

दुन्दुभिध्वानसम्पूर्ण[दिङ्]मुखो नागरैर्वृतः ।
पूर्वद्वारेण समवसरणं प्राविशद्बलिः ॥६८१॥ विशेषकम् ॥

दत्तप्रदक्षिणं भर्त्तुः, पुरस्तं खेऽक्षिपन्नराः ।
तस्य भूमीमनाप्तस्याऽगृह्णन्नर्द्धं दिवौकसः ॥६८२॥

भूगतस्याऽग्रहीदर्द्धं, **सगर**श्चक्रवर्त्यथ ।
तच्छेषं तीर्थशेषावदगृह्णन्परे जनाः ॥६८३॥

बलेस्तस्य प्रभावेण, पुराणा व्याधयोऽखिलाः ।
शाम्यन्ति यावत् षण्मासान्, प्रादुःषन्ति नवा न च ॥६८४॥

अथ प्रभुरुदग्द्वारा, निर्गत्य स्वर्गिभिर्वृतः ।
द्वितीयवप्रगे देवच्छन्दे विश्राममासदत् ॥६८५॥

सिंहासनेऽथ **सगरेणो**पनीते स्थितोऽकरोत् ।
सिंहसेनो गणधरो, देशनां नाशयन्नघम् ॥६८६॥

सङ्ख्यातीतान् भवानन्यदपि पृष्टं वदन्नसौ ।
छद्मस्थ इति नाऽज्ञायि, विना केवलिनं जनैः ॥६८७॥

---

१. **चतुःप्रस्थमितैः** ।

विभोः खेदच्छिदा शिष्यगुणदीप्तिस्तथा क्रमः ।
प्रत्ययश्च द्वयोरेते, गणभृद्देशनागुणाः ॥६८८॥

ततो द्वितीयपौरुष्यां, पूर्णायां गणभृद्वरे ।
देशनाविरते नाथं, नत्वोत्तस्थुः सभासदः ॥६८९॥

सुरा **नन्दीश्वरे** नित्यार्हतामष्टाह्निकोत्सवम् ।
विधाय विधिवत् प्रापुस्तुष्टा निजनिजास्पदम् ॥६९०॥

प्रणम्य जगतामीशं, **सगर**श्चक्रवर्त्यपि ।
साकेतं नगरं प्राप, नूत्नसाधुगुणान् स्मरन् ॥६९१॥

महायक्षाभिधो यक्षो, गजयानश्चतुर्मुखः ।
श्यामो भक्तोऽ**जितेशस्या**ऽभूत्तस्याऽष्टौ पुनर्भुजाः ॥६९२॥

वरदो मुद्गरी साक्षस्रक् पाशी चेति दक्षिणाः ।
वामाः सबीजपूरोऽभीप्रदोऽङ्कुशी सशक्तिकः ॥६९३॥

वरदं पाशयुक्तं च, बिभ्राणा दक्षिणौ भुजौ ।
वामौ पुनर्बीजपूरा-ऽङ्कुशयुक्तौ सुवर्णरुक् ॥६९४॥

नाम्नाऽ**जितबला**देवी, लोहासनसमाश्रिता ।
पार्श्वेऽस्थाद**जितेशस्य**, [भक्ता शासनदेवता] ॥६९५॥ [युग्मम्]

[काया निरामया रम्या, स्वेदा-ऽऽमय-मलोज्झिता ।
पद्मसुगन्धवान् श्वासो, दुग्धवद् रुधिरामिषम्] ॥६९६॥

[आहार-नीहारविधिश्चर्मचक्षुरगोचरः ।]
[च]त्वारोऽमी अतिशयाः, सहोत्था ज[ग]दीशितुः ॥६९७॥[युग्मम्]

१. 'सबीजपूरा भामप्रदंकुशि' इति पु. प्रे. । २. सहजन्मानः ।

आयोजनं ययौ वाणी, सर्वभाषानुगा प्रभोः ।
भामण्डलं पृष्ठतश्च, स्पर्द्धते स्म गभस्तिना ॥६९८॥

योजनप्रमितेऽप्यस्थुर्भूभागे प्रभुवैभवात् ।
कोटाकोटिमितास्तिर्यङ्-मनुष्य-त्रिदिवौकसः ॥६९९॥

अर्हद्विहारपूतायां, भुवि वैर-रुजेतयः ।
वृष्ट्यतिवृष्टि-दुर्भिक्ष-मार्यः स्वपरचक्रभीः ॥७००॥
नोत्पद्यन्ते स्म साग्रेऽपि, योजनान्ते शते खलु ।
कर्मक्षयोद्भवा एकादशैतेऽतिशयाः स्मृताः ॥७०१॥ [युग्मम्]

व्योम्नि च्छत्रत्रयी धर्मचक्रं रत्नमयो ध्वजः ।
सिंहासनं चामराश्चांऽह्रिन्यासे कमला नव ॥७०२॥

वप्रत्रयी चतुर्वक्त्रवपुष्ट्वं चैत्यपादपः ।
अधोमुखाः कण्टकाश्च, नतिर्वर्त्मनि शाखिनाम् ॥७०३॥

गन्धाम्बुवर्षणं चारुविचित्रसुमवर्षणम् ।
वातानुकूल्यं सर्वेऽपि, शकुनाश्च प्रदक्षिणाः ॥७०४॥

केश-रोम-नखाऽवृद्धिर्दुन्दुभेर्नाद उच्चकैः ।
जघन्यतोऽपि कोट्येका, समीपस्था दिवौकसाम् ॥७०५॥

सर्वेषामिन्द्रियार्थानामृतूनां चानुकूलता ।
एकोनविंशतिर्देवकृत्ता अतिशया अमी ॥७०६॥

एवं चतुस्त्रिंशदतिशयाढ्यस्त्रिजगद्गुरुः ।
यतिवृन्दवृतो भूमौ, चरन् भव्यानबोधयत् ॥७०७॥

संसारोद्भवतीव्रदुःखदवथोर्निर्वापणं तन्वती-
र्विच्छेत्रीस्तमसां ततेः कुवलयानन्दाय गाः स्फारयन् ।

सद्वृत्तो बहुतारकैः परिवृतोऽर्हच्चन्द्रमा अद्भुतं,
वर्याङ्कः सततोदया[त्] समभिनद्दोषोदयं सर्वतः ॥७०८॥ [शार्दूलवि.]

इति श्रीपद्मप्रभाचार्चरणराजीवचञ्चरीकश्रीदेवानन्दसूरिविरचिते श्रीअजितप्रभुचरिते आनन्दाङ्के महाकाव्ये च्यवन-जन्म-दीक्षा-ज्ञान-कल्याणपर्ववर्णनो नाम तृतीयः सर्गः ॥ श्री ॥ ग्रन्थाग्रं ७१० अ. १॥
॥ आदितः २९६४ अ. २१ ॥

● ● ●

चतुर्थः सर्गः

इतश्चाऽऽविरभूद् व्योमस्थितं मार्त्तण्डबिम्बरुक् ।
सुदर्शनाभिधं चक्रं, **सगरस्या**ऽस्त्रमन्दिरे ॥१॥

नानारत्नमयं नान्दीघोषयुक् स्रक्चयार्चितम् ।
तन्निरीक्ष्याऽऽयुधागाराध्यक्षोऽनंसीत् प्रमोदतः ॥२॥

ततश्च त्वरितं गत्वा, **सगराय** निवेदयन् ।
तदङ्गलग्नाऽलङ्कारानवापत् पारितोषिके ॥३॥

सगरोऽथ द्रुतं त्यक्तसिंहविष्टरपादुकः ।
पदानि कतिचिच्चक्रदिशि दत्त्वा ननाम तत् ॥४॥

ततश्च पावनैर्नीरैर्विहितस्नानमङ्गलः ।
सारनेपथ्यभृत् पद्भ्यामचलच्चक्रमर्चितुम् ॥५॥

ससम्भ्रमैर्महीपालैः, पादचारिभिरन्वितः ।
प्राप्याऽस्त्रागारमालोकमात्रे चक्रं ननाम सः ॥६॥

रोमहस्तेन[1] मार्जित्वा, सौवर्णकलसाहितैः ।
पयोभिः स्नपयामास, पवित्रैस्तन्महीपतिः ॥७॥

चन्दनस्थासकांस्तत्र, स्थापयित्वा[2] च भक्तितः ।
सुमनोदामभिर्वर्यैश्चित्रां पूजां विनिर्ममे ॥८॥

---

१. प्रमार्जनसाधनविशेषेण । २. 'थापा' इति भाषायाम् ।

गन्धैर्वस्त्रैरलङ्कारैरप्यर्चित्वा पुरोऽलिखत् ।
मङ्गलान्यष्ट सोऽष्टानामादित्सुः ककुभां श्रियः ॥९॥

पञ्चवर्णैः प्रसूनैश्चोपहारं पुरतोऽकरोत् ।
घनसारा-ऽगरुसारमधाक्षीद् धूपमप्यथ ॥१०॥

ततः प्रदक्षिणीकृत्य, त्रिः किञ्चिदपसृत्य च ।
प्रणनाम नृपश्चक्रं, पञ्चाङ्गस्पृष्टभूतलः ॥११॥

शस्त्रौकसि कृतावासोऽष्टाऽहानि विविधान् महान् ।
चक्री प्रावीवृतच्चक्रपूजाबद्धमतिः कृती ॥१२॥

ततः सौधं समागत्याऽऽहूतसामन्तमण्डलः ।
शुभेऽह्नि विहितस्नानो, धृताद्भुतोत्तमांशुकः ॥१३॥

स्वच्छचन्दनक्लृप्ताङ्गरागोऽलङ्कारबन्धुरः ।
आरुरोहेभरत्नं दिग्यात्रायै [ख]ड्गरत्नभृत् ॥१४॥ युग्मम् ॥

दण्डरत्नकरो वाजिरत्नारूढो नृपाग्रतः ।
चचाल रत्नं सेनानीर्द्विषां यम इवाऽङ्गवान् ॥१५॥

पुरोधाः सकलारिष्टकाष्ठोच्चयहुताशनः ।
समस्तध्वंजिनीभोज्यदानशक्तो गृहाधिपः ॥१६॥

सद्यः पुरादिनिर्माणप्रभविष्णुश्च वर्द्धकिः ।
विस्तारि[णी] करस्पर्शा[द्], रत्ने च च्छत्र-चर्मणी ॥१७॥

रत्ने च मणि-काकिण्यौ, ध्वान्तविध्वंसनक्षमे ।
ऋद्धिमन्तःपुरं चापि, चक्रिणाऽमा प्रतस्थिरे ॥१८॥ विशेषकम् ॥

---

१. सेना । २. पु. प्रे. बहुलतया 'काकणी' इति पाठः ।

पुरोगवत् पुरोऽचालीच्चक्रं चक्रारिकालरुक् ।
द्युतिमन्दितमार्त्तण्डमुररीकृतदिग्जयम् ॥१९॥

ध्वनिः प्रयाणतूर्याणां, कल्पकालाम्बुदध्वनिम् ।
अनुकुर्वंस्तदा विश्वं, विश्वमक्षोभयत्तराम् ॥२०॥

सप्तधा प्रक्षरद्दानजलाश्चेलुर्मतङ्गजाः ।
सम्प्राप्ताश्चक्रिसेवायै, शैला इव सनिर्झराः ॥२१॥

खुराग्रोद्धूतनीरन्ध्ररेणुपूरेण वाजिनः ।
तत्तेजो [लु]लुपुः सूरस्यापि विष्णुपदस्थितेः ॥२२॥

रथा वरूथिनो लोलध्वजकैतवतः करैः ।
जयलक्ष्मीसमाहूतिं, विदधाना इवाऽचलन् ॥२३॥

करोद्धूतायुधोऽरीणां, भीष्मः पत्तिगणोऽशुभत् ।
किन्नु शौर्यगुणश्चक्रिसेवार्थं बहुरूपभृत् ॥२४॥

चक्रानुगः सुशकुनैर्वर्द्धिष्णुकियदेतिकः ।
सेनान्या दण्डरत्नेन, समीकारितभूतलः ॥२५॥

क्रमान्मिलद्भिरुर्वीशैः, प्रेवृद्धपृतनः पथि ।
योजनप्रमितं नित्यं, प्रयाणमकरोन्नृपः ॥२६॥ युग्मम् ॥

कांश्चिदुन्मूलयामास, दुर्विनीतान् स भूपतीन् ।
नवांश्चारोपयामास, कांश्चिन्नीतिविशारदः ॥२७॥

उत्खाय कांश्चन पुनस्तथैव प्रत्यरोपयत् ।
कांश्चिच्च दण्डयामास, रत्न-वारण-वाजिनः ॥२८॥

---

१. वर्धमानोत्साहः । २. प्रवृद्धसैन्यः ।

पूर्वाशावर्त्तिनो भूपान्, वशीकुर्वन्निति क्रमात् ।
चक्र्यापन्**मागधतीर्थं**, गङ्गासागरसङ्गमे ॥२९॥

तत्र चक्रिनिदेशेन, महासौधालिबन्धुरम् ।
आपणश्रेणिसङ्कीर्णं, गुरुमण्डपमण्डितम् ॥३०॥

नवयोजनविस्तारं, दैर्घ्ये द्वादशयोजनम् ।
स्कन्धावार**मयोध्या**भं, वर्द्धकिः क्षण[तो]ऽतनोत् ॥३१॥ युग्मम् ॥

उद्दिश्य **मागधतीर्थकुमारं** तत्र चक्रभृत् ।
पौषधौकःस्थितो ब्रह्मचारी चक्रेऽष्टमं तपः ॥३२॥

स्नातस्तुर्ये दिने लम्बमानघण्टाचतुष्टयम् ।
अध्यारुह्य रथं ताक्ष्र्यैस्ताक्ष्र्यैरिव विराजितम् ॥३३॥

सेनयाऽनुगतोऽधिज्यधनुःपाणिर्महीशिता ।
रथ्चक्रनाभिदघ्ने, गत्वाऽस्थाज्जलधेर्जले ॥३४॥

अथ हैमनं स्वनामाङ्कं, पृषत्कं[2] द्विषदन्तकः ।
व्यसृजन्**मागधतीर्थकुमारं** प्रति दूतवत् ॥३५॥

स पत्री द्वादशोल्लङ्घ्य, योजनानि निमेषतः ।
सूत्कारमुखरोऽपत**न्मागधेशस्य** संसदि ॥३६॥

कृतान्तदण्डवच्चण्डं, तं काण्डं वीक्ष्य सोऽमरः ।
भालोत्थभ्रकुटीभीष्मः, प्रतिघस्फुरिताधरः[3] ॥३७॥

'अरे ! कः सुखसुप्तस्य, न्यधाद्यष्टिं हरेर्मुखे ? ।
को वा व्यापारयत् पाणिं, कुधीः शेषशिरोमणौ ?' ॥३८॥

---

१. रथचक्रनाभिप्रमाणे । २. बाणम् । ३. क्रोधस्फुरितोष्ठः ।

इति जल्पन् पुरः पश्यन्निव शत्रुं निजासनात् ।
उत्थाय कम्पयन् खड्गं, सर्वमक्षोभयत् सदः ॥३९॥ विशेषकम् ॥

वीराः सर्वेऽपि स्वस्वामिशत्रावाबद्धमत्सराः ।
उत्तस्थुः सत्वराः स्वस्वायुधानि दधतः करे ॥४०॥

अत्रान्तरे सायकं तं, स्वामात्येन करेऽर्पितम् ।
पश्यन् **मागधतीर्थेशो**, वर्णराजीं निरैक्षत ॥४१॥

'चक्रीह **भरत**क्षेत्रे, द्वितीयः **सगरा**भिधः ।
सेव्यतामस्ति चेद्राज्य-जीविताभ्यां प्रयोजनम्' ॥४२॥

वाचयित्वेत्युपशान्तकोपो **मागधनायकः** ।
विधिज्ञः क्रोधदष्टोष्ठमुवाच स्वं परिच्छदम् ॥४३॥

'भवद्भूतभविष्यद्भिर्नन्वहो **मागधेश्वरैः** ।
उपास्यः प्राभृतेनोच्चैश्चक्री विधिरयं ध्रुवः' ॥४४॥

इत्युक्त्वा स्पष्टविनयः, सेमं[1] लञ्जैरनेकशः ।
चक्रिणं **सगरं** स स्रागुपतस्थे विहायसा ॥४५॥

तं शरं कुण्डला-ऽऽवापा-ऽङ्गद-मुक्तालतादिकम् ।
नेपथ्यं देवदूष्याणि, स्वतीर्थाम्भोऽतिपावनम् ॥४६॥

प्राभृतीकृत्य चाऽवादीच्चक्रिणं रचिताञ्जलिः ।
'अद्य प्रभृत्यहं प्राच्यामस्मि ते भृतकायितः[2]' ॥४७॥ [युग्मम्]

ततः सन्मान्य तं चक्री, विसृज्य च निजास्पदम् ।
आगत्य स्नानदेवार्चापूर्वं व्यधित पारणम् ॥४८॥

---

१. 'समः नागैरनेकशः' इति पु.प्रे. । २. भृतक इवाचरितः ।

मागधेशितुरष्टाहान्यथ कृत्वा महामहम् ।
चक्रदर्शितमार्गेण, प्रतस्थे दक्षिणां प्रति ॥४९॥
अपाक्पश्चिममार्गेण, व्रजन्नद्भुतविक्रमः ।
विपक्षविषभृत्ताक्ष्यौ, दक्षिणाब्धेस्तटं ययौ ॥५०॥

तत्र वर्द्धकिसङ्क्लृप्तशिबिरः पौषधौकसि ।
वरदामानमुद्दिश्य, पौषधेऽस्थात् कृताष्टमः ॥५१॥

बाणक्षेपादिविधिना, **वरदामसुरं** ततः ।
मागधेशमिवाऽकार्षीत्, स्ववशं वशिनां वरः ॥५२॥

मुक्ताकलाप-केयूर-किरीट-कटकादिकम् ।
सार्वभौमाय दत्त्वाऽसौ, स्वास्पदं सत्कृतोऽगमत् ॥५३॥

वरदामकुमारस्य, विधायाऽष्टाह्निकोत्सवम् ।
चक्री चक्रानुगोऽचालीदथाऽऽशां पश्चिमां प्रति ॥५४॥

दासितानेकभूपालः, पश्चिमाम्भोनिधेस्तटम् ।
प्राप्तः **प्रभासतीर्थेशम**भि चक्रेऽष्टमं तपः ॥५५॥

वशीभूतः शरक्षेपा[द्], दिक्क्रमाद्दासतां गतः ।
उपायनमुपादायाऽभ्यागमत् सोऽपि चक्रिणम् ॥५६॥

कटकानि कटीसूत्रं, चूडामणिमुरोमणिम् ।
निष्कादि च नरेशाय, दत्त्वा स्वास्पदमाप सः ॥५७॥

ततश्चक्री **प्रभासस्य**, चक्रेऽष्टाहीमहोत्सवम् ।
सत्पुमांसः स्वभक्तानां, वर्द्धयन्ति हि वैभवम् ॥५८॥

अनुचक्रं ततश्चक्री, सिन्धोर्दक्षिणरोधसा ।
प्राङ्मुखः प्रचलन् **सिन्धुदेवी**सद्मान्तिके स्थितः ॥५९॥

अन्तेऽष्टमस्य सा रत्नासनकम्पेन सत्वरम् ।
प्रयुक्तावधिरायातमज्ञासीच्चक्रवर्त्तिनम् ॥६०॥
अथाऽऽगत्याऽन्तरिक्षस्था, सार्वभौम ! चिरं जय ।
अद्य प्रभृति ते दासी, वरिवर्त्मीति [साऽब्रवीत्] ॥६१॥

[सहस्रं रत्नकुम्भानामष्टोत्तरं च भूभुजे ।
रत्नभद्रासनद्वन्द्वं, वस्त्रालङ्करणान्यदात्] ॥६२॥

[प्रतिगृह्याऽथ तत्सर्वं, सादरं च विसृज्य ताम्] ।
चक्रे [ऽष्टाहानि तस्याः स], शक्रस्पर्द्धिमहामहः ॥६३॥

अथैशान्यां चलच्चक्रमनुगच्छन् महीपतिः ।
प्राप **वैताढ्य**शैलस्य, नितम्बं दक्षिणं क्रमात् ॥६४॥

तत्र विन्यस्तशिबिरं, चक्रिणं तं कृताष्टमम् ।
कम्प्रासनो **वैताढ्याद्रिकुमारः** समुपेयिवान् ॥६५॥

रत्नैर्भद्रासनैर्वस्त्रैरर्चित्वाऽसौ नरेश्वरम् ।
चिरं जीव चिरं नन्देत्याशीभिर्मुहुरस्तवीत् ॥६६॥

[तं विसृज्य ततश्चक्री, क्लृप्तपारणकक्रियः ।
तमिस्राह्वगुहाऽऽसन्ने, पताकिनीं न्यवेशयत्] ॥६७॥

[**कृतमाला**भिधो देवोऽष्टमान्तेऽथ समागतः ।
चक्रिणमवदत् स्वामिन् !], भृत्यं मन्येत भक्तितः ॥६८॥

नेपथ्यजातं तिलकचतुर्दशमनुत्तरम् ।
स्त्रीरत्नोचितमन्यच्च, वस्त्रगन्धादिपुष्कलम् ॥६९॥

प्रसत्त्या प्राभृतं सर्वमुररीकृत्य चक्रभृत् ।
सम्भाष्य तं विससर्ज, ततश्चाष्टाह्निकां व्यधात् ॥७०॥ युग्मम् ॥

चक्रवर्त्यथ सेनान्यमर्द्धसेनापुरस्कृतम् ।
समादिक्षद्विजेतुं द्राक्, पश्चिमं **सिन्धुनिष्कुटम्** ॥७१॥

ततः सेनापतिः प्रौढपौरुषो नीतिवित्तमः ।
महासिन्धुरमारूढः, प्रोल्लसच्छत्रचामरः ॥७२॥

चतुरङ्गेण सैन्येनाऽन्वितोऽरिक्ष्माधराऽशनिः ।
पार्श्वं **सिन्धु**प्रवाहस्य, समवापदुपायवित् ॥७३॥ युग्मम् ॥

अथ स्वपाणिना स्पृष्ट्वा, सेनान्या सरिदन्तरे ।
क्षिप्तं प्रवृद्धिमच्चर्मरत्नं बेडा[1]तुलां दधौ ॥७४॥

तेनोत्तीर्य च **सिन्धुं** द्राक्, सेनानीः सह सेनया ।
सिंहलान् बर्बरानन्यानप्युपाद्रवदुद्धुरः ॥७५॥

व्यजेष्ट **यवनद्वीपं**, वैताढ्योपत्यकागताः ।
नानाविधा म्लेच्छजातीः, **कच्छदेशं** च सोऽग्रहीत् ॥७६॥

म्लेच्छा एवं विदलितमाना म्लाननननाम्बुजाः ।
वयं ते पत्तयोऽत्र स्म, इति दीनोल्लसद्गिरः ॥७७॥

हस्त्यश्व-रथ-सद्वस्त्र-रत्न-स्वर्णादि सुन्दरम् ।
वस्तुवृन्दं चमूभर्त्रे, प्राभृतीचक्रुरादरात् ॥७८॥ युग्मम् ॥

स एवं स्ववशीकृत्य, विधिज्ञः **सिन्धुनिष्कुटम्** ।
सिन्धुं प्राग्विधिनोत्तीर्य, समागाच्चक्रिणोऽन्तिके ॥७९॥

म्लेच्छेभ्य आहृतं दण्डं, ढौकयन् दण्डनायकः ।
अस्खलक्रमनसा[2] चक्रभृता भृशमशस्यत ॥८०॥

---

१. नावाकारम् । २. सरलमनसा ।

दूरदूरागतै राजहंसैः सेव्यपदाम्बुजः ।
तत्रैवाऽस्थाच्चिरं चक्री, गुरुभाग्यामृताम्बुधिः ॥८१॥

चक्रिणाऽऽदिश्यताऽन्येद्युस्तमिस्त्रायाः कपाटयोः ।
उद्घाटनाय सेनानीर्विलसद्दण्डकुञ्चिकः ॥८२॥

गुहोपान्त्यं च स प्राप्य, **कृतमाल**सुरं प्रति ।
चक्रे तपोऽष्टमं **श्रेयः, किं नु स्यात्तपसा विना ?** ॥८३॥

अष्टमान्ते कृतस्नानः, सद्वासा धूपमुत्क्षिपन् ।
प्रणनाम गुहां गत्वा, कपाटौ कपटोज्झितः ॥८४॥

तत्राऽष्टाहीमहं कृत्वा, लिखित्वा चाऽष्टमङ्गलीम् ।
अपसृत्येषदररी, दण्डेन त्रिरहन् बलात् ॥८५॥

तत्कपाटयुगं वज्रमयं व्यघटत द्रुतम् ।
न्यवेदयच्च सेनानीः, **सगराय** महीभुजे ॥८६॥

ततः सैन्यान्वितश्चक्री, कुम्भिरत्नस्य दक्षिणे ।
कुम्भे न्यस्य मणीरत्नं, तेजसा द्युमणीयितम् ॥८७॥

पञ्चाशद्योजनायामां, तां गुहां चक्रमार्गगः ।
विवेश क्लेशरहितः, केसरीवाऽस्खलद्गतिः ॥८८॥ युग्मम् ॥

रत्नेन काकिणीनाम्ना, गुहाभित्त्योर्द्वयोरपि ।
एकैकं मण्डलं चक्री, योजने योजनेऽलिखत् ॥८९॥

विष्कम्भा-ऽऽयामतस्तेषां, मानं पञ्चधनुःशती ।
[उद्]द्योतस्तु यो[ज]नानि, द्वादश तिर्यक् तमिस्रभित् ॥९०॥

तान्येकहीनपञ्चाशत्सङ्ख्यान्याचक्रिजीवितम् ।
तिष्ठन्त्युद्घाटितं द्वारं, गुहाया अपि तिष्ठति ॥९१॥

अथोन्मग्ना-निमग्नाख्ये, गुहाप्राग्भित्तिनिर्गते ।
स प्राप निम्नगे प्रत्यग्भित्तिमध्येन सिन्धुगे ॥९२॥

उपलोऽपि तरेत् क्षिप्त, उन्मग्नायामलाबुवत् ।
अलाब्वपि निमग्नायां, शिलेव च निमज्जति ॥९३॥

सद्यो वर्द्धकिसङ्क्लृप्तपंद्ययोत्तीर्य [२]ते क्रमात् ।
चक्री प्राप गुहोदीच्यद्वारमुद्घाटितं स्वयम् ॥९४॥

पुरःसरेण चक्रेण, कम्पयन् वैरिणां कुलम् ।
निर्जगाम गुहामध्यात्, **सगरः** सैन्यसंयुतः ॥९५॥

पृथ्वीपांसुभिरुद्भूतैस्तिमिराद्वैतकल्पकम् ।
तन्वानं तुमुलैः शब्दाद्वैतमद्वैतविक्रमम् ॥९६॥

दृश्यस्वर्णध्वजव्यूहं, व्यक्तशस्त्रोज्ज्वलद्द्युति ।
दुर्निवारं क्षयक्षुब्धाऽम्भोधिवत् **सा[३]गरं** बलम् ॥९७॥

उदीच्यभरताऽर्धान्तःखण्डदेशान् समन्ततः ।
उपद्रवत् समालोक्य, ज्वलितक्रोधपावकाः ॥९८॥

आपाता इति विख्याताः, किराताः प्रस्फुरन्मदाः ।
प्रागदृष्टपराभूतिभावाः श्रीभरशालिनः ॥९९॥

अरे ! कोऽयमकाण्डेऽपि, मुमूर्षुर्दण्डघाततः ।
सुप्तं व्यालं बोधयतीत्यवज्ञागर्भगीर्भराः ॥१००॥

आप्तैरिव मुहुर्वामनिमित्तैर्वारिता अपि ।
अभूवन् सम्मुखा योद्धुमुद्भूतोद्धुरहेतयः ॥१०१॥ षड्भिः कुलकम् ॥

---

१. मार्गेण । २. नद्यौ । ३. सगरसम्बन्धि ।

दण्डादण्डि कुन्ताकुन्ति, गदागदि शराशरि ।
यष्टीयष्ट्यस्यसि युद्धं, चक्रुः सैन्यद्वयीभटाः ॥१०२॥

आपातैर्विक्रमं बाढं, तन्वद्भिश्चक्रिणश्चमूः ।
विक्रान्ताऽपि प्रतिपदमासादितजयाऽपि च ॥१०३॥

वित्रस्तहास्तिका नश्यदश्वीया रुग्णरथ्यिका[1] ।
पलायमानपादाता, क्षणादेव व्यधीयत ॥१०४॥ युग्मम् ॥

चमूनाथोऽथ सैन्यं स्वं, प्राप्तदैन्यं विलोकयन् ।
क्रोधदष्टाऽधरो वाजिरत्नं जयमिवाऽङ्गिनम् ॥१०५॥

आरुह्य पाणिविलसदसिरत्नो रिपून् जवात् ।
हूरवानिव[2] हर्यक्षः[3], प्रणिहन्तुमधावत ॥१०६॥ युग्मम् ॥

बलिना बलनाथेन, ते वराकाः किरातकाः ।
केचिद्धताः केचिदपि, पातिता नाशिताः परे ॥१०७॥

निर्विषोरगवत् कामं, क्षीणदर्पास्ततश्च ते ।
दूरे [प्र]णश्य सम्भूय, मिथ एवं बभाषिरे ॥१०८॥

'अहो ! केनाप्यनेनोच्चैर्लोकोत्तरतरस्विना ।
अभूतपूर्वा मानस्य, म्लानिराविष्कृताऽद्य नः ॥१०९॥

सैन्येऽस्य पत्तिरेकैकोऽप्यमेयस्थामशेवधिः ।
न जेयोऽस्माभिरौर्वाग्निरिवाऽम्भोभिर्घनैरपि ॥११०॥

जीवन्तोऽपि मृता अद्य, हितमाना म्रियामहे ।
यद्वा छेत्तुं रिपूनाराधयामो गोत्रदेवताः ॥१११॥

---

१. भग्नरथ्यिका । २. शृगालान् । ३. सिंहः ।

'स्मर्यन्ते हि सुरा एव, महाकृच्छ्रागमे नृभिः' ।
एवमालोच्य ते सर्वे, भेजुः **सिन्धु**नदीतटम् ॥११२॥

तत्रोत्तानास्त्यक्तचेलाः[1], सिकता[स्रस्त]रस्थिताः ।
स्मृत्वा **मेघमुखान्** गोत्रगीर्वाणांस्तेऽष्टमं व्यधुः ॥११३॥

जातासनकम्पास्ते[ऽथ], देवा **नागकुमारकाः** ।
विज्ञायाऽवधिनाऽभ्येत्य, तानूचुर्वियति स्थिताः ॥११४॥

'हे वत्सा ! दुष्करमिदं, युष्माभिः क्रियते कुतः ?' ।
तेऽप्यभ्यधुरयं कश्चिद्दर्वलेपं[2] लुलोप नः ॥११५॥

शरण्यान् शरणं प्राप्तास्तेन युष्मानिमे वयम् ।
तथा कुरु ध्वंसो यथा, यात्यायाति च नो पुनः' ॥११६॥

ऊचुर्मेघमुखा 'वत्सा !, धद्ध्वे विक्रमिमानिनः ।
शरभा इव जीमूते, गर्जामस्मिन् वृथा रुषम् ॥११७॥

न सुरैर्नाऽसुरैश्चापि, न नरैर्न च खेचरैः ।
चक्रवर्ती ह्ययं जय्यः, सुत्रामसमविक्रमः ॥११८॥

चक्रपाणिमुपद्रोतुं, क्षमो वह्निर्न नोदकम् ।
न शस्त्रं न विषं विद्या-मन्त्र-तन्त्रादयोऽपि न ॥११९॥

तथापि वः स्वभक्तानामुपरोधेन चक्रिणः ।
विघ्नमात्रं विधास्याम', इत्युक्त्वा ते तिरोऽभवन् ॥१२०॥

ततश्चक्रधरानीकस्योद्धतैर्दुर्दिने कृते ।
घोरध्वान्तनिरुद्धाक्षा, आसन् जात्यन्धवज्जनाः ॥१२१॥

---

१. त्यक्तवस्त्राः । २. गर्वम् ।

मुसलाकारधाराभिर्वर्षणे प्रकृतेऽथ तैः ।
पस्पर्श पाणिना [चक्री], चर्मरत्नं सपत्नभित् ॥१२२॥

तच्च सद्योऽपि विस्तीर्णं, यावद् द्वादशयोजनीम् ।
जलोपरिस्थं पोताभमारोहत् सबलो नृपः ॥१२३॥

तथैव विस्तृतं छत्ररत्नमूर्द्धं तु चर्मणः ।
निधाय च्छत्रदण्डान्ते, मणिरत्नं न्यवेशयत् ॥१२४॥

मणिध्वस्ततमःस्तोमं, छत्र-चर्मान्तरे स्थितम् ।
तत्सैन्यं स्वौकसां नैवाऽस्मरत् क्लेशकणोज्झितम् ॥१२५॥

उष्णां प्रगे चर्मरत्ने, धान्य-शाक-फलावलिम् ।
सायं पचेलिमां प्रत्यावासं गृहपतिर्ददौ ॥१२६॥

वर्षत्स्वखण्डधाराभिः, शश्वन्मेघमुखेष्वथ ।
सप्ताहोरात्रविगमे, चक्री यावदभूत् सरुट् ॥१२७॥

तावत् सान्निध्यकृद्यक्षसहस्राः षोडश द्रुतम् ।
चक्रिचित्तविदः क्रुद्धा, वर्मिताः शस्त्रपाणयः ॥१२८॥

उपेत्य **मेघवदनान**भ्यधू 'रे दुराशयाः ! ।
सगरचक्रिणि किमारब्धमायतिदारुणम् ? ॥१२९॥

यात यात द्रुतं दूरे, कुशलाकाङ्क्षिणो यदि ।
नो चेत् कुष्माण्डभेदं वो, भेत्स्यामो लीलया रयात् ॥१३०॥

ततो **मेघमुखा** भीताः, संहृतस्तनयित्नवः ।
प्रणश्याऽगुः किरातांश्चाऽभ्यधुर्जय्यो न चक्रभृत् ॥१३१॥

किरातास्ते ततो रत्न-वस्त्र-काञ्चन-वाजिनः ।
प्राभृतीकृत्य **सगरं**, चक्रिणं शरणं ययुः ॥१३२॥

रचिताञ्जलयो व्यज्ञपयंश्च नरनाथ ! ते ।
किङ्करा: स्मस्तदागो नः, क्षमस्वाऽज्ञानतः कृतम् ॥१३३॥

चक्र्यप्युचितमाभाष्य, सत्कृत्य विससर्ज तान् ।
सेनान्यं चाऽऽदिशज्जेतुं, **सिन्धोः** पश्चिमनिष्कुटम् ॥१३४॥

चर्मणा प्राग्वदुत्तीर्य, **सिन्धुं** म्लेच्छान् विजित्य च ।
उपात्तदण्डः **सगरं**, प्रणनाम चमूपतिः ॥१३५॥

तत्र चक्री चिरं स्थित्वोत्तरपूर्वाऽध्वना ततः ।
चक्रानुगोऽव्रजत् **क्षुद्रहिमवन्तं** गिरिं प्रति ॥१३६॥

नितम्बे दक्षिणे चास्य, शिबिरं न्यस्य शस्यरुक् ।
अष्टमं पौषधयुतं, प्रपूर्य रथमाश्रयत् ॥१३७॥

गर्वाद्रि**र्हिमवन्तं** त्री, रथाग्रेण प्रहत्य च ।
अक्षैप्सीत् **क्षुद्रहिमवत्कुमारं** प्रति सायकम् ॥१३८॥

द्वासप्ततिं योजनानि, सोऽतिलङ्घ्य झटित्यपि ।
पत्री पत्रीव **हिमवत्कुमारस्या**सदत् सदः ॥१३९॥

तस्येषोः पुरतः पातात्, भ्रकुटीघटितालिकः ।
शान्तात्मा **हिमवाना**सीत्तत्र चक्र्यभिधेक्षणात् ॥१४०॥

क्षणाद्विहायसाऽभ्येत्य, वदन् जय जयेत्यसौ ।
पद्मद्रहोदकं सर्वौषधीर्गोशीर्षचन्दनम् ॥१४१॥

देवदूष्याणि रत्नालङ्करणानि शरं च तम् ।
सुरद्रुपुष्पमालाश्च, ढौकयामास चक्रिणे ॥१४२॥ युग्मम् ॥

श्रितं सेवन्तं विसृज्य**र्षभकूटाचलं** नृपः ।
गत्वा जघान त्रीन् वारान्, रथाग्रेणोग्रविक्रमः ॥१४३॥

पूर्वभागे च तस्याद्रेः, काकिण्याऽक्षरमालिकाम् ।
अलिखत् **सगर**श्चक्री, द्वितीय इति सुस्फुटम् ॥१४४॥

ततः शिबिरमागत्य, विहिताष्टमपारणः ।
हिमाचलकुमारस्याऽष्टाह्निकामहमातनोत् ॥१४५॥

मार्गेणोत्तरपूर्वेणाऽनुचक्रमथ चक्रभृत् ।
गत्वा **गङ्गा**सुरीसद्मसविधे शिबिरं व्यधात् ॥१४६॥

कम्प्रपीठाऽष्टमाद् गङ्गाऽवधिज्ञानेन चक्रिणम् ।
प्राप्तं विज्ञाय नभसोपतस्थे धृतसम्भ्रमा ॥१४७॥

सहस्रं रत्नकुम्भानामष्टोत्तरमनुत्तरम् ।
स्वर्णमाणिक्यचित्रं च, रत्नसिंहासनद्वयम् ॥१४८॥

चक्री तद्दत्तमादाय, ससम्मानं विसृज्य ताम् ।
पारयित्वाऽष्टमं तस्या, विदधेऽष्टाह्निकामहम् ॥१४९॥ [युग्मम्]

अनुगच्छन्नथो चक्रं, दिशा दक्षिणया नृपः ।
प्राप **खण्डप्रपाता**ख्यां, गुहामहतपौरुषः ॥१५०॥

तस्याश्च सविधे स्कन्धावारं न्यस्याऽष्टमं तपः ।
नाट्यमालसुरं स्मृत्वा, चकार स्फारवैभवः ॥१५१॥

पीठकम्पेन सोऽभ्येतो, विविधालङ्कृतीः कृती ।
प्राभृतीकृत्य भृत्यत्वमभजच्चक्रवर्त्तिनः ॥१५२॥

विसृज्य तं महीयांसं, कृत्वाऽस्याऽष्टाह्निकामहम् ।
गङ्गाप्राग्निष्कुटं जेतुं, सेनान्यं चक्र्यथाऽऽदिशत् ॥१५३॥

सोऽप्यर्द्धसैन्यप्राग्भारभारेणोर्वीं प्रकम्पयन् ।
सिन्धुनिष्कुटवद् **गाङ्गं**, जित्वा निष्कुटमेतवान् ॥१५४॥

ततो जिगाय वैताढ्यश्रेणिद्वितयवर्त्तिनः ।
विद्याधरान् महाविद्यादुर्द्धरान् **सगरो** नृपः ॥१५५॥

विभाऽलङ्कारहस्त्यश्वाद्युच्चैः प्राभृतदायिनः ।
सत्कृत्य ते नरेन्द्रेण, विसृष्टाः स्वपदं प्रति ॥१५६॥

ततश्चमूपतिश्चक्रिनिदेशाद् द्वारमुत्तरम् ।
प्राग्वत् **खण्डप्रपाता**ख्यगुहाया उदघाटयत् ॥१५७॥

प्राग्युक्त्या लङ्घमानस्तां, मण्डलान्यालिखन्नृपः ।
प्रत्यग्भित्त्युद्भवे **गङ्गा**प्राप्ते प्राग्भित्तिवर्त्मना ॥१५८॥

उत्तीर्य पद्मयो**न्मग्ना-निमग्ना**ख्ये सरिद्वरे ।
स्वयमुद्घटिताऽपाच्यद्वारेण निरगाद्बहिः ॥१५९॥ युग्मम् ॥

स्कन्धावारं निवेश्याऽथ, **गाङ्गे** रोधसि पश्चिमे ।
निधीनुद्दिश्य विदधे, नरनाथोऽष्टमं तपः ॥१६०॥

अथैषु**र्नैसर्प**[१]-**पाण्डू**[२], **पिङ्गलः**[३] **सर्वरत्नकः**[४] ।
महापद्मः[५] **का**[६]**ल**[७]-**महाकालौ** [८]**मा**[९]**ण**[८]**व**-**शङ्खकौ**[९] ॥१६१॥

इत्येते नव निधयः, प्रत्येकं दशभिः शतैः ।
सुरैरधिष्ठिता हैमाः, सद्वैडूर्यकपाटकाः ॥१६२॥

चक्राष्टकस्थिता अष्ट, नव द्वादश योजनाः ।
उत्सेध-पृथुता-दैर्घ्यैश्चक्रचन्द्रार्कचिह्नाः ॥१६३॥ त्रिभिर्विशेषकम् ॥

तदधिष्ठायका देवास्तन्नामानस्तदालयाः ।
पल्योपमायुषो नागकुमारा नृपमभ्यधुः ॥१६४॥

वयं गङ्गामुखस्थानाः, साम्प्रतं तव सन्निधौ ।
भूमिमध्ये चरिष्यामस्त्वद्भाग्येन वशीकृताः ॥१६५॥

उपभुङ्क्ष्व यथाकाङ्क्षं, प्रयच्छ च यदृच्छया ।
वयं पाथोधिपाथोवदक्षयाः क्षितिनायक ! ॥१६६॥

तद्वाचमनुमन्याऽष्टाह्निकां तेषां व्यधान्नृपः ।
असाधयच्च सेनान्या, प्राचीनं **गाङ्गनिष्कुटम्** ॥१६७॥

चत्वारि निष्कुटान्यन्तःखण्डे द्वे चेति **भारतम्** ।
षट्खण्डं द्वात्रिंशताऽब्दसहस्रैः **सगरो**ऽजयत् ॥१६८॥

योजनप्रमितं तन्वन्, प्रयाणं प्रतिवासरम् ।
प्रष्ठचक्रोऽथ ववले, चक्रभृत् स्वपुरीं प्रति ॥१६९॥

द्विपपङ्क्तिमयीं क्वापि, हयोच्चयमयीं क्वचित् ।
रथवीथीमयीं क्वापि, पत्तिस्तोममयीं क्वचित् ॥१७०॥

भुवं कुर्वन्नभः सैन्यपांसुभिः परिपूरयन् ।
विनीतोपान्तमासोऽसौ, शिबिरं न्यस्य तस्थिवान् ॥१७१॥ युग्मम् ॥

तत्र चक्रधरोऽन्येद्युर्वाह्यालीभुवमाश्रितः ।
अवाहयन्महीयांसमेकं शौकलवाजिनम् ॥१७२॥

उत्तरोत्तरधारासु, क्रमादेष तुरङ्गमः ।
आरोप्यताऽखिलकलाशालिना चक्रवर्त्तिना ॥१७३॥

धारां पञ्चमिकामारोपितः प्रोद्भूतपक्षवत् ।
खेनोत्पपात वल्गादिसञ्ज्ञाज्ञानजडो हयः ॥१७४॥

तेनापहृत्य **सगरो**, गरुत्मद्गुरुरंहसा ।
क्षिप्तः क्षणा[द]रण्यान्यामगण्यसुकृतैकभूः ॥१७५॥

---

१. अश्वक्रीडाभूमिम् । २. उद्धताश्वम् ।

वल्गां सामर्षमाकृष्योरुभ्यां चाऽऽक्रम्य पार्श्वतः ।
चक्री दध्रे हयं झम्पां, दत्त्वोदतरदाशु च ॥१७६॥

वाहोऽपि प्राप्तवैधुर्यो, धरापीठे पपात सः ।
चरणाभ्यां चरंश्चक्री, पुरस्तात् प्रययावथ ॥१७७॥

प्राप्यैकं च सरः स्नात्वा, पयः पीत्वा नरेश्वरः ।
तस्य तीरे स्थितोऽद्राक्षीदेकां युवतिमुत्तमाम् ॥१७८॥

यद्वास्यदास्यमाधातुं, कुण्डलद्वितयच्छलात् ।
शशी द्वैरूप्यमाश्रित्य, मन्ये सन्निधिमाश्रयत् ॥१७९॥

दिनान्ते प्रस्फुरद्दैन्यं, निजसद्म महोत्पलम् ।
विहाय पद्मा यन्नेत्रपद्मे भेजे सदास्मिते ॥१८०॥

यस्या दन्तच्छदद्युत्या, विद्रुमो विद्रुतः किल ।
जलराशेर्जलेऽस्ताघे, पपात मरणेच्छया ॥१८१॥

लावण्यामृतवापीं यां, लसत्क्रमकराम्बुजाम् ।
पीनोन्नतकुचव्याजाद्भेजाते चक्रदम्पती ॥१८२॥

सिंहं जयन्त्या उदरश्रिया यस्या ध्रुवं गजः ।
प्रीतः स्वारिजयात् स्वीयां, प्राभृतीचकृवान् गतिम् ॥१८३॥

तां पश्यन्नुपमातीतरूपसम्पदमादरात् ।
सगरश्चक्रभृच्चित्ते, दध्यिवान् धीमतां वरः ॥१८४॥

सुरासुराङ्गनावृन्दविधानाभ्यासतो विधिः ।
इमामद्भुतलावण्यपुण्यां व्यधित निश्चितम् ॥१८५॥

---

१. यस्या मुखस्य दासत्वम् ।

तत् किं भूचरकन्येयं ?, यद्वा खेचरकन्यका ? ।
सुरी किमसुरी किं वा ?, किं वा कासारदेवता ? ॥१८६॥

इत्यनल्पविकल्पौघं, कल्पयन्नमुयाऽप्यसौ ।
ददृशे स्मरसम्भूतविभ्रमस्फारनेत्रया ॥१८७॥

मिथो निर्वर्णनाद्रागस्तयोर्मनसि तत्क्षणात् ।
प्रादुर्बभूव वाःसेकादिवाऽङ्कुरो महीतले ॥१८८॥

सा कामज्वरतः सीदत्सर्वाङ्गी शून्यचेष्टिता ।
संस्थाप्याऽऽनीयताऽऽवासे, सध्रीचीभिः कथञ्चन ॥१८९॥

सगरोऽपि च कामार्त्तः, सरस्तीरे शनैश्चरन् ।
सौविदेन समभ्येत्य, प्रणत्यैवं न्यगद्यत ॥१९०॥

'शृणु प्रभोऽत्र **भरते**, **वैताढ्यो** नाम पर्वतः ।
नगरं तत्र **गगनवल्लभं** प्रस्फुरच्छुभम् ॥१९१॥

सुलोचनाभिधस्तत्राऽभवद्विद्याधरेश्वरः ।
गुणारामवसन्तर्तुः, संस्त्यायः पौरुषश्रियः ॥१९२॥

तस्यात्मजन्मा **सहस्रनयनो** नाम विद्यते ।
सुता चेयं **सुकेशा**ख्या, प्रमदाजातिमण्डनम् ॥१९३॥

एको निमित्तविज्जन्मक्षण एव महामतिः ।
स्त्रीरत्नं चक्रिणो जायां, भवित्रीमभ्यधादिमाम् ॥१९४॥

इतश्च **पूर्णमेघा**ख्यो, **रथनूपुर**पार्थिवः ।
भूयो भूयः स्फुरद्रागोऽयाचिष्टेमां **सुलोचनम्** ॥१९५॥

तस्मिन्नददतीमां च, **पूर्णमेघो** हठादपि ।
जिघृक्षुर्मानिनां सीमा, समरार्थमुपाययौ ॥१९६॥

प्रवृत्ते समरे घोरे, **पूर्णमेघो** महाबलः ।
सुलोचनं संयमनीपुरीपथिकमातनोत् ॥१९७॥

सहस्रनयनो भीतस्ततः स्वभगिनीमिमाम् ।
उपादाय वनेऽत्राऽऽगाद्रयेण सपरिच्छदः ॥१९८॥

सरसीह स्मराकारं, भवन्तं वीक्ष्य सा विभो ! ।
दशां स्मरमयीं कां कां, न लेभे गतनिर्वृतिः ? ॥१९९॥

तदद्य मा विपाद्येषा, सद्यस्त्वद्विरहातुरा ।
त्रायतां त्रायतां नाथ !, त्वया स्वीकारभेषजात्' ॥२००॥

ब्रुवाणे कञ्चुकिन्येवं, **सहस्रनयनो**ऽपि सः ।
आगत्य चक्रिणं नत्वा, स्वावासेऽन[य]दादरात् ॥२०१॥

स्त्रीरत्नस्य **सुकेशाया**, दानाच्च परितोषितम् ।
तमनैषीद्विमानेन, **वैताढ्याद्रौ** निजं पुरम् ॥२०२॥

चक्रभृत् पैतृके राज्ये, **सहस्रनयनं** ततः ।
निवेश्याऽखिलविद्याभृदीशितारं विनिर्ममे ॥२०३॥

अथ स्त्रीरत्नयुक् चक्री, शिबिरं स्वमुपाययौ ।
विनीतां प्रति चक्रे च, पौषधेनाऽष्टमं तपः ॥२०४॥

पूरयित्वाऽष्टमं दुष्टारिष्टप्रकरपिष्टिकृत् ।
निर्ममे वसुधाधीशः, पारणं सपरिच्छदः ॥२०५॥

अथ भूषणसम्भारभूषितो वरवस्त्रभृत् ।
गजेन्द्रस्कन्धमारूढः, परितोऽपि वृतो नृपैः ॥२०६॥

नदन्नानाविधातोद्यनादपूरितदिङ्मुखः ।
पदे पदे कुलस्त्रीभिः, प्रकृताने[क]मङ्गलः ॥२०७॥

उच्चैर्बन्दिजनैः पठ्यमानासमगुणोच्चयः ।
मुदितैर्विस्मितैः पौरैर्वीक्ष्यमाणो मुहुर्मुहुः ॥२०८॥

घुसृणाम्बुच्छटापुष्पप्रकरस्वस्तिकादिभिः ।
प्रत्युग्रप्रसरच्छोभामविक्षन्नगरीं नृपः ॥२०९॥ कलापकम् ॥

क्लृप्तमङ्गलसन्दोहं, प्राप्तः स्वभवनाजिरम् ।
द्विपादुत्तीर्य भूपाल-सेनान्यादीन् विसृज्य च ॥२१०॥

सान्तःपुरपरीवारः, स्त्रीरत्नेन समन्वितः ।
प्रविवेश स्वधाम स्वःप्रतिधाम[1] धराधिपः ॥२११॥ युग्मम् ॥

अथ स्नात्वा देवपूजां, कृत्वा भुक्त्वा नवैर्नवैः ।
गीत-नृत्तादिभि[श्चक्री], चिक्रीडाऽमेयभाग्यभूः ॥२१२॥

अनुज्ञाप्याऽन्यदा देवाः, षट्खण्डभरतेश्वरम् ।
मुदिताश्चक्रवर्त्तित्वाभिषेकार्थं महोद्यमाः ॥२१३॥

पुर्या उत्तरपूर्वस्यां, रत्नपीठविराजितम् ।
विचक्रुर्मण्डपं रत्नमयं निर्मायमानसाः ॥२१४॥ युग्मम् ॥

नदी-नद-नदीनाथ-तीर्थेभ्यो निर्जरा जलम् ।
आनिन्यिरे भूधरेभ्यो, विविधा औषधीस्तथा ॥२१५॥

अथ सान्तःपुरः सस्त्रीरत्नस्तं रत्नमण्डपम् ।
प्रविश्य चक्रभृत् स्नानपीठं सिंहासनान्वितम् ॥२१६॥

१. स्वर्गसमानम् ।

मुदा प्रदक्षिणीकृत्य, पूर्वसोपानवर्त्मना ।
अधिरुरोह पूर्वाद्रिमिव रांजीविनीवरः ॥२१७॥ युग्मम् ॥

पूर्वाशाभिमुखस्तत्र, निविष्टः सिंहविष्टरे ।
गिरिप्रस्थे मृगारातिरिव राजा रराज सः ॥२१८॥

द्वात्रिंशत्सहस्रसङ्ख्या, माणिक्यमुकुटोद्धुराः ।
भूपा आरुरुहुः पीठमुदक्सोपानवर्त्मना ॥२१९॥

चक्रिणो नातिदूरेऽस्थुः, स्वस्वभद्रासनेषु ते ।
रचिताञ्जलयः सामानिका इव बिंडौजसः ॥२२०॥

सेनानाथो गृहपतिः, पुरोधा वर्द्धकिः परे ।
श्रेष्ठ्याद्याश्चाभजन् पीठं, याम्यसोपानवर्त्मना ॥२२१॥

अथ क्षणे शुभे देवा, अभ्यषिञ्चन् महीश्वरम् ।
रत्न-राजत-सौवर्ण्णकुम्भस्थैस्तीर्थवारिभिः ॥२२२॥

ततः क्षोणीश्वरैः सेनापति-श्रेष्ठिमुखैरपि ।
अभिषेको महीनेतुर्निर्ममे निर्मलोदकैः ॥२२३॥

राज्ञो[ऽङ्गं] गन्धकाषाय्योन्मृज्य गोशीर्षचन्दनैः ।
व्यलिम्पन्त महाभक्तिभासुरास्त्रिदशादयः ॥२२४॥

ततस्तैरुपनीतानि, सादरं **सगरो** नृपः ।
पर्यधाद्दिव्यवासांसि, रत्नालङ्करणानि च ॥२२५॥

मङ्गल्या सुमनोमाला, नृपस्योरसि निर्जरैः ।
निहिता रुरुचे पुण्यमाला मूर्त्तिमती किल ॥२२६॥

---

१. सूर्यः । २. इन्द्रस्य । ३. शुशुभे ।

अथ चक्रिनिदेशेन, शुल्क-दण्ड-करोज्झिता ।
भटप्रवेशरहिता, नानानाटकसङ्कुला ॥२२७॥

स्फुरदातोद्यनिर्घोषा, गुरुगन्धर्वगीतिभृत् ।
अभवद् द्वा[द]शाब्दानि, महोत्सवमयी पुरी ॥२२८॥ युग्मम् ॥

पुरोहितो गृहपतिर्वर्द्धकिः पृतनापतिः ।
स्त्री गजस्तुरगश्चेति, पञ्चाक्षं रत्नसप्तकम् ॥२२९॥

चक्रं छत्रं तथा चर्म, कृपाणः काकिणी मणिः ।
दण्डश्चैतानि सप्तैव, रत्नान्येकेन्द्रियाणि तु ॥२३०॥

एतैर्यक्षसहस्रेण, प्रत्येकं समधिष्ठितैः ।
चतुर्दशभिरुर्वीशो, रत्नैः शोभां परां दधौ ॥२३१॥

तस्याङ्गरक्षां यक्षाणां, सहस्रद्वयमातनोत् ।
काङ्क्षितार्थान् प्रददिरे, निधयश्च नवाऽक्षयाः ॥२३२॥

देशानां मेदिनीशानां, नाटकानां च चक्रभृत् ।
दधौ द्वात्रिंशत्सहस्रसङ्ख्यानां प्रभुतां पृथक् ॥२३३॥

तस्याऽभूवन् राजपुत्र्यो, जानपद्यश्च वल्लभाः ।
पृथग् द्वात्रिंशत्सहस्रप्रमाणाः प्रवरश्रियः ॥२३४॥

प्रत्येकं चतुरशीतिं, लक्षा दन्ति-रथा-ऽर्वताम् ।
चक्र्यपाद् ग्राम-पत्तीनां, कोटीः षण्णवतिं पुनः ॥२३५॥

द्वासप्ततेः पुरवरसहस्राणामधीशताम् ।
सहस्रोनद्रोणमुखलक्षाया अपि चातनोत् ॥२३६॥

पत्तनानां सहस्राष्टाचत्वारिंशतमैष्ट सः ।
आकराणां च सहस्रं, विंशतेरद्भुतश्रियाम् ॥२३७॥

कर्बटानां मडम्बानां, सहस्राणि तु चक्रभृत् ।
चतुर्विंशतिसङ्ख्यानि, प्रत्येकं शश्वदन्वशात् ॥२३८॥

सम्बाधानां खेटानां च, सहस्राणि यथाक्रमम् ।
चतुर्दश षोडश चाऽपालयद्बलभित्तुलः ॥२३९॥

कुराज्यानां तथैकोनां, पञ्चाशतमपादसौ ।
अन्तरोदकषट्पञ्चाशतं चा[ऽमेय]पौरुषः ॥२४०॥

चक्रिणः सूपकाराणां, सत्रिषष्टिः शतत्रयी ।
आसन्नष्टादशमिताः, श्रेणि-प्रश्रेणयः पुनः ॥२४१॥

षोडशसहस्रसङ्ख्यान्, द्वीपानम्भोधिमध्यगान् ।
अपाच्चक्रीतरदपि, **भरत**क्षेत्रमध्यगम् ॥२४२॥

षट्खण्डां भरतक्षोणीं, रक्षन्नक्षतभोगभाक् ।
अलक्ष्यचरणोऽविक्षत्, केषां हृन्मन्दिरं न सः ? ॥२४३॥

अजितप्रभुमन्येद्यु**र्विनीतो**पान्तमागतम् ।
वन्दितुं **सगरो**ऽयासीद्दासीभूतैर्नृपैर्वृतः ॥२४४॥

कृपावान् भगवान् शक्र-चक्र्यादिषु यथोचितम् ।
निषण्णेषु समादिक्षद्धर्मं दुष्कर्मनाशनम् ॥२४५॥

दृष्टान्तैर्दशभिर्मर्त्त्यजन्म दुर्लभमाप्य भोः ! ।
यतध्वमर्जने पुण्यसम्पदो दलितापदः ॥२४६॥

जीवाः प्रमादमैरेयासक्त्या गलितचेतनाः ।
निर्गम्य नृजनूरत्नं, शोचन्त्यन्तक्षणे भृशम् ॥२४७॥

यथा वारीगतो हस्ती, वागुरापतितो मृगः ।
बडिशस्थोऽथवा मत्स्यः, शोचेद्धर्मोज्झितस्तथा ॥२४८॥

प्रेमश्रीजीवितव्यानां, गन्धर्वनगरोपमाम् ।
विदन् कः कोविदो धर्मे, प्रमादं कुरुते किल ॥२४९॥

रूपमारोग्यमैश्वर्यं, विभवं चाप्यनुत्तरम् ।
यदि काङ्क्षत तद्धर्मं, विधत्त **धनमित्र**वत् ॥२५०॥

तथाहि–
अत्रैव **भरत**क्षेत्रे, मन्दिरं प्रवरश्रियः ।
विनीतपौरं **विनयपुरा**ख्यं विद्यते पुरम् ॥२५१॥

तत्राऽभव**द्वसुः** श्रेष्ठी, वसुनिर्जितरोहणः ।
दृढैर्गुणैश्चलां लक्ष्मीं, यो बद्ध्वा व्यधित स्थिराम् ॥२५२॥

तस्य **भद्रा**भिधानायां, जायायामजनि क्रमात् ।
मनोरथशतैः पुत्रो, **धनमित्रो**ऽभिधानतः ॥२५३॥

प्राच्यपापोदयात्तस्य, [शि]शोरपि परासुताम् ।
पितरौ प्रापतुर्लक्ष्मीरपि क्षीणा समन्ततः ॥२५४॥

मुक्तोऽसौ परिवारेण, बन्धुभिर्हीलितोऽखिलैः ।
दुःखेन वर्द्धमानोऽभूदास्पदं यौवनश्रियः ॥२५५॥

विनयात् प्रज्ञया चापि, कलाचार्यः प्रसन्नहृत् ।
विविधासु कलासूच्चैः, कौशलं तमलम्भयत् ॥२५६॥

अर्थाभावात् पुनः कन्यां, न ददौ तस्य कश्चन ।
दिशैकया ततो दुःखी, लज्जया निर्ययौ पुरात् ॥२५७॥

अध्वानं लङ्घमानोऽथ, प्राप्त एकां महाटवीम् ।
परिश्रान्तो विशश्राम, च्छायायां क्वापि शाखिनः ॥२५८॥

द्रव्यार्जनाय विविधानुपायान् परिचिन्तयन् ।
पलाशद्रुमशाखायां, प्ररोहं [स] समैक्षत ॥२५९॥

ततः प्रमुदितस्वान्तः, प्रणुन्नोऽसौ धनार्यया[1] ।
सस्मार खन्यवादस्य, श्रुतपूर्वस्य तद्यथा ॥२६०॥

'अक्षीरद्रौ प्ररोहश्चेद्, दृश्यते तदधस्तदा ।
निधानं निगदेत् किञ्चिद्, ध्रुवं बिल्व-पलाशयोः ॥२६१॥

प्ररोहस्तु यदि स्थूलो, निधाने भूरि तद्धनम् ।
तनुको यदि तत् स्तोकमिति' प्राहुर्मनीषिणः ॥२६२॥

'रजनौ स प्ररोहश्चेज्ज्वलेत्तद् द्रविणं बहु ।
ऊष्ममात्रान्वितश्चेत्तु, तदा विद्याद् धनं तनु ॥२६३॥

प्ररोहवेधतो रक्ते, निर्गते रत्नसञ्चयः ।
क्षीरे रूप्यं रसे पीते, पुनः स्वर्णं भवेन्निधौ ॥२६४॥

उच्चो यावति देशे स्यात्, प्ररोह उपरि ध्रुवम् ।
अधस्तावति देशे तन्निधानं गदितं बुधैः ॥२६५॥

ऊर्ध्वं यदि प्ररोहोऽसौ, तनुकोऽधः पृथुर्भवे[त्] ।
तदा निधानसम्प्राप्तिर्व्यत्ययो व्यत्यये पुनः' ॥२६६॥

---

१. धनेच्छया ।

ध्यात्वेति सम्यगालोक्य, स्वर्ण्णसत्तां विबुध्य च ।
'ॐ नमो धरणेन्द्रायेत्यादि' मन्त्रं जपन्नसौ ॥२६७॥

तं प्रदेशं खनन् क्षिप्रं, दुष्कर्मोदययोगतः ।
अपश्यत् केवलाङ्गारपूर्णं ताम्रघटद्वयम् ॥२६८॥ युग्मम् ॥

खिन्नस्ततोऽसकौ दध्यावहो ! मे दुष्कृतोदयः ।
स्वर्णे पीतरसाज्ज्ञातेऽप्यङ्गारान् यन्निभालये ॥२६९॥

तथाप्युद्यममुज्झिष्याम्यहं नैव कदाचन ।
अनिर्विण्णः श्रियो मूलमित्याहुर्यन्महाधियः ॥२७०॥

ध्यात्वेति खन्यवादस्य, वचांसि हृदये स्मरन् ।
लुब्धश्चखान बहुधा, भूमिभागान् पुरः पुरः ॥२७१॥

वराटिकामपि पुनरलब्ध्वा क्वापि निर्भरम् ।
खिन्नः सङ्गतिमातेने, सादरं धातुवादिभिः ॥२७२॥

तत्राप्यभाग्ययोगेनाऽनुभूतक्लेशसंहतिः ।
अकृतार्थोऽम्बुधिं तीर्त्वाऽविशद् द्वीपान्तराणि सः ॥२७३॥

तत्राऽऽर्जयदयं किञ्चिद्, द्रविणं कृच्छ्रकोटिभिः ।
ममज्ज तु तदम्भोधौ, चौरैर्वाऽह्रियत क्वचित् ॥२७४॥

ततः स्थलाध्ववाणिज्ये, धृतबुद्धिर्महोद्यमः ।
सरित्कान्तार-शैलादिविषमे [सो]ऽचलत् पथि ॥२७५॥

दुःखलक्षार्जितं तत्राऽप्यनशत्तस्य तद्धनम् ।
छलान्वेषिनरेन्द्रेभ्यः, स्तेनेभ्यः पावकादपि ॥२७६॥

ततो वाणिज्यमुज्झित्वा, बाढं निर्विण्णमानसः ।
प्रारब्ध भूमिपादानां, सेवां स्फुरदुपक्रमः ॥२७७॥

तेषां चित्तानुवृत्त्या स, चेष्टते स्म तथापि ते ।
तत्कृतं मेनिरे सर्वं, विपरीतं स्वचेतसि ॥२७८॥

ततो लेभे धनं किञ्चिन्नाऽयं भाग्यविवर्जितः ।
लेभे वा तुच्छं [यत्] केनाप्यसद्द्वारेण तद्ययौ ॥२७९॥

एवं स विविधैः क्लेशैः, खिन्नो धनलवोज्झितः ।
आत्मानं जीव[य]न् भिक्षावृत्त्या बभ्राम भूतले ॥२८०॥

हस्तिनापुरमन्येद्युर्गतो भाविशुभोदयः ।
सहस्राम्रवणोद्याने, स्थितं केवलिनं मुनिम् ॥२८१॥

गुणसागरनामानं, साधुवृन्दसमन्वितम् ।
नृपादीनां पुरो धर्मं, कथयन्तमलोकत ॥२८२॥ युग्मम् ॥

अथ नत्वा निषण्णोऽसौ, श्रुत्वा तस्य मुनेर्वचः ।
भावि[ता]त्मा गलद्बाष्पोऽवसरं प्राप्य पृष्टवान् ॥२८३॥

'आरभ्य शैशवात् स्वामिन् !, पतितो दुःखवारिधौ ।
सुखलेशमपि प्रापं, न कदाप्यत्र जन्मनि ॥२८४॥

अभूद्वियोगो बन्धूनां, धनस्य च परिक्षयः ।
वन्ध्यता च समग्राणामुपायानां प्रभो ! मम ॥२८५॥

कृपालो ! वेत्सि तत्सर्वं, केवलज्ञानचक्षुषा ।
भणामि पुनरुक्तं किं, तत्र हेतुं तु बोधय' ॥२८६॥

ततः सूरिवरः स्पष्टमाचष्ट शृणु सन्मते ! ।
निवेदयामि ते पूर्वदुष्कृतं दुःखदायकम् ॥२८७॥

'**भरते**ऽत्रैव **विजयपुर**नाम्नि पुरेऽभवत् ।
गङ्गदत्तो गृहपति**र्मगधा**प्राणवल्लभः ॥२८८॥

स स्वयं धर्मनामाऽपि, नाऽबुध्यत कदाचन ।
अन्येषामप्यकार्षी[च्च], विघ्नं धर्मविधायिनाम् ॥२८९॥

प्रकृत्या मत्सरापूर्णहृदयश्चाशकन्न हि ।
द्रष्टुं वराटिकामात्रमपि लाभं परस्य सः ॥२९०॥

व्यवहारेण सम्प्राप्तबहुलाभं परं पुनः ।
पश्यन् दाहज्वरं घोरमसौ सततमासदत् ॥२९१॥

चकार च प्रभूतानां, जनानां बहुधा कुधीः ।
लाभविघ्नं निर्निमित्तं, व्यथितोऽयमसूयया ॥२९२॥

चित्तस्फुरद्दुर्विकल्पकोटीभिः प्रविडम्बितः ।
सोऽभवत् सद्मनः स्वामी, यँशःशेषेऽथ वप्तरि ॥२९३॥

अन्येद्युः करुणासान्द्रः, श्रावकः **सुन्दरा**भिधः ।
साधूनामन्तिकेऽनैषीत्तं गाढादुपरोधतः ॥२९४॥

धर्मश्रवणतः सद्यः, सम्भूताच्छुभभावतः ।
सुन्दरस्योपरोधाच्च, **गङ्गदत्तो**ऽथ कान्यपि ॥२९५॥

व्रतानि प्राणातिपातविरत्यादीनि भेजिवान् ।
ऊरीचक्रेऽभिग्रहं च, नित्यचैत्यनमस्कृतौ ॥२९६॥ युग्मम् ॥

---

१. मृते ।

ततः साधून् प्रणत्याऽऽत्मसद्म प्राप्तः प्रमद्वरः ।
अतिचारैर्व्रतान्येष, कानिचिन्मलिनान्यधात् ॥२९७॥

मूलादेव भनक्ति स्म, कानिचित्तु विमूढधीः ।
सम्यग् ररक्ष तं चैत्यवन्दनाभिग्रहं पुनः ॥२९८॥

चिरमित्रमिव स्वान्तात्, प्रद्वेषमत्यजन्नयम् ।
[ला]भविघ्नकरोऽन्येषां, निजायुः पर्यपूरयत् ॥२९९॥

जातोऽसि **धनमित्रा**ख्यः, स त्वं भद्र ! पुराकृतैः ।
व्रतभङ्गादिभिः पापैरुज्झितो धन-बन्धुभिः ॥३००॥

अपालयः पुनश्चैत्यवन्दनाभिग्रहं तदा ।
यत्नेन साम्प्रतं साधुसंसर्गं समवापिथ' ॥३०१॥

श्रुत्वेति दुष्कृताद्भीतो, **धनमित्रो**ऽनुतापवान् ।
निन्दन्नात्मानमित्याख्यन्मुनिं प्रति कृताञ्जलिः ॥३०२॥

'स्वामिन् ! दुरात्मना पूर्वभवे हन्त हतात्मना ।
मया नात्महितं चक्रे, तदत्राऽभूवमीदृशः ॥३०३॥

प्रसीद वद तं कञ्चिदुपायं पापजित्वरम् ।
दुःखानामीदृशां येनास्पदं स्यां न कदाचन' ॥३०४॥

हितैकनिरतः सूरिर्दीनं तमव[द]त्ततः ।
'भद्र ! धर्मं विना कश्चिन्नोपायो दुःखभेदकः ॥३०५॥

दुःखभेदाय कल्याणोद्भेदाय च महामते ! ।
द्रुतं श्रयस्व सम्यक्त्वं, व्रतानि द्वादशाऽपि च ॥३०६॥

रागादिविजयी देवः, सर्वसङ्गोज्झितो गुरुः ।
जिनोक्तं तत्त्वमित्येतत्, सम्यक्त्वं श्रेयसां खनिः ॥३०७॥

स्थूलाङ्गिघात-मिथ्यावाक्-चौर्येभ्यः परदारतः ।
महापरिग्रहाच्चापि, विदध्याद्विरतिं गृही ॥३०८॥

गमने दिक्षु सीमानं, मानं भोगोपभोगयोः ।
त्यागं चानर्थदण्डस्य, कुर्वीताऽवद्यभीरुकः ॥३०९॥

सामायिके धरेद्यत्नं, तथा देशावकाशिके ।
पौषधे संविभागे चातिथीनां सुकृतैकधीः ॥३१०॥

एवं पञ्चाणुव्रतानि, त्रिसङ्ख्यांश्च गुणव्रतान् ।
शिक्षाव्रतानि चत्वारि, श्रयन् दुःखाद्यमं नयेत्' ॥३११॥

[ध]नमित्रो निशम्येति, सम्यक्त्वं व्रतसंयुतम् ।
स्वीचकाराऽनगाराणामीश्वरा[द्] द्रव्यवासनः ॥३१२॥

अभ्यग्रहीच्च नो धर्मादितरज्जीवितावधि ।
विधास्येऽह्नो निशश्चाद्ये, यामे वाचंयमाग्रिम ! ॥३१३॥

अन्यच्चान्यत्रानाभोगात्, सहसाकारतस्तथा ।
आजीवितं परित्यक्तो, मत्सरोऽस्मिन् भवे मया ॥३१४॥

इत्याद्यभिग्रहानूरीकृत्य कृत्यविदां वरः ।
धन्यम्मन्यो मुनिं नत्वा, प्राविशद्**धस्तिनापुरम्** ॥३१५॥

तत्र स्थितोऽन्वहं गत्वा, वाटिकामुदये रवेः ।
पुष्पावचयसाहाय्यात्, पुष्पाजीवमतोषयत् ॥३१६॥

---

१. मालाकृतम् ।

तस्माल्लब्ध्वा च पुष्पाणि, सपर्यामेकतानहृत् ।
कृत्वाऽर्हत्प्रतिमानां स, भक्त्या व्यधित वन्दनम् ॥३१७॥

ततश्च प्राप्य साधूनां, सन्निधिं विनयान्नतः ।
शुश्राव भावतो धर्मं, **धनमित्रः** प्रमोदभाक् ॥३१८॥

द्वितीये प्रहरेऽथाऽह्नः, स तैल-लवणादिकम् ।
क्रीत्वा विक्रीय [च] न्यायात्, किञ्चिद् द्रविणमार्जयत् ॥३१९॥

यथा यथा मतिर्धर्मे, तस्य स्थेर्यमानमानशे[1] ।
तथा तथाऽभ्.वद् द्रव्यार्जनं प्रतिदिनं बहु ॥३२०॥

ततो धर्मेऽधिकां श्रद्धां, दधद्बुद्धिमदग्रणीः ।
जिनपूजादिकार्येषु, व्ययति स्म घनं धनम् ॥३२१॥

तद्गुणावर्जितमनाः, श्राद्धश्चैको महर्द्धिकः ।
तस्मै ददौ निजां पुत्रीं, **सर्वं भाग्योदयेऽभवत्** ॥३२२॥

गृहमेकं धनेनाऽथ, गृहीत्वा तस्थिवान् सुखम् ।
धर्मैकप्रस्फुरद्बुद्धिर्वर्द्धिष्णुश्रीभरोऽन्वहम् ॥३२३॥

गतो गुडादि विक्रेतुं, सोऽन्यदा क्वापि गोकुले ।
तदैव प्रावृतत् त[त्तु], [ग]न्तुं स्थानान्तरं प्रति ॥३२४॥

नायको गोकुलस्याऽस्य, गोणीस्थान्निजकिङ्करैः ।
अङ्गारांस्त्याजयामास, भृत्वा भृत्वा पिटोच्चयम् ॥३२५॥

धनमित्रो वीक्षमाणः, केवलं स्वर्णमेव तान् ।
विस्मितो गोकुलाधीशं, त्यज्यतेऽदः किमित्यवक् ॥३२६॥

---

१. स्थिरताम् ।

सोऽप्याहाऽऽकर्णय श्रेष्ठिन्नियच्चिरमिमे वयम् ।
वञ्चिता हाटकमिदमिति तातगिरा वृथा ॥३२७॥

भारभूतांस्तदङ्गारानिदानीं त्याजयाम्यमून् ।
इति श्रुत्वा **धनमित्र**श्चिन्तयामास धीनिधिः ॥३२८॥

पूर्ववस्थास्वहमिव, ध्रुवं भाग्यविपर्ययात् ।
स्वर्णमप्येतदङ्गारानेव पश्यत्ययं हहा ! ॥३२९॥

ततो गोकुलनाथं तं, प्रोवाचाऽहो ! इमान् मम ।
गृहीत्वा मूल्यमुचितं, देहि मा स्म वृथा त्य[जः] ॥३३०॥

किं विधास्यसि भोऽमीभिरिति तेन प्रजल्पितः ।
धनमित्रोऽवदत् किञ्चिद्विद्यते मे प्रयोजनम् ॥३३१॥

पितृसत्का ममैते हि, तन्महार्घाद् ददामि ते ।
इत्युक्तवन्तं सन्तोष्य, तं गुडादिप्रदानतः ॥३३२॥

धनमित्रः स्वपृष्ठ्यानां, पृष्ठे निक्षिप्य तान् द्रुतम् ।
स्वमालयमुपेयाय, निरपायमुपायवित् ॥३३३॥ युग्मम् ॥

ततः स्वर्णसहस्राणां, त्रिंशतं तां निभाल्य सः ।
हृष्टो धान्यांऽशुकादीनां, नानाहट्टान्यमण्डयत् ॥३३४॥

स्वयं स्वर्णापणासीनश्चार्जयद् द्रविणं बहु ।
धनाद्धनं हि सुप्रापं, जन्मी जन्मान्तरं यथा ॥३३५॥

धर्मप्रभावतोऽनेनाऽर्जितं धनमहो ! इदम् ।
सकलेऽपि पुरे तस्य, ख्यातिरीदृग् व्यजृम्भत ॥३३६॥

---

१. **स्वर्णम्** ।

अर्हत्पदाब्जभृङ्गस्य, तस्य साधून्नमस्यतः ।
स्पर्द्धयेव हिरण्यस्य, धर्मे भावोऽप्यवर्द्धत ॥३३७॥

धर्माद्धनं समासाद्य, कृतज्ञानां शिरोमणिः ।
तमेव तेन सततं, स पुपोष विदोषधीः ॥३३८॥

अस्थात् प्रतिमया शून्यसदनादौ स पर्वसु ।
सुरासुरनरोद्भूतैरुपसर्गैश्च नाऽचलत् ॥३३९॥

एवं धर्मैकनिष्ठस्य, यशस्तस्य समुज्ज्वलम् ।
समन्ततो महीपीठे, प्रससार श्रिया समम् ॥३४०॥

इतश्चास्ति **सुमित्रा**ख्यस्तत्र श्रेष्ठी महाधनः ।
तस्यान्तिकं कुतोऽप्यर्था**द्धनमित्रः** प्रयातवान् ॥३४१॥

कोटिमूल्यैस्तदा रत्नैः, स च रत्नावलीं पराम् ।
एकाकी रचयन्नस्ति, विविक्तस्थानमाश्रयन् ॥३४२॥

[ध]नमित्रोऽपि तत्रैवासीनस्तेन समं तदा ।
आलापानुचितांस्तन्वन्नस्थादस्थानमंहसः ॥३४३॥

श्रेष्ठी **सुमित्रः** केनापि, कार्येणोत्थाय सत्वरम् ।
सदनाभ्यन्तरं गत्वा, पुनर्यावदुपाययौ ॥३४४॥

न तां रत्नावलीं तावदद्राक्षीदथ चाऽऽकुलः ।
धनमित्रं प्रति प्राह, 'क्व सा रत्नावली ननु ? ॥३४५॥

अधुनैव मया मुक्ताऽधुनैव च न दृश्यते ।
त्वां मां विना च नान्योऽत्राजग्मिवान् कश्चन ध्रुवम् ॥३४६॥

मा खेदय सखे ! तन्मां, हास्यं जहिहि सत्वरम् ।
सारं गेहस्य तां रत्नावलीं मम समर्पय' ॥३४७॥

अध्यायद्धनमित्रोऽथ, कर्मणां जृम्भितान्यहो ! ।
चेतसाऽप्यकृते पापे, कौलीनं यदवाप्यते ॥३४८॥

सुमित्रं प्रत्यवादीच्च, 'सत्यं वदसि सन्मते ! ।
यदन्यो नागतः कोऽपि, किन्तु चित्रं ममाप्यदः ॥३४९॥

अत्र रत्नावली साऽभूत्, पुरेदानीं च नेक्ष्यते ।
यथा भवानदो वेद, तथाऽहमपि वेद वै' ॥३५०॥

सुमित्रः स्माह 'नेदृक्षैर्वचनैश्छुटसि ध्रुवम् ।
व्यवहारेण भूभर्तुः, पुरो गृह्णाम्यमूं जवात्' ॥३५१॥

'यद्युक्तं तद्विधेहीति,' **धनमित्रस्य** भारतीम् ।
श्रुत्वेभ्यो भूमिनाथाय, तस्करं तं न्यवेदयत् ॥३५२॥

भूमीशोऽचिन्तयन्नैतत्तत्र धर्मैकसद्मनि ।
सम्भवेदित्यहं जानाम्यपरेऽपि जनास्तथा ॥३५३॥

निःसंशयमनाश्चायं, त्वेनं स्तेनं प्रलपत्यहो ! ।
पृच्छामि तत्तमेवेति, **धनमित्र**मजूहवत् ॥३५४॥

[ध]नात् पृष्टाच्च तत् सर्वं, यथावृत्तं धराधवः ।
आकर्ण्य विस्मितोऽजल्पदिभ्य ! किं क्रियते ? वद ॥३५५॥

सोऽभाणीद्धरणीभर्त्तः !, किं प्रत्येति भवानपि ।
प्रत्यक्षतस्करस्याऽस्य, कुंहनासद्मनो गिरि ॥३५६॥

---

१. दम्भगृहस्य ।

अब्रूत **धनमित्रो**ऽथ, 'देव ! रत्नावलीमहम् ।
अगृहीतामपि ददे, कलङ्कः स्यात् पुनः स्थिरः ॥३५७॥

मया च सकलङ्केन, जैनधर्मस्य लाघवम् ।
जायते तेन भूनाथ !, दिव्यात् प्रत्याययाम्यमुम् ॥३५८॥

सुमित्रानुमतो भूपस्तेन कारयितुं ततः ।
तप्तायोगोलकादानदिव्यदिनमतिष्ठिपत् ॥३५९॥

ततश्चोत्थाय संस्त्यायं[1], स्वं स्वं द्वावपि भेजतुः ।
राजाऽपि विस्मितस्वान्तोऽलञ्चक्रे मन्दिरान्तरम् ॥३६०॥

धनमित्रो विशुद्धात्मा, भावयन् दारुणं भवम् ।
प्रावर्त्तिष्ट विशेषेण, विमले धर्मकर्मणि ॥३६१॥

प्राप्ते दिव्यदिने स्नानं, विधाय विमलांशुकः ।
अर्चां भगवदर्चानां[2], विधिज्ञो व्यधिताऽष्टधा ॥३६२॥

गभीरार्थैः स्तुति-स्तोत्रैस्ततोऽसौ चैत्यवन्दनाम् ।
निर्मायो निर्ममे प्रोद्यत्पुलकोच्छ्वसिताङ्गकः ॥३६३॥

सुराणां सम्यग्दृष्टीनां, वैयावृत्त्यविधायिनाम् ।
कायोत्सर्गं विधायाऽथ, सोऽभ्यधादवधानवान् ॥३६४॥

इयं रत्नावली चित्तेनापि चेत् काङ्क्षिता मया ।
मा स्म भून्मम तद्दिव्ये, शुद्धिरार्हतनिर्जराः ! ॥३६५॥

अन्यथा तून्नतिं सार्वशासनस्य तथा द्रुतम् ।
प्रतनुध्वं यथा नान्योऽप्यस्य कुर्यात् प्रतीपताम् ॥३६६॥

---

१. गृहम् । २. प्रतिमानाम् ।

प्रणिधायेति साश्चर्यैर्जनैः परिवृतोऽभितः ।
अनुद्विग्नमनाः प्राप, स भूपालङ्कृतां सभाम् ॥३६७॥

सुमित्रोऽप्यागमत्तत्र, पौराश्च परितोऽमिलन् ।
धर्माध्यक्षैर्धृतौ देवस्थानस्याऽभिमुखौ च तौ ॥३६८॥

ध्मायमानं लोहगोलं, द्विपञ्चाशत्पलप्रमम् ।
समादातुमथो यावत्, कामानश्रावय**द्धनः** ॥३६९॥

तावद्रत्नावली सैव, द्युतिद्योतितदिङ्मुखा ।
सुमित्रस्योपसंव्यानग्रन्थेर्झटिति पेतुषी ॥३७०॥

इभ्येदं किमिति क्षोणीनाथेऽथ परिपृच्छति ।
तेनाद्भुतेन सोऽत्यन्तं, क्षुभितो नोत्तरं ददौ ॥३७१॥

किमेतदिति भूभर्त्रा, पृष्टोऽजल्प**द्धन**स्ततः ।
देवोऽवधारयत्येव, भूयोऽभाषत भूपतिः ॥३७२॥

'विवादो युवयोर्यस्या, रत्नावल्याः कृते कृतिन् ! ।
सेयं भवति नो वेति, ब्रूहि सम्यग् विनिर्णयम्' ॥३७३॥

धनोऽवादीन्महीनेतः !, सैवेयं लक्ष्यते खलु ।
कार्याणां परमार्थं तु, बुध्यन्ते सर्ववेदिनः ॥३७४॥

जातक्षोभे **सुमित्रे** तु, तूष्णीमवाश्रिते नृपः ।
रत्नावलीं निजकोशाध्यक्षपाणौ समार्पय[त्] ॥३७५॥

धनमित्रं शुद्ध इति, विसृज्य प्रीतिपूर्वकम् ।
इभ्यं स्थानान्तरे स्वीये, स्थापयित्वा गृहं ययौ ॥३७६॥

धनमित्रोऽप्यगाद्वेश्म, वाद्यनादभृताम्बरः ।
ददद्दानं जनैः श्लाघ्यमानस्तीर्थं प्रभावयन् ॥३७७॥

द्वितीयेऽह्नि पुना राजा, **सुमित्रं** पुरसत्तमैः ।
अप्रच्छयत्तं वृत्तान्तं, सोऽप्याख्याद्विमना इति ॥३७८॥

'महाराजो मुहुः किं मामनुयुङ्क्ते सुयुक्तिवित् ।
परमार्थं न जानेऽहं, स्वयं युक्तं करोतु तत्' ॥३७९॥

ततो भूमीश्वरः पौरा, निखिलाश्चातिविस्मिताः ।
परमार्थमजानाना, जोषमेवावतस्थिरे ॥३८०॥

एवं पुरेऽखिले बाढं, विस्मिते केवली मुनिः ।
स एव **धनमित्रस्य,** धर्मदाता समागमत् ॥३८१॥

अथ राजा समं पौरैः, प्रमोदोल्लसदाशयः ।
ऋद्ध्या महत्या नन्तुं तं, जगामाऽऽगामिमङ्गलः ॥३८२॥

धनमित्रोऽपि सद्भक्तिबन्धुरः सकुटुम्बकः ।
सोत्कण्ठं समुपेयाय, वन्दितुं तं महामुनिम् ॥३८३॥

आनायिते **सुमित्रे**ऽपि, नरेशेनाऽथ केवली ।
सद्धर्मदेशनां भव्यप्रबोधाय विनिर्ममे ॥३८४॥

समयेऽवददुर्वीशो, नत्वा विरचिताञ्जलिः ।
'भगवन् ! संशयध्वान्तं, भिन्द्धि ज्ञानप्रभापते ! ॥३८५॥

यदद्भुतं विवादेऽभूत्, **सुमित्र-धनमित्रयोः** ।
भवन्त एव जानन्ति, तत्र तत्त्वं सुदुर्गमम्' ॥३८६॥

ततः शमनिधिः स्माह, 'देहिनां संसृताविह ।
कर्मभिः परतन्त्राणामद्भुतं नैव किञ्चन ॥३८७॥

शृणु राजन् ! **गङ्गदत्ता**भिधानः प्राच्यजन्मनि ।
आसीद् गृहपतिर्जीवो, **धनमित्रस्य** ऋद्धिमान् ॥३८८॥

असौ त्विभ्यस्तदा **गङ्गदत्तस्य मगधा**भिधा ।
गृहिणी स्पृहणीयश्रीरभूदायतलोचना ॥३८९॥

साऽन्य**देश्वर**सञ्ज्ञस्य, वणिजो मन्दिरान्तरम् ।
कथञ्चन प्रविश्याऽऽशु, वञ्चनैकविचक्षणा ॥३९०॥

सम्बोसिका[1]भिधानायास्तत्पत्न्या रत्नमुत्तमम् ।
लक्षमूल्यं गृहीत्वाऽगात्, **किमकृत्यं हि दुर्धियाम्** ॥३९१॥ युग्मम् ॥

सम्बोसिकाऽपि तज्ज्ञात्वा, कथञ्चन शुचाकुला ।
गत्वा ययाचे **मगधा**न्ते, तद्रत्नं विविधोक्तिभिः ॥३९२॥

न पुन**र्मगधा**ऽमंस्त, केवलं क्रोधदुर्द्धरा ।
मुखरत्वेन यत् किञ्चिज्जजल्प प्रति तां मुहुः ॥३९३॥

उपालभ्यत **सम्बोसिक**याऽथ **मगधा**पतिः ।
सोऽपृच्छत्तां ततः सापि, जल्पाकी प्रत्यभाषत ॥३९४॥

'अस्या गृहमनुष्यैस्तद्रत्नं जह्रे खलु प्रिय ! ।
अभ्याख्यानं प्रदत्ते मे, [सा] मृषाऽनृतवादिनी' ॥३९५॥

गङ्गदत्तोऽपि तच्छ्रुत्वा, प्रतीतः प्रेयसीगिरि ।
प्राह **सम्बोसिकां** गेहमनुष्यैस्तदहारि ते ॥३९६॥

---

१. **'ईसरवणियस्स संतोसियाए भज्जाए वररयण' मिति पुष्पमालायां ४७८ श्लोकस्य वृत्तौ धनमित्रकथायां श्लो० ॥१३६॥**

ततः **सम्बोसिका** शीर्णरत्नप्राप्तिमनोरथा ।
व्यतीयाय भृशं खेदविवशाऽहानि कत्यपि ॥३९७॥

अथ खेदेन तेनैव, गृहीत्वा तापसव्रतम् ।
अज्ञानतपसा **सम्बोसिका** व्यन्तरतां गता ॥३९८॥

मगधाऽपि ततः किञ्चित्, कृत्वा सत्कर्म तादृशम् ।
जातः **सुमित्र**नामाऽयमिभ्यः सारश्रियां पदम् ॥३९९॥

गङ्गदत्तो गृहपतिः, प्रपूर्याऽऽयुः क्रमादयम् ।
धनमित्रोऽभवच्छुद्धधर्मोल्लसितसन्मतिः ॥४००॥

स्मृत्वा तं रत्नवृत्तान्तं, व्यन्तरः सोऽपि कोपतः ।
इभ्यस्य [तान्] सुतानष्टौ, निनाय निधनं क्रमात्' ॥४०१॥

इभ्यो राज्ञाऽथ दृष्टास्योऽवदत् 'सत्यमिदं प्रभो ! ।
किन्तु तेषां मृतेर्हेतुमद्यैवाऽज्ञासिषं स्फुटम्' ॥४०२॥

मुनिः पुनरभाषिष्ट, 'तेनैव क्रूरचेतसा ।
जह्रे रत्नावली सापि, व्यन्तरेणोल्लसत्क्रुधा ॥४०३॥

कान्तां **सम्बोसिका**गेहमनुष्येषु वृथैव यत् ।
अभ्याख्यानपरां [मु]ग्धहृदयः सहसैव हि ॥४०४॥

धनमित्रोऽनुमेने तत्कर्मणा वचनीयताम् ।
इह लेभे **कृतं कर्माऽननुभूय च्छुटेद्धि कः** ? ॥४०५॥ युग्मम् ॥

अन्यदप्यशुभं भूरि, व्यन्तरेण दुरात्मना ।
चिन्तितं **धनमित्रस्या**ऽप्यमुना त्वधुना परम् ॥४०६॥

व्यधायि दुरितव्यूहापोहकृद्धर्म आर्हतः ।
तेनायं व्यन्तरोऽमुष्मिन्, प्रभविष्णुरभून्न हि ॥४०७॥ युग्मम् ॥

तस्माच्च व्यन्तराद्रत्नावलीं तामपि सत्वरम् ।
मोचयित्वोन्नतिं चक्रुः, सुराः प्रवचनाश्रिताः' ॥४०८॥

विस्मितोऽथ धराधीशो, नत्वा निर्ग्रन्थपुङ्गवम् ।
स्माह 'स व्यन्तरोऽद्यापीभ्यस्य किञ्चिद्विधास्यति ?' ॥४०९॥

मुनिरूचे'ऽनया रत्नावल्या सत्राऽखिलां श्रियम् ।
विस्तृतामप्यमुष्यैष, क्रमादपहरिष्यति ॥४१०॥

अथेभ्यस्तीव्रदुःखार्त्तो, भ्रमिष्यति भवे बहु ।
व्यन्तरात्माऽपि बहुधा, विरोधं साधयिष्यति ॥४११॥

आकर्ण्यैवं प्रजानाथः, **सुमित्राय** समर्प्य ताम् ।
रत्नावलीं स्वयं मन्त्रि-सामन्तादिभिरन्वितः ॥४१२॥

सभार्यो जिनचैत्येषु, विधाय विविधान् महान् ।
संविग्नो विधिनाऽऽदत्त, दीक्षां सिद्ध्यध्वदीपिकाम् ॥४१३॥ युग्मम् ॥

धनमित्रोऽपि सूनुं स्वं, ज्येष्ठं [कृ]त्वा गृहाधिपम् ।
सपत्नीकः परिव्रज्यां, प्रपेदे मुक्तिमातरम् ॥४१४॥

चिरं तीव्रं तपस्तप्त्वा, धुताशेषरजोमलौ ।
अव्याबाधं पदं प्राप्तौ, **धनमित्र**-नरेश्वरौ' ॥४१५॥

श्रुत्वेति **धनमित्रस्य,** दृष्टान्तं स्पष्टचेतनाः ।
धर्मं शर्मप्रदं शश्वदाराधयत यत्नतः ॥४१६॥

★ इति धर्मविषये **धनमित्र**कथा ॥छा॥ ग्रं० १६६ ★

एवं श्रुतप्रभुगिरोऽनेके भव्यास्तदाऽभजन् ।
सम्यक्त्वं देशविरतिं, सर्वतो विरतिं तथा ॥४१७॥

तदा च **वैताढ्य**गिरौ, स्मरता स्वपितुर्वधम् ।
सहस्रनयनेनाशु, **पूर्णमेघे** निशुम्भिते ॥४१८॥

पलाय्य नन्दनस्तस्य, भीतिमान् **घनवाहनः** ।
तस्मिन् समवसरणे, शरणार्थी समाययौ ॥४१९॥ युग्मम् ॥

स त्रिः प्रदक्षिणीकृत्य, वन्दित्वा च जगत्पतिम् ।
उपपादाम्बुजं पुंष्पन्धयवद्धि निषेदिवान् ॥४२०॥

मत्तः स्रस्तः क्व यात्येष, तरणेरिव कौशिकः ।
शरणं वासवस्यापि, प्राप्तो घात्यो हठादपि ॥४२१॥

इति क्रोधोद्धुरस्तस्याऽनुपदं समुपागतः ।
उदायुधः **सहस्राक्ष**स्तमैक्षिष्ट तथास्थितम् ॥४२२॥

प्रभावाच्च प्रभोः शान्तप्रकोपस्त्यक्तहेतिकः[२] ।
नत्वा प्रदक्षिणापूर्वं, यथास्थानमुपाविशत् ॥४२३॥

चक्रिणा **सगरेणा**ऽथ, **पूर्णमेघ-सुनेत्रयोः** ।
विरोधकारणं पृष्टः, समाचष्टाऽजितप्रभुः ॥४२४॥

'**आदित्याभे** पुरे द्रव्यकोटीनाथो वणिक् पुरा ।
भावनाख्योऽभवत्तस्य, **हरिदासा**ह्वयः सुतः ॥४२५॥

---

१. भ्रमरवत् । २. त्यक्तास्त्रः ।

अन्येद्युर्**भावनः** सद्मसर्वस्वं स्वाङ्गजन्मनः ।
समर्प्य प्रययौ देशान्तरं द्रव्यार्जनेच्छया ॥४२६॥

वर्षैर्द्वादशभिस्तत्र, समुपार्ज्य घनं धनम् ।
आगत्य स्वपुरे श्रेष्ठी, **भावन**स्तस्थिवान् बहिः ॥४२७॥

तत्र मुक्त्वा परीवारं, भृंशोत्कलिकयाऽञ्चितः ।
[ए]काक्येव विभावर्यां, सदनं स्वमुपाययौ ॥४२८॥

विशन्तं **हरिदास**स्तं, चौरोऽसाविति शङ्कया ।
जघान निर्घृणस्वान्तः, शितेन तरवारिणा ॥४२९॥

स्वस्य व्यापादकं सूनुं, तज्ज्ञात्वा **भावनो**ऽप्यथ ।
सद्य उद्भूतविद्वेषपोषः पञ्चत्वमाप्तवान् ॥४३०॥

हरिदासोऽपि तं तातमवबुध्य स्वमानसे ।
दधानः परमं खेदं, प्रेतकार्याणि निर्ममे ॥४३१॥

कियत्यपि गते काले, सोऽप्यभून्मृत्युवत्क्रमः ।
भ्रेमतुर्द्वावपि ततो, दुःखदान् कतिचिद्भवान् ॥४३२॥

किञ्चिद्विधाय सुकृतं, **भावना**त्माऽथ जातवान् ।
पूर्णमेघो हरिदासजीवस्त्वासीत् **सुलोचनः** ॥४३३॥

इति प्राग्जन्मसंसिद्धं, वैरं प्राणान्तिकं नृप ! ।
विबुध्यस्वैहिकं त्वेतदनयोरानुषङ्गिकम्' ॥४३४॥

चक्र्यपृच्छत् पुनः 'स्वामिंस्तत्सून्वोरनयोर्मिथः ।
को वैरहेतुः ? प्रीतिश्च, **सहस्राक्षे** कुतो मम ?' ॥४३५॥

---

१. भृशोत्कण्ठया । २. मृत्युम् ।

प्रभुः स्माह 'पुराऽभूस्त्वं, प्रकृत्या करुणापरः ।
स्फुरद्दानगुणख्यातः, परिव्राड् **रम्भका**भिधः ॥४३६॥

तदा च **शश्यावल्या**ह्वौ, शिष्यौ तेऽभवतामिमौ ।
आवलिस्तु विनीतत्वान्नितान्तं तव वल्लभः ॥४३७॥

अन्येद्युरेकां गोधेनुं, राया क्रीणन्त**मावलिम्** ।
शशी गोस्वामिनो भेदं, कृत्वाऽपास्थत् कठोरहृत् ॥४३८॥

स्वयं चिक्राय च ततस्तत्र व्यतिकरे तयोः ।
प्रवृत्ते कलहे घोरे, निजघ्ने **शशिना**ऽऽवलिः ॥४३९॥

शशी चिरं भवं भ्रान्त्वा, जातोऽयं **मेघवाहनः** ।
आवलिस्तु **सहस्त्राक्ष**स्तद्वैरमनयोरिदम् ॥४४०॥

रम्भकोऽपि शुभाः प्राप्य, गतीर्दानप्रभावतः ।
चक्र्यभूस्त्वं **सहस्त्राक्षे,** स्नेहस्ते प्राक्तनस्ततः' ॥४४१॥

अथ रक्षःपति**र्भीमो**, निषण्णस्तत्र संसदि ।
उत्थायाऽऽश्लिष्य च प्रीत्या, बभाषे **मेघवाहनम्** ॥४४२॥

'**पुष्कर**द्वीप**भरतवैताढ्य**शिखरिण्यहम् ।
प्राग्भवे **काञ्चनपुरे**, **विद्युद्दंष्ट्रो** नृपोऽभवम् ॥४४३॥

भवे तत्र च मेऽभूस्त्वं, **रतिवल्लभ**नामकः ।
पुत्रोऽतिवल्लभो वत्स !, साम्प्रतं साध्वसीक्षितः ॥४४४॥

तदेवं सम्प्रत्यपि मे, पुत्रोऽसि प्रमदप्रदः ।
यन्मदीयमनीकादि, त्वदीयं सर्वमेव तत् ॥४४५॥

अन्यच्च **राक्षसद्वीपो**, विद्यते **लवणाम्बुधौ** ।
योजनानां सप्तशतीं, दिक्षु सर्वासु विस्तृतः ॥४४६॥

तदन्तरे च पञ्चाशद्योजनाऽऽभोगवान् महान् ।
योजनानि नव प्रांशु**स्त्रिकूटाद्रिः** सुदुर्गमः ॥४४७॥

तस्योर्ध्वं स्फारसौवर्णसाल[1]-मन्दिर-तोरणा ।
लङ्केति नाम्ना नगरी, कारिताऽस्ति मयाऽधुना ॥४४८॥

तथा षड्योजनीं भूमिमध्यं गत्वा चिरन्तनी ।
शुद्धस्फटिकवप्राङ्का, रत्नौकःसुन्दरान्तरा ॥४४९॥

पुरी मम तुरीयांशयुग्योजनशतप्रमा ।
नाम्ना **पाताललङ्केति**, विद्यते देवदुर्गमा ॥४५०॥ युग्मम् ॥

तत्पुरीद्वयमादाय, वत्स ! तत्र नृपो भव ।
लाह्यमुं च महा[हा]रं, माणिक्यैर्नवभिः कृतम्' ॥४५१॥

सप्रमोदमिदं **भीम**, उक्त्वा तं हारमुज्ज्वलम् ।
पूर्णमेघात्मजायाऽदाद्, राक्षस्या विद्यया सह ॥४५२॥

नत्वा प्रभुं तदैव द्रागुत्थितो **मेघवाहनः** ।
राक्षसद्वीपमागत्य, राजाऽभूल्**लङ्क्ययो**स्तयोः ॥४५३॥

रक्षोद्वीपस्य यत् स्वाम्यं, यद्विद्याऽपि च राक्षसी ।
रक्षोवंश इति ख्यातिं, तत्तद्वंशस्तदाद्यगात् ॥४५४॥

प्रभुं नत्वाऽथ देवेन्द्र-नरेन्द्राद्या मुदुद्धुराः ।
स्वस्वास्पदं ययुः स्वामी, व्यहार्षीच्चान्यतस्ततः ॥४५५॥

चक्रिणोऽथ चतुःषष्टिसहस्र्या हरिणीदृशाम् ।
क्री[ड]तो जज्ञिरे षष्टिसहस्रप्रमिताः सुताः ॥४५६॥

---

१. प्राकारः ।

धात्र्यस्तान् वर्द्धयामासुरर्थानिव नयश्रियः ।
गुणानिव गुरोः शिक्षा, आपः कारस्करानिव[1] ॥४५७॥

तज्जह्न्वाद्यभिधाः क्रमेण कलयामासुः कलाकौशलं,
तारुण्यं बिभराम्बभूवुरमलं, लावण्यपाथोधयः ।
चेतश्चक्रभृतः सितांशुविशदैरानन्दयन्तो गुणै-
रुद्यानादिषु रेमिरे च सततं, नानाविधैः खेलनैः ॥४५८॥

[शार्दूलविक्रीडितम्]

इति श्रीपद्मप्रभाचार्यचरणराजीवचञ्चरीकश्रीदेवानन्दसूरिविरचिते श्रीअजितप्रभुचरिते आनन्दाङ्के महाकाव्ये सगरचक्रिदिग्विजय-धनमित्रदृष्टान्त-चक्रिपूर्वभवोपेतप्रभुदेशना-चक्रिसुतोत्पत्तिवर्णनो नाम चतुर्थः सर्गः ॥ ग्रं. ४५९ अ. १२ ॥ आदितः ३४२४ अ. १ ॥

● ● ●

१. वृक्षान् ।

पञ्चमः सर्गः

अथाऽन्येद्युः कुमारास्ते, कुमारोपमतेजसः ।
तातं विज्ञपयामासुः, सुधर्माभसभास्थितम् ॥१॥

तात ! त्वया नृपाः सर्वे, **भरत**क्षेत्रवर्त्तिनः ।
लीलयैव पदातित्वं, गमिता अमितौजसः ॥२॥

देवा **मागध**नाथाद्याः, शश्वदादेशकाङ्क्षिणः ।
सेवां सेव्यस्य ते तात !, दासेरा इव तन्वते ॥३॥

त्वत्कीर्त्तिः सकलामुर्वीं, भ्रान्त्वा श्रान्तेव वारिधेः ।
तीरकान्तारवीथीषु, विश्राम्यति महीपते ! ॥४॥

कृतकृत्यस्य ते कृत्यशेषं किञ्चिन्न विद्यते ।
त्वत्पुत्रतां वयं स्वामिन् !, ज्ञापयामो विधाय यत् ॥५॥

किन्तु तात ! त्वया भूमिपीठेऽस्मिन् साधितेऽखिले ।
स्वेच्छाविहारतोऽस्माकं, त्वत्पुत्रत्वं प्रकाशताम् ॥६॥

अथ तेऽनुमता राज्ञा, धन्यम्मन्या महस्विनः ।
उत्कण्ठिताः प्रयाणाय, दुन्दुभीन् पर्यताडयन् ॥७॥

तेषां तदानीमुत्पाता, दुरन्ता ऐंनःप्रदर्शकाः ।
नानारूपा अजायन्त, प्रयाणप्रतिषेधकाः ॥८॥

---

१. अशुभप्रदर्शकाः ।

तथाहि—

चकम्पे काश्यपी कामं, सम्मुखः पवनो ववौ ।
रजसः करकाणां च, चण्डावृष्टिरजायत ॥९॥

ववाशिरे शिवाः सूर्यदिशि दक्षिणपार्श्वगाः ।
चिल्लाश्च मण्डलीभूता, नीचकैर्बभ्रमुर्दिवि ॥१०॥

मार्त्तण्डमण्डलं केतुशताकुलमलोक्यत ।
दृश्यमानान्तरच्छिद्रं, चन्द्रमण्डलमप्यभूत् ॥११॥

निर्मदा अभवन् सद्यो, गन्धदन्तावला[1] अपि ।
आस्यान्तरात्तथाऽश्वानां, धूमलेखा विनिर्ययुः ॥१२॥

अवमत्याऽखिलानेतानुत्पातान् **सगरात्मजाः** ।
भवितव्यतया नुन्नाः, कृतकौतुकमङ्गलाः ॥१३॥

नानालङ्कारसंशोभिशरीराः शुद्धवाससः ।
गजा-ऽश्वादीनि यानानि, यथाकाममधिष्ठिताः ॥१४॥

स्त्रीरत्नवर्जमखिलैरनुमत्या नरेशितुः ।
रत्नैरनुगताश्चित्रशस्त्रभ्राजितपाणयः ॥१५॥

मूर्ध्नि श्वेतातपत्रेण, भ्राजन्तो[2]ऽद्भुतचमूवृताः ।
वाद्यनादाचितदिशः, प्राचलन्नचलश्रियः ॥१६॥ कलापकम् ॥

सामोदं ते नगोद्यान-ह्रदिनीषु यदृच्छया ।
खेलन्तोऽस्खलितं भ्रेमुरभ्रमा भरतावनौ ॥१७॥

विनीतान्नृपतीन् मार्गे, सदाऽकार्षुर्यथोचितम् ।
दुर्विनीतान्यकार्षुश्चाऽतानिषुर्भूतले यशः ॥१८॥

---

१. गन्धहस्तयः । २. शोभमानाः ।

अथ ते क्वचनाऽरण्ये, तारुण्यभरशालिनम् ।
स्थिरध्यानं जिताशेषहृषीकं ददृशुर्मुनिम् ॥१९॥

ततश्च सम्मदोद्भूतपुलकास्तं मुनीश्वरम् ।
प्रणत्य परया भक्त्या, पप्रच्छुः स्वच्छमानसाः ॥२०॥

'साधुधुर्य ! भवस्याऽस्याऽसारताऽस्माभिरप्यहो ! ।
बुध्यते न पुनस्त्यक्तुं, किञ्चनापि हि शक्यते ॥२१॥

जानाना अपि [ल]क्ष्म्यादि, शरदभ्रचलाचलम् ।
ऋते बाह्यं निमित्तं नो, विरज्यन्ते बताऽङ्गिनः ॥२२॥

श्रीपूज्या ! भवतां केन, निमित्तेनेदृशी मतिः ।
यौवनेऽपि भवत्यागमयी जज्ञे निवेद्यताम्' ॥२३॥

साधुः प्रोवाच 'भोश्चक्रिनन्दनाः ! संसृताविह ।
ज्ञानालोकोज्झिता जीवा, नेक्षन्ते स्वहितं क्वचित् ॥२४॥

अहो ! असुमतां जाड्यमहो ! मोहः सुदुर्जयः ।
सत्यप्यर्हद्वचःपोते, यन्मज्जन्ति भवाम्बुधौ ॥२५॥

केचिदेव मह्यु(हा)सत्त्वास्तत्त्वावगतिशालिनः ।
स्वयं बाह्यनिमित्ताद्वा, विरज्यन्ते भवादतः ॥२६॥

श्रुत्वा प्राग्जन्मजं कान्तादुर्वृत्तं मुनिवक्त्रतः ।
विरक्तोऽस्मि यथा चक्रिसूनवः ! श्रूयतां तथा ॥२७॥

सुप्रतिष्ठितसञ्ज्ञेऽभूत्, पुरे विपुलविक्रमः ।
धीमान् **वरुणवर्मा**ख्यः, क्षत्रवंश्यो लसद्गुणः ॥२८॥

तस्यासी**च्छीलवत्या**ख्या, नवयौवनमञ्जुला ।
लावण्यवसतिः प्राणवल्लभा सुकुलोद्भवा ॥२९॥

सा क्रमात् कुलमर्यादामुल्लङ्घ्याऽथैकमन्दिरम् ।
अत्यन्तं कामविवशा, स्वैरिणीभावमा[पि]पत् ॥३०॥

मधुरैर्वचनैः शश्वच्छिक्षिताऽपि न सत्पथम् ।
प्रतिपेदे महापापा, प्रियेणोपेक्षिता ततः ॥३१॥

अन्यदा **सिंहदत्ता**ख्यः, पल्लीनाथो महाभुजः ।
वपुःशोभापराभूतकर्मलातनयद्युतिः[1] ॥३२॥

बहुचौरपरीवारो, मूषितुं तत्पुरं रयात् ।
पपाताऽऽकस्मिक[म]पत्रासिताशेषनागरः ॥३३॥ [युग्मम्]

मुमुषुः स्वेच्छया स्तेनाः, पुरं त्रातुरभावतः ।
स्वयं विवेश पल्लीशो, गृहं **वरुणवर्मणः** ॥३४॥

वेश्मैकदेशे **वरुणो**, निलीयाऽतिष्ठदात्मना ।
दुःशीला सा तु पल्लीशं, दृष्ट्वा रक्तेत्यभाषत ॥३५॥

'त्वया मोषणसामर्थ्यं, नन्विदं शिक्षितं कुतः ? ।
चेतोऽपि येन मुष्णासि, मदीयं पल्लीनायक ! ॥३६॥

यदि वा कोऽप्ययं स्नेहः, प्राच्यजन्मसमुद्भवः ।
त्वत्सङ्गमसमुत्कानि, सीदन्त्यङ्गानि यन्मम ॥३७॥

प्रार्थनासुरशाखिस्तदनुकम्पापरायणः[1] ।
विषमेषुव्यथामग्नां, सत्वरं मां समुद्धर' ॥३८॥

इति प्रेमवचोजातानुरागः पल्लिनायकः ।
तां गृहीत्वा धनस्वर्णपूर्णपल्लिं समासदत् ॥३९॥

---

१. कामदेवः । कल्पवृक्षः ! ।

समस्तान्तःपुरप्रष्ठां, तां विधाय च सन्ततम् ।
विलासान् विविधांस्तन्वन्, प्रेमोत्कर्षमदर्शयत् ॥४०॥

प्रति पल्लीशमुक्तानि, तस्यास्तानि वचांसि तु ।
वरुणः शुश्रुवानुद्यद्विवेको ह्यचिन्तयत् ॥४१॥

[चा]पल्यं तडितां धर्मः, सरितां नीचगामिता ।
क्रूरत्वं सर्पिणीनां वा, दौःशील्यं हरिणीदृशाम् ॥४२॥

प्रमदास्वपि ये मूढा, विश्वस्य सुखमासते ।
ग्रसित्वा कालकूटं ते, निश्चिन्ताः खलु शेरते ॥४३॥

अहो ! धाष्ट्यमहो ! पापमहो ! अस्याः कृतघ्नता ।
निष्ठुरत्वमहो ! रागोऽप्यहो ! पल्लेरधीश्वरे ॥४४॥

इयं हि स्वैरिणी पूर्वमप्यनिष्टाऽभवन्मम ।
अकृच्छ्रेणैव तद्दिष्ट्या, व्याघ्रीवदनतोऽच्छुटम् ॥४५॥

इति सञ्चिन्तयंस्तस्या, मोचने स पराङ्मुखः ।
सुहृद्भिरेवमन्येद्युरुपालभ्यत निर्भरम् ॥४६॥

गृहीतां तस्करैः पत्नीं, निजां जानन् महामते ! ।
तस्याः किं मोचनोपायं, न चिन्तयसि चेतसा ? ॥४७॥

पद्मिनीव रवेरस्ते, तटिनीव घनात्यये ।
सा वराकी भवत्सङ्गाभावे यास्यति कां दशाम् ? ॥४८॥

एवं तैः प्रेरितोऽनिच्छन्नपि चित्तेन स द्रुतम् ।
प्रियां [मो]चयितुं प्राप्तस्तां पल्लीमतिभीषणाम् ॥४९॥

भ्रमंस्तत्र **सुमित्रा** ख्यस्थविराया निकेतनम् ।
प्राप्तो मातुरिवैतस्याः, प्रणामं चाऽकरोत् कृती ॥५०॥

सत्कृत्याऽऽसनदानेन, वत्सला पृच्छति स्म सा ।
कुत आयातवान् ? वत्स !, क्व गन्ता ? किं प्रयोजनम् ? ॥५१॥
वरुणोऽप्यब्रवीन्मातः !, पराभूतः स्वबन्धुभिः ।
दूरदेशात् समायातो, देशेऽमुष्मिन् भ्रमन् [भ्रमन्] ॥५२॥

अनुजानासि चेदम्ब !, दिनानि कतिचित्तदा ।
तिष्ठाम्यत्राऽथ साऽप्यूचे, 'निश्चिन्तस्तिष्ठ पुत्रवत्' ॥५३॥

ततस्तया सुतस्थित्या, शश्वत् स्थानाशनादिभिः ।
सत्कृतोऽसौ सुखं [त]स्थावुपायान्वेषणापरः ॥५४॥

स्थविरा तं चिन्तया क्रान्तं, विलोक्याऽन्येद्युरादरात् ।
पप्रच्छ 'वत्स ! ते बाधा, कीदृशी हृदि विद्यते ? ॥५५॥

कश्चित् प्रियमनुष्यस्य, वियोगस्त्वां नु बाधते ? ।
उताहो वैरसम्बन्धो, दुःसाधो बत कश्चन ? ॥५६॥

दीर्घोष्णा भवतो वक्त्रे, निःश्वासाः प्रसरन्ति यत् ।
यच्च हस्तस्थदण्डेन, लिखस्युर्वीं मुहुर्मुहुः ॥५७॥

चिरं यच्च हृदा किञ्चिद्, ध्यात्वा दष्टाधरः क्रुधा ।
रक्तनेत्रः खड्गलतां, मुहुर्मुहुरवेक्षसे ॥५८॥

तदस्ति कारणं किञ्चिन्निश्चिनोमीति चेतसा ।
अगोप्यं यदि तद्वत्स !, स्वजनन्यै निवेदय' ॥५९॥

अथ किञ्चिद्विहस्याऽसौ, स्माह 'गोप्यं न किञ्चन ।
स्वबुद्धिज्ञातहृदयाकूताया[1] अम्ब ! ते पुरः ॥६०॥

---

१. स्वमतिज्ञातहृदयाशयया ।

नेयत्कालं ह्रियैवाख्यमित्युक्त्वा सोऽखिलं निजम् ।
अवग् वृत्तं ततः सोचे, 'वत्सार्थोऽयं सुदुष्करः ॥६१॥

यदेकाकी भवानत्र, पल्लीयं चातिदुर्गमा ।
महाबलश्च पल्लीशो, दूरे ग्रामोऽपि तावकः ॥६२॥

समग्रः स्त्रीजनः प्रायः, स्फुटकुटैकशेवधिः ।
विशेषात् त्वत्प्रिया **शीलवती** दुःशीलतावधिः ॥६३॥

तथाऽपीदं शुभं चक्रे, स्ववृत्तं ज्ञापिताऽस्मि यत् ।
ग्रहीष्ये वल्लभायास्ते, नचिरादाशयं खलु' ॥६४॥

इत्युक्त्वा स्थविरा **शीलवत्या** गेहे गमागमौ ।
प्रारभ्य विविधां गोष्ठीं, नित्यं चक्रे तया सह ॥६५॥

कथान्तरेऽन्यदा वृद्धाऽपृच्छत्तां 'वद सुन्दरि ! ।
क्व ते वासः ? कथं चासीत् पल्लीशेन समागमः ? ॥६६॥

पितरौ तव कुत्र स्तः ?, श्वशुरावपि कुत्र ते ? ।
प्रियस्ते प्रेमवान्नो वा ?, धीरो वा कातरोऽथवा ? ॥६७॥

किमत्र सुखिताऽसि त्वं, यद्वा श्वशुरवेश्मनि ? ।
पितृसद्मनि वा भद्रे !, यद् व्याख्येयं तदावद' ॥६८॥

अथाऽकृत्वाऽपि प्रश्नानां, तेषामुत्तरमेषका ।
प्रपञ्चचतुराऽवादीदिति निर्दोषतोचितम् ॥६९॥

'मुग्धे ! न वेत्सि नारीणां, पितरौ श्वशुरौ पतिम् ।
मुक्त्वाऽपि जीवितं यत्तदधिकं मरणादपि ॥७०॥

अबला विषमावस्थापतिता शरणोज्झिता ।
आत्मानमीदृग्विधिना, जीवयामि करोमि किम् ?' ॥७१॥

सनिःश्वासं जगादाऽथ, स्थविरा 'सखि ! चेदतः ।
जायेत निर्गमोपायस्तव तत् खलु सुन्दरम्' ॥७२॥

पृष्टा बाष्पभरक्लिन्नदृगगादीत् सगद्गदम् ।
क्वेदृंशि मम भाग्यानि, व्यसनाद्यच्छुटाम्यतः[२] ॥७३॥

मिलामि च द्रुतं मातापित्रोर्बन्धुततेरपि ।
पत्युश्च विश्वविख्यातविक्रमस्य गुणाम्बुधेः' ॥७४॥

श्रुत्वेति प्राञ्जला वृद्धा, वेगादागत्य मन्दिरम् ।
वरुणायाऽखिलं वृत्तं, तत् सहर्षमचीकथत् ॥७५॥

स तु दध्यावहो ! तस्याश्छद्मेदमतिदुर्गमम् ।
क्व स पल्लीपतौ रागः ?, क्व च कैतवगीरियम् ? ॥७६॥

चन्द्रा-ऽर्क-राहु-ताराणां, चरितं मतिशालिभिः ।
सुज्ञानं प्रमदानां तु, दुर्ज्ञानं दम्भसद्मनाम् ॥७७॥

अन्येद्युर्वृद्धया गूढं, भावं जिज्ञासमानया ।
सोचे 'स[मा]ययौ भद्रे !, प्रवृत्तिः प्रेय[स]स्तव' ॥७८॥

श्रुत्वा तन्मायिनी साऽपि, साश्रुनेत्रा ससम्भ्रमम् ।
जगाद 'सत्यमेतत् किं, प्रतारयसि वा मुधा ॥७९॥

यदि सत्यं तदा ब्रूहि, कीदृग् वार्त्ता समाययौ ?' ।
स्थविराऽब्रूत 'भर्त्ता ते, भ्राम्यति त्वां विलोकयन्' ॥८०॥

अथाऽवद**च्छीलवती**, 'भवेन्मातरदोऽपि किम् ।
दृग्भ्याममूभ्यां स प्रेयान्, कदाचिदपि दृश्यते ॥८१॥

---

१. शीलवती । २. दुःखाद् ।

अम्ब ! तत् प्रेमलेखं मे, भर्तुः सौभाग्यशेवधेः ।
मत्कार्यं हृदये धृत्वा, तूर्णं प्रहिणु तद्यथा ॥८२॥

'विप्रलम्भाग्निना दह्यमानाऽस्मि सुभगोत्तम ! ।
अद्याप्युपेक्षां तनुते, समर्थोऽपि कथं भवान् ? ॥८३॥

निष्कृत्रिमस्नेहवतीं, सम्प्राप्तां विषमां दशाम् ।
नाथ ! नो वेत्सि मां यत्तत्, प्रेम्णस्तस्योचितं किमु ?' ॥८४॥

इति प्रेमरसार्द्रां तां, वाचं श्रुत्वार्जुमनसा[1] ।
स्थविरा कुटिलं तस्या, अजानाना हृदब्रवीत् ॥८५॥

'मृगाक्षि ! त[व] स प्रेयान्, प्राप्तोऽस्ति मम मन्दिरे ।
मा स्म त्वमुद्वहः खेदमानन्दं धेहि मानसे' ॥८६॥

ततः सरभसं दानं, प्रदाय पारितोषिकम् ।
पतित्वा पादयोस्तस्याः, साऽवदच्छाठ्यशेवधिः ॥८७॥

मातर्जीव चिरं कान्तं, मम मेलय सत्वरम् ।
यथाऽङ्गे शमयामि द्राक्, तापं विरहवह्निजम् ॥८८॥

मनोऽस्त्युत्कण्ठितं बाढं, दिष्ट्या पल्लीश्वरोऽप्यसौ ।
गतोऽद्य यक्षयात्रायां, तदद्य[2] प्रियमानय ॥८९॥

ततः स्थविरया वेश्मप्राप्तया **वरुणो**ऽखिलम् ।
वृत्तं तज्ज्ञापितो बाढं, स्वचेतसि विसिष्मिये ॥९०॥

प्रदोषे वृद्धया दर्श्यमानाऽध्वा प्रस्खलत्पदः ।
विस्फुरद्वामनेत्रोऽथ, स तस्याः सदनं ययौ ॥९१॥

---

१. सरलमानसा । २. 'प्रददौ प्रियमानसे' इति पु.प्रे. ।

साऽपि वीक्ष्याऽऽगतं कान्तं, तत्र कार्यमिषाद् द्रुतम् ।
परीवारं विसृज्याऽथ, रुरोद कपटे पटुः ॥९२॥

स्थविरा तां समाश्वस्य, ययावात्मीयसद्मनि ।
भृशमाश्लिष्य कान्तं तु, परा शय्यामशिश्रियत् ॥९३॥

अत्रान्तरे तयैवाऽऽशु, पतिद्रोहपटिष्ठया ।
आह्वायितो द्वारदेशं, पल्लिनाथः समागमत् ॥९४॥

'हताऽस्मि व्यसनादस्मात्, कथं नाम च्छुटिष्यसि' ।
इत्युक्त्वा सा शठा शय्यातले का[न्तम]तिष्ठिपत् ॥९५॥

अथाऽऽश्लिष्य मुदा शय्यां, नीतः प्रेमातिरेकतः ।
पल्लीशस्तामवक् 'कान्ते !, प्रसीदाऽऽदेशदानतः ॥९६॥

विधाय यक्षयात्राया, भङ्गं कमललोचने ! ।
अहं त्वरितमेवागां, त्वदाज्ञाभङ्गभीरुकः ॥९७॥

स्वकिङ्करमिमं प्राणप्रिये ! कृत्ये नियुङ्क्ष्व तत् ।
यथैष पूरयेत् प्राणैरपि हृत्काङ्क्षितं तव' ॥९८॥

अथ दौःशील्यवसतिरवदत् सा 'न वेत्सि किम् ? ।
त्वत्सङ्गमं विना देहे, मम या वर्त्तते व्यथा ॥९९॥

स्वदेशं स्वजनांस्त्यक्त्वा, त्वयैव हृतमानसा ।
विषमायां वसाम्यस्यां, पल्ल्यां प्रेमरसोदधे ! ॥१००॥

आसे पीयूषसिक्तेव, वीक्षमाणा त्वदाननम् ।
नरकाधोगतेवैषा, तिष्ठामि पुनरन्यथा' ॥१०१॥

एवं मधुरगीःक्लृप्तप्रीतिः सा पुनरप्यवक् ।
'आयाति यदि मे भर्त्ता, तत् त्वं तस्य करोषि किम् ?' ॥१०२॥

पल्लीशोऽभ्यधिता'ऽऽहार-ताम्बूल-वसनादिभिः ।
सत्कारपूर्वमानन्दात्, त्वां तस्मै प्रददे द्रुतम्' ॥१०३॥

कुटी पापकुटुम्बस्य, विधाय भ्रकुटीं ततः ।
साऽवदत् 'प्रेमहीनानां, सीमा त्वमसि निश्चितम् ॥१०४॥

अनुरक्तस्य भक्तस्य, स्वीकृतस्य जनस्य हा ।
परिहारे रसज्ञा ते, कथं वक्तुं प्रगल्भते ? ॥१०५॥

स च त्वां यदि वीक्षेत, मद्वृत्तस्य तदा स्मरन् ।
तीव्ररोषभरापूर्णो, हन्त्येव परमो रिपुः ॥१०६॥

तत् सत्कर्त्तुं निकर्त्तुं वा, स ते युक्तिज्ञ ! युज्यते ? ।
सहन्ते क्वापि किं वीरा, मानिनो निजवैरिणम् ?' ॥१०७॥

ततः पल्लीपतिः स्माह, 'मया स्नेहभरस्य ते ।
परीक्षार्थमदोऽवादि, न तु चित्तेन तत्त्वतः ॥१०८॥

सत्यं त्विदं निरीक्षे चेत्तमरिं जीवितेश्वरि ! ।
करोमि करवालेन, तल्लूनशिरसं रयात्' ॥१०९॥

ततः सा नितरां प्रीतचेताः शय्यातलस्थितम् ।
अङ्गुल्या दर्शयित्वा तमूचे रिपुरसौ स ते ॥११०॥

ततः पल्लीपतिः सद्यः, क्रोधारुणविलोचनः ।
दत्तहक्कः कशपाशे, धृत्वा वामेन पाणिना ॥१११॥

असिना दक्षिणकरगतेन गलकन्दलम् ।
यावल्लुनाति तस्योच्चैस्तावत्पापाऽभ्यधत्त सा ॥११२॥ युग्मम् ॥

'आर्यपुत्रैकघातेन, मार्यमाणः सुखं न मे ।
विदधाति यथा दुःखमारेणाऽसौ दुराशयः' ॥११३॥

ततः पल्लीपतेराज्ञाकारकैर्यममूर्त्तिभिः ।
स्थूणायां स दृढं बद्धः, शरीरोत्कृत्तचर्मणा ॥११४॥

स्वस्थानं तेषु यातेषु, ततः सा स्वैरिणी मुदा ।
पल्लीशेन समं कामविलासान् भृशमातनोत् ॥११५॥

वरुणस्तु तथा पश्यन्, दुर्दैवस्य वशङ्गतः ।
अन्वभूदधिकं दुःखं, शरीरादपि मानसम् ॥११६॥

बीजं भवतरोर्मूलं, वैराणां पदमापदाम् ।
नार्यो नृणां भवेयुः किं, ननु निर्वृतिकारणम्[1] ? ॥११७॥

स्त्रीनिमित्तो मयाऽनर्थः, सर्वोऽयं प्रापि दुर्धिया ।
काऽधुना धर्महीनेन, गतिर्लभ्या मृतेन तु ? ॥११८॥

एवं चिन्तयतस्तस्य, निस्सीमप्रस्फुरच्छुचः ।
छिन्नो विधिवशाद्बन्धो, बान्धवैरिव मूषकैः ॥११९॥

रुषाऽथ सविधं पल्लीभर्त्तुर्गत्वा स सत्वरम् ।
तस्यैव खड्गमाकृष्येत्याक्षिपत् परुषाक्षरम् ॥१२०॥

'पुरुषाधम ! रे तूर्णमुत्तिष्ठाऽस्त्रं करे कुरु ।
निरीक्षे पौरुषं वीरम्मन्यस्य तव साम्प्रतम्' ॥१२१॥

इति ब्रुवन् द्रुतं तस्य, च्छित्त्वा खड्गेन कन्धराम् ।
भयोत्थवेपथुं[2] **शीलवतीं** रोषादभाषत ॥१२२॥

---

१. सुखकारणम् । २. भयोद्भूतकम्पाम् ।

'त्यज दृग्गोचरं पापे !, न भवस्यन्यथा ध्रुवम्' ।
साऽप्याह 'शरणं नाथ !, त्वं मे कुरु यथोचितम्' ॥१२३॥

तयाऽनुगम्यमानोऽथ, पापया स भटाग्रणीः ।
रजन्यामेव तां पल्लीं, जिहासुरचलद् द्रुतम् ॥१२४॥

तां तु पल्लीशानुचरज्ञप्तये पृष्ठतोऽध्वनि ।
वासोदशा विमुञ्चन्तीमृजुधीर्बुबुधे न सः ॥१२५॥

सरिद्भिर्गिरिभिर्वृक्षैर्विषमं पल्लिवर्त्म तत् ।
यावत् किञ्चिल्लङ्घेऽसौ, तावदन्तमगान्निशा ॥१२६॥

पृष्ठाऽऽगमिष्यत्पल्लीशभटोच्चयभयादथ ।
शीलवत्या समं क्वापि, कुञ्जे तस्थौ निलीय सः ॥१२७॥

पल्लीनाथात्मजो **व्याघ्र**नामाऽथ सुभटैर्वृतः ।
वासोदशानुसारेण, तत्र सद्यः समापतत् ॥१२८॥

प्राप्तोऽस्मि त्वदभिज्ञानप्रयोगादिह सत्वरम् ।
इति **शीलवतीं** कूटपेटां सोऽवददुच्चकैः ॥१२९॥

निघ्नंश्च **वरुणं** पापाशयया गदितस्तया ।
महारिपुममुं वत्स !, दुःखमारेण मारय ॥१३०॥

ततोऽयं खादिरैः कीलैः, सुतीक्ष्णाग्रैः भुवा समम् ।
पञ्चस्वङ्गेषु **वरुणं**, कीलयित्वा व्यमुञ्चत ॥१३१॥

तामादाय स्वयं **व्याघ्रो**, जगाम निजमन्दिरम् ।
वरुणस्तु व्यथावार्द्धिमग्नश्चेतस्यचिन्तयत् ॥१३२॥

मयाऽहो ! चतुरेणापि, मार्गे चिह्नपराऽसकौ ।
नाऽज्ञायि **कस्य वा बुद्धिः, स्फुरेद्दैवे पराङ्मुखे** ॥१३३॥

वीक्षते योजनशतात्, परतोऽप्यामिषं स्थितम् ।
शकुनो मृतिकाले तु, वधपाशं न पश्यति ॥१३४॥

सदसद्वा यथा येन, पुरा यत्कर्म निर्ममे ।
सदसद्वा तथा तेन, फलं तस्योपभुज्यते ॥१३५॥

विधीयतेऽत्र संसारे, कस्य केन शुभाशुभम् ।
कर्मैव कर्तृ व्यर्थैव, शेषस्य वचनीयता ॥१३६॥

इति तत्त्वस्मृतिं तस्मिन्, कुर्वाणे तत्र कश्चन ।
कपीश्वरः समायासीत्, परोपकृतिलालसः ॥१३७॥

तं तथास्थं स वीक्ष्याऽऽसमूर्च्छो द्राग् लब्धचेतनः ।
गत्वाऽद्रिशिखरं वेगादागा[दा]दाय मूलिकाम् ॥१३८॥

ऊर्ध्वं खादिरकीलानां, चर्बयित्वा च तामसौ ।
मुमोच तत्प्रभावाच्च, ते सर्वेऽपि विनिर्गताः ॥१३९॥

ततः संरोहिणीनाम्न्यौषध्या कपिपतिर्व्रणान् ।
संरोह्य भुवि हस्तेनाऽलिखदक्षरमालिकाम् ॥१४०॥

अहं त्वद्ग्रामवास्तव्यः, **सिद्धकर्मा**भिधो भिषक् ।
मृत्वा कर्मवशाद्भद्र !, जातोऽस्म्येष प्लवङ्गमः ॥१४१॥

त्वद्दर्शनसमुत्पन्नजातिस्मृतिरसज्जयम् ।
त्वां प्राच्यभवविज्ञातौषधीयुगलतः क्षणात् ॥१४२॥

बलिना पुनरेकेन, कपिना कपितान्तरात् ।
आगत्य यूथमधुना, त्याजितोऽस्मि नरोत्तम ! ॥१४३॥

तत् प्रसीद सपत्नं तं, विनिहत्य कपिब्रुवम् ।
विक्रमैकनिधे ! धीर !, यूथनाथं विधेहि माम् ॥१४४॥

वाचयित्वेति तं तूर्णं, पुरस्कृत्याऽऽरुरोह सः ।
करात्तकण्टकोदग्रलगुडः शिखरं गिरेः ॥१४५॥

ततः स प्लवगो वक्त्रमूर्ध्वीकृत्याऽमुचद् द्रुतम् ।
बूत्कारं पर्वतगुहोच्छलितोग्रप्रतिध्वनिम् ॥१४६॥

बूत्कारध्वनिना ते[न], दिक्चक्रे निचिते तदा ।
सातङ्काः स्वापदा वन्यास्तृणान्यौज्झन्मुखान्तरात् ॥१४७॥

अथोर्ध्वीकृतलाङ्गूलो, बूत्कारभरिताम्बरः ।
कुर्वद्भिरुपलासारं, वानराणां शतैर्वृतः ॥१४८॥

बिभ्रत् सकण्टकं दण्डं, करे कोपोच्छ्वसत्तनुः ।
सद्यः समीये तद्दर्पोन्मत्तः स कपियूथपः ॥१४९॥ युग्मम् ॥

अथोपकारिणा शाखामृगेणाऽऽलोकिताननः ।
वरुणो वैरिणं वेगाद्दण्डेन निजघान तम् ॥१५०॥

दृढेन तेन घातेन, परासौ तत्र यूथपे ।
वरुणस्य पुरोऽनृत्यत्, पूर्वः कपिपतिर्मुदा ॥१५१॥

वरुणोऽथ हरीशं तमापृच्छ्याऽतुच्छविक्रमः ।
पल्लीं तामेव भूयोऽगाद्रात्रौ केनाप्यलक्षितः ॥१५२॥

साहसैकनिधिस्तं च, हत्वा पल्लीशनन्दनम् ।
तां पापां पाणिनाऽऽदाय, केशेषु ववले बली ॥१५३॥

व्यतीते वर्त्मनोऽथार्द्धेऽन्यस्याः पल्लेरधीश्वरः ।
वीरकाख्यः **शीलवतीं**, लिप्सुस्तमरु[ण]द्रयात् ॥१५४॥

एकोऽप्यनेकान् पल्लीशसुभटान्निर्जिगाय सः ।
अन्धकारानिव रविर्मृगारातिर्मृगानिव ॥१५५॥

पल्लिनाथोऽभ्यधाद्वीर !, पौरुषं साधु साधु ते ।
किन्त्विमैर्निहतैः कीटकल्पैः किं कातरैर्नरैः ? ॥१५६॥

यदि वीरव्रतं किञ्चिदस्ति ते सुभटोत्तम ! ।
भव मे सम्मुखीनस्तद्दोःकण्डूं खण्डयाम्यरम् ॥१५७॥

ममाऽथवा रणारम्भस्त्वया सार्द्धं न युज्यते ।
त्वय्यज्ञातकुले यस्मात्, का कीर्त्तिर्विजितेऽपि हि ? ॥१५८॥

ईषद्विहस्य **वरुण**स्ततोऽवादीदुदारवाक् ।
गेहेनर्दिन् ! किमात्मानं, मुहुरेवं विकत्थसे ? ॥१५९॥

वीरव्रतं हि वीराणां, दोर्द्वये न पुनर्गिरि ।
सामर्थ्यमस्ति चेत्तर्हि, प्रहराऽपसराऽन्यथा ॥१६०॥

धीरेण वचसा तेन, तं विभाव्य नरोत्तमम् ।
पल्लीनाथोऽब्रवीद् 'भद्र !, गिरैवाऽहं जितस्त्वया ॥१६१॥

किन्तु ब्रूहि भटोत्तंस !, कोऽसि त्वं ? कुत आगतः ?।
अत्रातिविषमे पल्लीदेशे किं ते प्रयोजनम् ?' ॥१६२॥

सोऽपि पल्लीपतेरेवं, पृच्छतः प्रीतचेतसः ।
तादृक्स्वदारदौःशील्यगर्भं स्वचरितं जगौ ॥१६३॥

पल्लिनाथोऽवदद्भद्र !, दुराचाराऽसकौ त्वया ।
स्थाप्या स्वसदने नैवाऽनर्थव्यालमहा[लया] ॥१६४॥

बाह्यवृत्त्या परं प्रेम, दर्शयत्यङ्गनाजनः ।
अन्तर्वृत्त्या पुनः प्राणाऽपहृत् किञ्चन चेष्टते ॥१६५॥

दुष्टाभिप्रायता स्त्रीणां, दहनं पावकस्य च ।
विषस्य मरणं चेति, स्वभावो निरुपाधिकः' ॥१६६॥

इत्युक्त्वा पल्लिनाथेन, नीतः स्वौकसि सादरम् ।
सत्कृतः स दिनं प्रेमसंलापैरत्यवाहयत् ॥१६७॥

ततश्चापं करे बिभ्रत्, पल्लीशस्तं प्रियान्वितम् ।
उत्तार्य भीषणां पल्लीमभाषत हितं वचः ॥१६८॥

'अथाऽऽसन्नस्तव ग्रामो, वर्त्तते भद्र ! तद् व्रज ।
दुःशीलाया ममुष्यां तु, विश्वसीर्मा कदाचन ॥१६९॥

वक्ष्यति प्रेमसान्द्राणि, वचांसि विविधान्यसौ ।
त्वया तेषां प्रवेशोऽपि, न देयः श्रवणाध्वनि ॥१७०॥

पिशाच्या इव कीनाशहस्तयष्टेरिव त्वया ।
अस्या विनष्टशीलाया, भेतव्यं सुभटोत्तम ! ॥१७१॥

अशेषनीतिविज्ञस्य, यद्वाऽलं तव शिक्षया' ।
इत्युक्त्वा मोटितात्मीयचापः स क्वचनाप्यगात् ॥१७२॥

अवादीदथ तां पापां, **वरुणः** स्वजनास्तव ।
अभ्यर्णास्तत्र तद् याहि, ततः सा प्रत्यवोचत ॥१७३॥

'इहाऽमुत्र च मे त्वत्तः, परः को ज्वलनं विना ।
निजोऽस्ति प्रणयिन् ! येन, वक्ष्येवं परुषं वचः ॥१७४॥

यदि त्वमपि कौलीनं, दत्त्वा मां मुञ्चसि प्रिय ! ।
तदा निर्गमयिष्यामि, त्वत्पुरो निजजीवितम्' ॥१७५॥

इत्युक्त्वा सा तरौ क्वापि, स्वोत्तरीयेण मायिनी ।
निबध्य कण्टमात्मानं, मोक्तुं प्रारभत द्रुतम् ॥१७६॥

तां निवार्य भृशोद्विग्नमानसो **वरुणो** हृदि ।
दध्यावकृत्यखानीः स्त्रीर्धिक् प्रपञ्चद्रुमेदिनीः ॥१७७॥

ततः स्वयमयं गत्वा, तां ब[न्धू]नां समर्प्य च ।
प्रबुद्धो गुरुपादान्ते,व्रतं धृत्वा दिवं ययौ ॥१७८॥

इतश्चाऽङ्गाख्यदेशेऽस्ति, पुरं **रत्नपुरा**भिधम् ।
राट् तत्राऽ**शोकचन्द्रो**ऽस्य, **प्रियङ्गुलतिका** प्रिया ॥१७९॥

तत्कुक्षौ **वरुणो** देवभवाच्च्युत्वाऽवतीर्णवान् ।
जातश्चाऽ**शोकभद्रा**ख्यस्तनयः स्मरसुन्दरः ॥१८०॥

वर्द्धमानः क्रमादेष, कलासु प्राप्तनैपुणः ।
सुंन्दरीचित्तवातायुवीतंसं यौवनं ययौ ॥१८१॥

अन्येद्युः स वसन्तर्तुं[२]श्रीवीक्षायै चमूवृतः ।
उद्यानं प्राप्तवानेकं, वाचंयममलोकत ॥१८२॥

---

१. नारीमनमृगवीतंसम् । २. शोभादर्शनाय ।

नवे वयसि तं खड्गधारातीव्रव्रतं मुनिम् ।
वीक्ष्योल्लसितरोमाञ्चस्मेरास्यो नृपभूरभूत् ॥१८३॥

नत्वा च तं लसत्प्रीतिरपृच्छद्भगवन् ! दृशौ ।
त्वयि दृष्टेऽपि पीयूषपूरिते इव मे कथम् ? ॥१८४॥

ततो मुनिवरोऽजल्पद्, '**वरुणाह्वः** पुरा भवान् ।
दुःशीलकान्तासम्पर्कात्लेभे नानाविडम्बनाः ॥१८५॥

तदा च **वीरका**ख्यः पल्लीशस्त[त्वं] त्वदाननात् ।
ज्ञात्वा त्वां पल्लिमुत्तार्य, स्वास्त्रमामोट्य निर्ययौ ॥१८६॥

भवोद्विग्नोऽचिन्तयं च, स्त्रीषु पापास्विमासु धिक् ।
धृतरागा विरागाः स्युः, शर्महेतौ शिवश्रिये ॥१८७॥

स्त्रीषु रक्ता नराः प्रायो, नोद्यच्छन्ते सुकर्मसु ।
गणयन्ति [क]लङ्कं न, दुर्गतेर्नैव बिभ्यति ॥१८८॥

न शृण्वन्ति गुरुगिरस्त्यजन्त्युपशमश्रियम् ।
किं बहूक्त्या ? प्रवर्त्तन्ते, सर्वतोऽवद्यकर्मसु ॥१८९॥

इति ध्यायन् भृशं स्त्री-श्री-स्वजनादिषु निःस्पृहः ।
धर्मघोषाद् गुरोः प्राप्य, प्रव्रज्यां द्यां समासदम् ॥१९०॥

च्युत्वा च **पुण्डरीकिण्यां**, पुर्यामत्रैव **भारते** ।
नाम्ना **पुरन्दरदत्त**, **इन्द्रदत्तात्**मजोऽभवम् ॥१९१॥

अन्यदा यौवनं प्राप्तो, मुने**र्ऋषभसेनतः** ।
श्रुतपूर्वभवोऽगृह्णं,परिव्रज्यां विरागवान् ॥१९२॥

तत्ते **वरुण**जीवस्य, प्राग्जन्मप्रेम मां प्रति ।
इदमुल्लसति क्ष्मापतनूजेति विनिश्चिनु' ॥१९३॥

श्रुत्वेत्य**शोकभद्रो**ऽपि, जातजातिस्मृतिः क्षणात् ।
प्राग्जन्मकान्तादुर्वृत्तं, तद्विज्ञायेति दध्यिवान् ॥१९४॥

तीव्रं विषं वरं भुक्तं, प्रविष्टं पावके वरम् ।
वरं प्रपतनं कूपे, न तु स्नेहोऽङ्गनाजने ॥१९५॥

विषादिसेवया जन्मन्येकत्रैव मृतिर्भवेत् ।
स्त्रीसेवनादनन्तं तु, दुःखं वाचामगोचरम् ॥१९६॥

इति ध्यात्वा भवोद्विग्नस्तस्य पल्लीश्वरात्मनः ।
गुरोः पार्श्वे व्रतं दुःखभीतोऽसौ प्रत्यपद्यत ॥१९७॥

सोऽहं स्वगुरुणा सार्धं, विहरन् **सगरा**त्मजाः ! ।
अत्राऽऽगमं गुरुस्त्वाप, सम्प्रत्येव परं पदम् ॥१९८॥

तदयं व्रतहेतुर्मे, युष्माभिरपि संसृतिम् ।
पश्यद्भिर्भीषणां धर्मे, यतितव्यं शुभाशयाः ! ॥१९९॥

समाकर्ण्येति मुदितास्ते **जह्नु**प्रमुखा मुनिम् ।
भक्त्या परमया नत्वोत्तस्थुः स्थैर्यैकपर्वताः ॥२००॥

पुनर्दत्तप्रयाणाश्च, विविधाश्चर्यपूरिताम् ।
मेदिनीं स्वेच्छया चेरुररिंकौशिकहेलयः ॥२०१॥

यानाधिरूढैर्भूपालैः, सवयोभिः पदे पदे ।
अतोष्यन्त कुमारास्ते, नानानर्मकथादिभिः ॥२०२॥

---

१. रिपुकौशिकसूर्याः ।

भुञ्जाना विविधान् भोगान्, ददाना दानमद्भुतम् ।
अर्हदर्चा अर्चयन्तः, स्थापयन्तः स्थिरं यशः ॥२०३॥

अन्यदा स्फाटिकग्रावमयं पर्वतसत्तमम् ।
ते**ऽष्टापदा**भिधं प्रापुः, शृङ्गैरङ्गज्जिनालयम् ॥२०४॥ युग्मम् ॥

सान्द्रद्रुमावलीरम्यं, विलासार्थं स्फुरत्सुरम् ।
प्राज्यनिर्झरझात्कारध्वनिपूरितदिङ्मुखम् ॥२०५॥

चैत्यप्रणमनोत्कण्ठां, बिभ्राणैः परमां हृदि ।
सङ्कीर्णाध्वानममर-चारणश्रमणादिभिः ॥२०६॥

तमष्टयोजनोत्तुङ्गं, चतुर्योजनविस्तृतम् ।
वीक्ष्य शैलं **सुबुद्ध्या**ख्यं, ते पप्रच्छुः स्वमन्त्रिणम् ॥२०७॥

त्रिभिर्विशेषकम् ॥

दृष्टमात्रोऽपि क्षुत्तृष्णापहारी को त्वसौ गिरिः ? ।
नेत्रामृताञ्जनं चेदं, केन चैत्यं विनिर्ममे ? ॥२०८॥

उवाच सचिवोऽमुष्मिन्, **भारते वृषभः** प्रभुः ।
आद्यस्तीर्थकृतामासीदोङ्कारोऽभिजनस्य वः ॥२०९॥

शतं तस्याऽङ्गजा आसंस्तेषां तु **भरतो**ऽग्रजः ।
अयं क्रीडागिरिस्तस्य, चक्रिणो**ऽष्टापदा**भिधः ॥२१०॥

शैलेऽस्मिन्ननगाराणामयुतेन समं प्रभुः ।
ऋषभो निर्वृतिं लेभे, चतुर्दशतपःपरः ॥२११॥

ततो वर्द्धकिरत्नेन, निदेशाच्चक्रवर्त्तिनः ।
चक्रे **सिंहनिषद्या**ख्यं, चैत्यं रत्नोपलैरिह ॥२१२॥

तदेकयोजनायाममर्द्धयोजनविस्तृतम् ।
त्रिगव्यूतोन्नतं स्फारचतुर्द्वारं व्यराजत ॥२१३॥

चतुर्विंशतिसङ्ख्यानां, **वृषभा**द्यर्हतामिह ।
रत्नमय्यो व्यधीयन्त, प्रतिमाः स्फारकान्तयः ॥२१४॥

स्वस्वप्रमाणसंस्थानवर्णलाञ्छनसुन्दराः ।
ता अर्हत्प्रतिमा लभ्या, अर्चितुं भाग्यशालिभिः ॥२१५॥

स्वबन्धूनां कृताः स्तूपा, मूर्त्तयश्चाद्यचक्रिणा ।
इह शैले विलोक्यन्ते, केन पुण्योदयं विना ? ॥२१६॥

भरतेशः पदान्यष्टौ, योजनान्तरितानि यत् ।
परितोऽमुं गिरिं चक्रे**ऽष्टापदो**ऽयं तदुच्यते' ॥२१७॥

श्रुत्वेति **सगरस्या**त्मजन्मानो हर्षशालिनः ।
तस्य पूर्वजशैलस्य, शृङ्गमारुरुहुर्द्रुतम् ॥२१८॥

तत्र **सिंहनिषद्यायां**, चैत्ये ते विधिना बुधाः ।
प्रविश्याऽऽलोकमात्रेऽपि, **वृषभा**द्यर्हतोऽनमन् ॥२१९॥

ततश्च परया भक्त्या, स्नपयित्वा यथाविधि ।
समभ्यर्च्य च शुद्धान्तःकरणा इति तुष्टुवुः ॥२२०॥

सानन्दमुद्यत्पुलकैः सुपर्वराजैः समभ्यर्चितपादपद्मान् ।
जिनांश्चतुर्विंशतिमस्तदोषान्, वन्दामहे**ऽष्टापद**शैलशृङ्गे ॥२२१॥

[उपजातिवृत्तम्]

नाभेयमुख्यास्त्रिदशा(स्त्रिशला)ङ्गजन्माऽ-
न्तिमा अमात्मातिशयश्रियाऽऽद्याः ।

जपेन्दु-हेमाञ्जन-नीलरत्न-
तुल्याङ्गभासो विजयध्वमीशाः ! ॥२२२॥ संस्कृतम्॥

दुद्दप्परागाइमहागइंदघडाविणिग्घायणकेसरीणं ।
नमोऽत्थु संसारसमुद्दपारंगयाण तुम्हाण तिलोगनाहा ! ॥२२३॥ प्राकृतम् ॥

[दुर्दर्परागादिमहागजेन्द्रघटाविनिर्घातनकेसरिभ्यः ।
नमोऽस्तु संसारसमुद्रपारङ्गतेभ्यो युष्मभ्यं त्रिलोकनाथाः ! ॥२२३॥]

भीदाण भीमादु भवादु [णा]धा !, तुम्हं पय य्येव गदी नराणं ।
घोरंधयारेण विबो(मो)हिदाणं, सुय्यं विणा किं सरणं भवेज्जा ? ॥२२४॥
॥शौरसेनी ॥

[भीतानां भीमाद् भवाद् ना[था] !, युष्माकं पदमेव गतिर्नराणाम् ।
घोरान्धकारेण विमोहितानां,सूर्यं विना किं शरणं भवेत् ?॥२२४॥]

ये तुम्ह दाशा नणु ताण दाशी, शुलाशुलेशाण शिली यिणेशा ! ।
ये पुञ्ञशुञ्ञा पुण वो न दाशा, गश्चंति शच्चा हवि दाशदं ते ॥२२५॥
॥ मागधी ॥

[ये युष्माकं दासा ननु तेषां दासी,
सुरासुरेशानां श्रीर्जिनेशाः ! ।
ये पुण्यशून्याः पुनर्वो न दासा,
गच्छन्ति सत्त्वा झटिति दासतां ते ॥२२५॥]

तेसिं कतत्थं खलु जीवितव्वं, धञ्ञा य ते तान सिवं न तूरे ।
येहिं तुमानं समयो कतावि, मुचिय्यते [नो] निजमानसातो ॥२२६॥
॥पैशाचिकी ॥

[तेषां कृतार्थं खलु जीवितव्यं, धन्याश्च ते तेषां(भ्यः) शिवं न दूरे ।
यैर्युष्माकं समयः कदाऽपि, मुच्यते नो निजमानसात् ॥२२६॥]

कुना अनंता चिननायका ! वो, अम्हातिसानं पतिफा च थोवा ।
चीहा च एक्का वतने फनेतुं, तुम्हप्पभावं किमु ता तरेमो ॥२२७॥
॥ चूलिकापैशाचिकी ॥

[गुणा अनन्ता जिननायका ! वः, अस्मादृशानां प्रतिभा च स्तोका ।
जिह्वा चैका वदने भणितुं, युष्मत्प्रभावं किमु ततः शक्नुमः ? ॥२२७॥]

इह सुलहउ महीअलि कप्परुक्खु, चिंतामणि सुलहउ दलिअदुक्खु ।
तह सुलही कामदकामधेणु, पुणु दुल्लहु तुम्हहं चरणरेणु ॥२२८॥
॥अपभ्रंशः ॥

[इह सुलभो महीतले कल्पवृक्षश्चिन्तामणिः सुलभो दलितदुःखः ।
तथा सुलभा कामदकामधेनुः, पुनर्दुर्लभा युष्माकं चरणरेणुः ॥२२८॥]

म(भ)द्रालया ! भूरिदयासमुद्रा !, हे देवदेवा ! गुरुमोहपीडम् ।
समुद्धरन्तूरुगुणा भवन्तो, भीमे भवे भाविगणं कणन्तम् ॥२२९॥
॥ समसंस्कृत-प्राकृतम् ॥

तीर्थेऽष्टापदसञ्ज्ञके हरिसओ संठाविआ मेइणी-
नाधेणं भरदेण शस्तिनिहिणो सव्वेवि तित्थेशला ।
अह्मानं पनतान फत्तिफरतो पावुल्लई मूलहे,
उम्मूलेविणु दिंतु मञ्जुमहिमावासा वरं मङ्गलम् ॥२३०॥
॥ सर्वभाषाचित्रं वृत्तम् ॥

[तीथेऽष्टापदसञ्ज्ञके हर्षतः संस्थापिता मेदिनी-
नाथेन भरतेन स्वस्तिनिधयः सर्वेऽपि तीर्थेश्वराः ।
अस्माकं प्रणतानां भक्तिभरतः पापोल्लता मूलत
उन्मूल्य ददतु मञ्जुमहिमावन्तो वरं मङ्गलम् ॥२३०॥]

एवं स्तुत्वा प्रचुरपुलकोद्भेदनिर्दिग्धदेहा-
स्तेऽर्हद्गृहादथ बहिरुपागत्य कृत्यज्ञधुर्याः ।
नेमुः स्तूपान् भरतनृपतेः सोदराणामुदारा-
नन्दाः स्वीयं नरजनुरमन्यन्त धन्यं च तज्ज्ञाः ॥२३१॥ [मन्दाक्रान्तावृत्तम्]

इति श्रीपद्मप्रभाचार्यचरणराजीवचञ्चरीकश्रीदेवानन्दसूरिविरचिते श्रीअजितप्रभुचरिते आनन्दाङ्के महाकाव्ये स्त्रीदुश्चरित्रविरक्ताऽशोकभद्रऋषिचरित्रगर्भितसगरनन्दनस्वेच्छाविहारश्रीअष्टापदतीर्थवन्दनवर्णनो नाम पञ्चमः सर्गः ॥

॥ ग्रं. २३७, अ.४, आदितः ३६६१ ॥

• • •

षष्ठः सर्गः

अथ तच्चैत्यमात्मीयपूर्वजानां यशश्चयम् ।
धृताङ्गमिव निध्याय, तनुजान् **जह्नु**रूचिवान् ॥१॥

'अहो ! **भरत**वत्कापीदृशचैत्यविधानतः ।
कुर्मः कुन्दोज्ज्वलां कीर्तिं, क्षितौ वयमपि स्थिराम् ॥२॥

स्थापिते **भरतेशेन**, तीर्थेऽस्मिन्नेव वाऽधुना ।
ध्रुवपुण्याप्तये किञ्चित्, कृत्यशेषं विदध्महे ॥३॥

पर्वतोऽयं रत्नखानिः, प्रवरौषधिसङ्कुलः ।
नानारत्नम[य]श्रीमदर्हद्देहविभूषितः ॥४॥

प्रवृत्ते दुःषमाकाले, हीनसत्त्वैर्धनार्थिभिः ।
भविष्यत्पार्थिवैर्लोपं, नेष्यते पापवृत्तिभिः ॥५॥ युग्मम् ॥

तदमुष्यैव रक्षायै, यत्नः कश्चिद्विधीयते ।
त्राणं प्रत्नस्य तीर्थस्याऽधिकं यन्नूत्ननिर्मितेः' ॥६॥

इत्युक्तवानवरजैरनुज्ञातः करेऽकरोत् ।
दण्डं **जह्नु**ः सहस्रांशुरिव तेजस्विनां वरः ॥७॥

कनीयोभिः सहाऽह्याय, तं शैलं परितोऽपि सः ।
धरित्रीं दण्डरत्नेन, परिखार्थं व्यदारयत् ॥८॥

दण्डस्याऽमेयशक्तित्वाच्चक्रिपुत्रैर्महाबलैः ।
योजनानां सहस्रं भूपीठे खाते झटित्यपि ॥९॥

प्रादुर्बभूवुर्नागानां, भवनानि रजोभरः ।
विशंश्च तेषु निखिलं, नागलोकमचुक्षुभत् ॥१०॥ युग्मम् ॥

खातक्ष्माविवरैरर्कः, स्वकरौघं रसातले ।
ततान 'नाा[ग]लल[ना]तनु'स्पर्शोत्कधीरिव ॥११॥

हहा ! प्रादुरभूत् कोऽयमुत्पात इति वादिनः ।
सातङ्काः स्वस्वशस्त्राणि, बिभ्राणाः पाणिषूरगाः ॥१२॥

कोपकम्प्राधरा बाढमाकुलीभूतमानसाः ।
सत्वरं शरणं भेजुः, स्वनाथं **ज्वलनप्रभम्** ॥१३॥ युग्मम् ॥

असमञ्जसमालोक्याऽकस्मात्तत् **ज्वलनप्रभः** ।
प्रयुक्तावधिविज्ञात**सागरिभ्यो**[२]ऽकुपत्तराम् ॥१४॥

कम्पमानतनुः कोपादुर्दर्शः प्रलयाऽर्कवत् ।
झटित्यागत्य **सगरा**त्मजानेवं जजल्प सः ॥१५॥

'अनन्तजन्तुनिर्घातकारणं भूमिदारणम् ।
महापापमिदं मत्ताः, कथं कुरुथ रे जडाः ? ॥१६॥

भवद्भिर्भवनेशानां, भवनाः शाश्वता अपि ।
दण्डप्रहारतो रे रे, किं व्यधीयन्त जर्जराः ? ॥१७॥

सगरस्य तनूजानां, भ्रातृव्याणां जिनेशितुः ।
युष्माकमुत्तमानां किं, युज्यते कर्त्तुमीदृशम् ? ॥१८॥

---

१. 'नाल लातुनु' इति पु.प्रे. । २. सगरपुत्रेभ्यः ।

दुर्मदा दण्डरत्नाप्त्या, श्रीमदाद् गतबुद्धयः ।
न पश्यामि दुराचारा !, उदर्कं वः शुभावहम्' ॥१९॥

जह्नुरूचेऽथ 'नागेन्द्र !, नास्माभिरयमुद्यमः ।
उपद्रवाय युष्माकं, सदनानां विनिर्ममे ॥२०॥

किन्त्व**ष्टाप**दशृङ्गस्थं, चैत्यं पूर्वजनिर्मितम् ।
भाविदुर्गतलोकेभ्यस्त्रातुं खेयमखान्यदः ॥२१॥

वेश्मानां वः सुदूरत्वाच्छशङ्के न ह्युपद्रवः ।
अर्हद्भक्तिपराणां तद्दोषलेशोऽपि नास्ति नः ॥२२॥

अपराद्धं दण्डशक्त्या, नागनाथ ! सहस्व तत् ।
कोपं संवृणु नेदृक्षं, विधास्यामः पुनर्वयम्' ॥२३॥

जह्नुनेत्यनुनीतोऽथ, नागेन्द्रः शममाश्रितः ।
ईदृक् कृद्वं पुनर्मा स्मेत्युक्त्वाऽगात् स्वपदं द्रुतम् ॥२४॥

ऊचेऽनुजांस्ततो **जह्नुरष्टाप**दगिरेरिदम् ।
कृतं पातालगम्भीरं, खेयं नो भाति निर्जलम् ॥२५॥

रिक्तस्य पूरणं कालाद्, रजसाऽप्यस्य सम्भवेत् ।
तद् **गाङ्ग**मोघमानीयाऽम्बुनेदं पूर्यते जवात् ॥२६॥

सानन्दं सोदरै**र्जह्नु**र्जल्पितः साधु साध्विति ।
[र]या[द]दारयद्दण्डरत्नेन स्वर्नदीतटीम् ॥२७॥

रयनिर्घोषबधिरीकृतदिग्द्विरदश्रवाः ।
स्फुरदभ्रंलिहोल्लोलपटलन्यक्कृताचला ॥२८॥

मत्स्य-कच्छप-पाठीनमुख्यजन्तुकुलाकुला ।
दण्डक्लृप्ताऽध्वना प्राप, **गङ्गा** तां खातिकामथ ॥२९॥ युग्मम् ॥

पातालकल्पा योजनसहस्रद्वयसी[1] क्षणात् ।
गाङ्गैर्जलभरैर्विष्वक्, परिखेयमपूर्यत ॥३०॥

प्राग्जातैर्भूमिविवरैः, सलिलौघोऽथ भोगिनाम् ।
भवनेषु विवेशोच्चैर्जनयन् क्षोभमुल्वणम् ॥३१॥

ततस्त्राससमाकीर्णाः, पूत्कारमुखराननाः ।
नागनाथं समभ्येत्याऽभ्यधुर्**नागकुमारकाः** ॥३२॥

नाथ ! नाथ ! कुतोऽप्येष, जलराशिः प्रसृत्वरः ।
पूरयत्यहिसद्मानि, दुर्निवारः समुद्रवत् ॥३३॥

नागा इतस्ततो नष्टा, दुष्टारिष्टोल्लसद्भेराः[2] ।
एताश्च जलपूरेण, प्लाव्यन्ते नागयोषितः ॥३४॥

ततस्त्रायस्व त्रायस्व, नागान् भयविसंस्थुलान् ।
समर्थोऽपि कथं नामाऽसमर्थ इव तिष्ठसि ? ॥३५॥

नागेश्वरोऽव[द]त् क्रोधाद्, भ्रकुटीभीषणालिकः ।
'मन्ये दुश्चेष्टितमिदं, **सगरस्य** तनूभुवाम् ॥३६॥

रजोभरप्रपातेन, पूर्वं यद्विहितागसः ।
मया न शिक्षिता एते, तदेवं दुर्मदा व्यधुः ॥३७॥

सामाऽयोग्यानिमांस्तातलक्ष्मीप्राग्भारगर्वितान् ।
द्राग्दण्डविषयीकुर्वे, महामन्तुविधायिनः' ॥३८॥

इत्युक्त्वा त्वरितं दृष्टिविषकुण्डलिभिः समम् ।
निरगादौर्व[3]वद्वार्धेः, पाताला[ज्ज्व]लनप्रभः ॥३९॥

---

१. योजनसहस्रप्रमाणा । २. भयाः । ३. वडवाग्निवत् ।

तेनाऽर्कमण्डलेक्षोग्रदृग्विषेण विलोकिताः ।
बभूवुर्भस्मसात् षष्टिः, सहस्राः **सगरात्मजाः** ॥४०॥

सद्यः सनागे नागेशे, पातालं प्राप्तवत्यथ ।
स्कन्धावारान्तरे हाहारवः प्रादुरभूद् गुरुः ॥४१॥

तदा मूर्च्छावशाल्लुप्तचेतना अभवन् जनाः ।
दुरध्वगकुमारानुयातप्राणा इव क्षणात् ॥४२॥

क्रमाद्विगतमूर्च्छास्ते, शोकप्राग्भारपीडिताः ।
एवं तारस्वरं चक्रुर्विलापान् श्रुतिदुःखदान् ॥४३॥

रे दैव ! किमकाण्डेऽपि, युगपन्नः प्रभोः सुतान् ।
समहार्षीर्महापाप !, निष्कृपानां शिरोमणे ! ॥४४॥

चेत् संहृता अमी तत् किं, वयं मुक्ता दुराशय ! ।
प्रभुनाशे सहायानां, हासायैव [हि] जीवितम् ॥४५॥

हा नाथा ! क्व गता यूयं, मुक्त्वाऽस्मान् शरणोज्झितान् ।
न किं प्रत्युत्तरं दद्ध्वे, भक्तानामनुजीविनाम् ॥४६॥

युष्मान् विना गतान् [१]नोऽद्य,दृष्ट्वा चक्री विरङ्क्ष्यते ।
विहास्यति च निःसत्त्वानथवा निग्रहीष्यति ॥४७॥

[२]नागाप[श]द ! दग्ध्वा नः, स्वामिनः श्वानवच्छलात् ।
क्व नंष्ट्वा यासि युद्धाय, प्रगुणीभव दुर्मते ! ॥४८॥

इत्थं [३]वरूथिनीनाथ-सामन्ताद्याः स्फुरच्छुचः ।
शिरो-हृदादि निघ्नन्तो, व्यलपन् विविधोक्तिभिः ॥४९॥

---

१. अस्मान् । २. नागाधम ! । ३. सेनाधिपतिः ।

अन्तःपुरस्त्रियोऽप्येवमुद्दिश्य स्वस्ववल्लभान् ।
व्यलपन् बाष्पधाराभिः, पूरयन्त्यः सुरापगाम् ॥५०॥

हा जीवितेश ! हा सोमद्युतिद ! प्रगुणोच्चय ! ।
हा सौम्यैकसदन ! [क्व], क्वाऽसि हा मदनद्युते ! ॥५१॥

देहि प्रतिवचः प्रेयन् !, किं न जानास्यमुं जनम् ।
प्राणप्रियं महादुःखाकूपारावर्त्तपातिनम् ॥५२॥

पक्वित्रमैर्वारुफलवत्[1], स्फुट रे हृदय ! द्विधा ।
रे रे जीवित ! निर्गच्छाऽनुगच्छाऽधिपतिं स्वकम् ॥५३॥

दैव ! प्रेयोवियोगेऽस्मान्, द्रुतं संहर संहर ।
धर्त्तुं क्षणमपि प्राणान्, शक्नुमोऽतः परं न हि ॥५४॥

दावाग्नि ! त्वमिह प्रादुर्भूय भूयः शिखाकुलः ।
प्रियं नोऽनुयियासूनां, कुरु साहाय्यकं जवात् ॥५५॥

पत वाऽस्माकमुपरि, निर्विलम्बं तडिल्लते ! ।
सरिद्वरेऽथवोत्प्लुत्य, जलैर्नः प्लावयोद्धतैः ॥५६॥

एवं रुदत्यो विविधं, सुदत्यस्ता उरःस्थलम् ।
आजघ्निरे दृढं मुक्तास्रजं चाऽत्रोटयन् रयात् ॥५७॥

इतरानप्यलङ्कारान्, व्यक्षिपंस्ताः समन्ततः ।
बाष्पौघार्द्रां भुवं चाऽशोषयन्निःश्वासवायुभिः ॥५८॥

शोकाब्धिरेवमुद्वेलः, प्रसरन् रुदितस्वरैः ।
व्यानशे सर्वतोऽप्याशु, पक्षि-द्रुम-मृगानपि ॥५९॥

---

१. पक्वचिर्भटकफलवत् ।

विच्छाये निखिले सैन्ये, कार्यमूढेषु मन्त्रिषु ।
सुबुद्धिः सचिवो धैर्यमालम्ब्य प्रोचिवानथ ॥६०॥

'भो भो ! अरण्यरुदितेनैतेनाऽलं यतो विधिः ।
परिस्फुरन् सुदुर्वारः, शक्राद्यैरपि सर्वथा ॥६१॥

नैते चक्रिसुताः शोच्या, नश्वराङ्गव्ययेन यैः ।
तीर्थं सुरक्षितं कृत्वा, स्थेयं सुकृतमर्जितम् ॥६२॥

अथाऽस्माकं रयागच्छज्जाह्नवीजलसङ्कुले ।
सप्रत्यूहे प्रदेशेऽत्र, स्थातुं नो युज्यते क्षणम् ॥६३॥

तदद्यैवाऽमुतो देशात्, प्रयाणं प्रवितन्यताम् ।
गत्वा च स्वामिने हस्ति-तुरगाद्यं समर्प्यताम् ॥६४॥

ततोऽस्मासु प्रभुः किञ्चिद्यत् करोति करोतु तत् ।
न नः कर्तुं ततां चिन्तां, साम्प्रतं खलु साम्प्रतम्' ॥६५॥

इत्यमात्यवचो युक्तं, मन्वाना निखिला अपि ।
सामन्ताद्या गतोत्साहाः, प्रयाणकमकल्पयन् ॥६६॥

म्लाननना **अयोध्यायाः**, प्राप्योपान्तभुवं च ते ।
निषद्यैकत्र सम्भूयाऽमन्त्रयन्तेतरेतरम् ॥६७॥

भक्ताः शक्ताः पुरा दृष्टसारा इति महीभुजा ।
ससम्मानं समादिष्टा, वयं सार्द्धं तनूरुहैः ॥६८॥

गत्वा च तान् विनाऽद्याऽऽस्यं, दर्शनीयं कथं प्रभोः ? ।
वक्तव्या वा कथं पुत्रवार्त्तेयं सहसेदृशी ? ॥६९॥

तदस्माकं कुलीनानां, तत्र गन्तुं न युज्यते ।
[युज्यते] त्वनुगन्तुं तान्, स्वप्रभून् मृत्युसाधनात् ॥७०॥

क्रियते ज्वलने वारिपूरे वा तत् प्रवेशनम् ।
उदरे वा क्षुरीक्षेपः, कण्ठे वा खड्गवाहनम्[१] ॥७१॥

उद्बध्यते तरौ वाऽऽत्मा, यदि वा पत्यते भृगोः ।
न तु भूमीपतेः स्वास्थ्यं, मलिनं खलु दृश्यते ॥७२॥

किञ्च मृत्युं स्वपुत्राणां, श्रुत्वा चेच्चक्रवर्त्त्यपि ।
प्राणानुज्झति दुःखार्त्तो, मृत्युरेव तदाऽपि नः ॥७३॥

इत्यनल्पविकल्पौघव्याकुलान् मृतिमिच्छतः ।
तानवादीत् तदैवैतं[२], एकः कषायभृद् द्विजः ॥७४॥

'यदि षष्टिः सहस्रा भो !, मृता वः स्वामिनोऽङ्गजाः ।
तद्विषादनिषादः[३] किं, प्रविवेश हृदालयम् ? ॥७५॥

न ह्येतन्नूतनं किञ्चित्, प्रकृत्या भङ्गुरे भवे ।
यत् **संयोगो वियोगान्तो, मरणान्ता तथा जनिः** ॥७६॥

उपायानां खलु शतैरपि नो रुध्यते मृतिः ।
रुध्यते यदि तद्याताः, शक्र-चक्र्यादयः क्व ते ॥७७॥

युगपन्मरणेऽप्येषां, न हि कश्चन विस्मयः ।
कर्मणां हि परिणामान्नास्ति तद्यन्न जायते ॥७८॥

ध्रुवभाविनि मृत्यावुद्भूते [भो] धीरबुद्धयः ! ।
शुचं त्यजत नो प्रत्यावर्त्तन्ते हि मृताः शुचा ॥७९॥

चक्रिणोऽपि पुरो वक्ष्याम्येत[द्] युक्तं यथा तथा ।
न स शोकाम्बुधौ मङ्क्ता, त्यजताऽऽकुलतां ततः' ॥८०॥

---

१. वहनमेव वाहनम् । प्रज्ञादित्वात् सि.है.-७-२-१६५-सूत्रेण स्वार्थेऽण्प्रत्ययः इति शब्दप्रभेदे २।२ । २. आगतः । ३. खेदचण्डालेन ।

एवमाश्वास्य तानध्वस्थितं किञ्चिदनाथकम् ।
आदाय मृतकं सोऽगा**द्विनीतां** नगरीं द्विजः ॥८१॥

आस्थानमण्डपासीने, चक्रिण्यथ स वाडवः ।
द्वारे स्थित्वोद्ध्वदोर्दण्डः, पूत्कृतिं तेनिवानिति ॥८२॥

हताऽशेषरिपुव्यूह !, प्रीणिताऽशेषमार्गण ! ।
नमितानेकगीर्वाण !, नीतिगङ्गाहिमालय ! ॥८३॥

भवता रक्षितेऽमुष्मिन्, **भारते** सकले प्रभो ! ।
हहा ! निर्नायक इव, मुषितो मुषितोऽस्म्यहम् ॥८४॥ युग्मम् ॥

निशम्याऽश्रुतपूर्वं तद्, द्वारपालं नृपो जगौ ।
'जानीहि किं रवीत्येष, यदि वाऽत्र प्रवेशय' ॥८५॥

अथैत्य द्वारपालेनाऽनुयुक्तोऽयं मुहुर्मुहुः ।
तथैव पूत्कृतिं बाढमशृण्वान इव व्यधात् ॥८६॥

द्वारपालः पुनः प्रोचे, 'किमकर्णोऽस्यहो द्विज ! ? ।
यत् परित्यज्य पूत्कारं, न शृणोसि हितां गिरम् ॥८७॥

धन्योऽसि त्वं गृहे तेऽद्योद्गतः कल्पतरुर्ध्रुवम् ।
प्रसूता कामधेनुर्वा, चिन्ताश्मा वा [स]मागतः ॥८८॥

यत् स्वयं **सगर**श्चक्री, भवद्दुःखेन दुःखितः ।
कृपाम्बुधिर्मदास्येन, हेतुं दुःखस्य पृच्छति ॥८९॥

पुरतो मम तद् ब्रूहि, स्वकीयं दुःखकारणम् ।
यदि वा स्वयमागत्य, भाषस्व नृपतेः पुरः' ॥९०॥

श्रुत्वेति बाष्पसंरुद्धलोचनः प्रस्खलत्पदः ।
विलुलन्मूर्द्धजो म्लाननानः क्षामकपोलकः ॥९१॥

स द्विजो वेत्रिणा सार्धं, संसदं चक्रवर्त्तिनः ।
प्रविवेश चक्रिणाऽपीत्यपृच्छ्यत कृपालुना ॥९२॥ युग्मम् ॥

'वस्त्र-काञ्चन-रत्नादि, किञ्चित् ते केनचिद्धृतम् ? ।
न्यासापलापात् केनापि,पापिना पीडितोऽसि वा ? ॥९३॥

ग्रामारक्षादिना केनाऽप्यर्दितोऽस्यथवा वृथा ? ।
केनचिद्वा पराभूतो, दारोपप्लवकारिणा ? ॥९४॥

केनाऽप्यरिणा [वा] दूनो ?, व्याधिना बाधितोऽसि वा ? ।
नैःस्वेनोपद्रुतः किं वा ?, यद्वाऽन्यद् दुःखकृद्वद' ॥९५॥

ततः स ब्राह्मणोऽश्रान्तमलीकाश्रुप्लुताम्बकः ।
विमुञ्चन् दीर्घनिःश्वासान्नृपमूचे कृताञ्जलिः ॥९६॥

'राजन्वत्यां त्वया चक्रिन्नमुष्यां भरतावनौ ।
कृष्णाहिवत् परद्रव्यं, जना नै[व] स्पृशन्त्यपि ॥९७॥

कश्चिन्नाऽपह्नुते न्यासं, गुरुं स्वमिव सन्मतिः ।
ग्रामारक्षादयः स्वीयाऽपत्यवत् पान्ति च प्रजाः ॥९८॥

पराङ्गना मातृ-स्वसृ-तनयोपमयाऽखिलः ।
त्वद्राज्ये मनुते लोको, धत्तेऽरित्वं च कोऽपि न ॥९९॥

भीतास्त्वत्तोऽरय इव, रुजोऽपि प्रलयं गताः ।
दारिद्र्यं तव दानेन, नाशितं भुवनादपि ॥१००॥

न कश्चिद् दुःखितो लोके, त्वन्महिम्ना महीपते ! ।
वर्जयित्वा तु मामेकममुं दुर्दैवदूषितम् ॥१०१॥

---

१. दारिद्र्येण ।

अवन्तिदेशेऽश्वभद्रनामग्रामकृतस्थितिः ।
अग्निहोत्ररतोऽस्म्येष, बांडवो भरताधिप ! ॥१०२॥

पुत्रं प्राणप्रियं पत्न्याः, पार्श्वे मुक्त्वाऽन्यदा मुदा ।
विशेषविद्याऽवाप्त्यर्थं, ग्रामान्तरमयासिषम् ॥१०३॥

तत्राऽधीयानमन्येद्युर्भेजे मामरतिर्भृशम् ।
अनिमित्तेन तेनाऽतिक्षुभ्यन् स्वं ग्राममागमम् ॥१०४॥

सूचिताऽमङ्गलोऽनेकैर्दुर्निमित्तैर्गृहं गतः ।
प्रियां हा पुत्र ! हा पुत्रेत्याक्रन्दन्तीं निरैक्षिषि ॥१०५॥

मृत्युं पुत्रस्य निश्चित्य, मूर्च्छितोऽथ परासुवत् ।
पतितः पृथिवीपीठे, चिराच्चैतन्यमाप्नुवम् ॥१०६॥

प्रलपन्नथ गेहान्तः, सर्पदष्टमिमं सुतम् ।
वीक्ष्योद्वेगं चिरं धृत्वा, हृदयेन व्यभावयम् ॥१०७॥

सर्वार्थघातिनं शोकं, विमुच्य स्वाङ्गजन्मनः ।
जीवनाय तनोम्येष, उपायं लघु कञ्चन ॥१०८॥

उपायः कोऽस्ति हुं ज्ञातं, षट्खण्डभरताधिपः ।
किङ्करीकृतगीर्वाण-विद्याधर-नरोच्चयः ॥१०९॥

समस्ति **सगर**श्चक्री, दीनानाथैकबान्धवः ।
तमाश्रयामि विपदामसाधारणमौषधम् ॥११०॥ युग्मम् ॥

जीवयित्वा स मे पुत्रं, दुःखस्यान्तं विधास्यति ।
आश्रितस्य हि कल्पद्रुं, कुतः स्यादातपव्यथा ? ॥१११॥

---

१. ब्राह्मणः । २. अपशकुनेन ।

इति सञ्चिन्त्य पृथ्वीश !, त्वामस्म्येष उपस्थितः ।
प्रसीद जीवय प्राणप्रियं पुत्रममुं मम' ॥११२॥

अथाऽऽदिष्टैर्नरेन्द्रेण, [1]नरेन्द्रैर्मन्त्रकौशलम् ।
प्रयुक्तं तत्र बहुधाऽभूद्वृथोषरवृष्टिवत् ॥११३॥

ततो जाङ्गुलिकाः खिन्ना, जगदुर्जगतीपतिम् ।
'देव ! व्यापन्न एवायं, [2]यतित्वा खलु तद्वृथा' ॥११४॥

चक्री विप्रमुवाचाऽथ, 'त्वत्पुत्रो मान्त्रिकोत्तमैः ।
अमीभिरपि नाऽजीवि, यदि तत् किं विधीयते ?' ॥११५॥

श्रुत्वा तद्दुःश्रवं भूपवचो विप्रः सगद्गदम् ।
जगाद 'पुण्यहीनानामवधिर्वरिवर्त्म्यहम् ॥११६॥

यत्त्वं समस्तभूनाथो, [3]दैन्यहा दीनदेहिनाम् ।
शरण्यः शरणेच्छूनां, सुररत्नसमोऽर्थिनाम् ॥११७॥

आश्रितोऽपि मया प्रोद्यद्गुर्वाशेन न रक्षसि ।
गृह्यमाणं कृतान्तेन, स्वामिन्नन्दनमेककम् ॥११८॥ युग्मम् ॥

प्रसीद पुत्रशोकाब्धौ, मज्जन्तं मां समुद्धर ।
त्वमप्युपेक्षसे चेत्तद्, हा हतोऽस्मि हतोऽस्मि [हा]' ॥११९॥

इति श्रुतवचाश्चक्री, तद् दुःखेनाऽतिदुःखितः ।
भूयोऽपि विषवैद्यानामाननानि [नि]रैक्षत ॥१२०॥

अथ तेऽचिन्तयन् दीनं, विविधं जल्पताऽमुना ।
द्विजन्मनाऽवनीनाथो, विदधे कुण्ठितोत्तरः ॥१२१॥

---

१. जाङ्गुलिकैः । २. यतित्वा खलु-यतनीयं न इत्यर्थः, निषेधे० (सि.है. ५।४।४४।) इति सूत्रेणाऽयं प्रयोगः । ३. दैन्यनाशकः ।

परासुश्चैष नो जीवयितुं शक्यः कथञ्चन ।
तदुपायेन केनापि, बोध्योऽयं जडधीर्द्विजः ॥१२२॥

इत्यालोच्य तमाहुस्ते, 'विपन्नो यत्र कोऽपि न ।
रक्षामानय तस्माद्भोः !, कुतश्चिन्मङ्गलौकसः ॥१२३॥

यथा ते नन्दनं विप्र !, गतप्राणमपि क्षणात् ।
प्राणयामश्चिकित्सा हि, न सिध्येद्भेषजं विना' ॥१२४॥

नृपादेशादथ द्वाःस्था, **विनीतायां** समन्ततः ।
अन्यत्रापि च पप्रच्छुर्मङ्गलौकस्तथाविधम् ॥१२५॥

हस्यमाना जनैस्तादृगलब्ध्वा मन्दिरं च ते ।
प्रत्यागत्य नृपं क्लृप्ताञ्जलयोऽथ व्यजिज्ञपन् ॥१२६॥

देव ! प्रतिगृहं लोकः, सङ्ख्यातीतान् मृतिं गतान् ।
ब्रवीति विद्यते तस्मान्न मङ्गलगृहं क्वचित् ॥१२७॥

जजल्पाऽथ नृपो विप्रं, 'रक्षा मङ्गलसद्मनः ।
त्वत्पुत्रजीवनायोच्चैर्जायुराख्यायि मान्त्रिकैः ॥१२८॥

मङ्गलौकस्तु नास्त्येव, यतोऽस्यां **भरता**वनौ ।
समस्तेष्वपि गेहेषु, गेहमस्माकमुत्तमम् ॥१२९॥

अस्मिन् कुलकराः सप्त, क्लृप्त[1]सहा-मादिनीतयः ।
समजायन्त **विमलवाहना**द्याः पुरा किल ॥१३०॥

ते च सर्वेऽपि काल[2]ेन, काल[3]ेन कवलीकृताः ।
ततश्चाऽभून्**मरुदेवा**कुक्षिभून्**र्नाभिनन्दनः** ॥१३१॥

---

१. कृतहाकार-माकारादिनीतयः । २. समयेन । ३. यमदेवेन ।

अनन्तविज्ञाननिधिः, सुरासुरनमस्कृतः ।
प्रथमस्तीर्थनाथानां, भगवा**नृषभ**प्रभुः ॥१३२॥

विपन्नः सोऽपि कालेन, तस्य ज्येष्ठः सुतस्ततः ।
आदिमश्चक्रिणामासीद्, **भरतो** नाम विश्रुतः ॥१३३॥

सोऽपि प्राप्तः परं लोकममुष्याऽवरजोऽपि च ।
बली **बाहुबलिः** स्थेयोभावं नो भेजिवान् भुवि ॥१३४॥

नाम्नाऽऽ**दित्ययशा** आसीत्, सूनु**र्भरत**चक्रिणः ।
महायशास्ततश्चाऽभूत्, ततोऽप्य**तिबलो** नृपः ॥१३५॥

ततः परं **बलभद्रो**, **बलवीर्या**भिधस्ततः ।
कीर्त्तिवीर्यो जलवीर्यो, **दण्डवीर्य**स्ततः क्रमात् ॥१३६॥

एतेऽष्टौ भरतार्द्धस्य, शासितारो महौजसः ।
अर्हद्व्यूढोष्णीषधरा, अप्यासन् मृत्युगोचराः ॥१३७॥

ततः परं परे केऽपि, शिवं केऽपि दिवं पुनः ।
सङ्ख्यातीता महीनाथाः, शिश्रियुः कालधर्मतः ॥१३८॥

जितशत्रुः शिवं प्राप, **सुमित्र**स्त्रिदिवं तथा ।
तन्ममापि गृहे कालान्नाऽवशिष्टोऽस्ति पूर्वजः ॥१३९॥

यज्जानीहि द्विजोत्तंस !, मङ्गलौकोऽस्ति न क्वचित् ।
सर्वसाधारणं मृत्युं, सहस्व स्वाङ्गजन्मनः ॥१४०॥

न मन्त्रा मणयो नापि, नौषधानि न बुद्धयः ।
न शस्त्राणि न शौर्यं च, कृतान्ते प्रभवन्त्यहो ! ॥१४१॥

न महाब्धौ न पाताले, न वा गीर्वाणवेश्मनि ।
न कान्तारे न विवरे, छाद्यतेऽस्मात् कृतान्ततः ॥१४२॥

न बालं न जराक्रान्तं,न युवानं न [लं][1]क्ष्मणम् ।
न निःस्वं वा जहात्येष,समवर्त्ती सुदारुणः ॥१४३॥

यद्यनन्तेन कालेनाऽनन्ताश्चक्र्यादयोऽपि ते ।
मृत्युना संहृतास्तत् किं, शोचस्येकं मृतं सुतम् ? ॥१४४॥

किञ्चाऽसौ मे पिता माता, सोदरस्तनुजोऽथवा ।
इति च्छिद्रेण शोकोऽयं, विशन् वार्यो विवेकिना ॥१४५॥

पादपे पक्षिण इव, वेश्मन्येकत्र देहिनः ।
केनापि कर्मयोगेन, संसारेऽस्मिन् मिलन्ति यत् ॥१४६॥

स्वस्वकर्मवशात् काले, गच्छन्ति च पृथक् पृथक् ।
विधातुं तत्र धीराणां, खेदः किं नाम युज्यते ? ॥१४७॥

वैराग्यभावनां नावमिवाश्रित्य द्विजाग्रणीः ! ।
सद्यस्त्वमुद्धराऽऽत्मानं, मज्जन्तं शोकसागरे' ॥१४८॥

द्विजन्माऽथाऽभ्यधाच्चक्रिन्नद्य मे पुत्रशोकतः ।
विदतोऽपि भवस्येदं, सं[२]तत्त्वं मङ्क्षु विस्मृतम् ॥१४९॥

धीरतां क इवोर्वीश !, न जहाति शुचाकुलः ।
न हि कल्पान्तवातेन, न कम्पन्तेऽचला अपि ? ॥१५०॥

धीरस्त्वमिव नो नाथ !, कोऽप्यस्ति जगतीतले ।
न हि स्थिरो मेरुरिव,वर्ण्यते क्वापि कश्चन ॥१५१॥

जैनवाक्यामृतास्वादध्वस्तमोहोऽधुना भवान् ।
मां प्रबोधितवान् साधु, साधु शोचनविह्वलम् ॥१५२॥

---

१. लक्ष्मीवन्तम् । 'लक्ष्मीवान् लक्ष्मणः श्लीलः' इति अभि.चिन्ता. श्लो.३५७ ।
२. स्वरूपम् ।

त्वयाऽप्यजिततीर्थेशभ्रात्रा भर्त्तर्विवेकिना ।
वैराग्यभावना नैव, त्याज्या स्वैव्यसनोदये ॥१५३॥

यतः कालोऽसकौ रङ्कं, चक्रिणं चाऽविचिन्तयन् ।
प्राणान् पुत्रादिकमपि, हरत्येवाऽकुतोभयः ॥१५४॥

यथा च चक्रभृत् स्वस्या, विपुलर्द्धेः परिक्षये ।
बाढं शोचति रङ्कोऽपि, स्वीयाल्पर्द्धेस्तथा क्षये ॥१५५॥

न शोचिष्यामि पुत्रस्यैकस्य नाशे धियां निधे ! ।
मा शोचीत् षष्टिसहस्रपुत्रनाशे भवानपि' ॥१५६॥

इति द्विजन्मनोऽकाण्डाऽशनिपातनिभं वचः ।
श्रुत्वा यावन्महीशो ! हा, किमेतदिति दध्यिवान् ॥१५७॥

तावत् प्राक्कृतसङ्केताः, संव्यानस्थगिताननाः ।
अश्रुस्तिमितभूपीठाः, कुमारोपान्तवर्त्तिनः ॥१५८॥

सामन्ता-ऽमात्य-सेनानीप्रमुखाः प्रस्खलत्पदाः ।
हाहारवं प्रकुर्वाणाः, प्राप्ताश्चक्रभृतः सदः ॥१५९॥ युग्मम् ॥

प्रणम्याऽवाङ्मुखेष्वेषु, यथास्थानं स्थितेष्वथ ।
कुमाराऽनीक्षणाद्विप्रगिरं संवादिनीं स्मरन् ॥१६०॥

सद्यश्चक्री दृढं वज्राहतवत् स्थम्भिताङ्गवत् ।
सुप्तवन्मत्तवच्छून्यो, वैवर्ण्यं प्रत्यपद्यत ॥१६१॥ युग्मम् ॥

धैर्यं तथा त्यजन्तं तं, प्रबोधयितुमादृतः ।
विप्रः प्रोवाच 'किं चक्रिंस्त्वमप्येवं विमुह्यसि ॥१६२॥

१. स्वदुःखोदये ।

पृथग्जन इव क्ष्माप !, भ्रश्यद्धैर्य ! स्वपूर्वजम् ।
ऋषभेशं भ्रातरं चा**ऽजितेशं** मा स्म लज्जय' ॥१६३॥

राजा दध्यौ स्वपुत्रान्तमिषादेष द्विजो ध्रुवम् ।[1]
दुर्वचं सूचयामास, ममाऽशेषसुतक्षयम् ॥१६४॥

किन्तु तेषां कुमाराणां, महारत्नविराजिनाम् ।
भुजौजसाऽप्यजय्यानां, केन नाशो विधीयते ? ॥१६५॥

ध्यात्वेति भूमिनाथेन, पृष्टाः किमिदमित्यथ ।
शशंसुः सचिवाद्यास्त**ज्ज्वलनप्रभ**चेष्टितम् ॥१६६॥

राजा राज्ञ्यश्च तच्छ्रुत्वा, न्यपतन् मूर्च्छिता भुवि ।
कथञ्चिल्लेभिरे शीतोपचारैश्चेतनां ततः ॥१६७॥

राज्ञ्यः स्वाङ्गभुवां ग्राहं, ग्राहं गुणपरम्पराम् ।
रुरुदुर्विलुलत्केशकलापान्तर्हिताननाः ॥१६८॥

आत्मरक्षाः प्रतीहाराः, सौविदा वारयोषितः ।
चेटाश्चेट्यश्च पूत्कारैः, पूरयन्ति स्म रोदसी ॥१६९॥

राज्ञीवद्भूपतिरपि, त्यक्तधैर्यस्ततो भृशम् ।
दीर्घनिःश्वासं मुक्त्वाऽरं, विललापेति विह्वलः ॥१७०॥

'हे कुमारा ! निजं तातं, विरहार्त्तिप्रपातिनम् ।
आगत्योद्धरत क्षिप्रं, गता यूयं क्व दूरतः ? ॥१७१॥

सुतास्तातस्य वात्सल्येऽपीक्षिता कापि खण्डना ।
यद् वो लब्धापमानानामिव कश्चिन्न वक्त्यपि ॥१७२॥

---

१. **स्वपुत्रमरणमिषात् ।**

रे दैव ! मदनाकारा, हारा भूमिमृगीदृशः ।
आः ! कुमाराः कथङ्कारं, युगपत् संहृतास्त्वया ॥१७३॥

नागब्रुव ! महापाप !, ममैषां तनुजन्मनाम् ।
एकस्मिन्नपि नाऽऽसीत्ते, किं कृपा क्रूरतावधे ! ॥१७४॥

हा सेनानीर्वर्द्धके ! हा, हा पुरोधो ! गृहेश ! हा ।
कुमाराणां परित्राणे, प्रयातं तद्बलं क्व वः ? ॥१७५॥

गजरत्न ! वाजिरत्न !, चक्र-दण्डा-ऽसयः ! किमु ।
दैवे पराङ्मुखे यूयमप्यभूत तथाविधाः ॥१७६॥

मणे ! काकिणि ! हा चर्म !, च्छत्र ! युष्मासु सत्स्वपि ।
कुमारा नागखेटेन, तेन व्यापादिता कथम् ? ॥१७७॥

पौरुषेणापि महता, साम्प्रतं किं करोम्यहम् ? ।
न हि प्राणन्ति मे पुत्राः, सगोत्रेऽप्युरगे हते ॥१७८॥

हा वत्सा ! **ऋषभ**स्वामिवंशेऽमुष्मिन् सुनिर्मले ।
अभूतपूर्वमीदृक्षं, कथं मृत्युमवापत ? ॥१७९॥

यो वः स्वेच्छाविहारेऽभू**द्धारते** [तु] मनोरथः ।
तमसम्पूर्य हा ! कस्मात्, स्वर्विहारे व्यधायि सः ॥१८०॥

राज्यश्रियोऽधुना यूयं, धुर्यतां समुपागताः ।
हताश्च युगपद्दुष्टविधिना निर्दयेन हा ! ॥१८१॥

युष्मान् विनाऽद्य मे राज्यश्रिया किं निधिभिः कृतम् ।
अलं चक्रादिकै रत्नैरेभिर्भ[व]तु चाऽसुभिः' ॥१८२॥

एवं विलापिनं मूर्च्छां, गच्छन्तं च मुहुर्मुहुः ।
चक्रिणं स द्विजोऽवादीददीनवचनस्थितिः ॥१८३॥

'नरनाथ ! यथा त्वं मामन्वशा अधुनैव हि ।
तथाऽनुशाधि स्वात्मानं, मा मुहः सत्त्वसेवधे ! ॥१८४॥

यस्य भ्राताऽ**जितस्वामी**, जँगन्मोहतमोरविः[1] ।
तस्य ते बोध्यमानस्य, परैर्नाऽपत्रपा किमु ? ॥१८५॥

संसारं स्वयमेवामुं, वेत्स्यसारतरं ततः ।
तवाग्रे किं वयं ब्रूमः, सारासारविवेचक ! ? ॥१८६॥

पितृ-मातृ-स्वसृ-भ्रातृ-पुत्र-पुत्र्यादयो ह्यमी ।
सम्बन्धाः स्वप्नदृष्टाभा, मन्यन्ते तत्त्ववेदिभिः ॥१८७॥

विवेकिन् ! मुञ्च तच्छोकं, धीरतामुररीकुरु ।
जीवन्ति च म्रियन्ते च, देहिनः स्वस्वकर्मभिः' ॥१८८॥

एवं तत्त्वमयैर्विप्रवाक्यैर्बोधं क्षणं नृपः ।
क्षणं च पुत्रपञ्चत्वस्मृत्या मोहमशिश्रियत् ॥१८९॥

ततः **सुबुद्धि**मन्त्रीन्दुर्गिरा पीयूषतुल्यया ।
भूपस्य खेदगरलं,तीव्रं भेत्तुं प्रचक्रमे ॥१९०॥

'धर्त्तुं विधुरता नो ते, युज्यते व्यसने प्रभो ! ।
न हि क्वचित् समुद्रोऽपि, मर्यादां लङ्घते निजाम् ॥१९१॥

अन्यच्च महतामेवाऽऽपदो नाऽमहतां पुनः ।
ग्रस्यते राहुणा पुष्पदन्तावेव न तारकाः ॥१९२॥

महतां विकृतिं कर्त्तुं, शक्तः कालोऽपि नो पुनः ।
शिशिरोऽपि न शैशिर्यं, विदधाति विभावसोः ॥१९३॥

---

१. जगतां मोहान्धकारनाशने सूर्यसमः ।

सुधियां बोधतां चाऽस्मिन्, भवे सर्वं चलाचलम् ।
कुतः शोकपिशाचस्याऽवकाशोऽपि हि सम्भवेत् ?' ॥१९४॥

एवं मन्त्रिगिरा जाग्रद्विवेकः शोकवर्जितः ।
सगरोऽवोचत गिरं, भवनिर्वेदबन्धुराम् ॥१९५॥

'सचिवेन्द्र ! त्वया साधु, साध्विदं प्रतिपादितम् ।
क्षणाद् दृष्टं क्षणान्नष्टं, सर्वमेव भवेऽत्र हि ॥१९६॥

शैलाँ[1]ऽऽपगामहापूरसध्र्यग् यौवनमङ्गिनाम् ।
कुशाग्रस्थितपानीयबिन्दुतुल्यं च जीवितम् ॥१९७॥

लक्ष्मीस्तडिल्लतालोला, प्रेम बुद्बुदसन्निभम् ।
विषयास्तु सुनासीरकोदण्डनिभविभ्रमाः ॥१९८॥

पश्यन्तोऽपीति हा मूढा !, वाञ्छितार्थस्य कस्यचित् ।
प्राप्तौ नाशे च प्रमदं, खेदं च तन्वते वृथा ॥१९९॥

न तूद्विज्य भवाद्भीष्मादमुष्मादुरुदुष्कृताः ।
साधयन्ति सर्वसङ्गत्यागा[त्] स्वार्थमनुत्तरम् ॥२००॥

न बाधते जरा यावद्, यावद् व्याधिर्न वर्द्धते ।
यावन्नाऽक्षीणि हीयन्ते, यावन्मृत्युरुपैति न ॥२०१॥

तावद्भ**गीरथा**भिख्ये, **जह्नु**पुत्रे नृपश्रियम् ।
नियोज्य सचिवाधीश !, चारित्राय यतामहे' ॥२०२॥

यावद्वदति चक्रेवं, भववैराग्यभृद् भृशम् ।
ताव**दष्टापदा**भ्यर्णवासिलोकाः समाययुः ॥२०३॥

---

१. गिरिनदीमहापूरसमानम् ।

'प्रभोऽस्मान् रक्ष रक्षेति,' पूत्कुर्वन्तस्त उच्चकैः ।
भूभर्त्राऽऽह्वाय्य किमिति, पृष्टा एवं व्यजिज्ञपन् ॥२०४॥

'दण्डरत्नेन या कृष्टा, **गङ्गा** देव ! त्वदङ्गजैः ।
साऽधुनाऽ**ष्टापद**गिरेः, पूरयित्वाऽऽशु खातिकाम् ॥२०५॥

आप्लावयत्युपकण्ठस्थितं ग्राम-पुरादिकम् ।
तत् त्रायस्व महीनाथाऽन्यथाऽनाथा वयं गताः' ॥२०६॥ युग्मम् ॥

श्रुत्वेति **भरता**धिशः, करुणापूरितान्तरः ।
भगीरथं निजं पौत्रमादिदेशेति सत्वरम् ॥२०७॥

वत्साऽ**ष्टापद**पर्यन्तवासिनोऽमी जना भृशम् ।
भ्रमद्भिः स्वेच्छया **गाङ्गैः**, सलिलैराकुलीकृताः ॥२०८॥

याहि तानि पयांस्युच्चैर्दण्डेनाऽऽकृष्य सन्मते ! ।
नीत्वा पूर्वपयोराशौ, जनानेतान् प्रमोदय ॥२०९॥

कुलोद्भवोऽसि प्रज्ञावानस्यसि स्मरसुन्दरः ।
विक्रान्तोऽसि वदान्योऽसि, शस्त्रे कौशलवानसि ॥२१०॥

परैरपि गुणैर्दर्पोत्पत्तिहेतुभिरन्वितः ।
वत्स ! त्वमसि मौद्धत्यं[1], पुनर्गा विपदां पदम् ॥२११॥

अप्यनेकैर्गुणैः सन्तो, न दृप्यन्ति कदाचन ।
महानदी वहत्युच्चैर्जलापूर्णाऽपि मन्थरम् ॥२१२॥

गुणलेशमपि प्राप्य, माति विश्वेऽपि नेतरः ।
रथो मिलितनीरौघः, किं न शब्दायते वहन् ? ॥२१३॥

---

१. 'विपदां पदम् औद्धत्यं पुनः मा गाः' इत्यन्वयः ।

दर्पो दुर्यशसां कर्त्ता, हर्ता सकलसम्पदाम् ।
अन्वयस्याऽपि संहर्त्ता, प्रहर्त्ता धर्मवर्ष्मणः ॥२१४॥

विनयः सम्पदां मूलं, कुलिशः क्लेशभूभृताम् ।
सौख्यद्रुमाणां पाथोदो, भास्वान् गुणसरोरुहाम् ॥२१५॥

ततो विनयिना वत्स !, त्वया शक्तिमताऽपि हि ।
वर्ज्यो दलितदर्पेण, नागादीनामुपद्रवः ॥२१६॥

सुराणामसुराणां च, त्वया शश्वद्यथोचितम् ।
उपचारे वर्त्तितव्यं, विघ्नव्यूहनिवृत्तये ॥२१७॥

तथेति चक्रिणः शिक्षां, तां प्रपद्य प्रणम्य च ।
चमूवृतोऽचलद्दण्डरत्नमादाय **जह्नु**भूः ॥२१८॥

क्रमा**दष्टापदं** प्राप्तः, स्मृत्वाऽथ **ज्वलनप्रभम्** ।
गन्ध-मालाद्युपचारपरश्चक्रे तपोऽष्टमम् ॥२१९॥

उपस्थितमथो नागराजं जल्पितवान् प्रधीः ।
नयेऽब्धिं त्वन्मतेनेमां, **गङ्गां** देशविनाशिनीम् ॥२२०॥[1]

वाञ्छितं कुर्वतस्तेऽस्तु, निर्विघ्नमित्यहीशितुः ।
वाचं श्रुत्वा स मुदितो, निर्ममेऽष्टमपारणम् ॥२२१॥

ततः करान्तरस्फूर्जद्दण्डरत्नकृताध्वना ।
भगीरथो महावीर्यः, समाकृष्य सरिद्वराम् ॥२२२॥

पूर्वपाथोनिधिं निन्ये, तत्तीर्थं तत्प्रभृत्यपि ।
गङ्गासागर इत्यासीत्, सर्वलोकेषु विश्रुतम् ॥२२३॥ युग्मम् ॥

---

१. त्वदनुज्ञया ।

पूर्वं यज्ज[ह्नु]नाऽऽनीता, प्रथिता **जाह्नवी**ति तत् ।
कृष्टा **भगीरथेने**ति, **गङ्गा भागीरथी**त्यभूत् ॥२२४॥

दृग्विषोरगदग्धानां, **सगरा**त्मभुवां तदा ।
अस्थीनि तेन **गङ्गायाः**, प्रवाहेणाऽब्धिमाश्रयन् ॥२२५॥

दध्यौ च **जह्नु**भूः साधु, पितृणामस्थिसंहतिः ।
गङ्गयाऽब्धिं गता नेतस्ततोऽथ प्रपतिष्यति ॥२२६॥

तदा पितृणामस्थीनि, जलेऽक्षिप्यन्त तेन यत् ।
इदानीमपि तल्लोकोऽध्वानं तमनुवर्त्तते ॥२२७॥

अथो **भगीरथः** पाथःकष्टात् त्रातैर्जनैर्मुदा ।
स्तूयमानो रथारूढोऽवलत स्वपुरीं प्रति ॥२२८॥

सैन्यरेणुभरच्छन्नमार्तण्डश्चण्डदोर्युगः ।
नमितानेकभूपालमौलिलालितशासनः ॥२२९॥

आगच्छन् वर्त्मनि प्राज्यपुण्यप्राग्भारराजितः ।
सोऽपश्यत् केवलज्ञानवर्यमेकं महामुनिम् ॥२३०॥ युग्मम् ॥

धन्यम्मन्यो रथात्तूर्णमुत्तीर्याऽऽर्यमतल्लिका ।
तं त्रिः प्रदक्षिणीकृत्य, ननामाऽथ महामतिः ॥२३१॥

न्यषदच्च यथास्थानं, विनयाद्रचिताञ्जलिः ।
श्रोतुं पीयूषदेशीयां, देशनां तस्य भक्तिभाक् ॥२३२॥

आदिदेश परार्थैकपरः शम[व]तां वरः ।
अपारभवनिस्तारकारकं तत्त्वमुज्ज्वलम् ॥२३३॥

अहो ! मनो-वचः-कायैः, सत्कर्मण्येव कोविदाः ! ।
यतध्वं यदि काङ्क्षाऽस्ति, सौख्ये स्वर्गापवर्गजे ॥२३४॥

दुष्कर्माणि पुनः काय-वाङ्-मनोभिः कुधीधनाः ।
विधायाऽनन्तदुःखानां, भवेयुर्भाजनं भवे ॥२३५॥

शुभाशुभफलप्राप्तौ, धर्माधर्मौ पुराकृतौ ।
मुख्यौ हेतू परिज्ञेयौ, गौणाः सर्वे परे पुनः ॥२३६॥

वार्यते मुक्तमर्यादः, सागरोऽपि समापतन् ।
अवश्यभोग्यं केनापि, न तु कर्मविजृम्भितम् ॥२३७॥

दुष्कृतं स्वल्पमप्युच्चैर्दारुणान्तं प्रजायते ।
इहार्थे **वसुमत्या**ख्यावणीक्पुत्रीनिदर्शनम् ॥२३८॥

तद्यथा-

श्रेष्ठी बभूव **श्रावस्त्यां, सुधनु**र्नाम सद्धनः ।
विष्णोः श्रीरिव तस्यासी**दमृतश्री**रिति प्रिया ॥२३९॥

क्रमादजाय[त] तयोर्नाम्ना **वसुमती** सुता ।
मृद्वीकामृदुगीः स्फारलावण्यमयवर्ष्मभृत् ॥२४०॥

कलानैपुण्यतो बालपण्डितेति प्रथां गता ।
साऽभूत् पित्रोः प्रमोदाब्धेरुल्लासे चन्द्रिकायिता ॥२४१॥

सध्रीच्येवाऽविरहिता, मायया सा निरन्तरम् ।
उपायैर्विविधैः सर्वजनचेतांस्यरञ्जयत् ॥२४२॥

अथ बाल्येऽपि माताऽस्याः, परलोकमुपेयुषी ।
श्रेष्ठी च **कमला**नामस्त्रियमन्यां व्यवाहयत् ॥२४३॥

अभ्यधत्त च तां 'रे चेत्, सुतां मे निजदेहवत् ।
न पालयसि तत् कार्यं, भवत्या मे न किञ्चन' ॥२४४॥

साऽपि भीता ततः सम्यग्, **वसुमत्या**मवर्त्तत ।
यथा तथा स्वार्थसिद्धौ, चेष्टन्ते हि विशारदाः ॥२४५॥

कमलाऽथ गते काले, कियत्यपि पतिं भृशम् ।
वशंवदं परिज्ञाय, तस्यामासीच्छ्लथादरा ॥२४६॥

तथा दृष्ट्वा **वसुमती,** चिन्तयामास किं पितुः ।
निवेदयामि यदि वा, किमेतावन्निवेद्यते ? ॥२४७॥

असाध्यं नास्ति मद्बुद्धेः, किञ्चनापि महीतले ।
तत्तामेव प्रयुञ्ज्याऽहं,साधयिष्याम्यभीप्सितम् ॥२४८॥

अथो गतायामन्येद्युः, **कमलायां** बहिः क्वचित् ।
प्रदोषे वासवेश्मान्तः, स्थिते च निजवसरि ॥२४९॥

स्वयं द्वारस्थिता मायाखनि**र्वसुमती** निजाम् ।
सखीमुद्दिश्य वचनं, प्रोवाचेति कथान्तरे ॥२५०॥ [युग्मम्]

'सखि ! नेयं विमाता मे, चोक्षा शाटिकया खलु ।
विधत्ते तस्मिमेतां च,[न] तातो बालिका न्वहम् ॥२५१॥

तत् किं करोमि ? किं वा मे, व्यर्थया चिन्तयाऽमुया ।
एति निद्रा तत् स्वपिमीत्युक्त्वा' सुष्वाप चैषका ॥२५२॥

सुधनुस्तु निशम्यैतत्, क्रुद्धो दौःशील्यशङ्कया ।
कपाटे सुदृढं दत्त्वा, स्थितवान् मन्दिरान्तरे ॥२५३॥

अत्रान्तरे **कमला**ऽपि, द्वारदेशमुपागता ।
प्राह सप्रणयं 'प्रेयन् !, द्वारमुद्घाटय द्रुतम्' ॥२५४॥

कोपाक्रान्तस्तु **सुधनु**र्नास्याः प्रतिवचोऽप्यदात् ।
कमलाऽथाऽवदच्छङ्काशङ्कुशल्यितमानसा ॥२५५॥

'किमियं जीविताधीश !, किङ्कर्यामप्रसन्नता ? ।
स्मरामि कञ्चनात्मीयं, न मन्तोर्लेशमप्यहम् ॥२५६॥

अज्ञानाद्वा कृतं मन्तुं, प्रसद्य कथयाऽऽशु मे ।
क्षमयामि यथा नाथ !, लगित्वा तव पादयोः' ॥२५७॥

एवमुक्तोऽप्यसौ यावन्न दत्ते किञ्चिदुत्तरम् ।
तावत् सा दीनवचनैर्विललापेति हृतहृत् ॥२५८॥

'प्रिय ! प्रसादं तावन्तमुपदर्श्य क्षणात् कथम् ।
जातोऽसि दारुणोऽत्यन्तममुष्मिन् किङ्करीजने ? ॥२५९॥

अदर्शितं वरं प्रेम, दर्शयित्वोज्झितं न तु ।
जात्यन्धो हि वरं देही, न तूत्खातावलोचनः ॥२६०॥

शीलस्खलनरूपं च, मुक्त्वाऽऽगः स्त्रीषु नाथ ! किम् ।
एतावान् युज्यते कर्तुं, कोपो धीमन् ! विचारय ॥२६१॥

त्वत्तः परं नरं नाहं, नाथ ! स्वप्नेऽप्यचिन्तयम् ।
तत् प्रसीद प्रतिवचः, करुणाकर ! देहि मे ॥२६२॥

उपेक्षसे च यदि मामेवं दीनप्रलापिनी[म्] ।
तदा न वीक्षसे भूयो,जीवन्तीं हृदयेश्वर !' ॥२६३॥

तच्च शृण्वन्नपि श्रेष्ठी, मायिन्या सुतयाऽनिशम् ।
पुराऽपि रञ्जितोऽमंस्त, दुःशीलामेव वल्लभाम् ॥२६४॥

दध्यौ च मत्सुताया गीः, काऽपि व्यभिचचार न ।
निर्निमित्तानि बालानां, वचांसि स्युश्च नान्यथा ॥२६५॥

इति प्रतिवचस्तस्मिन्नददानेऽखिलां निशाम् ।
साऽनैषीद्विलपन्त्येव, पतिता दुःखवारिधौ ॥२६६॥

श्रेष्ठी तु प्रातरुत्थाय, निर्गतो निजमन्दिरात् ।
बहिरेव दिनं सर्वं, नीत्वा सायं समाययौ ॥२६७॥

वासौकश्च प्रविश्याऽऽशु, शिश्ये दत्तारिद्वयः ।
क्रन्दन्तीं तु तथैवाजीगणत्तां तु क्रुधोद्धुरः ॥२६८॥

निशान्तेऽचिन्तयच्चैषा, समुत्पन्नमतिर्हृदा ।
इदं प्रादुरभून्नूनं, किञ्चित् खलविचेष्टितम् ॥२६९॥

तादृक् स्निग्धोऽन्यथा भर्त्ता, किमकस्माद् व्यरज्यत ? ।
न हि शीतं जलं वह्निं, विनोष्णत्वं समाश्रयेत् ॥२७०॥

सपत्नीतनयेदानीं, मयाऽदर्शि ह्यवज्ञया ।
तत्प्रपञ्चप्रवीणायास्तस्याश्चेष्टितमेतकत् ॥२७१॥

तदमूमेव विनयात्, प्रसन्नां करवै द्रुतम् ।
भूमौ स्खलितपादो हि, भूमिमेवाऽवलम्बते ॥२७२॥

विमृश्येति लगित्वाऽऽशु, **वसुमत्याः** पदोर्भृशम् ।
कमलोचे 'सहस्वाऽऽगो, वत्से ! निखिलमेव मे ॥२७३॥

प्रसीद सप्रसादं च, कुरुष्व पितरं मयि ।
त्वयैव विमलप्रज्ञे !, कार्यमेतद्विसिध्यति' ॥२७४॥

ततो मायाविनी साऽपि, न्यगादीदिदमम्ब ! किम् ।
कुतः कदादि तातोऽभूदप्रसन्नो ननु त्वयि ? ॥२७५॥

मायाविलसितं तस्यास्तच्चित्तेन विदत्यपि ।
कमलाऽथाऽऽख्यदखिलं, वृत्तं दुःखमयं स्वकम् ॥२७६॥

अस्माभिर्डिम्भरूपैः किं, ज्ञायतेऽत्रेति साऽपि ताम् ।
उक्त्वा प्रारभताऽलीकनिद्रां कर्त्तुं विशेषतः ॥२७७॥

कमला विलपन्ती तु, लगित्वा तत्पदद्वये ।
बभाणाऽद्य प्रभृत्येषा, वत्सेऽस्मि तव किङ्करी ॥२७८॥

पुनर्नाऽऽगः करिष्यामि, प्रसद्य पितरं निजम् ।
सकृन्मयि प्रसन्नत्वं, नय सन्मतिशालिनी' ॥२७९॥

वसुमत्यभणन्मातर्यदि तेऽयमसद्ग्रहः ।
तद्भणिष्याम्यहं तातं, मंस्यते चेत्स मद्वचः' ॥२८०॥

इत्युक्त्वा स्थापयित्वा च, तत्रैव **कमलां** स्वयम् ।
गत्वा पितरमप्राक्षीदपराद्धं किमम्बया ? ॥२८१॥

सोऽब्रवीन्मा ग्रहीस्तस्याः, स्वैरिण्या अभिधामपि ।
परोचे स्वैरिणी ज्ञाता, कथं सोऽप्यभ्यधात्ततः ॥२८२॥

'त्वया सख्या समं गोष्ठ्यां, यदभाणि परेद्यवि ।
इयं शाटिकया चोक्षा, नेति' तच्छुश्रुवे मया ॥२८३॥

अथो **वसुमती** स्माह, सोपहासं 'पितस्तव ।
चार्वी विदग्धता साधु, वेत्सि तत्त्वं न मद्गिराम्' ॥२८४॥

सोऽथाऽवोचत 'वत्से ! किं, तत्तथा न त्वयौच्यत' ।
साऽभ्यधात्तात ! मलिनां, निवस्तेऽम्बा हि शाटिकाम् ॥२८५॥

मयोक्ता चाऽम्ब ! किं शाटीं, प्रक्षालयसि न द्रुतम् ? ।
तथाप्येषा स्थिता जोषं, रजकस्य तु नो ददौ ॥२८६॥

न करोषि पुनस्तस्मिं, तात ! त्वमपि तन्मया ।
तथाऽभण्यत शीले तु, चोक्षता मातुरेव हि' ॥२८७॥

ततश्चिन्तितवान् श्रेष्ठी, धिग्मां तत्त्वबहिर्मुखम् ।
अविचार्यैव सच्छीला, यदुःखे पातिता प्रिया ॥२८८॥

ततो गत्वा स्वयं कान्तामुवाच 'प्राणवल्लभे ! ।
अज्ञानाद्यन्मया बाढं, खेदिताऽसि क्षमस्व तत्' ॥२८९॥

कमलाऽप्यथ तद्वृत्तं, **वसुमत्या** महाद्भुतम् ।
वीक्ष्य भीताऽनिशं तस्या, आज्ञां नैवाऽन्यथाऽकरोत् ॥२९०॥

ततः काले **वसुमती, साकेतपुर**वासिना ।
परिणिन्ये **नन्द**नाम्ना, वणिजा विपुलर्द्धिना ॥२९१॥

चिरं प्रपाल्य गार्हस्थ्यं, मृते भर्त्तरि सा पुनः ।
तापसव्रतमादत्त, तीव्रं वयसि पश्चिमे ॥२९२॥

मृत्वा च व्यन्तरेष्वासीद्वेश्या च्युत्वा ततोऽपि च ।
अजाय**तर्षभपुरे, सुप्रभ**श्रेष्ठिनः सुता ॥२९३॥

नाम्ना **कमलिनी** साऽथ, ववृधे कमलानना ।
यौवनं युवदृग्भृङ्गकमलं समवाप च ॥२९४॥

इतश्च **चम्पा**वास्तव्यः, श्रेष्ठिराट् **सुव्रता**भिधः ।
स्वपुत्रस्य **वसुदत्तस्या**र्थे तामवृणोत् कनीम् ॥२९५॥

अत्रान्तरे च यत् पूर्वं, तया मायापटिष्ठया ।
दुःखं विमातुः कुर्वत्या, बद्धं दुष्कर्म दारुणम् ॥२९६॥

तद्विपाकेन केनापि, गीर्वाण-नरजन्मनोः ।
स्त्रीत्वं प्राप्तं पुनः शेषं, किञ्चिदागात्तदोदयम् ॥२९७॥

महिम्ना कर्मणस्तस्य, **वसुदत्तः** कदाचन ।
रममाणः सहचरैर्हास्येनैवमभण्यत ॥२९८॥

'मित्र ! त्वदर्थं तातेन, वृता या विद्यते कनी ।
साऽक्ष्णा काणा कुरूपाणामवधिर्लक्षणोज्झिता' ॥२९९॥

कथं वित्थेति तेनोक्ते, तेषां मध्यादथैककः ।
ऊचिवा**नृषभपुरे**, गतोऽहं स्वप्रयोजनात् ॥३००॥

तथाविधां च तां दृष्ट्वा, समागां तद्यथोचितम् ।
कुरुष्वेति निशम्याऽतिदुःखं श्रेष्ठिसुतोऽश्रयत् ॥३०१॥

अचिन्तयच्च किं कन्या,नान्याः सन्ति जगत्यपि ? ।
यदीदृशीं पिता वव्रे,मदर्थे हेयकन्यकाम् ॥३०२॥

किं कुर्वेऽहमिदानीं तु, जन्ययात्रा चलत्यसौ ।
पञ्चमेऽहनि लग्नं च, जल्पने लज्ज्यतेऽपि च ॥३०३॥

न च तां तादृशीं दृग्भ्यां, द्रष्टुं शक्ष्यामि तन्मम ।
किञ्चित् कपटमाधातुं, युज्यते ननु साम्प्रतम् ॥३०४॥

इति ध्यात्वा दृशौ बद्ध्वा, पट्टेनाऽगान्निजं गृहम् ।
पृष्टः पितृभ्यामूचे च, दृक्पीडा मे प्रथीयसी ॥३०५॥

पितृभ्या**मृषभपुरं**, सोऽनीयत तथास्थितः ।
परिणिन्ये च दृग्बद्धपट्ट एव वधूमिमाम् ॥३०६॥

आनीता श्वशुराभ्यां सा, **चम्पायां** स्थापिता गृहे ।
यावन्त्यहानि तावन्ति, नाऽऽगाद्वेश्मनि [सोऽ]पि हि ॥३०७॥

सा पुनः प्रवरैस्तैस्तैः, सद्गुणैर्विनयादिभिः ।
रञ्जयामास श्वशुरकुलं सकलमन्वहम् ॥३०८॥

तदुःखाद् दुःखिताभ्यां च, श्वशुराभ्यां निजः सुतः ।
भणितो भाणितोऽप्येनां, दृग्भ्यामपि न दृष्टवान् ॥३०९॥

प्रेषिताऽथ पितुर्वेश्म, श्वशुराभ्यां दिनानि सा ।
दुःखौघनिर्मितानीव, कल्पकल्पान्यलङ्घत ॥३१०॥

वसुदत्तोऽपि वेश्याभिर्विललास घनं धनम् ।
चित्ते तेपेतरां नाम्नि, **कमलिन्याः** श्रुतेऽपि तु ॥३११॥

परै रूपादिकांस्तस्याः, सुगुणान् वर्णितानपि ।
न श्रद्दधे परं मौनमेडमूक इवाश्रयत् ॥३१२॥

एवं **कमलिनी** प्राच्यजन्मोपात्तस्य कर्मणः ।
दोषेण द्वाद[शा]ब्दानि, विरहं प्राप दुःसहम् ॥३१३॥

कालेनैतावता तस्या, निर्जीर्णे तत्र कर्मणि ।
उदभूत्**सुव्रता**ख्यस्य, श्वशुरस्य परा मतिः ॥३१४॥

ततोऽसौ पुत्रसुहृदं, नामतो **मतिमन्दिरम्** ।
चतुर्द्धा बुद्धिसम्पन्नमाजुहाव स्वमन्दिरे ॥३१५॥

सम्मान्य तमभाणीच्च, यथा 'जानासि ते सुहृत् ।
दोषोज्झितामपि वधूं, नैव वाञ्छति दुर्मतिः ॥३१६॥

तथा विधेहि तद्भद्र !, यथा साऽऽप्नोति निर्वृतिम् ।
बुद्धिवल्लीनवाम्भोदं, त्वां विनेदं न सिध्यति' ॥३१७॥

ततः सोऽप्यगदत् 'श्रेष्ठिन् !, खिद्यथा मा स्म तां त्विह ।
छन्नमानायय यथा, सिध्यत्यर्थः समीहितः' ॥३१८॥

श्रेष्ठ्यप्यामेति[1] व्याहृत्य, च्छन्नं **कमलिनीं** वधूम् ।
आनाय्याऽन्यगृहे क्वापि, स्थापयामास सत्वरम् ॥३१९॥

गत्वा च तत्र सद्बुद्धिशेवधि**र्मतिमन्दिरः** ।
विदध्या एवमेवं चेत्यशिषत्तां प्रयत्नतः ॥३२०॥

---

१. **आमेत्यङ्गीकारेऽव्ययम्** ।

तद्बुद्धिवर्त्मगा साऽथ, याप्ययानमधिष्ठिता ।
विहितोदारशृङ्गारा, **वसुदत्ता**ऽऽपणं ययौ ॥३२१॥

ततस्तां युवतिं सोऽपि, रूपातिशयशालिनीम् ।
निरीक्ष्य क्षुब्धचेतस्कोऽदापयन्महदासनम् ॥३२२॥

तस्यां तत्र निषण्णायां, **वसुदत्तः** ससम्भ्रमम् ।
चेटीं पप्रच्छ का त्वेषा, ततः सेत्थमचीकथत् ॥३२३॥

'भूमीशवल्लभस्यैषा, **मगधा**ख्यस्य गेहिनी ।
सम्प्राप्ता प्रवरकुलाभिधानात् सन्निवेशतः ॥३२४॥

कर्पटा-ऽगरु-कर्पूर-कस्तुरी-चन्दनादिकम् ।
इतो ग्रहीष्यत्यस्माकं, स्वामिनीयं वणिग्वर !' ॥३२५॥

तच्छ्रुत्वा तुष्टचित्तोऽसौ, प्रेरितः पुष्पधन्वना ।
तूर्णं सम्मानयामास, तां ताम्बूलादिदानतः ॥३२६॥

तदुक्तं वस्तु सर्वं च, प्रदाय स्वैर्वणिक्सुतैः ।
बन्धयामास स क्षिप्रं, दर्शयन् परमादरम् ॥३२७॥

ततोऽस्तङ्गतवत्यर्के, तिमिरे च प्रसृत्वरे ।
दास्यवो[च]**द्वसुदत्त**मुत्सूरोऽजायताऽधुना ॥३२८॥

यदि किञ्चिद्भवेत् स्थानमापणे वस्तदा तमीम् ।
लङ्घतेऽत्रैव नः स्वामिन्येषा बाढं श्रमातुरा ॥३२९॥

वयं तु क्वापि यास्यामोऽन्य[त्रे]ति श्रेष्ठिनन्दनः ।
आकर्ण्य हृदये दध्यावीषत्स्मरवशंवदः ॥३३०॥

इदं कलत्रं भूमीशवल्लभस्य वणिक् त्वहम् ।
द्वयोरेकत्र शयनं, भृशं लोके विरुध्यते ॥३३१॥

यद्वाऽदः प्रमदारत्नं, कथं मुञ्चे करस्थितम् ।
लोको वदतु यत् किञ्चित्, स्वार्थस्तु त्यज्यते न हि ॥३३२॥

इति कामितया लुप्तयुक्तायुक्तविवेचनः ।
पल्यङ्केऽस्थापयत्तां स, जग्मिवांस्तु परिच्छदः ॥३३३॥

स्नेहसारं ततश्चैतौ, स्वेच्छयैव [वि]लेसतुः ।
यूनोर्ह्युपांशु जागर्त्ति, मान्मथी विक्रियाऽखिला ॥३३४॥

एवं प्रेमभरान्नित्यं, विविधं क्रीडतोस्तयोः ।
दिनानि कतिचिज्जग्मुः, सम्मदापूर्णचेतसोः ॥३३५॥

वसुदत्तमथाऽन्येद्युः, सस्मितं **मतिमन्दिरः** ।
कथाप्रसङ्गे न्यगदन्, 'मित्रेदानीं त्वया समम् ॥३३६॥

राज्ञी काचन सानन्दा, तनुलाभप्रदायिनम् ।
व्यवहारं करोतीति, श्रूयते जनताजनात्' ॥३३७॥ युग्मम् ॥

साकूतं वक्ति च्छेकोऽयमित्याशङ्कां दध**द्वसुः** ।
अव[द]त् कापि ग्रामीणा, गृह्णीते कर्पटादिकम् ॥३३८॥

पुनः परोऽवदत् स्मित्वा, 'पश्याऽहो पुण्यपादपे ।
फलिते लभते काले, सर्वः सर्वमपीप्सितम् ॥३३९॥

यत् प्रदोषे कमलिनीं, पश्यत्यर्को दृशाऽपि न ।
करैः स्पर्शं सुसर्वाङ्गं, तां सुखाकुरुते प्रगे' ॥३४०॥

गिरं विदग्धां श्रुत्वेति, **वसुदत्तो** व्यचिन्तयत् ।
अदः किं वक्ति गम्भीरं, वाक्यमेष सुहृन्मम ॥३४१॥

गिराऽनया हि राज्ञीयं, सा मद्भार्येति सूच्यते ।
कथं च घटते सा यच्छुतैव विषकन्दली ॥३४२॥

इयं चाऽमृतवल्लीव, न च तस्या इहागतिः ।
सम्भाव्या न च मे मित्रमसम्बद्धप्रलापकम् ॥३४३॥

इति चिन्तापरोऽथैष, सुहृदाऽवादि मा मुहः ।
दैवाल्लोके घटते हाऽघटमानमपि क्षणात् ॥३४४॥

वसुदत्तोऽवदत् 'किं नु, सैवेयं **सुप्रभाङ्ग**जा ?' ।
अवादीत् सुहृदामेति, **वसु**र्भूयोऽप्यभाषत ॥३४५॥

'सुहृद्भिर्मत्पुरः काणा, कुरूपाणां च साऽवधिः ।
यदजल्प्यत तत् किं तु,' प्रोचेऽथ **मतिमन्दिरः** ॥३४६॥

'त्वं बालिशोऽसि यत्केलीकिलानां तादृशां वचः ।
प्रत्येषि यदि वा दोषो, न ते तेषां च नाऽसकौ ॥३४७॥

किन्तु तस्याः पूर्वजन्मविहितं कर्म किञ्चन ।
उदीर्णं तेन सा दुःखमियत्कालमदोऽन्वभूत्' ॥३४८॥

इति मित्रगिराऽऽत्मानमविमृश्य विधायिनम् ।
निन्दन् **कमलिनीं** प्रेम्णाऽनाय[य]त् स निजौकसि ॥३४९॥

कमलिन्या सममथो, भजन् वैषयिकं सुखम् ।
निनाय वासरान् भूरीन्, क्षणवत्तुष्टमानसः ॥३५०॥

पितर्यथ कथाशेषे, गृहस्वाम्यं श्रयन्नयम् ।
सिषेवे धर्म-कामा-ऽर्थान्, यथाकालं महाशयः ॥३५१॥

नाम्ना **कमलवदन**मवधिज्ञानिनं मुनिम् ।
नत्वाऽन्येद्युः सभार्योऽसौ, देशनामशृणोदिति ॥३५२॥

'तत्त्वातत्त्वपरिज्ञानविमूढैः क्रूरवर्त्तिभिः ।
गिराऽपि सहसा कर्म, बध्यते दुर्विपाकदम् ॥३५३॥

उच्छृङ्खलतया तस्मादविचार्य मनीषिभिः ।
यत्किञ्चन न वक्तव्यमायतौ दुःखदं वचः ॥३५४॥

श्रूयते हि पुरा पुंसा, केनचित् ज्ञानवान् मुनिः ।
पृष्टो यद्भगवन्नस्ति, पुत्री मे बन्धुराकृतिः ॥३५५॥

नामतः सा **त्वशोकश्री**रकस्मादपरेद्यवि ।
आक्रान्ता विविधै रोगैः, परं दौःस्थ्यमुपाययौ ॥३५६॥

ज्वरो महान् दृशोः पीडा, कुक्षिशूलं गलग्रहः ।
शिरोर्त्तिश्चेति केचन, व्या[ध]यस्तामुपाद्रवन् ॥३५७॥

अङ्गखेदं वक्त्रशोषं, शून्योक्तिं करकम्पनम् ।
दधती सा स्वबन्धूनां, महद्दुःखमजीजनत् ॥३५८॥

प्रश्नग्रहार्चनदेवीपूजामन्त्रादि वाऽपरम् ।
विविधं विदधे किन्तु, गुणः स्वल्पोऽपि नाऽभवत् ॥३५९॥

ज्ञानिन् ! को हेतुरत्रेति, कृपां कृत्वा निवेदय ।
ततो ज्ञान्याख्यदस्याः प्राग्जन्मकर्म निशम्यताम् ॥३६०॥

अस्माद्भवात् तृतीयेऽभूद्, भवे **कुरुमती**त्यसौ ।
घृततर्पितबर्हिर्वज्ज्वलन्ती सततं रुषा ॥३६१॥

दुग्धेऽन्यदौतुना पीतेऽनयोचे रोषतो वधूः ।
ग्रस्ताऽभूः किमु शाकिन्या, यदुग्धं न हि रक्षितम् ॥३६२॥

तां च तद्वचनोद्भ्रान्तां, तद्गृहे छंगणोच्चयम् ।
स्थापयन्ती छलं लब्ध्वा, मातङ्गी द्रुतमग्रहीत् ॥३६३॥

---

१. 'छणा' इति भाषायाम् ।

शून्योक्ति-न्यगनिरीक्षा-प्राक्कृतास्मृत्यादिलक्षणैः ।
विवेद मान्त्रिकस्तस्याः, शाकिनीदोषमुल्वणम् ॥३६४॥

ततः स यन्त्रमालिख्य, मन्त्रशक्तिसुदुर्द्धरः ।
तापयत्यनले यावत्तावन्मुक्तकचोच्चया ॥३६५॥

दह्ये दह्ये हहेत्युच्चैः, रटन्ती कटुनिःस्वनम् ।
मातङ्गी तत्र साऽऽयासीत्, सहक्कं तेन चोच्यत ॥३६६॥ [युग्मम्]

क्व त्वयेयमुपात्ता रे !, साऽपि भीता ततोऽवदत् ।
श्वश्रूगिरा गृहीता त्वद्गिरा मुक्ता तु साम्प्रतम् ॥३६७॥

परं मे जीवितं रक्षेस्ततस्तां धरणीधवः ।
लाञ्छित्वा व्यमुचद्वाक्यमलङ्घ्यं मान्त्रिकस्य हि ॥३६८॥

ततः प्रोचुर्जनाः कालजिह्वा **कुरुमती** ह्यसौ ।
तदालप्या न केनापि, तच्छ्रुत्वोद्विविजे च सा ॥३६९॥

लात्वा द्रुतं व्रतं मृत्वा, स्वर्गता प्रच्युता ततः ।
तवेयमभवत् पुत्री, प्राग्दुर्वाक्कर्मतोऽधुना ॥३७०॥

[१]खदेवीदूषिता जज्ञे, तदानय ममाऽन्तिकम् ।
यथा नीरुग् भवेत् प्राच्यभवान् स्मृत्वा च बुध्यते ॥३७१॥ [युग्मम्]

ततः सोऽपि मुनेः पार्श्वेऽनयत्तां स्वसुतां तदा ।
मुनेर्दर्शनतोऽयासीत्, क्रन्दित्वा च खदेवता ॥३७२॥

साऽथ श्रुत्वा निजं प्राच्यवृत्तं जातिस्मृतेः पुनः ।
प्रत्यक्षमिव संवीक्ष्य, वैराग्यं भेजुषी भृशम् ॥३७३॥

---

१. आकाशदेवी ।

गुरोः पुरस्ततश्चाऽऽशु, तदालोच्य स्वदुष्कृतम् ।
दुष्कर्ममथनं धर्ममर्हदुक्तमशिश्रियत् ॥३७४॥

विज्ञाय **कुरुमत्या**स्तदेवं दुर्वाक्यजं फलम् ।
दुःखाद् भीतिं दधानाः स्त, भाषासमितिशालिनः' ॥३७५॥

इति श्रुतवचाः साधुमूचे **कमलिनी** ततः ।
'अलभेऽहं मुने ! प्रेयोवियोगं केन कर्मणा ?' ॥३७६॥

मुनिः प्राह '**वसुमती**भवे यत् **कमला** त्वया ।
यामान् द्वादश कान्ताऽवहेलादुःखे प्रपातिता ॥३७७॥

प्राप्ताऽसि द्वादशाब्दानि, तद्दुःखं विरहोद्भवम् ।
कृतं हि कर्म नाऽभुक्त्वा, छुटत्यङ्गी कदाचन' ॥३७८॥

सविस्तरं मुनेर्वक्त्रात्, तच्छ्रुत्वा दम्पती इमौ ।
संविग्नौ वेश्मनो भारे, न्यास्थतां ज्येष्ठमङ्गजम् ॥३७९॥

धनं धर्मे व्ययित्वाऽथ, पूजयित्वा जिनेश्वरान् ।
तौ सद्यः प्रतिपेदाते, दान्ते[न] मनसा व्रतम् ॥३८०॥

सद्ध्यानध्यायिनौ तीव्रं, तप्यमानौ तपश्च तौ ।
प्रान्ते सानशनौ कल्पे, दशमेऽभवतां सुरौ ॥३८१॥

वसुमत्या इदं वृत्तं, विमर्षद्[१]भर्बुधोत्तमैः ।
सावधानैः सदा पापयोगोद्योगो निवार्यताम् ॥३८२॥

इति कृतकर्मविपाके वसुमतीकथा ॥ श्री ॥ ग्रं. १४९ ॥

एवं केवलिनः साधोर्गिरं श्रुत्वा **भगीरथः** ।
अप्राक्षीद्युगपत् किं मे, प्रमीताः पितरः प्रभो ! ? ॥३८३॥

---

१. '**विवर्द्धद्**भ' इति पु. प्रे. ।

दुःखखानिं भवं भ्रान्त्वा, कृत्वा सत्कर्म किञ्चन ।
अभवन्नन्दना **जह्नु**मुख्याः **सगर**चक्रिणः ॥३९४॥

स पुनः कुम्भकारोऽपि, विपन्नः कालयोगतः ।
वणिग् **विराट**देशेऽभूद्विदधे धर्मकर्म च ॥३९५॥

ततो मृतो नृपो जज्ञे, प्राप्य दीक्षां सुरोऽभवत् ।
च्युत्वा **भगीरथा**ख्यश्च, **जह्नोः** पुत्रोऽभवद् भवान् ॥३९६॥

तेनाऽत्युग्रविपाकेन, सङ्घलुण्ठनकर्मणा ।
अभवन् युगपद्भस्मसाज्**जह्नु**प्रमुखा इमे ॥३९७॥

तन्निवारणरूपेण, त्वं पुनः शुभकर्मणा ।
न दग्धोऽसि कृतिश्रेष्ठ !, तत्रेवाऽत्राऽपि[1] जन्मनि ॥३९८॥

भगीरथो निशम्येति, विरक्तोऽपि भवाद्भृशम् ।
मा भूत् पितामहोऽत्यन्तं, दुःखीत्यादत्त न व्रतम् ॥३९९॥

ततः केवलिनं नत्वा, दिव्यस्यन्दनमाश्रितः ।
ग्रामाकरपुरादीनि, वीक्षमाणः सकौतुकम् ॥४००॥

स्तुत्यान् स्तुवन्नमन्नम्यान्, पूज्यांश्च परिपूजयन् ।
स्थापयन् पृथिवीपीठे, हरेर्[2]हासंसितं यशः ॥४०१॥

उल्लसन्नवतारुण्या, नरनाथकुमारिकाः ।
स्पृहयन्तीः सलावण्याः, स्वीकुर्वाणः पदे पदे ॥४०२॥

प्राभृतानि गजा-ऽश्वादीन्यनेकानि महीश्वरैः ।
ढौकितान्युररीकुर्वन्, प्रसन्नाननपङ्कजः ॥४०३॥

---

१. तत्र-कुम्भकारभवे इव अत्राऽपि । २. शिवहास्यवदुज्ज्वलम् ।

दुःखखानिं भवं भ्रान्त्वा, कृत्वा सत्कर्म किञ्चन ।
अभवन्नन्दना **जह्नु**मुख्याः **सगर**चक्रिणः ॥३९४॥

स पुनः कुम्भकारोऽपि, विपन्नः कालयोगतः ।
वणिग् **विराट**देशेऽभूद्विदधे धर्मकर्म च ॥३९५॥

ततो मृतो नृपो जज्ञे, प्राप्य दीक्षां सुरोऽभवत् ।
च्युत्वा **भगीरथा**ख्यश्च, **जह्नोः** पुत्रोऽभवद् भवान् ॥३९६॥

तेनाऽत्युग्रविपाकेन, सङ्घलुण्ठनकर्मणा ।
अभवन् युगपद्भस्मसाज्**जह्नु**प्रमुखा इमे ॥३९७॥

तन्निवारणरूपेण, त्वं पुनः शुभकर्मणा ।
न दग्धोऽसि कृतिश्रेष्ठ !, तत्रैवाऽत्राऽपि[1] जन्मनि ॥३९८॥

भगीरथो निशम्येति, विरक्तोऽपि भवाद्भृशम् ।
मा भूत् पितामहोऽत्यन्तं, दुःखीत्यादत्त न व्रतम् ॥३९९॥

ततः केवलिनं नत्वा, दिव्यस्यन्दनमाश्रितः ।
ग्रामाकरपुरादीनि, वीक्षमाणः सकौतुकम् ॥४००॥

स्तुत्यान् स्तुवन्नमन्नम्यान्, पूज्यांश्च परिपूजयन् ।
स्थापयन् पृथिवीपीठे, हरेरहासि[2]तं यशः ॥४०१॥

उल्लसन्नवतारुण्या, नरनाथकुमारिकाः ।
स्पृहयन्तीः सलावण्याः, स्वीकुर्वाणः पदे पदे ॥४०२॥

प्राभृतानि गजा-ऽश्वादीन्यनेकानि महीश्वरैः ।
ढौकितान्युररीकुर्वन्, प्रसन्नाननपङ्कजः ॥४०३॥

---

१. तत्र-कुम्भकारभवे इव अत्राऽपि । २. शिवहास्यवदुज्ज्वलम् ।

मागधैः पठितोदारविचित्रचरितः कृती ।
प्रीणितार्थिजनव्यूहः, **साकेतपुर**मासदत् ॥४०४॥ पञ्चभिः कुलकम् ॥

शुचं विस्मारयन् पुत्रदुर्मृत्युप्रभवां रयात् ।
पितामहस्य चरणावयं विनयतोऽनमत् ॥४०५॥

भरतेशोऽपि हर्षाश्रुपूरपूर्णविलोचनः ।
तस्य पृष्ठे निजं पाणिं, न्यस्यति स्म ससम्भ्रमम् ॥४०६॥

बुद्ध्वा च राज्यधुर्यं तं, मन्त्रि-सामन्तसम्मतः ।
अनिच्छन्तमपि प्रौढाग्रहाद्राज्येऽभ्यषिञ्चत ॥४०७॥

स्वयं पुनर्भवदवं, दुःखकीलासमाकुलम् ।
दारुणं तं हृदा ध्यायन्, विमुखो विषयोच्चयात् ॥४०८॥

अनन्तसौख्यसदनं, यियासुरपुनर्भव[म्] ।
चारित्रप्राप्तये बद्धस्पृहोऽतिष्ठन्महामतिः ॥४०९॥ युग्मम् ॥

इतश्चाऽप्रतिबद्धेन, विहारेण चरन् भुवि ।
सहस्राम्रवणोद्याने**ऽजितेशः** समवासरत् ॥४१०॥

अथ सार्द्धा हिरण्यस्य, कोटीर्द्वादश चक्रभृत् ।
स्वाम्यागमनशंसिभ्यः, प्रददौ पारितोषिके ॥४११॥

साकं **भगीरथेना**ऽपि, महद्ध्यां निर्गतः पुरात् ।
गत्वा समवसरणं, नत्वा स्वामिनमस्तवीत् ॥४१२॥

'जय कल्पद्रुम इव, ज[ग]दङ्गिषु कामद ! ।
भूर्भुवःस्वर्विभुस्तुत्य !, द्वैतीयीकजिनेश्वर ! ॥४१३॥

---

१. सगरः । २. अग्निज्वाला ।

जगत्प्रभो ! सुधादेश्या, युगपत् सर्वदेहिनाम् ।
हरन्ती तीव्रसन्देहविषं जयति गीस्तव ॥४१४॥

ये भीष्माद् भवतो भीता, भवन्तं पर्युपासते ।
पदं सनातनं देवदेव ! तेषां न दूरतः ॥४१५॥

चरणौ तव ये नाथ !, शरण्यौ शरणं श्रिताः ।
न तानवार्यवीर्योऽपि, द्रष्टुं शक्नोति मोहराट् ॥४१६॥

भावारिभिरतिक्रूरैर्दूनमूनं शमश्रिया ।
त्रातस्त्रायस्व त्रायस्व, मां स्वीयक्रमसंश्रितम्' ॥४१७॥

एवं स्तुत्वा यथास्थानं, निषण्णे **भरता**धिपे ।
सुधोर्मिकल्पां तीर्थेशः, प्रारेभे धर्मदेशनाम् ॥४१८॥

'भव्याः ! सत्कुल-सज्जाति-बुद्धि-श्रद्धादिसंयुतम् ।
नृभवं प्राप्य विरतिं, प्रपद्यध्वमवद्यतः ॥४१९॥

अवद्यात् कुशलभ्रंशमवद्याद्वासनोदयम् ।
अवद्याद् दुर्गतिं मूढा, लभन्तेऽनात्मचिन्तकाः ॥४२०॥

अवद्यानि च सर्वाणि,हृषीकगणनिर्जिताः ।
पीतमद्या इवाऽज्ञानाद्वितन्वन्ति शरीरिणः ॥४२१॥

शब्दादिगोचराण्याहुः, श्रवणादीनि पञ्च तु ।
अविवेकैर्दुर्जयानि, हृषीकाणि विशारदाः ॥४२२॥

स शूरः स च मेधावी, सतां स्तुत्यः स एव च ।
यस्य नो लुण्ट्यते पुण्यधनमिन्द्रियतस्करैः ॥४२३॥

अक्षैः पञ्चभिरङ्गस्थैः, शश्वत् खण्डितवैभवः ।
बाह्यान् जयन् परोलक्षानपि शूरः किमुच्यते ? ॥४२४॥

शब्दे कुरङ्गः शलभश्च रूपे, गन्धे द्विरेफोऽपि रसे च मीनः ।
स्पर्शे च गृध्नुर्द्विरदः प्रकामं, समासदद्वै विपदं दुरन्ताम् ॥४२५॥
[उपजातिवृत्तम्]

यस्तु प्रमादैकपरः समस्तान्यक्षाणि शश्वद्विषयैरशेषैः ।
प्रलोभयेत्तस्य भवेयुरुग्रा, यदापदस्तत्र किमद्भुतं तु ॥४२६॥
[उपजातिवृत्तम्]

हता **सुभद्रा** श्रवणेन्द्रियेण, वणिक्सुतोऽक्ष्णा च नसा कुमारः ।
रसज्ञया राड् **रसलोल**नामा, परेण[1] भर्त्ता **सुकुमालिकायाः** ॥४२७॥
[उपेन्द्रवज्रावृत्तम्]

यथा प्रापाऽऽपदं तीव्रामजितश्रवणेन्द्रिया ।
सार्थवाही **सुभद्रा**ख्या, भो भव्याः ! श्रूयतां तथा ॥४२८॥

वसन्तपुरमित्यस्ति, पुरं सर्वपुरोत्तमम् ।
धनदाख्यः सार्थवाहस्तत्रर्द्ध्या धनदोपमः ॥४२९॥

प्रेमपात्रं स्वलावण्यतर्जितस्मरवल्लभा ।
सुभद्रा नाम तस्याऽऽसीद्, गृहिणी हरिणेक्षणा ॥४३०॥

अन्येद्युर्**धनदः** पत्नीं, तां संस्थाप्य स्वमन्दिरे ।
आदाय प्रवरं भाण्डं, गतोऽन्यत्र वणिज्यया ॥४३१॥

गृहचिन्तां प्रकुर्वाणा, सार्थवाह्यथ कत्यपि ।
निनाय दिवसान् प्रेयोनामस्मृतिपरायणा ॥४३२॥

कदाचन समुत्पन्ने, कस्मिन्नपि प्रयोजने ।
सुभद्रा नगरस्यान्तः, प्रजिघाय स्वकिङ्करीः ॥४३३॥

---

१. **स्पर्शनेन्द्रियेण ।**

[इ]तश्च नगरे तत्र, समेतः किन्नरस्वरः ।
गन्धर्वः **पुष्पशाला**ख्यो, गायन्नस्ति श्रवःसुखम् ॥४३४॥

श्रुत्वा तस्य स्वरं दास्यस्ता मृग्य इव सत्वरम् ।
हृतस्वान्ता ययुस्तत्र, विमुक्तस्वप्रयोजनाः ॥४३५॥

तद्गीतिध्वनिमाधुर्यपरतन्त्राश्च तास्तदा ।
स्थित्वा तत्र चिरं गेयोपरमे स्वगृहं ययुः ॥४३६॥

सुभद्रया गाढरुषा, ततस्ता भर्त्सिता जगुः ।
'मा कुपः स्वामिनि ! शृणु, हेतोर्यस्माद्वयं स्थिताः ॥४३७॥

साम्प्रतं नगरेऽमुष्मिन्, गान्धर्वनिपुणः पुमान् ।
पुष्पशालाभिधः प्राप्तः, कुतश्चित् कोकिलस्वरः ॥४३८॥

तद्गीतेनाऽतिमाधुर्यादाक्षिप्ताः पशवोऽपि हि ।
किं पुनः स्वामिनि ! नराः, स्फुटचैतन्यशालिनः ॥४३९॥

तद्गीतहृतचेतस्का, गच्छन्तं समयं वयम् ।
प्रभूतमपि नाऽबुद्ध्यामहि देव्य इव द्यवि' ॥४४०॥

सार्थवाही ततोऽभाणीद्यद्येवं तर्हि मामपि ।
सख्यः ! श्रावयत क्षिप्रं, तद् गेयं सुधया समम्' ॥४४१॥

तथेति प्रतिपद्यैताः, पश्यन्त्योऽवसरं ततः ।
क्वचिद्देवकुले यात्रोत्सवे क्वापि प्रसर्पति ॥४४२॥

मिलिते प्रचुरे लोके, गायन्तमवबुध्य तम् ।
सार्थवाहीं **सुभद्रां** द्राग्, निन्युस्तत्र सकौतुकाम् ॥४४३॥ युग्मम् ॥

तदा च सुचिरं गानात्, खिन्नो गान्धर्वविद्भृशम् ।
पृष्ठे देवकुलस्याऽस्य, शयितोऽस्ति सुनिर्भरम् ॥४४४॥

प्रस्तावेऽस्मिन् सार्थवाहभार्या तत्र समागता ।
दासिभिर्दर्शितं गान्धर्विकं तं सुप्तमैक्षत ॥४४५॥

कुरूपं काकवत् कृष्णवपुषं दन्तुरं च तम् ।
पश्यन्ती सार्थवाही सा, सजुगुप्समभाषत ॥४४६॥

'रूपं यस्येदृशं तस्येदृशं गेयमपि ध्रुवम् ।
गुणा आकृतिहीनेषु, लभ्यन्ते हि कुतोऽङ्गिषु ?' ॥४४७॥

इत्यादि ब्रुवती तस्य, कुरूपत्वेन खेदभाक् ।
मुहुर्मुहुः सा थूत्कृत्य, समवाप स्वमन्दिरम् ॥४४८॥

पुष्पशालः प्रबुद्धोऽथ, तस्याः सर्वं विचेष्टितम् ।
सविशेषं समासन्नवर्त्तिभिर्ज्ञापितोऽकुपत् ॥४४९॥

दध्यौ च दर्शयाम्यस्या, दुर्मत्तायाः सुदारुणम् ।
फलं पचेलिमं क्षिप्रं, मदवज्ञामहीरुहः ॥४५०॥

न करोत्युपकर्त्तुर्योऽपकर्त्तुर्वा यथोचितम् ।
स मा जीवन् महीपीठे, शिलाशकलसन्निभः ॥४५१॥

एवं विचिन्त्य मनसा, तस्याः सकलमप्यसौ ।
स्वरूपं लोकतोऽज्ञासीदपकारैकबद्धधीः ॥४५२॥

यथा सस्नेहमापृच्छ्य, तां प्रास्थित पुरादयम् ।
यथा देशान्तरे भूपप्रसादं समवाप च ॥४५३॥

व्यवहाराद्यथा द्रव्यमर्जयामास पुष्कलम् ।
यथा निवृत्तः सोत्कण्ठमुपैति च निजं गृहम् ॥४५४॥

इत्यादि सार्थवाहस्य, **धनदा**ख्यस्य विस्तरात् ।
चरितं सकलं गेये, तावत्तेन न्यबध्यत ॥४५५॥

यावत् प्राणेश्वरीसङ्गोल्लसदायल्लको निजम् ।
वेश्म प्रविशति प्रौढऋद्ध्या विस्माययन् जनम् ॥४५६॥

॥ चतुर्भिः सम्बन्धः ॥

अथ रात्रेरन्त्ययामे, स्थित्वा तस्य गृहान्तिके ।
मधुरध्वनिनाऽनेन, तद् गातुमुपचक्रमे ॥४५७॥

यथा यथा च सा गीतं, तच्छुश्राव मनोहरम् ।
तथा तथाऽतीवतप्ता, प्रेयोविरहवह्निना ॥४५८॥

पूर्वं प्रेमभराद्भर्त्रा, समं विलसितानि तु ।
स्मारं स्मारं सशल्येव, सर्वाङ्गं साऽभवन्मुहुः ॥४५९॥

मृगीवद् गीततः पारवश्यं प्राप्ता स्ववल्लभम् ।
प्रविशन्तमिवाऽऽगारे, ज्ञात्वाऽचालीच्च सम्मुखा ॥४६०॥

हर्षोत्कर्षाचितस्वान्ता, प्रासादोद्धर्वमपि स्थितम् ।
स्वं भूमिष्ठं मन्यमाना, गेयोत्कृष्टरसाद् द्रुतम् ॥४६१॥

अम्बरे ददतीरणं[1], निष्ठुरे मेदिनीतले ।
पतिता मुमुचे प्राणैः, परत्राऽप्याप च व्यथाः ॥४६२॥ युग्मम् ॥

अनिर्जितेन श्रवणेन्द्रियेणैव गता क्षयम् ।
सुभद्रेति परिज्ञाय, निगृह्णीध्वं तदुद्यमात् ॥४६३॥

इति श्रवणेन्द्रिये **सुभद्रा**कथा ॥ श्री ॥ ग्रं. ३६ ॥

चक्षुर्लोलो वणिक्पुत्रो, यथा सेहे महापदः ।
तथाऽधुना वर्णयामः, शृण्वन्तु स्वहितार्थिनः ! ॥४६४॥

---

१. ईरणम् = गतिम् ।

नगरं **काञ्चनपुरं, कलिङ्गेष्वस्ति** सत्तमम् ।
श्रेष्ठी **श्रीनिलयो** नाम, तत्राऽभूत् सान्वयाह्वयः ॥४६५॥

तस्य भार्या **यशोभद्रा,** समभूत् स्त्रीशिरोमणिः ।
तयोर्मनोरथशतैरजनिष्ट क्रमात् सुतः ॥४६६॥

रतिसेनाभिधः सैष, रूपादिगुणशोभितः ।
वर्द्धयन् प्रमदं पित्रोरवर्द्धत दिने दिने ॥४६७॥

महाद्भुतं तस्य रूपं, दृष्ट्वा तातोऽतिहर्षभाक् ।
तद्देहलक्षणस्तोमं, बुभुत्सुः स्वीयवेश्मनि ॥४६८॥

आहूय लक्षणशास्त्रपाठकान् मतिमद्वरान् ।
सत्कृत्याऽपृच्छदेषोऽङ्गजन्मा किंलक्षणो मम ? ॥४६९॥ [युग्मम्]

ते वीक्ष्याऽथाऽवदन् 'श्रेष्ठिन् !, शृणु स्त्री-पुंसलक्षणम् ।
उक्तं शास्त्रेषु विस्तीर्णं, सङ्[क्षिप्तं] तु निवेद्यते ॥४७०॥

त्रिगम्भीरस्त्रिविपुलश्च[तु]र्ह्रस्वः षडुन्नतः ।
पञ्चदीर्घः पञ्चसूक्ष्मः, सप्तरक्तो नरो वरः ॥४७१॥

नाभिः स्वरः सत्त्वमिति, गम्भीरं शस्यते त्रयम् ।
त्रयं तु विपुलं वक्षो, ललाटं वदनं तथा ॥४७२॥

कण्ठः पृष्ठं तथा लिङ्गं, जङ्घा चेति चतुष्टयम् ।
ह्रस्वं ह्रासाय विपदां, विनिर्दिष्टं विशारदैः ॥४७३॥

वक्षो नासा नखाः कण्ठः, कक्षा च वदनं तथा ।
एतैरभ्युन्नतैर्मर्त्त्या, गुर्वीं प्राप्नुयुरुन्नतिम् ॥४७४॥

मध्यमक्ष्णोः स्तनयोश्च, बाहू नासा हनुस्तथा ।
इति दीर्घाणि पञ्च स्युर्दीर्घश्रीसमवाप्तये ॥४७५॥

नखा अङ्गुलिपर्वाणि, त्वग्दन्ताश्चिकुरास्तथा ।
इमानि पञ्च सूक्ष्माणि, लक्ष्याणि शुभसन्ततेः ॥४७६॥

नेत्रान्त-नख-ताल्वोष्ठ-जिह्वं पाणी पदौ तथा ।
एतानि सप्त रक्तानि, रञ्जयन्ति श्रियं नृषु ॥४७७॥

नृणां स्याच्छ्रेष्ठया गत्या, यानं भोगाः पुनस्त्वचा ।
मांसेन सुखमस्थ्नाऽर्थाः, स्वरेणाऽऽज्ञा दृशा स्त्रियः ॥४७८॥

पुंसां पादतलं रक्तं, स्निग्धं स्वेदविवर्जितम् ।
अवक्रं पद्मसोमालं, वज्राद्यङ्कं प्रशस्यते ॥४७९॥

खर-कोल-सृगालास्तु, यस्य पादतले स्थिताः ।
स दुःखितो दरिद्रः स्यात्, सर्वकालं नराधमः ॥४८०॥

उत्तुङ्गाः पृथुला रक्ताः, स्निग्धा दर्पणसन्निभाः ।
नखाः शस्ताः कुशीलत्वव्यञ्जका रूक्ष-पुष्पिताः ॥४८१॥

शस्यौ कूर्मोन्नतावुष्णौ, गूढगुल्फौ समौ पदौ ।
निन्द्यौ सूर्पाकृती वक्रौ, सशिरौ विरलाङ्गुली ॥४८२॥

जङ्घे वृत्ते प्रविरलश्लक्ष्णरोमसमन्विते ।
स्यातां श्रिये विदेशायाऽतिदीर्घस्थूलिके पुनः ॥४८३॥

जानुनी मांसले वृत्ते, ऊरू करिकरोपमौ ।
धन्यानां मणिना लिङ्गं, तून्नतेन युतं लघु ॥४८४॥

निःस्वः प्रलम्बलिङ्गः स्यात्, स्थूललिङ्गस्तु निष्प्रजः ।
मूत्रं प्रदक्षिणावर्त्तं, सशब्दं शस्यते पुनः ॥४८५॥

सिंहस्य(स्येव) कटिः शस्या, विस्तृता मांसलाऽपि च ।
निन्द्या तु सङ्कटा ह्रस्वा, मध्यं वज्रोपमं शुभम् ॥४८६॥

गम्भीरं दक्षिणावर्त्तकलितं नाभिमण्डलम् ।
प्रशस्तमप्रशस्तं तु, वामावर्त्तं तथोन्नतम् ॥४८७॥

विशालं मांसलं वक्षः, शस्तं लोमशमुन्नतम् ।
विषमं श्रीविनाशाय, शस्त्रपाताच्च मृत्यवे ॥४८८॥

विक्रमी महिषग्रीवः, कम्बुग्रीवो नरेश्वरः ।
अतिदीर्घ-कृशग्रीवो, दुःखितो बहुभक्षकः ॥४८९॥

मांसलौ विपुलावंसौ, श्रिये दुःखप्रदौ कृशौ ।
शस्ते स्वेदोज्झिते पीने, कक्षे क(पृ ?)ष्ठमरोमशम् ॥४९०॥

आजानुलम्बितौ पीनावल्परोमान्वितौ भुजौ ।
राज्याय किङ्करत्वाय, तौ ह्रस्वौ विषमौ तथा ॥४९१॥

नवाम्रपल्लवाताम्रतलावस्वेदनौ तथा ।
अकर्मकर्कशावुभौ, पाणी स्यातां नृपश्रिये ॥४९२॥

कोमलाः सरला दीर्घा, अङ्गुल्यश्चिरजीविनाम् ।
श्लक्ष्णा मेधाविनां स्थूला, दासकर्मकृतां पुनः ॥४९३॥

शस्ता अङ्गुलिमूर्द्धानो, दक्षिणावर्त्तसंयुताः ।
अङ्गुष्ठमूलमध्यस्था, यवाः पुत्रयशःप्रदाः ॥४९४॥

मणिबन्धे क्रमादेका, द्वे तिस्रो यवपङ्क्तयः ।
दध्युर्नृणां धनाढ्यत्वं, सचिवत्वं नरेशताम् ॥४९५॥

धनी पाणेस्तले शोणे, कल्माषे धनवर्जितः ।
पीते त्वगम्यनारीगो, नीले भवति मद्यपः ॥४९६॥

रेखाः पाणितले शस्ता, गम्भीरा मधुपिङ्गलाः ।
सूक्ष्माः स्निग्धा गतच्छेदा, अव्यावृत्तास्तथाऽऽयताः ॥४९७॥

आभ्यां मध्याङ्गुलिस्थाभ्यां, वाच्यः प्रोक्तविपर्ययः ।
लेखा सुमृत्युदा मध्ये, तर्जनी-गृहबन्धयोः ॥५०८॥

श्लिष्टैरङ्गुलिमध्यैः स्यान्नराणां द्रव्यसञ्चयः ।
छिद्रान्वितैः पुनस्त्यागशीलतां तैः प्रचक्षते ॥५०९॥

विमलं वर्त्तुलं सौम्यं, सममास्यं प्रशस्यते ।
ह्रस्वं कृपणताहेतुर्दीर्घं दारिद्र्यकारणम् ॥५१०॥

लघ्वोष्ठो दुःखितो मर्त्यः, पीनोष्ठः सुभगः पुनः ।
भोगी भवेत् प्रलम्बोष्ठो, विषमोष्ठस्तु भीरुकः ॥५११॥

समाः शुद्धाः शिखरिणो, घनाश्च दशनाः शुभाः ।
न पुनर्विषमाः श्यामा, रूक्षाः प्रविरलाश्च ते ॥५१२॥

नृपो द्वात्रिंशता दन्तैरेकहीनैस्तु भोगभाक् ।
त्रिंशता मध्यमगुणस्ततो हीनैर्विलक्षणः[1] ॥५१३॥

धन्यानां रसना दीर्घा, श्लक्ष्णा पद्मदलोपमा ।
चित्रला मद्यपानां स्यात्तालु रक्तं तु शस्यते ॥५१४॥

कृष्णं कुलक्षयाय स्यान्नीलं दुःखौघकारणम् ।
हंसस्वरो नरः स्तुत्यो, निन्दितो वायसस्वरः ॥५१५॥

श्रीहेतुः श्लक्ष्णविवरा, नासिका सरलोन्नता ।
दुष्टा तु चिपिटा गण्डौ, प्रशस्यौ कूपवर्जितौ ॥५१६॥

आयतौ विपुलौ कर्णौ, लोमशौ च चिरायुषाम् ।
शस्या पद्मदलाभा दृग्, मधुपिङ्गा धनावहा ॥५१७॥

---

१. लक्षणविहीनः ।

आभ्यां मध्याङ्गुलिस्थाभ्यां, वाच्यः प्रोक्तविपर्ययः ।
लेखा सुमृत्युदा मध्ये, तर्जनी-गृहबन्धयोः ॥५०८॥

श्लिष्टैरङ्गुलिमध्यैः स्यान्नराणां द्रव्यसञ्चयः ।
छिद्रान्वितैः पुनस्त्यागशीलतां तैः प्रचक्षते ॥५०९॥

विमलं वर्त्तुलं सौम्यं, सममास्यं प्रशस्यते ।
ह्रस्वं कृपणताहेतुर्दीर्घं दारिद्र्यकारणम् ॥५१०॥

लघ्वोष्ठो दुःखितो मर्त्यः, पीनोष्ठः सुभगः पुनः ।
भोगी भवेत् प्रलम्बोष्ठो, विषमोष्ठस्तु भीरुकः ॥५११॥

समाः शुद्धाः शिखरिणो, घनाश्च दशनाः शुभाः ।
न पुनर्विषमाः श्यामा, रूक्षाः प्रविरलाश्च ते ॥५१२॥

नृपो द्वात्रिंशता दन्तैरेकहीनैस्तु भोगभाक् ।
त्रिंशता मध्यमगुणस्ततो हीनैर्विलक्षणः[1] ॥५१३॥

धन्यानां रसना दीर्घा, श्लक्ष्णा पद्मदलोपमा ।
चित्रला मद्यपानां स्यात्तालु रक्तं तु शस्यते ॥५१४॥

कृष्णं कुलक्षयाय स्यान्नीलं दुःखौघकारणम् ।
हंसस्वरो नरः स्तुत्यो, निन्दितो वायसस्वरः ॥५१५॥

श्रीहेतुः श्लक्ष्णविवरा, नासिका सरलोन्नता ।
दुष्टा तु चिपिटा गण्डौ, प्रशस्यौ कूपवर्जितौ ॥५१६॥

आयतौ विपुलौ कर्णौ, लोमशौ च चिरायुषाम् ।
शस्या पद्मदलाभा दृग्, मधुपिङ्गा धनावहा ॥५१७॥

---

१. लक्षणविहीनः ।

नीलाक्षोऽहङ्कृतः श्वेतदृग् ज्ञानी शोणदृग्नृपः ।
दीर्घाक्षश्चिरजीवी स्याद्, भोगी विपुललोचनः ॥५१८॥

कपोतनय[न]ः कामी, गजनेत्रश्चमूपतिः ।
मार्जारनयनः पापी, कलिकृत्ताम्रचूडदृक् ॥५१९॥

क्रूरास्तिर्यग् निरीक्षन्ते, सरलं सरलाशयाः ।
सविकाशं पुण्यवन्तः, पापाः पुनरधोमुखम् ॥५२०॥

अन्धात् काणो महाक्रूरः, काणात् केकरनेत्रकः ।
केकराक्षा[त्] काक(तं)राक्षः, प्रेक्षावद्भिर्निगद्यते ॥५२१॥

रूक्षा दृग् यस्य निर्हेतु, भ्राम्यतीतस्ततश्चला ।
परदारादिसक्तोऽसौ, काक(त)रो विपदां पदम् ॥५२२॥

स्युर्मानवन्तः सौभाग्ययुता दीर्घपृथुभ्रुवः ।
स्त्रीविषये प्राप्नुवन्ति, [तुच्छभ्रुवो] महापदः ॥५२३॥

धन्यानां भालमर्द्धेन्दुसंस्थानं विपुलं मतम् ।
तुच्छायुषामतितुच्छं, दुःखिनां चातिविस्तृतम् ॥५२४॥

सताञ्छत्रसमं शीर्षं, केशाश्च मृदवो घनाः ।
दरिद्राणां पुना रूक्षाः, स्फुटिता मलिना मताः ॥५२५॥

---

१. 'अन्धः क्रूरः काणः काणादपि केकरो मनुजात् स्यात् ।
काणात् केकरतोऽपि क्रूरतरः कातरो भवति' ॥२५४॥ इति सामुद्रिकतिलके *प्रथमाधिकारे ॥*

२. 'हीणभुमआहिं पुरिसा महिलाकज्जे य बंधया होंति' इति कुवलयमालायां पृ.नं. १३०।२१६ । तथा 'इत्थीविसए जायइ महावया तुच्छभमुहाण'मिति पुष्पमालायां ॥ २६१ ॥ श्लोकस्य वृत्तौ वणिक्पुत्रकथायां श्लो. ॥४३॥

अन्यच्च–

'धन्यो[1] गतेस्तु मर्त्यस्य,' वर्णः स्नेहस्ततो वरः ।
स्नेहात् स्वरः स्वरात् सत्त्वं, सर्वं सत्त्वे प्रतिष्ठितम् ॥५२६॥

नारीणामपि देहेषु, नरवत् प्रायशो बुधैः ।
शुभाशुभफलं ज्ञेयं, निःशेषमपि लक्षणम् ॥५२७॥

कनिष्ठाद्याः पदाङ्गुल्यो, यस्या भूमिं स्पृशन्ति न ।
एकं द्वौ त्रींश्चतुरश्च, सा [प]तीन् मारयेत् क्रमात् ॥५२८॥

प्रलम्बेन[2] ललाटेन, हन्ति देवरमङ्गना ।
श्वशुरं तूदरेण स्फिग्द्वितयेन च वल्लभम् ॥५२९॥

शास्त्रोक्तं लक्षणं स्त्रीणां, कियद्वच्मि शुभाशुभम् ।
पूर्वसूरिकृतं वृत्तद्वयं तत्सूचकं त्विदम् ॥५३०॥

पीनोरुः पीनगण्डा समसितदशना, पद्मपत्रायताक्षी,
बिम्बोष्ठी तुङ्गनासा गजगतिगमना, दक्षिणावर्त्तनाभिः ।
स्निग्धाङ्गी वृत्तवक्त्रा पृथुमृदुजघना, सुस्वरा चारुकेशी,
भर्त्ता तस्याः क्षितीशो भवति च तनुजो, विक्रमी सार्वभौमः ॥५३१॥

[स्रग्धरावृत्तम्]

---

१. 'धास्यस्वचिसुवर्णस्य' इति पु.प्रे. ।
तुला-'धन्नो गईण वन्नो, वन्नाओ सुंदरो हवइ सद्दो ।
तत्तोवि वरं सत्तं, सव्वंपि पइट्ठियं सत्ते ॥५४॥' इति पुष्पमालायाम् ॥

२. यस्यास्त्रिणि प्रलम्बानि, ललाटमुदरं भगः ।
त्रीणि सा हन्यते नारी, देवरं श्वशुरं पतिम् ॥६२॥
इति सामुद्रिकशास्त्रे स्त्रीलक्षणाधिकारे ॥
तथा 'यस्याः प्रलम्बमलिकं, सा नारी देवरं निजं हन्ति ।४।१८१। पूर्वार्ध ॥
भवति प्रलम्बमुदरं यस्याः सा श्वशुरमाहन्ति ।४।७८। पूर्वार्ध ॥
परुषं रूक्षं चिपिटं स्फिग्युग्मं मांसरहितं न शुभम् ।
तदपि विलम्बमानं धत्ते वैधव्यमचिरेण ।४।४६।'
इति सामुद्रिकतिलके ॥

पिङ्गाक्षी कूपगण्डा खरपरुषरवा, स्थूलजङ्घोर्ध्वकेशी,
लम्बोष्ठी दीर्घवक्त्रा प्रविरलदशना, श्यामताल्वोष्ठजिह्वा ।
शुष्काङ्गी संहितभ्रूः कुचयुगविषमा, रोमशा काकजङ्घा,
सा नारी वर्जनीया सुतधनरहिता, भ्रष्टशीला च पुंसा ॥५३२॥

[स्रग्धरावृत्तम्]

श्रेष्ठिन्निदं प्रसङ्गात् स्त्री-पुंसयोर्लक्षणं स्फुटम् ।
सङ्क्षेपात् किञ्चन प्रोक्तं, प्रकृतं त्वधुना शृणु ॥५३३॥

'त्वत्पुत्रस्य शरीरेऽस्ति, सर्वः सल्लक्षणोच्चयः ।
दृशस्तु लक्षणं बाढं, काक(त)रत्वेन दूषितम् ॥५३४॥

तत्तनूलक्षणैः शस्तैरेष श्रीमान् भविष्यति ।
दृग्दोषैस्त्वापदो भूयो, भूयोऽपि समवाप्स्यति ॥५३५॥

अनियन्त्रितदृग् ह्येष, परदारेषु सन्ततम् ।
सक्तस्तेनैव दोषेणाऽवश्यं प्राप्स्यति पञ्चताम्' ॥५३६॥

श्रुत्वेति श्रेष्ठिशार्दूलो, वज्राहत इव क्षणम् ।
स्थित्वा निःश्वस्य चाजल्पदनल्पारतिसङ्गतः ॥५३७॥

'परदारप्रसक्तानां, श्रिया विपुलयाऽपि किम् ? ।
प्रभूतेनाऽपि शास्त्रेण, किं सुरापायिनां किल ? ॥५३८॥

श्रेयो दारिद्र्यमप्युद्यद्विवेकविमलात्मनाम् ।
न तु लक्ष्मीरपि प्रौढकलङ्काङ्कितवर्ष्मणाम् ॥५३९॥

महते च कलङ्काय, परस्त्रीप्रार्थनं नृणाम् ।
विशेषेण कुलेऽस्माकं, शारदेन्दुसमुज्ज्वले ॥५४०॥

ममात्मजोऽपि चेदेवं, क्लेशकोटिनिबन्धने ।
अकार्ये [पतिता] तर्हि, दैवेन मुषितोऽस्मि हा !' ॥५४१॥

इत्थं खेदपरं श्रेष्ठिधुर्यं लक्षणपाठकाः ।
स्माहुरस्तु शुचा **भावा, भवन्त्येव हि भाविनः** ॥५४२॥

सम्मान्य तानथ श्रेष्ठी, विसृज्य च विशारदः ।
चकार धर्मकर्माणि, जानानो विरसं भवम् ॥५४३॥

सुतस्तु तस्य बालत्वादप्यारभ्य चलां दृशम् ।
रमणीषु सुरूपासु, न्यास्थद्रागभराच्चिरम् ॥५४४॥

तरुणीषु रसोत्कर्षात्, स शश्वल्लोललोचनः ।
अभ्यधीयत लोकेन, **लोलाक्ष** इति नामतः ॥५४५॥

कलाः क्रमेण गृह्णंश्च, दुष्टदृष्टिविकारवान् ।
आसदद्यौवनं काममत्तमातङ्गकाननम् ॥५४६॥

ततश्च मदनोन्मत्तो, भ्राम्यत्येष पुरेऽखिले ।
अङ्गोपाङ्गेषु रम्येषु, प्रमदानां प्रयुक्तदृक् ॥५४७॥

काश्चिद्रूपवतीर्नारीराश्लिष्यद्बलतोऽपि सः ।
काश्चन प्रार्थयामास, रमयामास काश्चन ॥५४८॥

तस्मिन् व्यतिकरे चैष, वध-बन्धादिभिर्भृशम् ।
काः काः कदर्थना नाप, पापानामवधिः कुधीः ॥५४९॥

अन्यदा प्रमदा रूपशालिनी**र्मगधेष्व**यम् ।
निशम्योद्दिश्य वाणिज्यमाप्रष्ट पितरौ रसी ॥५५०॥

ताभ्यामप्यतिखिन्नाभ्यां, विसृष्टो द्रविणं बहु ।
उपादाय **राजगृहे,** ययौ परिजनान्वितः ॥५५१॥

मण्डयित्वा तत्र हट्टं, व्यवहारपरायणः ।
दिनानि गमयामास, सद्योषावर्ष्मबद्धदृक् ॥५५२॥

अन्येद्युः कस्यचिद्भूपवल्लभस्य मृगेक्षणा ।
सुरूपा शिबिकारूढाऽऽययौ तस्याऽऽपणान्तिके ॥५५३॥

लोलाक्षो निश्चलन्यस्तनेत्रः प्रत्यङ्गमादरात् ।
क्षणं तां वीक्षमाणोऽस्थात्, पाषाणघटितो यथा ॥५५४॥

विकल्पलक्षाकुलितमनाः स्मरवशस्ततः ।
कण्ठे तस्या अनात्मज्ञो, धावित्वा लग्नवान् दृढम् ॥५५५॥

तस्याः पदातिवर्गेण, ताडयित्वा ततोऽसकौ ।
सन्दानितश्चालितश्चाऽर्पयितुं स्वप्रभोर्जवात् ॥५५६॥

पुरोऽथाऽऽगच्छता तेन, प्रभुणाऽखिलमप्यदः ।
वृत्तं विविदुषा तस्य, सर्वस्वं जगृहे द्रुतम् ॥५५७॥

स च यावन्नृपस्यार्पयितुं प्रस्थापितः पुरः ।
तावदागात् पुरश्रेष्ठी, **विद्रुम**स्तत्पितुः सुहृत् ॥५५८॥

बहु प्रदाय स स्वस्वं[1], प्रभूताच्चोपरोधतः ।
स्नेहेन कृपया चैनं, विमोच्य स्वगृहेऽनयत् ॥५५९॥

पत्नीं **धनवती**नाम्नीमभ्यधत्त च सादरम् ।
'भ्रातुष्पुत्रोऽयमस्माकं, सत्कर्त्तव्यः प्रियेऽनिशम्' ॥५६०॥

ततोऽयं **विद्रुम**श्रेष्ठिमन्दिरे प्राप्तगौरवः ।
यान्तमप्यविदन् कालं, तस्थिवानुरुसौख्यतः ॥५६१॥

---

१. निजद्रव्यम् ।

तत्रापि च दुराकूतः, श्रेष्ठिजायां निरन्तरम् ।
स्थितां सुप्तां चलन्तीं वा, साङ्गोपाङ्गं निरैक्षत ॥५६२॥

एकदा च रहस्येतामत्यन्तं मदनाकुलः ।
प्रार्थयामास **लोलाक्षो**, नैच्छत् सा तु कथञ्चन ॥५६३॥

प्रार्थनातः पुनर्नोपरराम स कदाचन ।
अनिच्छन्तीमपि रहो, लब्ध्वाऽन्येद्युरभुक्त च ॥५६४॥

सुखं गृद्धा ततः सापि, तस्मिन् भृशमरज्यत ।
श्रेष्ठी च **विद्रुमो**ऽज्ञासीत्तद्दुर्वृत्तं तयोः क्रमात् ॥५६५॥

किञ्चिद् ब्रवीति नो यावच्छ्रेष्ठी निजगुरुत्वतः ।
ताभ्यां भृशं सचेतोभ्यां, तावन्मन्त्रितमीदृशम् ॥५६६॥

किमनेनाऽन्तर्गडुना ?, विनाश्यैनं रयात्ततः ।
निरन्तरायं सौख्यानि, चिररात्राय भुञ्ज्वहे ॥५६७॥

इति निश्चित्य **लोलाक्षः**, पिशाच इव मूर्त्तिमान् ।
रात्रौ सुप्तममुं यावत्, क्षुर्या हन्तुं प्रवृत्तवान् ॥५६८॥

तावज्जागरितो दैवाद्, घातं वञ्चितवानयम् ।
भिया ह्रिया च स ततः, पलायामास पातकी ॥५६९॥

अथ दध्यौ हृदि श्रेष्ठी, धिगहो ! मोहजृम्भितम् ।
यदकृत्यरताः कृत्याऽकृत्यानि गणयन्ति न ॥५७०॥

मयैष मोचितः प्राप्तो, विपदं मारणान्तिकीम् ।
गृहे च स्थापितः पुत्र, इव दृष्टश्च सन्ततम् ॥५७१॥

तथाऽप्यहो ! प्रियायां मे, सक्तस्तुष्टश्च नेयता ।
अन्त्यजेभ्योऽपि हीनो धिग्, यन्मामपि जिघांसति ॥५७२॥

न प्राक् स्वल्पोऽपि भार्याया, विकारोऽदर्शि जातुचित् ।
इदानीं त्वस्य सङ्गेन, साऽप्येवं स्म व्यवस्यति ॥५७३॥

यद्वाऽलीकमिदं दोषोत्पत्तिर्यत् परसङ्गतः ।
विषभृच्छीर्षगोऽपीह, मणिर्दृष्टो विषापहृत् ॥५७४॥

तदियं सद्मनोऽर्थस्य, प्राणानां चेश्वरीकृता ।
यद्येवं दारुणा जज्ञे, गृहवासेन तत् कृतम् ॥५७५॥

इति भावयन् श्रेष्ठी, विरक्तो गृहवासतः ।
अर्हदर्चादिकार्येषु, व्ययित्वा सकलां श्रियम् ॥५७६॥

परिव्रज्यां [च] **विबुधसूरि**पार्श्वे प्रपन्नवान् ।
लोलाक्षेन समं चक्रे, गेहवासं परा पुनः ॥५७७॥ [युग्मम्]

लोलाक्षो धनवत्यङ्गाभरणोच्चयमूल्यतः ।
पुरे तत्रैव वाणिज्यं, विदधाति स्म किञ्चन ॥५७८॥

जरासन्धान्वयोद्भूतो, भूपः **समरसिन्धुरः** ।
पाति प्रजास्तदा तत्र, द्वेषिद्रुमपरश्वधः ॥५७९॥

स वसन्तोत्सवेऽन्येद्युरन्तःपुरसमन्वितः ।
समं सामन्त-सचिवादिभिरुद्यानमीयिवान् ॥५८०॥

तत्र पौरजनोऽप्येतः, प्रवृत्तः क्रीडितुं मुदा ।
लोलाक्षोऽप्याययावाशु, प्रवृद्धोरुकुतूहलः ॥५८१॥

विकारैर्मान्मथैः पूर्णो, **लोलाक्ष**स्तत्र सञ्चरन् ।
याप्ययानाधिरूढाया, नृपपत्न्या मनोहरम् ॥५८२॥

---

१. धनवती ।

कङ्केल्लिपल्लवच्छायं, प्रक्वणन्मणिकङ्कणम् ।
मुद्रारत्नोच्छलत्कान्तिसान्द्रीभूतनखांशुकम् ॥५८३॥

कथञ्चित् प्रकटं पाणितलं निर्वर्णयन् क्षणम् ।
उत्कण्ठानिचितस्वान्तश्चिन्तयामासिवानिति ॥५८४॥ विशेषकम् ॥

अहो ! यस्याः कराग्रस्याऽपीदृशं रूपमद्भुतम् ।
तस्याः सर्वां वपुर्लक्ष्मीं, यः पश्यति स पुण्यवान् ॥५८५॥

उपायः कोऽस्तु तद् द्रष्टुमस्याः सर्वां वपुःश्रियम् ।
मूर्द्धन्यो भाग्यहीनानामस्मि पश्यामि नो यदि ॥५८६॥

एवं विकल्पलक्षाणि, तन्वंस्तद्दर्शनोत्सुकः ।
पार्श्वं गन्तुमशक्तश्चाऽपृच्छत् सौविदमेककम् ॥५८७॥

'केयं ? कस्येति' सोऽप्याख्यत्, 'जानीह्येतां महीपतेः ।
प्राणप्रियां महादेवीं, नामतः **सुरसुन्दरीम्**' ॥५८८॥

श्रुत्वेति दुर्लभां बाढं, मत्वा तां प्रसरज्ज्वरः ।
कथञ्चित् स ययौ गेहं, चिन्ताशल्यितमानसः ॥५८९॥

बुभुजे न निदद्रौ न, [न] लेभे च रतिं क्वचित् ।
निःश्वसन् शून्यहुङ्कारान्, ददौ शून्यनिरीक्षणः ॥५९०॥

धनवत्याऽथ निर्बन्धात्, पृष्टो नोत्तरमप्यदात् ।
ततो रात्रौ प्रसुप्तोऽपि, निद्रालेशमनाप्नुवन् ॥५९१॥

चिन्तार्तः सहसोत्थाय, धार्ष्ट्येन रजनीभरे ।
सम्मुखं भूपसौधस्य, त्यक्ताशेषभयोऽचलत् ॥५९२॥ युग्मम् ॥

इतश्च नगरे तत्र, भ्राम्यन् विद्याप्रसाधकः ।
कश्चित् सम्प्राप **लोलाक्षं**, नृपसौधार्धवर्त्मनि ॥५९३॥

स च तं बहुधाऽऽक्रन्दपरं निजनरैर्द्रुतम् ।
बन्धयित्वा निनायैकां, काञ्चनोच्चैर्महाटवीम् ॥५९४॥

अस्थापयच्च शैलस्य, गुहायामथ निर्दयम् ।
तद्देहाद्रक्तमाकृष्य, मांसखण्डान्निकृत्य च ॥५९५॥

साधको ज्वलनेऽहौषीद्वारानष्टोत्तरं शतम् ।
पुपोष पुनरौषध्या, व्रणरोहं विधाय च ॥५९६॥ युग्मम् ॥

पुनस्तथैवाऽष्टशतं, वारानग्नौ स साधकः ।
जुहाव क्रन्दतस्तस्योत्कृत्य मांसांशमङ्गतः ॥५९७॥

एवं कतिपयदिनपर्यन्तेऽसौ मुहुर्मुहुः ।
छिद्यमानोऽन्वभूद्गाढं, वेदनां नरकोपमाम् ॥५९८॥

अध्यायच्च विधे ! क्रुद्धस्त्वं मेऽसून् हरसे यदि ।
तथाऽपि दर्शय सकृत्, सर्वाङ्गं **सुरसुन्दरीम्** ॥५९९॥

तद्दर्शनात् कृतार्थस्य, मम स्वरुचितं भवान् ।
विदधातु विषीदामि, यथा प्राणात्ययेऽपि न ॥६००॥

इत्थं मानस-शारीरदुःखल[क्ष]विबाधितः ।
दिनानि कल्पकल्पानि, बहून्येष व्यलङ्घत ॥६०१॥

लोलाक्षस्य पितुर्बालमित्रं सार्थेश्वरोऽन्यदा ।
काञ्चनपुरवास्तव्यो, नामतो **भुवनोत्तमः** ॥६०२॥

ततो वणिज्यया प्रत्यावृत्तः तत्रैव दैवतः ।
सार्थं न्यवेशयत्तं च, तथाऽज्ञासीत् परिच्छदात् ॥६०३॥ युग्मम् ॥

झटित्येत्य च तं विद्यासाधकं भयविह्वलम् ।
नाशयित्वा निजे सार्थे, **लोलाक्ष**मनयत्ततः ॥६०४॥

कारितो भोजनं देहाभ्यङ्गाद्यैः प्रगुणीकृतः ।
पृष्टः स सार्थवाहेन, कथमागाद् भवानिह ? ॥६०५॥

अभ्यधादथ **लोलाक्षः**, पुरे **राजगृहे** यथा ।
आगां वाणिज्यतोऽहं तन्निखिलं विदितं हि वः ॥६०६॥

तिष्ठंस्तत्राऽमुना विद्यासाधकेन दुरात्मना ।
हट्टमार्गान्निशि हृतस्तन्मां विसृजताऽधुना ॥६०७॥

यथा तत्र गतो भाण्डं, संवृणोम्यखिलं निजम् ।
पित्रोश्च कथयेताऽल्पैरहोभिः सुत एष्यति ॥६०८॥

एवमाद्युत्तरैर्धूर्तस्तस्मात् पितृवयस्यतः ।
स्वं विमोच्य द्रुतं **राजगृहे**ऽगान्निजमन्दिरम् ॥६०९॥

'इयन्त्यहानि कुत्राऽस्था ?,' इति प्रश्नपरायणाम् ।
[अ]सौ धनवतीं केनाप्युत्तरेण व्यबोधयत् ॥६१०॥

निर्गम्य **सुरसुन्दर्या**, विरहात् कृच्छ्रतो दिनम् ।
भीतो निशाटनात् सायमेव गत्वा नृपालयम् ॥६११॥

रहःस्थां स्फारशृङ्गारां, वासौकःस्थामथो निशि ।
प्रतीक्षमाणां भूमीशागमनं तां निरैक्षत ॥६१२॥ युग्मम् ॥

गत्वाऽभ्यर्णं ततः पापस्तस्या रूपं विलोकयन् ।
क्षणं चित्रस्थित इव, निमेषोज्झितदृक् स्थितः ॥६१३॥

अथ स्मरपराधीनो, धावित्वा यावदाशु ताम् ।
समालिङ्गति तावत् साऽपससार झटित्यपि ॥६१४॥

अत्रान्तरे चागतेन, नरेशेन निजैर्नरैः ।
बन्धयित्वा दृढमयं, कशादिभिरघात्यत ॥६१५॥

'अरे पाप ! किमारब्धं, त्वयेदमतिसाहसम् ?' ।
इति पृष्टोऽप्यसौ तूष्णीमास्ते शस्तेतरक्रियः ॥६१६॥

ततः सर्वां निशां तप्ततैलसेकादियातनाः ।
प्रापितो विलपंश्चक्रे, दुःखितं लोकमप्यसौ ॥६१७॥

प्रातर्नृपतिनिर्देशात्, कोट्टपालेन सत्वरम् ।
बाह्योद्याने महावृक्षशाखायामुदलम्ब्यत ॥६१८॥

मृतोऽयमिति जानन्तः, पौरा राजनरास्तथा ।
अपसृत्याऽऽस्पदं स्वं स्वं, जग्मिवांसः क्रमात्ततः ॥६१९॥

कथञ्चित्त्रुटिते पाशे, सन्ध्यायां पतितो भुवि ।
निशि शीतलवातेनाऽऽश्वासितः स समुत्थितः ॥६२०॥

निजं च सदनं प्राप्तो, **धनवत्या** कथञ्चन ।
पालयित्वा प्रगुणाङ्गो, विदधे दुर्धियां वरः ॥६२१॥

अन्येद्युरेष पृथिवीपतेर्निर्गच्छतः पुरात् ।
महान्तं दुन्दुभिरवं, श्रुत्वा पप्रच्छ कञ्चन ॥६२२॥

कुत्र प्रयाति भूमीन्द्रस्ततः सोऽप्यवदच्छृणु ।
नाम्ना **त्रिभुवनभानुः**, सम्प्राप्तोऽस्त्यत्र केवली ॥६२३॥

तं नन्तुं नृपतिः सर्वपरीवारसमन्वितः ।
सान्तःपुरोऽपि सर्वद्‌र्ध्या, याति भक्तिभरोज्ज्वलः ॥६२४॥

इदं निशम्य **लोलाक्षः**, प्रेक्षितुं **सुरसुन्दरीम्** ।
उत्को[1] **धनवती**दृष्टिं, वञ्चयित्वा प्रधावितः ॥६२५॥

---

१. उत्कण्ठितः ।

इतश्च क्ष्माधनो देव्या, समं केवलिनं मुनिम् ।
वन्दित्वा वि[न]याद् योग्यप्रदेशेऽस्थाद्बुधाग्रणीः ॥६२६॥

धर्मं निशम्याऽवसरे, पप्रच्छाऽथ कृताञ्जलिः ।
'भगवन् ! ज्ञानभानो ! यस्तदाऽघाति मया पुमान् ॥६२७॥

स कथं निन्दिते बालैरपि दृश्यमहापदि ।
अकार्ये तादृशे स्वामिन् !, प्रवृत्त इति बोधय ॥६२८॥

ज्ञानी जगाद 'भूमीश !, दुर्जयैः करणैर्नरः ।
प्रेरितः कुरुते किं किं, नाकृत्यमशुभायतिः ? ॥६२९॥

एकोऽपि भटकोटीर्यो, जेतुं सामर्थ्यभाग् भवेत् ।
एकेनाऽपीन्द्रियेणाऽहो, तस्याऽपि महिमाऽस्यते ॥६३०॥

व्योमकेशो[१] हृषीकेशो[२], लोकेशः[३] कौशिकोऽपि[४] च ।
अन्येऽपि लीलयैवैतैर्हृषीकैः किङ्करीकृताः ॥६३१॥

शास्त्राब्धेः पारदृश्वानस्तत्त्वविज्ञानशालिनः ।
भूत्वाऽपि बालवत् कष्टं, चेष्टन्ते करणेरिताः ॥६३२॥

किं बहूक्तेन यच्छिष्टगर्हितं कार्यमङ्गवान् ।
कुरुते विद्धि तत् सर्वमक्षाणामेव जृम्भितम्' ॥६३३॥

एवं यावन्मुनिर्ब्रूते, **लोलाक्ष**स्तावदुन्मनाः ।
धावन्नालिङ्गितुं देवीं, बद्धो नृपनरैर्दृढम् ॥६३४॥

श्रुत्वा कलकलं राजा, सम्भ्रान्तस्तत्र लोचने ।
न्यस्यन्नरं मन्तुकृतमुपलक्षयति स्म तम् ॥६३५॥

---

१. महादेवः । २. विष्णुः । ३. ब्रह्मा । ४. इन्द्रः ।

भगवत्सन्निधौ युक्तो, निग्रहो नेति भूभुजा ।
तं विमोच्य पुनः पृष्टो, मुनिनाथः सविस्मयम् ॥६३६॥

'तथाऽयं मारितोऽप्युच्चैः, कथं जीवति नाथ ! नु ? ।
कथं वा पापमीदृक्षं, व्यवस्यत्यन्तिकेऽपि वः ?' ॥६३७॥

केवल्युवाच 'सत्यायुष्युपक्रमविवर्जिते ।
शक्रोऽपि नो मारयितुं, शक्तोऽन्यः किं पुनर्नृप !' ॥६३८॥

ततोऽतिविस्मितायोर्वीनाथाय मुनिपुङ्गवः ।
न्यवेदयद् व्यतिकरं, तं पाशत्रुटनादिकम् ॥६३९॥

अन्यच्च मेदिनीजाने !, चक्षुषा परतन्त्रताम् ।
प्रापितोऽयमनात्मज्ञोऽकार्यमेवं व्यवस्यति ॥६४०॥

भूयो भूपोऽवदन्नाथ !, यदसौ सविधेऽपि वः ।
अकार्यादृतहत्तत् किं, नाश्रौषीद्धर्मदेशनाम् ? ॥६४१॥

आमेति गुरुणा प्रोक्ते, नृपः प्राह 'जगद्गुरो ! ।
किं बाधिर्यात्ततो ज्ञानी, प्रोचे 'नैवं नरेश्वर ! ॥६४२॥

किन्त्वस्य चिक्कणं पापं, विद्यते निरुपक्रमम् ।
तानि सोपक्रमाण्येव, च्छिद्यन्ते नः पुनर्गिरा ॥६४३॥

ततो धर्मं कथयतामपि नः पदमप्यहो ! ।
सङ्क्रान्तं श्रवणे नाऽस्य, हताशस्य नरेश्वर ! ॥६४४॥

दर्शनेन्द्रियचौरेण, हृते च हृदि नेत्यपि ।
विवेदाऽयं यदस्त्यत्र, कः ? कोऽहं ? कोऽथवा यतिः ?' ॥६४५॥

नृपोऽभाषत 'द्रष्टव्यदर्शनाच्चक्षुरिन्द्रिये ।
कृतार्थे स्पर्शलुब्धः किं, देव्यामेष प्रधावति ?' ॥६४६॥

अब्रूत यतिनाथोऽथाऽक्षाण्येतानि परस्परम् ।
संहतान्येव पापानि, प्रवर्त्तन्ते प्रजापते ! ॥६४७॥

यत्रार्थेऽभिनिवेशं हि, बध्नात्येकमपीन्द्रियम् ।
प्रायस्तत्रैव सर्वाणि, प्रवर्त्तन्ते मनोवशात् ॥६४८॥

दृष्टेस्त्वयं विशेषो यदन्धानां करयष्टिवत् ।
सर्वाक्षाणामियं हेतुः, स्वस्वार्थेषु प्रवर्त्तने ॥६४९॥

यस्य दृष्टिर्वशे तस्य, वशेऽक्षाण्यखिलान्यपि ।
सा पु[न]र्नो वशे यस्य, सर्वाक्षाणां वशो हि सः ॥६५०॥

वराकोऽयं क्षिपत्यक्षि, ततश्चेतः प्रवर्त्तते ।
तेनाऽऽकृष्टः स्पर्शनादिरक्षौघोऽथ विजृम्भते ॥६५१॥

यथाऽयं पुरुषः शेषमपि विश्वं तथैव हि ।
तारतम्यात् पराभूयमानं विद्धीन्द्रियैर्नृप ! ॥६५२॥

कश्चिदेव पुनस्तीव्रजैनव्रतकृपाणभृत् ।
धृतसन्तोषकवचस्तज्जयं कुरुते कृती' ॥६५३॥

श्रुत्वेत्युर्वीपतिस्तेषामसाधारणवैरिणाम् ।
जयधृतोद्यमः पुत्रं, राज्यभारे न्ययोजयत् ॥६५४॥

स्वयं कतिपयैः पत्नी-सामन्त-सचिवादिभिः ।
समं जिनालयेष्वर्चाः, कृत्वा चारित्रमाददे ॥६५५॥

स राजर्षिरथाऽप्राक्षीत्, पुनः केवलिनं मुनिम् ।
'अगान्नरः स कुत्रेति,' ततोऽभाषत साधुराट् ॥६५६॥

'इतः पलाय्य चलितः, पुरस्योपान्तभुव्यसौ ।
अनवस्थितचेतस्कः, पर्याट मदनोत्कटः ॥६५७॥

महत्तमस्य कस्यापि, पुरस्तत्र जनङ्गमीम् ।
समं कान्तेन गायन्तीं, शस्तरूपां निरैक्षत ॥६५८॥

पश्यंश्च सुचिरं कामपारवश्यं गतोऽधमः ।
तामाशिश्लेष धावित्वा, कृत्याकृत्यबहिर्मुखः ॥६५९॥

तद्भर्त्रा कुपितेनाऽथ, हतः कर्त्रिकया हृदि ।
रौद्रध्यानी मृतोऽभूत् स, तृतीयभुवि नारकः ॥६६०॥

परिपूर्याऽऽयुरुत्कृष्टमुद्वृत्तश्च भ्रमिष्यति ।
अनन्तं भवमुद्भूतविविधार्त्तिविडम्बितः' ॥६६१॥

एवं श्रुत्वा स राजर्षिरिन्द्रियग्राममुल्वणम् ।
निर्जित्याऽऽसादितानन्तज्ञानः सिद्धिं समासदत् ॥६६२॥

श्रुत**लोला**क्षदृष्टान्ता, भविनो ! भवभीरवः ! ।
निगृह्णीताऽर्थेऽनुचिते, मङ्क्षु चक्षुः प्रवृत्तिमत् ॥६६३॥

इति चक्षुरिन्द्रिये लोलाक्षकथा ॥ ग्रन्थाग्रम् २०० अ. ८ ॥

गन्धप्रियः कुमारोऽथ, घ्राणेन्द्रियवशीकृतः ।
यथा प्राणात्ययं प्राप, तथा सम्प्रति दर्श्यते ॥६६४॥

वसन्तपुरसञ्ज्ञेऽभूत्, पुरे विक्रमशेवधिः ।
कीर्त्तिशैवलिनीशैलो, **नरसिंहा**भिधो नृपः ॥६६५॥

तस्य ज्येष्ठः सुतः सर्वगुणपादपमेदिनी ।
पित्रोरानन्दयामास, हृदयं विनयोदधिः ॥६६६॥

किन्तु पश्यति यत् किञ्चिद्वस्तु तत् सर्वमप्यसौ ।
आजिघ्रति करोतीष्टे, रागं द्वेषं परे पुनः ॥६६७॥

क्रियासमभिहारेण, प्रवृत्तं तं तथाऽन्यदा ।
गुरवो हितशिक्षैकनिरता अशिषन्निति ॥६६८॥

'वत्स ! मा स्म करो रागं, त्वमिष्टे वस्तुनि क्वचित् ।
इतरस्मिन् द्वेषमपि, किन्तु माध्यस्थ्यमाश्रय ॥६६९॥

यत् पुद्गलपरीणामो, लोके सर्वोऽप्यशाश्वतः ।
उपाधेरेव सौगन्ध्य-दौर्गन्ध्यप्रविलोकनात् ॥६७०॥

तथाह्यशुचिदेहस्य, संसर्गात् पूतिगन्धिताम् ।
अवाप्नुया[द्] घनसार-श्रीखण्डाद्यं सुगन्ध्यपि ॥६७१॥

सुगन्धिरपि चाहारः, सच्छालि-व्यञ्जनादिकः ।
पश्य कण्ठादतिक्रान्तोऽशुचितां लभते क्षणात् ॥६७२॥

दुर्गन्धान्यपि पानीयादीनि संस्कारयोगतः ।
स्पष्टमेव निरीक्ष्यन्ते, सम्प्राप्तानि सुगन्धताम् ॥६७३॥

एवं विबोधतां सारधियामस्थिरताजुषि ।
काऽस्तु मूर्च्छा जुगुप्सा वा, पुद्गलौघे शुभाशुभे ॥६७४॥

जुगुप्सते च यानर्थान्, विष्ठादींश्छन्ननासिकः ।
दृष्टस्तेषां हि सर्वेषां, सम्भवो निजवर्ष्मतः ॥६७५॥

शश्वज्जुगुप्समानश्चोन्मादमाप्नोति मानवः ।
तदिष्टानिष्टयोर्मूर्च्छा-जुगुप्से त्यज धीनिधे !' ॥६७६॥

एवं बहूदितोऽप्येषोऽजस्रं घ्राणवशङ्गतः ।
वस्तून्यन्वेषयामास, शुभगन्धानि सर्वतः ॥६७७॥

आजिघ्रन् कुसुमादीनि, व्यरमच्च न जातुचित् ।
ततो **गन्धप्रिय** इति, नाम्नाऽसौ पप्रथे जने ॥६७८॥

अथाऽस्य यौवनस्थस्य, विमाता विकृताशया ।
दध्यौ यथा मम सुतो, लघुर्ज्येष्ठस्त्वसौ ततः ॥६७९॥

उपायान्मारयाम्येनं, पश्चान्मम सुतः सुखम् ।
निःसपत्नतया राज्यलक्ष्म्याः पात्रं भवेदिति ॥६८०॥

कुमारः स तु नद्यम्बुन्यपरैर्नावमाश्रितः ।
वयस्यैर्नौगतैः सार्द्धं, खेलति स्म दिने दिने ॥६८१॥

विमात्राऽथो पुटिकायां, बद्धं किञ्चन तद्विषम् ।
जीवितं यन्नयत्यन्तं, घ्रातमात्रमपि क्षणात् ॥६८२॥

पुटिकाऽप्यथ सैकस्मिन्, विनिक्षिप्ता समुद्गके ।
अक्षेपि लघुपेटायां, सोऽपि पेटान्तरे च सा ॥६८३॥

एवमन्यान्यपेटासु, बह्वीषु तद्विषं क्रमात् ।
क्षिप्त्वा तस्यास्तरङ्गिण्या, ऊर्द्ध्वदेशे प्रवाहितम् ॥६८४॥

तरन्ती विषपेटी सा, कुमारस्यान्तमागता ।
उद्घाटिता क्रमात्तेन, यावत् प्राप्तः समुद्गकः ॥६८५॥

तमुद्घाट्या[ऽथ] पुटिकां, छोटयित्वा च तां विषम् ।
कुमारः सादरं जिघ्रन्, सद्यः प्राणैर्व्यमुच्यत ॥६८६॥

कथां **गन्धप्रियस्यै**तां, कृत्वा चेतसि सद्धियः ! ।
सदसद्गन्धयोर्मूर्च्छां, कुत्सां च त्यजताऽनिशम् ॥६८७॥

इति घ्राणेन्द्रिये गन्धप्रियकुमारकथा ॥ श्री ॥ ग्रं. २४ ॥

अथ भूपो **रसलोलो**, रसनेन्द्रियतो यथा ।
कृतोग्रपापः सम्प्राप, विपदं ब्रूमहे तथा ॥६८८॥

विदेहदेशभूषाकृ**न्मिथिले**त्याख्यया पुरी ।
सुरीरूपविजेत्रीभिर्ललनाभिर्मनोरमा ॥६८९॥

नृपोऽभूत्तत्र **विमलयशाः** सान्वयनामभाक् ।
येनाऽरयो रयान्मैत्र्यं, ग्राहिता हरिणैः सह ॥६९०॥

अन्यदा स पुरीप्रान्ते, देवागमनसूचितम् ।
नन्तुं केवलिनं सान्तःपुरपौरः प्रयातवान् ॥६९१॥

वन्दित्वा च निषण्णेऽस्मिन्, केवली धर्मदेशनाम् ।
तन्वन् प्रस्तावतः प्राप्तमादिदेशाऽर्थमीदृशम् ॥६९२॥

'अक्षेषु दुर्जया जिह्वा, मोहनीयं च कर्मसु ।
ब्रह्मव्रतं व्रतौघे च, मनोगुप्तिश्च गुप्तिषु' ॥६९३॥

अपृच्छन्नृपतिः 'शेषेन्द्रियेभ्यो रसनेन्द्रियम् ।
कथं दुर्जयमाम्नायीत्याख्याहि भगवन्मम' ॥६९४॥

ज्ञान्यवादीन्निगृहीते, रसेश ! रसनेन्द्रिये ।
शेषेन्द्रियार्था धिन्वन्ति, गेयाद्या न क्षुधार्दितम् ॥६९५॥

किन्तु तन्निग्रहाशक्ताः, सत्त्वाः सत्त्वविवर्जिताः ।
नानारसान् गृद्धिभाजो, भुञ्जते शल्यशेखराः ॥६९६॥

ततश्च ललितं गीतं, शुश्रूषन्ते श्रवःप्रियम् ।
सकामाः परिरिप्सन्ते, कोमलाङ्गीश्च कामिनीः ॥६९७॥

विलेपनं तथेच्छन्ति, कर्पूर-चन्दनादिभिः ।
किं बहूक्तेन बाध्यन्ते, विकारैरखिलैरपि ॥६९८॥

मूले सिक्ते यथा वृक्ष, ऊर्द्ध्वं स्यात् फलपुष्पभाक् ।
तत्र शुष्के च झटिति, शुष्यत्येष समन्ततः ॥६९९॥

एवमिन्द्रियवृक्षोऽपि, प्रीणिते रसनात्मनि ।
मूले विकारैः फलति, शुष्यत्येवाऽन्यथा पुनः ॥७००॥

तदुक्तमिदमेवोर्वीपते ! दुर्जयमिन्द्रियम् ।
जितेऽमुष्मिन् जितान्येव, जानीह्यज्ञानहेलया ॥७०१॥

दुर्जयत्वेऽस्य दृष्टान्तं, शृंण्वभूतां[1] नृपात्मजौ ।
नामतो **विबुध-मति[वि]कलौ** भिन्नमातृकौ ॥७०२॥

सह वृद्धिं गतावेतौ, सहैव क्रीडितावपि ।
सहोपात्तकलौ चापि, जातौ भिन्नस्वभावकौ ॥७०३॥

विबुधस्तत्र सरलः, शुद्धबुद्धिर्जितेन्द्रियः ।
कृतज्ञः प्रियवाक् त्यागी, परोपकृतिकर्मठः ॥७०४॥

विपरीतगुणस्त्वन्यो, विशेषाज्जिह्वया जितः ।
अतृप्तो [यः] पलं भुङ्क्ते, मद्यं पिबति चानिशम् ॥७०५॥

आदिनेशोदयं यावन्नहि रुद्धः प्रमीलया ।
नैवाऽखाद्यादपेयाच्च, तावद् व्यरमदेषकः ॥७०६॥

मृगयायां चरन्नेष, मृग-कोलादिकान् बहून् ।
जन्तून् जघान कारुण्यवर्जितो रसलौल्यतः ॥७०७॥

---

१. 'शृणु अभूताम्' इति सन्धिविश्लेषः ।

विचित्रैरुपदेशैस्तु, वारयन्तमहर्निशम् ।
विबुधं प्रत्यभाणीत् सोऽनणीयःपातकावनिः ॥७०८॥

'मूढात्मन् ! मांस-मद्यादिरसं जानाति नो भवान् ।
तत्तस्माद् मामपि कथं, वृथा वञ्चयते ननु ? ॥७०९॥

तदेव सारं विश्वेऽस्मिन्, भुज्यते पीयते च यत् ।
नो भुक्ता न च पीता ये, ते[ऽन्ते] शोचन्ति मानवाः' ॥७१०॥

एवं समुद्धतं जल्पन्, कल्पयन् पातके मनः ।
अवहीलितसच्छिक्षो, बद्धलक्षो रसेष्वसौ ॥७११॥

तन्वानः कष्टलक्षाणि, क्षीणदुर्गतिपातभीः ।
रसलोल इति ख्यातिं, लेभे लोके समन्ततः ॥७१२॥ युग्मम् ॥

वसन्तेऽथोद्यानिकया[१], गन्तुकामोऽन्यदा बहुम् ।
स्निग्धं मधुरमाहारं, सज्जयामास वल्लवैः ॥७१३॥

सर्वं च प्रगुणीकृत्य, विज्ञप्तस्तैरथ द्रुतम् ।
आगत्य स्वयमैक्षिष्ट, रसास्वादनलम्पटः ॥७१४॥

तदा च प्रज्वलत्कायोऽप्युच्चैर्ज्वरभरादसौ ।
पश्यन् मोदकं सद्गन्धं, घृतशाल्यादि सुन्दरम् ॥७१५॥

आघ्रायाऽऽघ्राय लोलात्मा, यावदारब्ध जेमितुम् ।
तावद्वैद्याः सुनिष्णातमतयोऽवारयन्निति ॥७१६॥ युग्मम् ॥

'राजाङ्गज ! ज्वरः सद्योजातः प्राज्योऽस्ति ते तनौ ।
जायोरप्यधिकारो नाऽधुना भोज्यस्य का कथा ?' ॥७१७॥

---

१. तुला. पुष्पमालायां २६१ तमस्य श्लोकस्य वृत्तौ रसलोलकथायाम् 'अह अन्नया चलिओ उज्जाणियाए इमो' इति ।

अब्रवीन्**मतिविकलो**ऽद्यापि रे रे चिकित्सकाः ! ।
न वित्थ प्रकृतिं कालेनेयताऽपि तनोर्मम ॥७१८॥

वाताधिकं शरीरं मे, ज्वर ऊनतया ह्यसौ ।
उत्तरिष्यति तन्मङ्क्षु, बहुसन्तर्पणात्तनोः' ॥७१९॥

ऊचुर्वैद्याः 'शरीरस्य, लिङ्गैः सुस्निग्धतादिभिः ।
उद्गाराणामप्यजीर्ण्णगन्धेन च विबुध्यते ॥७२०॥

वातोद्भवो [ज्वरो] नैष, कुमार ! तव वर्ष्मणि ।
तर्पणात् प्रबलो भावी, लङ्घनं युक्तमद्य तत्' ॥७२१॥

कुमारोऽवददज्ञानजनवन्मामपि द्रुतम् ।
लङ्घनेनाऽधुना मारयितुमिच्छथ किं शठाः ! ? ॥७२२॥

जाने स्वीयशरीरस्य, प्रकृतिं स्वयमप्यहम्' ।
वैद्यास्ततोऽवदंस्तर्हि, यद् युक्तं तद्विधीयताम्' ॥७२३॥

ततः स्वैरमसौ भुक्त्वा, रसगृद्धो दुराशयः ।
वारितोऽपि समारुह्य, करेणुं निर्ययौ बहिः ॥७२४॥

तत्रापि प्रेरितो बाढं, रसलोलतया कुधीः ।
बाहौ धृत्वा भिषगाद्यैः, प्रतिषिद्धोऽप्यवाष्वणत् ॥७२५॥

आकण्ठं पूर्ण्णजठरो, वामचेष्टो वमन्नथ ।
त्रायध्वं त्रायध्वमिति, दीनगीरलुठद्भुवि ॥७२६॥

तथा विसूचिकाक्रान्तं, लुठन्तमशुचौ रसे ।
तं विज्ञायाऽथ **विबुधो**, वत्सलस्तूर्ण्णमागमत् ॥७२७॥

वैद्यैर्निवेदितं श्रुत्वा, तं च व्यतिकरं रयात् ।
शिबिकायां तमारोप्य, निनाय निजवेश्मनि ॥७२८॥

रसलोलोऽपि पीडार्त्तो, लगित्वा भिषगंह्रिषु ।
अभाषत 'प्रसद्यैकवारं, जीवयताऽऽशु माम्' ॥७२९॥

अजल्पन् भिषजो 'दोषस्त्वयैवैष स्वयंकृतः ।
त[द्] विघ्नोऽस्मत्प्रतीकाराद्विनिवर्त्स्यति वा न वा ॥७३०॥

न च जिह्वा तव वशे, हितोक्तिं न च मन्यसे ।
उल्लाघश्च तथैव त्वं, चेष्टसेऽलं श्रमेण तत्' ॥७३१॥

रसलोलः पादलग्नोऽवददेवं चिकित्सकान् ।
'अद्य प्रभृति वो वाक्यं, विधास्याम्यखिलं ननु' ॥७३२॥

ततस्तथैव ते मातापितृभ्यां **विबुधेन** च ।
भणिताः प्रगुणीचक्रुस्तं यत्नेन कथञ्चन ॥७३३॥

सम्प्राप्तोऽनामयमयमवमत्य भिषग्वचः ।
नैवाऽखाद्यमपेयं [च], दुर्धीस्तत्याज किञ्चन ॥७३४॥

निषेधतो **विबुधस्यो**परि च द्वेषमादधौ ।
बालिशा नहि जानन्ति, हिताहितविचारणाम् ॥७३५॥

अन्यदा तावुभौ भोक्तुमुपविष्टौ समं क्वचित् ।
पीयूष-गरलौ दैवादेकत्र मिलिताविव ॥७३६॥

विबुधः सरलात्माऽथ, स्निग्धं मधुरमुत्तमम् ।
भोज्यं किञ्चित् क्षणेऽमुष्मिन्, प्रागेव समुपाददे ॥७३७॥

तच्च पश्चा**दकुशलमतेर्नो** पुण्यमेव तत् ।
क्रोधान्धोऽचिन्तयच्चित्ते, नृशंसप्रकृतिर्यथा ॥७३८॥

भुञ्जानं सरसाहारं, मामेष प्रतिषेधति ।
सर्वं चैकः स्वयं भुङ्क्ते, कैतवाक्रान्तमानसः ॥७३९॥

वैमा[त्रे]यो ह्ययं भ्राता, रिपुरेव कथं हितः ? ।
तदमुं मारयाम्यद्येत्याचकर्ष क्षुरीं रयात् ॥७४०॥

प्रहारं चामु[चत्] क्रूरो, **विबुध**स्तु स्वकौशलात् ।
वञ्चयामास तुमुलः, सुमहांश्च तदाऽभवत् ॥७४१॥

अहो ! पश्यत संसारस्यासारत्वं यदेष मे ।
भ्राताऽपि वैरिवत् कामं, निर्निमित्तमभूदहो ! ॥७४२॥

अमुना गृहवासेन, सर्वानर्थैकहेतुना ।
तत् किं ममेति मनसा, ध्यायन्नुद्वेगभृद्भवात् ॥७४३॥

विबुधस्तुमुले तत्र, प्रसर्पति विनिर्गतः ।
पथि गच्छन्नवैक्षिष्ट, क्वाप्युद्याने महामुनिम् ॥७४४॥ त्रिभिः सम्बन्धः ॥

सौवर्णकमलासीनं, तं चतुर्ज्ञानिनं मुनिम् ।
भक्त्या नत्वा च शुश्राव, महार्थां धर्मदेशनाम् ॥७४५॥

संविग्नश्च तदभ्यर्णे, प्रव्रज्य विजितेन्द्रियः ।
शुभाशुभेषु भावेषु, माध्यस्थ्यं समधिष्ठितः ॥७४६॥

त्रिकालत्रिजगद्भासि, केवलज्ञानमासदत् ।
सोऽहं नरपतेऽत्राऽऽगां, विहरन्नवनौ क्रमात् ॥७४७॥ [युग्मम्]

ततो **विमलयशसा**, राज्ञा सभयविस्मयम् ।
पप्रच्छे **रसलोलस्य**, ततः किं भगवन्नभूत् ? ॥७४८॥

मुनिनाऽभण्यत शृणु, स वराको निरन्तरम् ।
उत्साहितो लोलतया, प्रावृतत् पापकर्मसु ॥७४९॥

स्थापितश्चान्यदा सैष, पित्रा राज्ये महर्द्धिके ।
लोलुपोऽन्यान्यमांसादिरसास्वादैकधीरभूत् ॥७५०॥

अन्येद्युरामिषं राद्धं, तन्निमित्तं कथञ्चन ।
ओतुना भक्षितं सूपकारो भीतमनास्ततः ॥७५१॥

रथ्यायां निकटे डिम्भं, क्रीडन्तं कञ्चन द्रुतम् ।
गृहीत्वा हत्वा पक्त्वा च, **रसलोल**मभोजयत् ॥७५२॥ [युग्मम्]

'भो भो ! अभुक्तपूर्वोऽसौ, स्वादुमांसरसः कुतः ?' ।
इति निर्बन्धतः सूदमन्वयुङ्क्त स भूमि[प]ः ॥७५३॥

प्राप्ताभयेन सूदेन, कथितेऽथ यथास्थिते ।
रसलोलोऽभ्यधादेवमेव कुर्या दिने दिने ॥७५४॥

एवं स प्रत्यहं पापश्छन्नं रथ्यागतं शिशुम् ।
एकैकं हारयित्वाऽऽशु, मारयित्वा च भुक्तवान् ॥७५५॥

विद्वद्भिः क्रमतस्तच्च, स्वरूपं सचिवोत्तमैः ।
बहुधा वारितोऽप्येष, दुष्टात्मा विरराम न ॥७५६॥

ततो नृचक्षःप्रकृतिं, बुद्ध्वा बद्ध्वा च तं क्वचित् ।
क्षिप्त्वाऽटव्यां ददू राज्यं, मत्कनिष्ठाय मन्त्रिणः ॥७५७॥

स तु तत्रापि सार्थादिभ्रष्टं कञ्चन मानुषम् ।
प्राप्य हत्वा च भुञ्जानः, कुधीरगमयद्दिनान् ॥७५८॥

मेखलायां गिरेरेकाकिन्याः कस्याश्चिदन्यदा ।
पुलिन्द्याः शिशुमुद्दाल्य, बुभुजे जडशेखरः ॥७५९॥

ततश्च तूर्णमायातः, पुलिन्दः प्रज्वलत्क्रुधा ।
तं सर्वाङ्गं शरैस्तीक्ष्णैः, प्रहृत्य प्रापयन्मृतिम् ॥७६०॥

अप्रतिष्ठाननरके, सप्तम्यां भुवि नारकः ।
उत्कृष्टायुः समुत्पेदे, **रसलोलो** रसेश्वरः ॥७६१॥

पुरतोऽपि च संसारमनन्तं स भ्रमिष्यति ।
तद्विद्धि सकलाक्षेषु, दुर्जयां रसनां नृप ! ॥७६२॥

भूमीशो **विमलयशाः**, श्रुत्वैवं ज्ञानिनोऽन्तिके ।
प्रव्रज्य विजितस्रोताः, सिद्धोऽभूत् सिद्धकेवलः ॥७६३॥

ज्ञात्वा [रसा]निति प्रान्ते, विरसान् कथयाऽमुया ।
तेषु मा लोलतां कृद्वं, सिद्धान्तरसलालसाः ॥७६४॥

इति रसनेन्द्रिये रसलोलनृपकथा ॥ ग्रं. ७८ ॥

अमुञ्चत् स्पर्शनासक्तः, पार्थिवः **सुकुमालिकाम्** ।
व्यसनं राज्यभ्रंशाद्यं, यथा[ऽऽप] श्रूयतां तथा ॥७६५॥

वसन्तपुरसञ्ज्ञेऽभूत्, पुरे प्रा[ज्य]र्द्धिशालिनि ।
जितशत्रुर्नृपोऽनेकविलासवशमानसः ॥७६६॥

तस्याऽग्रमहिषी जज्ञे, नामतः **सुकुमालिका** ।
शिरीषसुममृद्वङ्गी, वर्णतो जितकाञ्चना ॥७६७॥

तस्याः कोमलदेहस्य, स्पर्शे सक्तस्तथा नृपः ।
कदाचिद्देशराज्यादिचिन्तां नो चकृवान् यथा ॥७६८॥

मन्त्रिभिर्बहुधा दत्तामपि शिक्षाममंस्त न ।
किं सृणिं मन्यते क्वापि, मातङ्गो मददुर्द्धरः ? ॥७६९॥

ततोऽमात्यैः स पल्यङ्के, **सुकुमालिकया** समम् ।
सुप्तो निशि वनेऽमोचि, राज्ये [न्य]स्तश्च तत्सुतः ॥७७०॥

प्रबुद्धोऽथ समं देव्या, नृपोऽचालीत् पुरः पथि ।
देवी श्रान्ता च तृषया, प्रकामं समपीड्यत ॥७७१॥

अशक्तां पुरतो गन्तुं, विन्यस्यैकत्र तामथ ।
भ्राम्यन्नन्वेषयामास, सर्वत्राऽम्बु नराधिपः ॥७७२॥

तदाऽलब्ध्वाऽथ [पानीयं], रुधिरं निजबाहुतः ।
आकृष्य क्षिप्रमक्षैप्सीत्, पुटिकायामुपायवित् ॥७७३॥

मध्ये च मूलिकां क्षिप्त्वा, [कृत्वा] निर्मलमम्बु तत् ।
पाययामास तां राजा, कंटरे प्रेमवल्गितम् ॥७७४॥

देव्यामतिक्षुधार्त्तायामाहारं कञ्चनाऽपरम् ।
अप्राप्य स्वोरुमांसानि, च्छित्त्वाऽपक्त दवानले ॥७७५॥

संरोहणीमूलिकया, रोहयित्वा व्रणोच्चयम् ।
देव्यै शशादिपललच्छद्मनाऽदत्त तान्यथ ॥७७६॥

ततश्चाऽगात् सदेवीको, **गङ्गा**तीरे पुरे क्वचित् ।
वणिज्यां च व्यधाद्देवीदेहाभरणरिक्थतः ॥७७७॥

---

१. आश्चर्यद्योतकोऽयमव्ययः ।

अभाणीदन्यदा देवी, नरनाथं 'कथं त्वहम् ।
पूर्वं कञ्चुकिसध्रीचीजनैः परिवृताऽभितः ॥७७८॥

वेणु-वीणादिभिर्नित्यं, कुतूहलितमानसा ।
भूत्वा साम्प्रतमेकाकिन्येव तिष्ठामि वेश्मनि ॥७७९॥ [युग्मम्]

तत् कञ्चन सहायं मे, विधेहीति' प्रियागिरा ।
राट् पङ्गुमविकारोऽयमिति ध्यात्वाऽधरद् गृहे ॥७८०॥

न त्वेवं प्राञ्जलमना, बुबुधे धरणीधवः ।
यल्लोलाक्ष्यो व्रतत्यश्च, प्रायेण स्युः सदृग्गुणाः ॥७८१॥

सगुणं निर्गुणं वापि, पुमांसं सविधस्थितम् ।
नार्यो भजन्ति माकन्दं, निम्बं वा वल्लयो यथा ॥७८२॥

पङ्गुः शृङ्गारगर्भाभिः, कथाभिर्गीतिभिश्च ताम् ।
देवीमावर्ज्य कालेन, स्वल्पेन स्ववशां व्यधात् ॥७८३॥

रिरंसुः स्वेच्छया तेन, जिघांसामास सा पतिम् ।
स्मरातुरा हि वामाक्ष्यो, न हि तद्यन्न कुर्वते ॥७८४॥

जगाम मेदिनीनाथोऽन्यदोद्यानिकया बहिः ।
रम्ये तटे च **गङ्गाया**, न्यषदत् सरलाशयः ॥७८५॥

पापिन्याऽथ तया प्रेर्य, प्रक्षिप्तः सलिलान्तरे ।
तरन् क्वापि पुरे लग्नः, श्रान्तोऽशेत तरोस्तले ॥७८६॥

तरोश्छाया च तस्योर्द्ध्वं, स्थिता नैव परावृतत् ।
किमद्भुतमिदं स्फारभागधेय[वि]राजिनाम् ॥७८७॥

तदा च तत्र नगरे, नृपे निष्पुत्रके मृते ।
मन्त्राधिवासितो हस्ती, भ्रम्यमाणोऽस्ति मन्त्रिभिः ॥७८८॥

तेनाऽऽगत्य बहिः पुर्याः, सुखसुप्तः स सत्वरम् ।
अभिषिक्तोऽभवत् प्राज्यसाम्राज्याधिपतिः कृती ॥७८९॥

सा तु दुष्टाशया देवी, भुक्त्वा द्रव्यं करस्थितम् ।
वहन्ती शिरसा पङ्गुं, मधुरध्वनिगायिनम् ॥७९०॥

भिक्षां ययाचे भ्राम्यन्ती, प्रतिगेहं जनैः पुनः ।
पृष्टाऽभ्यधत्त 'भर्त्ताऽयं, दत्तो गुरुजनेन मे ॥७९१॥ युग्मम् ॥

पतिव्रता परिणीतं, तदमुं पालयाम्यहम् ।
स्त्रीणां विशुद्धशीलानां, पतिर्यद्देवतोपमः' ॥७९२॥

एवं परिभ्रमन्ती सा, क्र[मा]द् ग्राम-पुरादिषु ।
ययौ तन्नगरं राज्ञा, पालितं **जितशत्रुणा** ॥७९३॥

राजा निरीक्ष्य वेगेनाऽऽह्वाय्य वातायनस्थितः ।
भूमिस्थितां तां पप्रच्छ, काऽसि ? कः पङ्गुरेष च ॥७९४॥

पितृभ्यां ब्राह्मणैर्देवैर्दत्तः पङ्गुः पतिर्मम ।
पतिव्रताऽहं तदमुं, भजामीत्यभ्यधत्त सा ॥७९५॥

'बाह्वो रुधिरमापीतमूरुमांसं च भक्षितम् ।
गङ्गायां प्लावितो भर्त्ता, साधु साधु पतिव्रते !' ॥७९६॥

एवमुक्त्वा नराधीशः, पुरान्निर्वास्य तां रयात् ।
प्रजाः पाति स्म विस्मेरपुण्योदयविराजितः ॥७९७॥

जितशत्रुरिति प्राप, व्यसनं स्पर्शनेन्द्रियात् ।
देवी पुनर्विशेषेण, तन्निगृह्णीत तज्जनाः ! ॥७९८॥

इति स्पर्शनेन्द्रिये सुकुमालिकानृपकथानकम् ॥ श्री ॥ [ग्रन्थाग्रम्] ३४ ॥

प्रदर्श्य तुच्छकं सौख्यमेवं पञ्चभिरिन्द्रियैः ।
अनन्तदुःखे नरके, प्रक्षिप्यन्ते शरीरिणः ॥७९९॥

पञ्चापि दुर्जयान्यक्षाण्यक्षामतपसस्तु ये ।
विजयन्ते श्रयन्ते ते, सम्पदं [मोक्षसौख्यदाम्] ॥८००॥

[इति] इन्द्रियपञ्चककथानकम् ॥ ग्रन्थाग्रम् ३८४ अ. १२ ॥

श्रुत्वेति देशनां भर्तुः, **सगर**श्चक्रवर्त्यथ ।
प्रणत्य प्रोचिवान् विश्वस्वामिनं रचिताञ्जलिः ॥८०१॥

'स्वामिन् ! मयेन्द्रियसुखलोलुपेनाऽवशात्मना ।
हहा मनुष्यजन्मायुरिदमक्षपि निष्फलम् ॥८०२॥

साम्प्रतं तु प्रसद्याऽऽशु, दीक्षारथ्यां निवेश्य माम् ।
भीतमिन्द्रियशत्रुभ्यो, नय निर्वाणपत्तनम्' ॥८०३॥

ततो भगवता दीक्षाग्रहणेऽनुमतो भृशम् ।
भगीरथाभ्यर्थनयाऽलञ्चक्रे **सगरः** पुरीम् ॥८०४॥

भक्त्या **भगीरथेना**ऽथ, कृतदीक्षाभिषेचनः ।
धृतदिव्याम्बरोऽनर्घ्यालङ्कारालङ्कृताङ्गकः ॥८०५॥

आरूढः शिबिकां दिव्यां, दानानन्दितमार्गणः ।
अन्वीयमानमार्गश्च, सामन्ता[दि]भिरुत्सुकैः ॥८०६॥

पदे पदे जनैः क्लृप्तमङ्गलो गुरुभिर्महैः ।
प्रभावयन् प्रवचनं, चक्री प्राप जिनान्तिकम् ॥८०७॥ विशेषकम् ॥

भगीरथधरानाथोपनीतयतिवेषभृत् ।
चतुर्यामामथो दीक्षाम**जितेशा**दुपाददे ॥८०८॥

कुमारै**र्जह्नु**प्रमुखैः, समं जग्मुश्च ये पुरा ।
प्राव्राजिषुस्तदा तेऽपि, नृप-सामन्त-मन्त्रिणः ॥८०९॥

अनुशिष्टिमयीं तेषां, कृत्वाऽर्हन् देशनामथ ।
अन्ते प्रथमपौरुष्या, देवच्छन्दमशिश्रियत् ॥८१०॥

ततो गणधरप्रष्ठः, पादपीठं प्रभोः श्रितः ।
चक्रे द्वितीयपौरुष्यां, प्रभुवद्धर्मदेशनाम् ॥८११॥

स्वं स्वं स्थानं ततः प्रापुर्हृष्टचित्ताः सुराऽसुराः ।
भगीरथादयोऽप्यन्तश्चक्रिसत्त्वैकशंसिनः ॥८१२॥

चक्रिसाधुरथो पृथ्व्यां, विहरन् प्रभुणा समम् ।
अध्यैष्ट द्वादशाङ्गानि, नचिरात् सूत्रतोऽर्थतः ॥८१३॥

नित्यं प्रमादरहितः, सुसमाहितमानसः ।
दशधा यतिनां धर्मं, स सम्यक् पर्यपालयत् ॥८१४॥

अस्मि तीर्थेशितुर्भ्राता, **भरत**स्याऽधिपोऽपि च ।
इत्यहङ्कारलेशेनाऽप्यबाध्यत न सन्मुनिः ॥८१५॥

इति प्राज्यं बिभ्रद्विनयमसमैरार्जवमुखै-
र्गुणैस्तैस्तैर्धिन्वन्, विमलहृदयं साधुनिचयम् ।

क्रमाद् घातिव्यूहं, स शलभतुलं ध्यानदहने,
विधायाऽऽप ज्ञानं, ध्रुवतरमहानन्दजनकम् ॥८१६॥ [शिखरिणीवृत्तम्]

इति श्रीपद्मप्रभाचार्यचरणराजीवचञ्चरीकश्रीदेवानन्दसूरिविरचिते श्रीअजितप्रभुचरिते आनन्दाङ्के महाकाव्ये सगरनन्दननिधन-वसुमतीदृष्टान्तसूचकतत्पूर्वभव-पञ्चेन्द्रियदुर्विपाकसूचककथापञ्चकमयप्रभुदेशना-चक्रवर्त्तिदीक्षावर्णनो नाम षष्ठः सर्गः ॥

॥ श्री ॥ [ग्रं.] ८२२ अ. १६ ॥ आदितः ४४८३ अ. २१ ॥

सप्तमः सर्गः

अन्येद्युर्भगवान् विश्वं, मोहशत्रोरुपद्रवात् ।
अवन्नवाप **कौशाम्बीं**, कृपारसमहाम्बुधिः ॥१॥

देवैः समवसरणे, क्षणात् क्लृप्ते स्थितः प्रभुः ।
सुरासुरनृनाथानां, पुरतो देशनां व्यधात् ॥२॥

इतश्चैको द्विजस्तत्राऽऽगत्य वल्लभया सह ।
प्रणम्याऽवसरेऽपृच्छत्, कथं नु भगवन्नदः ? ॥३॥

प्रभुराख्यत 'भो भद्र !, महिमा सकलोऽप्ययम् ।
सम्यक्त्वस्यैव शुद्धस्य, कल्पद्रुमसमस्थितेः ॥४॥

सम्यक्त्वादर्थसिद्धिः स्यादनर्थस्यापि वारणम् ।
किं वा बहूक्त्या ? सम्यक्त्वात्, प्राप्तिः स्वर्गापवर्गयोः ॥५॥

भो विप्र ! विघ्नविलयादियतोऽप्यसि विस्मितः ।
सुपर्णोत्थे सर्पनाशे, कोऽपि चित्रीयते नु किम् ?' ॥६॥

विप्रः प्रणम्य विनयात्, क्लृप्ताञ्जलिरवोचत ।
'भगवन् ! सत्यमेवेदं, **नान्यथा सर्वविद्वचः**' ॥७॥

एवमुक्त्वा स्थिते जोषं, विप्रे तत्तत्त्ववेद्यपि ।
जनं ज्ञापयितुं नाथ[म]पृच्छद् गणभृद्वरः ॥८॥

प्रभो ! विप्रेण किं पृष्टमादिष्टं प्रभुणा च किम् ? ।
इति ज्ञापय नः स्पष्टमथोचे तीर्थनायकः ॥९॥

'पुर्या अनतिदूरेऽस्याः, **शालिग्राम**ाभिधो महान् ।
अग्रहारोऽस्ति तत्राऽग्रजन्मा **दामोदरो**ऽवसत् ॥१०॥

तस्य **सोमा**कुक्षिजन्मा, **शुद्धभट्ट**ाभिधः सुतः ।
अभूद्बुद्धिपराभूतपुरुहूतगुरुः कृती ॥११॥

अथैष **सिद्धभट्टस्य**, **सावित्री**कुक्षिकां सुताम् ।
उदुवाहाऽभिधानेन, प्रकृत्यापि **सुलक्षणाम्** ॥१२॥

तारुण्यपुण्यसर्वाङ्गावथ तौ प्रेमसंहतौ ।
भुञ्जाते स्म स्वविभवोचितान् भोगान् यदृच्छया ॥१३॥

अथोभावपि तौ मातापितृनाशात् परां शुचम् ।
अन्वभूतांतरां **नैकावस्थं हि सकलं जनुः** ॥१४॥

क्षीणाऽथ पैतृकी लक्ष्मीः, **शुद्धभट्टस्य** दैवतः ।
दारिद्र्यमाययौ सर्वपराभवनिबन्धनम् ॥१५॥

नाऽपूरि स्वोदरमपि, दुर्दैवोदयतोऽसकौ ।
पटच्चरं पर्यधाच्च, पटुपुण्यविवर्जितः ॥१६॥

वरं मृगैः समं वासः, कान्तारान्तः शरीरिणाम् ।
न पुनर्धनहीनानां, नगरान्तः स्वबन्धुभिः ॥१७॥

इति चित्ते विमृश्योऽयमनापृच्छ्य प्रियामपि ।
निशीथे निर्ययौ स्वीयनगराद् गुरुदुःखभाक् ॥१८॥

पत्युर्देशान्तरगतिं, द्वितीयेऽह्नि **सुलक्षणा** ।
ज्ञात्वा निर्लक्षणम्मन्या, मनस्येवं व्यचिन्तयत् ॥१९॥

मूर्द्धन्या गतभाग्यानामहमेव यदासदम् ।
नाशं पित्रोर्धनस्यापि, विरहं प्रेयसोऽपि च ॥२०॥

एवं खेदपरा कालं, कियन्तमपि कृच्छ्रतः ।
यावन्निनाय सा ताव**द्विमला**ख्या प्रवर्त्तिनी[1] ॥२१॥

साध्वीमधुकरीसेव्यपादपद्मा तपःखनिः ।
तपात्यये गृहं तस्या, आगाद्वसतिकाम्यया ॥२२॥ युग्मम् ॥

सुलक्षणाऽपि वसतिं, तस्यै दत्ते स्म मोदतः ।
प्रत्यहं च शृणोति स्म, धर्ममर्म तदाननात् ॥२३॥

विमलाऽपि गणिन्येनां, विचार्य ऋजुचेतसम् ।
क्रमाद्देवादितत्त्वानि, शशासेति प्रशस्यधीः ॥२४॥

रागादिदोषरहितो, विमलज्ञानभासुरः ।
सुरा-ऽसुरार्च्यो हितवाग्, देवः सेव्यः शिवप्रदः ॥२५॥

ये तु स्त्रीसङ्गतः शस्त्रधारणाच्चात्मनि स्फुटम् ।
राग-द्वेषौ सूचयन्ति, कथं ते सिद्धिदाः सुराः ? ॥२६॥

ज्ञानक्रियाश्रयास्त्यक्तकषायविषयोदयाः ।
निरीहा निरहङ्कारा, गुरवो भवतारकाः ॥२७॥

ये सदाराः सदारम्भपरा दम्भमयक्रियाः ।
भवाम्भोधावयस्पात्रदेश्यास्ते गुरवो ध्रुवम् ॥२८॥

कर्ममर्मापहो धर्मः, श्रीसर्वज्ञप्रकाशितः ।
हिंसादिदोषनिर्मुक्तो, न मोक्तव्यः शुभार्थिभिः ॥२९॥

---

१. 'गणिनी विपुला नाम' इति त्रिषष्टि. २।३।८७२।

हिंसादिकलुषो मिथ्यादृष्टिभिर्दर्शितस्तु यः ।
स धर्मः सरलः पन्था, निरयद्वंङ्गागामुकः[1] ॥३०॥

देवं गुरुं तथा धर्ममेवं सकृत् परीक्ष्य यः ।
सम्यक् स्वीकुरुते तस्य, सम्यक्त्वमभिधीयते ॥३१॥

यस्त्वदेवे देवबुद्धिमगुरौ गुरुतामतिम् ।
अधर्मे धर्मबुद्धिं च, दध्यान् मिथ्यात्वमस्य वै ॥३२॥

मिथ्यात्वमूढमतयोऽनन्तसंसारमङ्गिनः ।
भ्रेमुर्भ्राम्यन्ति सततं, भ्रमिष्यन्ति च दुःखिनः ॥३३॥

अन्तर्मुहूर्त्तमात्रं तु, स्पृष्ट्वा सम्यक्त्वमुज्ज्वलम् ।
अपार्द्धपुद्गलावर्त्तान्तरे सिध्यन्ति निश्चितम् ॥३४॥

शङ्का काङ्क्षा विचिकित्सा, प्रशंसा परलिङ्गिनाम् ।
तत्संस्तवश्च पञ्चैते, तस्य मालिन्यहेतवः ॥३५॥

शम-संवेगौ निर्वेदोऽनुकम्पाऽऽस्तिकताऽपि च ।
सम्यक्त्वस्यैतदाख्यातं, बुधैर्लक्षणपञ्चकम् ॥३६॥

जिनप्रवचने स्थैर्यं, कौशलं च प्रभावना ।
भक्तिश्च तीर्थसेवा च, सम्यक्त्वस्य गुणा अमी ॥३७॥

एवं साध्वीगिरं नित्यं, शृण्वाना सा **सुलक्षणा** ।
अभूत् सम्यक्त्वसलिलधौतमिथ्यात्वकर्दमा ॥३८॥

जीवाजीवादितत्त्वेषु, निष्णतां ग्राहिता ततः ।
सा देशविरतिं साध्व्या, विध्वस्ताऽखिलदुर्मतिः ॥३९॥

---

१. नरकनगरगामुकः ।

भववाससमुद्विग्ना, विषयेभ्यो विरक्तहृत् ।
उपशान्तकषाया [सा], चाऽभूत्तत्त्वावबोधतः[1] ॥४०॥

सुधासा[धा]रणीं[2] साध्व्याः[3], पिबन्ती साऽनिशं गिरम् ।
वर्षारात्रं व्यतीयाय, मुदिता क्षणलीलया ॥४१॥

विहृतायामथाऽन्यत्र, प्रवर्त्तिन्यां समाययौ ।
देशान्तराच्छुद्धभट्टः, समर्ज्य द्रविणं बहु ॥४२॥

तेनाऽन्यदा रहस्येवं, पृष्टा प्रेम्णा **सुलक्षणा** ।
'दिनान् कथमनैषीस्त्वं, दुःसहे विरहे मम' ॥४३॥

सा स्माह 'त्वद्वियोगाग्निदह्यमानतनोर्मम ।
सुधावृष्टिरिवैकाऽऽगाद्, गणिनी गुणवृक्षभूः ॥४४॥

अपारेऽब्धौ नावमिव, विरहे तव तां मुनीम्[3] ।
प्राप्य मे मनसः खेदो, बिभिदे तत्क्षणादपि ॥४५॥

तया चिन्तामणीकल्पं, भाग्यहीनैः सुदुर्लभम् ।
दुर्गतिद्वारपरिघः, सम्यक्त्वं दीयते स्म मे' ॥४६॥

कीदृशं वल्लभे ! ब्रूहि, तदित्युक्ताऽमुनाऽथ सा ।
सविस्तरं तत्स्वरूपमब्रवीद्धीनकल्मषा ॥४७॥

लघुकर्मतया सोऽपि, सम्यक्त्वं प्रतिपद्य तत् ।
ऊचे प्रिये ! त्वं धन्याऽसि, यत् प्राप्नोस्तत्त्वमीदृशम् ॥४८॥

ततस्तौ सततं जैनधर्माराधनतत्परौ ।
धन्यम्मन्यौ कृपासान्द्रौ, व्यतीयतुरहर्गणम् ॥४९॥

---

१. तत्त्वज्ञानतः । २. अमृतसमानाम् । ३. साध्वीम् ।

तदग्रहारवास्तव्यो, मिथ्यादृष्टिर्द्विजव्रजः ।
चकार **शुद्धभट्टस्य**, निन्दामिति निर्[1]र्गलम् ॥५०॥

धिगेतेन दुराशेन, कान्तामोहितचेतसा ।
कुलक्रमागतो धर्मः, सर्वोऽपि परितत्यजे ॥५१॥

कुल-जाती अवमते, गुरु-देवावपाहृतौ ।
दत्तो वेदोक्तनिःशेषक्रियाणां ही जलाञ्जलिः ॥५२॥

इत्यादिद्विजदुर्वाक्यान्यवज्ञाय महाशयौ ।
तौ दम्पती श्राद्धभावाच्चेलतुर्न मनागपि ॥५३॥

सुलक्षणाऽन्यदाऽसूत, सुतं सल्लक्षणान्वितम् ।
स्ववैभवानुसारेण, द्विजो जन्ममहं व्यधात् ॥५४॥

माघमासे द्विजोऽन्येद्युः, प्रातरादाय तं सुतम् ।
धर्मार्थाग्निष्टिकां विप्रपर्षत्परिवृतामगात् ॥५५॥

विप्रास्तेऽथ समं प्रोचुः, सासूयाः श्रावकोऽसि भोः ! ।
तद्दूरं गच्छ नो युक्तं, द्विजातिषु तवाऽऽसितुम् ॥५६॥

त एवमाक्रोशकृतस्तां धर्माग्निष्टिकां द्रुतम् ।
वेष्टयित्वा स्थितास्तस्य, प्रवेशं व्यतरन्न हि ॥५७॥

वीक्षापन्नोऽथ सम्यक्त्वस्थिरधीः स द्विजाग्रणीः ।
समक्षं पर्षदस्तस्या, व्यधात् सं[2]त्यापनामिमाम् ॥५८॥

'सम्यक्त्वं चेज्जिनादिष्टं, न भवाब्धिवहित्रकम् ।
अनेकान्तस्वरूपं चेन्न च वस्तु यथातथम् ॥५९॥

---

१. निर्बाधम् । २. प्रतिज्ञाम् ।

ममापि च मनो बाढं, न चेत् प्रवचने स्थिरम् ।
तन्मे सूनुरयं जातवेदसाऽनेन दह्यताम् ॥६०॥

अदश्चेत् सर्वमप्यस्ति, तर्हि मे तनुजन्मनः ।
अमुष्य वारिवच्छैत्यं, भजताज्ज्वलनो ज्वलन्' ॥६१॥

इत्युक्त्वा रोषमाज्जिष्ठनेत्रो रौंभसिको[1] द्विजः ।
पावके तत्र चिक्षेप, तं करस्थं स्तेनन्धयम्[2] ॥६२॥

मूर्खेण धिग् धिगेतेन, दग्धो दग्धो निजः शिशुः ।
इत्याक्रोशपरा पर्षत्, तुमुलं बहुलं व्यधात् ॥६३॥

तत्रस्थैका च सम्यक्त्वशालिनी व्यन्तरी तदा ।
दाहशक्तिं जहाराऽग्नेः, कराभ्यां च दधौ शिशुम् ॥६४॥

प्राग्विराद्धव्रता सा हि, व्यन्तरीत्वमुपाययौ ।
आत्मनो बोधिलाभं चाऽपृच्छत् केवलिनं मुनिम् ॥६५॥

मुनिर्जगाद 'सुलभा, बोधिस्ते भाविनी ध्रुवम् ।
भवेः किन्तु समुद्युक्ता, सम्यक्त्वस्य प्रभावने' ॥६६॥

इत्येषाऽर्हत्प्रवचनं, स्थाने स्थाने स्वशक्तितः ।
प्रभावयन्ती तत्रागात्, तं जुगोप च बालकम् ॥६७॥

आविर्भूय च विप्राणां, समक्षं तं द्विजोत्तमम् ।
साऽश्लाघिष्टेति सम्यक्त्वस्थिरचित्त ! चिरं जय ॥६८॥

धन्योऽसि जन्म ते श्लाघ्यं, कुलमत्युत्तमं तव ।
यदित्थं दृढतां धत्से, सम्यक्त्वे विमलाशय ! ॥६९॥

---

१. साहसिकः । २. बालम् ।

इयन्मात्रश्च महिमा, किं सम्यक्त्वस्य चित्रकृत् ।
पौरीन्द्रस्य[1] कुरङ्गौघं, प्रति ध्वंसनशक्तिवत् ॥७०॥

महिमानं सम्यक्त्वस्य, सर्वं विद्याद्बुधोऽपि कः ? ।
इयज्जलं जलनिधाविति को निर्णयेन्ननु ? ॥७१॥

त्वया वै तिर्यग्-नरकगत्योर्दत्तो जलाञ्जलिः ।
नृ-देवगत्योः सिद्धेश्च, स्वाधीनस्ते सुखोच्चयः ॥७२॥

इति स्तुत्वा **शुद्धभट्टं**, तिरोधत्त सुरी क्षणात् ।
अदृष्टपूर्वं तद्वीक्ष्य, व्यस्मयन्त च वाडवाः ॥७३॥

शुद्धभट्टोऽप्युपादाय, पुत्रं स्मितमुखाम्बुजः ।
सूतैः[2] स्तुतः प्रवचनोन्नतिं तन्वन् गृहं गतः ॥७४॥

सुलक्षणाऽपि तद्वृत्तेक्षणादक्षतहर्षभाक् ।
एकान्ते दयितं प्रोचे, विवेकविमलं वचः ॥७५॥

'यत् त्वया तनयोऽक्षेपि, वह्नौ तच्चारु नो कृतम् ।
सर्वस्य सर्वदा किं स्यात्, सन्निधौ शासनाऽमरी ॥७६॥

सम्यग्दृष्टिः सुरी चेन्नाऽभविष्यत् सन्निधौ तदा ।
अधक्ष्यत सुतस्तर्हि, तवाऽयं जीवितेश्वर ! ॥७७॥

आयातं जिनधर्मस्याऽप्रामाण्यमियता च किम् ।
ते तु पापाः प्रलपेयुरेवाप्रामाण्यमुदीधुराः[3]' ॥७८॥

इत्याद्याभाष्य सम्यक्त्वस्थैम्ने कान्तं **सुलक्षणा** ।
समानिनाय नः पार्श्वे, सत्रा[4] चित्रीयितैर्द्विजैः ॥७९॥

---

१. सिंहस्य । २. मागधैः । ३. निरङ्कुशाः । ४. सह ।

स्वेनाऽनुभूतं विप्रोऽसौ, वृत्तं मनसिकृत्य तत् ।
पृच्छन्नस्माभिः सम्यक्त्वमहिमोक्त्या व्यबोध्यत ॥८०॥

अथ ये **शुद्धभट्टेन**, समं तत्राऽऽगता द्विजाः ।
तान् प्रबोधयितुं तीर्थनाथो भूयोऽभ्यधादिति ॥८१॥

यथा जलानां जलधिर्विन्ध्याद्रिर्दन्तिनां यथा ।
शस्यानां च यथा भूमिस्ताराणां वा यथा नभः ॥८२॥

स्वर्यथा कल्पवृक्षाणां, रत्नानां रोहणो यथा ।
सम्यक्त्वं सर्वगुणानां, तथाऽऽधारोऽभिधीयते ॥८३॥ युग्मम् ॥

इन्दिरा-रूप-सौभाग्यप्रमुखं सकलं भवे ।
सुलभं दुर्लभं त्वेकं, सम्यक्त्वं मङ्गलाकरः ॥८४॥

सम्यग्दृष्टिर्व्रजेन्नूनं, वैमानिकसुपर्वसु ।
चेन्नो विगतसम्यक्त्वो, बद्धायुर्वा पुरा न हि ॥८५॥

सम्यक्त्वे स्थिरचित्तानां, देहिनां सत्त्वशालिनाम् ।
शम्यन्ते विपदस्तीव्रा, इहापि त्रिदशोत्तमैः ॥८६॥

शृण्वन्त्वमरदत्तस्य, पत्न्याः सद्दर्शनस्थितेः ।
नाम्ना धाम्ना च **विमलयशसो**ऽत्र निदर्शनम् ॥८७॥

सुराष्ट्रादेशमध्येऽस्ति, पुरी **द्वारवती**[1] वरा ।
श्रेष्ठी **पद्मा**भिधस्तत्राऽमरद[त्त]स्तु तत्सुतः ॥८८॥

मूर्त्या मदनसङ्काशश्चातुर्याच्चतुराननः ।
सज्जनं स्वजनांश्चापि, लम्भयामास विस्मयम् ॥८९॥

---

१. दृष्टान्तः । २. आसि सुरट्ठाजणवयमज्झगया, कणयरयणपडिपुन्ना ।
रयणवई नाम पुरी, भारहवासम्मि विक्खाया ॥ इति पुष्पमालायां ॥१०३॥
श्लोकस्य वृत्तौ अमरदत्तभार्यादृष्टान्ते श्लो. ॥१॥

सोऽन्यदा जनकानुज्ञां, प्राप्य प्रवहणं श्रितः ।
वणिज्यया **कुशद्वीपे**ऽगात् **सुवर्णपुरे** पुरे ॥९०॥

अस्ति तत्र **विशङ्क**ाख्यः, श्रेष्ठी श्रेष्ठगुणोदयः ।
जिनप्रवचने भक्तः, श्रिया श्रीद इवाङ्गवान् ॥९१॥

कुतोऽपि कार्यतस्तस्य, श्रेष्ठिनो मन्दिरं गतः ।
क्रीडन्ती**ममरदत्तो**, बालामेकां व्यलोकत ॥९२॥

तस्याः शिरीषकुसुमसोमाले वपुषि स्थिरम् ।
तन्नेत्रभृङ्गद्वितयं, लावण्यरसमापपौ ॥९३॥

समाप्ते प्रस्तुते कार्ये, कथञ्चिन्निःसरन् गृहात् ।
सोऽपृच्छत् कञ्चन नरं, काऽयं ? किमभिधेति च ॥९४॥

तेनाप्युक्तं सुताऽस्यैव, श्रेष्ठिनोऽसौ कुमारिका ।
नामतो **विमलयशाः**, सुनिर्मलकलास्पदम् ॥९५॥

श्रुत्वे**त्यमरदत्त**स्तत्पाणिग्रहसमुत्सुकः ।
याचयामास तां श्रेष्ठिपुङ्गवं निजमानुषैः ॥९६॥

श्रेष्ठ्युवाचाऽवश्यदेया, कन्येति विदितं भुवि ।
तद्ददेऽहं सुदुष्पूरोऽमुष्यास्त्वेष प्रतिश्रवः ॥९७॥

यो धर्मविषये वादे, मां जेता विद्वदग्रणीः ।
स एव परिणेताऽस्तु, जैनी दीक्षाऽन्यथा पुनः ॥९८॥

तन्निशम्या**ऽमरो** विद्वन्मन्यो मिथ्यात्वभावितः ।
सावलेपं जगादेति, कन्यां द्रुतमुपेत्य ताम् ॥९९॥

'मुग्धे ! ताम्यसि यस्याऽर्थे, नास्ति धर्मः स एव नु ।
लुब्धैः पाषण्डिभिर्लोको, वृथाऽयं विप्रलभ्यते ॥१००॥

धर्मा-ऽधर्मौ हि वर्ण्येते, जीवाधारौ सुबुद्धिभिः ।
जीवस्तावत् प्रत्यक्षेणाऽनुपलब्धेर्न विद्यते ॥१०१॥

अन्यानि तु प्रमाणानि, व्यभिचारीणि तैस्ततः ।
कुतोऽर्थप्रतिपत्तिः स्यान्नेत्रैरिव सकामलैः ॥१०२॥

यदक्षगोचरातीतं, तन्नास्ति खरशृङ्गवत् ।
जीवस्तथा चेति सिद्धं, जीवाऽसत्त्वं प्रमाणतः ॥१०३॥

जीवाभावे परं लोकं, को गन्ता क[श्च] भोक्ष्यते ।
धर्माधर्मफलं तन्वि !, मा मुहस्तन्मुधा हृदि ॥१०४॥

पृथ्व्यप्-तेजो-ऽनिला-ऽऽकाशलक्षणाद् भूतपञ्चकात् ।
चेतनेयं समुद्भूता, जीवभ्रान्तिं तनोत्यहो ! ॥१०५॥

मद्याङ्गेभ्यो यथा दृष्टा, मदशक्तिस्तथा न किम् ।
भूतेभ्यश्चेतना स्थानगमनाऽऽसनकारणम् ॥१०६॥

तद्यौवनभरेऽमुष्मिन्, सारं विद्ध्येतदेव हि ।
यद् भुज्यते पीयते वा, रम्यते वा यदृच्छया' ॥१०७॥

स्मित्वाऽथोवाच **विमलयशा** 'आलं किमात्थ भोः ! ।
धर्माधर्मौ तदाधारो, जीवश्चास्त्येव निश्चितम् ॥१०८॥

आरोग्य-धन-वैदुष्य-कीर्त्यादेः कार्यलिङ्गतः ।
धर्मोऽधर्मो विपरीतादस्ति धूमादिवाऽनलः ॥१०९॥

न च वक्तव्यमध्यक्षात्, परं मानं न विद्यते ।
भवत्पितामहादीनामप्यभावप्रसङ्गतः ॥११०॥

अदृष्टपरलोकादिभावं त्वमुमपीतरत् ।
प्रत्याययस्यनुमानप्रमाणेनैव सन्मते ! ॥१११॥

पराभिप्रायतस्तच्चेन्मतं तर्हि महाशय ! ।
प्रमाणमप्रमाणं वाऽन्यमततोऽभिधीयताम् ॥११२॥

प्रमाणं चेत् परलोकादिकं तर्ह्युररीकुरु ।
अथाप्रमाणं तत्तेन, तन्निषेधोऽपि दुष्करः ॥११३॥

अहंप्रत्ययसंवेद्यः, कर्त्ता भोक्ता च कर्मणाम् ।
अनादिमान् परलोकयायी जीवः प्रपद्यताम् ॥११४॥

तदहर्जातबालस्य, स्तनेला प्रथमा ध्रुवम् ।
पूर्वाभिलाषपूर्वाभिलाषत्वादिति मानतः ॥११५॥

अनाद्यनेकजन्मानुयायिचैतन्यसिद्धितः ।
भूतेभ्यो जायमानस्य, चैतन्यस्य विबाधनम् ॥११६॥ युग्मम् ॥

अचेतनेभ्यो भूतेभ्यः, कार्यं चैतन्यलक्षणम् ।
जायतेऽननुरूपं यदिति प्रामाणिकी न वाक् ॥११७॥

मृतावस्थायां भूतेषु, तदवस्थेष्वपीह यत् ।
चैतन्यं नोपलब्धं तत्तदुत्पादो न भूततः ॥११८॥

ततो निश्चिनु चैतन्यं, पूर्वजन्मान्तरागतम् ।
कर्मावष्टब्धमन्यान्यशरीरोत्पादनक्षमम् ॥११९॥

तदेवं परलोका-ऽऽत्मा-ऽदृष्टादीनां प्रमाणतः ।
सिद्धौ सारं तदेवेह, सुकृतं यद्विधीयताम् ॥१२०॥

विरतिर्विषयग्रामात्तपसा कृशिमा तनोः ।
सर्वाङ्गिषु कृपा चेति, धर्मः सुगतिकारणम् ॥१२१॥

आसक्तिरशने पाने, विलासाश्च यदृच्छया ।
अयं सर्वोऽप्यधर्मः स्यादुर्गदुर्गतिलब्धये' ॥१२२॥

एवं वदन्तीं **विमलयशसं पद्मनन्दनः** ।
स्माह सस्मितमब्जाक्षि !, धर्मे ते [चेत्] कदाग्रहः ॥१२३॥

तर्हि मन्मातापितृभ्यां, स्वीकृतं श्रुतिदर्शितम् ।
सौख्यसन्ततिदं धर्मं, प्रतिपद्यस्व सादरम् ॥१२४॥

स्नानदानादिसत्कृत्यमयं भूमीश्वरादिभिः ।
उत्तमैः स्वीकृतं यत्नाद्धर्ममेतं विमुच्य ये ॥१२५॥

श्रयन्ति धर्ममपरं, बालिशा एव ते ध्रुवम् ।
महाजनो येन गतः, स पन्था इति विश्रुतम्' ॥१२६॥ युग्मम् ॥

अथो बभाषे **विमलयशा** 'भद्र ! परीक्षितः ।
धर्मः स्वीक्रियते दोषवर्जितः स्वर्णवद्बुधैः ॥१२७॥

गतानुगतिकत्वेन, श्रितो[२] यद्भूरिभिर्जनैः ।
एतावतैव नायं स्यादुपादेयो महात्मनाम् ॥१२८॥

विद्वन् ! स्नानेन दानेन, धर्मो यद्वर्ण्यते त्वया ।
असमीक्षितवाक्त्वं तत्, समस्तं प्रतिभासते ॥१२९॥

स्नानान्नद्यादिनीरेषु, जीवघातं विधाय भोः ! ।
पापशुद्धिं निगदतः, का ते वचनचातुरी ? ॥१३०॥

---

१. एवं ठिएऽवि अहवा असग्गहं जइ न चयसि तं धम्मे ।
ता तुह अम्मापियरो सिवाइभणियं कुणंति तयं ॥
इति पुष्पमालायां ।१०३। श्लोकस्य वृत्तौ अमरदत्तभार्यादृष्टान्ते श्लो० ॥२१॥

२. 'शूरो' इति पु.प्रे. ।

सर्पिर्भोजनतोऽजीर्ण्णदोषः खलु समुत्थितः ।
निवृत्तिं लभते नैव, भूयस्तस्यैव भोजनात् ॥१३१॥

किन्तु तद्भोजनात् कृत्वोपरमं मतिमद्वरः ।
क्रमेण लभते दोषनिवृत्तिं विश्रुतं ह्य[द]ः ॥१३२॥

एवं पापमु[प]चितं, जीवघातादिहेतुभिः ।
तन्निवृत्तो दयाशाली, क्षपयेदिति युक्तिमत् ॥१३३॥

स्नानाद् बाह्यमलस्यापि, सम्यक्शुद्धिमपश्यताम् ।
अन्तर्मलापनयनमिच्छतां साहसं महत् ॥१३४॥

व्यासादयोऽपि तन्वन्तः, सम्यक्तत्त्वविचारणाम् ।
अवस्तुत्वं जलस्नानस्योचिवांसः स्फुटं यथा ॥१३५॥

[१]नोदकक्लिन्नगात्रो हि, स्नात इत्यभिधीयते ।
स स्नातो यो दमस्नातः, स बाह्याभ्यन्तरः शुचिः ॥१३६॥

चित्तमन्तर्गतं दुष्टं, तीर्थस्नानैर्न शुध्यति ।
शतशोऽपि जलैर्धौतं, सुराभाण्डमिवाशुचि ॥१३७॥

आत्मा नदी संयमपुण्यतीर्था, सत्योदका शीलतटा दयोर्मिः ।
तत्राभिषेकं कुरु पाण्डुपुत्र !, [न] वारिणा शुध्यति चान्तरात्मा ॥१३८॥
[उपजातिवृत्तम्]

आरम्भे वर्त्तमानस्य, जीवघातादिवर्त्तनैः ।
मैथुनं सेवमानस्य, कुतः शौचं युधिष्ठिर ! ? ॥१३९॥

दयालुर्वक्ति यः सत्यं, परादत्तविवर्जकः ।
ब्रह्मचारी च निःसङ्गः, शुचिर्भारत ! नित्यशः ॥१४०॥

---

१. विरामम् । २. श्लो. १३६-१४२ तुला-पुष्पमालायां ।१०३। तमस्य श्लोकस्य वृत्तौ श्लो. ६६ तः ७२ ।

चित्तं रागादिभिः क्लिष्टमलीकवचनैर्मुखम् ।
जीवघातादिभिः कायो, गङ्गाऽप्यस्य पराङ्मुखी ॥१४१॥

चित्तं शमादिभिः शुद्धं, वदनं सत्यभाषणैः ।
ब्रह्मचर्यादिभिः कायः, शुद्धो गङ्गां विनाऽप्यसौ ॥१४२॥

अपरं च-

युक्तलाङ्गल-भू-लोह-तिलादीनां मतं त्व[या] ।
यद्दानं जीवघातैकहेतुस्तद् दृश्यते स्फुटम् ॥१४३॥

तेन दानेन संसारो, वृद्धिमेव समश्नुते ।
मृत्युर्निवर्त्तते नैव, कालकूटस्य भक्षणात् ॥१४४॥

तस्माच्छिवप्रदं दानं, तदेव श्लाघ्यते बुधैः ।
प्रदत्तं केवलं धर्मोपग्रहं विदधीत यत् ॥१४५॥

तस्माच्छिवेन बुद्धेनाऽर्हता वाऽस्तु प्रदर्शितः ।
धर्मः स एव यत्र स्युः, सदाचारा दयादयः ॥१४६॥

यद् ब्रूषे चोत्तमैर्भूपमुख्यैरेष समाश्रितः ।
तदयुक्तं यतस्तेषामुत्तमत्वं कुतो ननु ? ॥१४७॥

न हि धर्मविचारेऽत्र, रूप-रै-यौवनादिभिः ।
उन्मत्ता उत्तमा ग्राह्याः, किन्तु ये तत्त्वदर्शिनः ॥१४८॥

भूपादयोऽपि ये केचित्, सुधियो भवभीरवः ।
ते प्रपन्नाः प्रवचनं, जैनमेव शिवेच्छवः' ॥१४९॥

इति युक्तोक्तिभिस्तन्व्या, विहितोऽसौ निरुत्तरः ।
हृदि दध्यावहो ! दाक्ष्यममुष्या जिनशासने ॥१५०॥

एतदेवाधुना शिक्षे, ततः प्रतिपदं तथा ।
दूषयिष्यामि न यथा, बालेयं प्रतिवक्ष्यति ॥१५१॥

इति ध्यात्वा स साधूनां, पादमूलमुपागतः ।
पूर्णदम्भेन विनयं, कुर्वन्नारब्ध शिक्षितुम् ॥१५२॥

पश्चाच्च मानसे तस्य, जिनधर्मसितच्छदः ।
बाढं स्थैर्यमुपेयाय, कटरे कर्मलाघवम् ॥१५३॥

अन्यदा चैष सूक्ष्मार्थविचारविलसद्रसः ।
दृष्टः **समन्तभद्रा**ख्यसूरीणां सन्निधौ तया ॥१५४॥

संवेगशालिनं ज्ञानाभ्यासवासनयाऽन्वितम् ।
विनयैकपरं चैनं, सा निरीक्ष्य विसिष्मिये ॥१५५॥

भद्र ! धर्मविचारे ते, स्पृहाऽद्याप्यस्ति किं त्विति ।
पृच्छन्त्यां तस्यां तत्राऽऽगा**द्विशङ्क**श्रेष्ठिराडपि ॥१५६॥

प्रत्युवाचा**ऽमरो**ऽप्येवं, 'शुद्धाकरसमुद्भवे ।
मणौ विचारणां मन्दमतीन् मुक्त्वा करोति कः ? ॥१५७॥

पूर्वापराविरुद्धार्थे, प्रमाणैः सुप्रतिष्ठिते ।
क्रोधा-ऽहङ्कार-कपट-लोभलेशविवर्जिते ॥१५८॥

हृषीकविजयोपायकलिते ध्यानबन्धुरे ।
सर्वज्ञदेशिते धर्मेऽनन्तशर्मप्रदायिनि ॥१५९॥

विमुच्याऽज्ञाततत्त्वार्थान्, दुर्गदुर्गतिगामिनः ।
विचारणां विधत्ते कः, कुविकल्पप्रकल्पनैः ?' ॥१६०॥ विशेषकम् ॥

एवं तस्य गिरं सारां, शृण्वती हर्षपोषभाक् ।
अध्यासी**द्विमलयशा**, नूनं धर्मोऽस्य मानसे ॥१६१॥

सम्यक् परिणतो जैनोऽन्यथा संवेगभासुरः ।
कुतो वचनविन्यासो, भवतीदृक् सुनिर्मलः ? ॥१६२॥ युग्मम् ॥

अन्यच्चास्य मनः प्राग्वद्, दृढरागधरं मयि ।
नाधुना लक्ष्यते तत्त्वविज्ञानां लक्षणं ह्यदः ॥१६३॥

तद्यदीच्छेदसौ तातोऽप्यमुष्मै मां ददाति च ।
तदुद्वहाम्यमुं जैने, धर्मे कुर्वे च सुस्थिरम् ॥१६४॥

ततः श्रेष्ठी स्वपुत्र्यास्तं, लक्षयित्वाऽऽशयं शुभम् ।
अचिन्तयदनेनाऽस्या, उपयामोऽथ युज्यते ॥१६५॥

रूपादिगुणसम्पत्तिरनुरूपा पुराऽपि हि ।
अधुना जिनधर्मेऽपि, स्थैर्यमस्य निरीक्ष्यते ॥१६६॥

एवं ध्यात्वा क्षणं धर्मं, निशम्य च गुरोर्मुखात् ।
तमादृतो निजं गृहं, निनाय श्रेष्ठिपुङ्गवः ॥१६७॥

सम्मानपूर्वमाख्यच्च, 'धन्योऽसि त्वं महायशः ! ।
यत् सारे सर्वविद्धर्मे, निरतो विरतोंऽहसः ॥१६८॥

साधर्मिकस्य ते सर्वं, मदोकःसारमप्यदः ।
साधारणं विजानीहि, पुत्रीमात्रं पुनः कियत् ॥१६९॥

कृत्वाऽनुग्रहमेनां तत्, त्वमुद्वह महामते !' ।
इत्युक्त्वा श्रेष्ठिराट् चक्रे, तयोः पाणिग्रहोत्सवम् ॥१७०॥

दिनानि कतिचित्तत्र, सोऽस्थापि श्रेष्ठिना ततः ।
पित्रोर्लेखे[न] सोत्कण्ठोऽगात् स्वस्थानं वधूयुतः ॥१७१॥

विनयं विदधानाऽपि, **विशङ्क**श्रेष्ठिभूरथ ।
आसीच्छ्वशुरवर्गस्याऽनिष्टा धर्मविभेदतः ॥१७२॥

अथो पितृभ्यां**ममरो**, बभणे किमु मुग्ध रे ! ।
त्वमप्यमुष्या मायिन्या, गिरा भ्रान्तो वृथैव हि ॥१७३॥

ततोऽसौ दृढसम्यक्त्वो, वचनैर्जिनभाषितैः ।
बोधं ददद् दृढं पित्रोर्द्वेषपोषमजीज[न]त् ॥१७४॥

ततस्तौ सततं वध्वाश्छिद्रान्वेषणतत्परौ ।
अलीकानूचतुर्दोषा**नमरस्य** पुरः सदा ॥१७५॥

स तु स्वभावं प्रेयस्या, निष्कलङ्कं विदन् हृदि ।
न प्रत्ययमुपेयाय, पित्रोर्वचसि धीरधीः ॥१७६॥

वहन्तावथ तौ नित्यं, प्रद्वेषमधिकाधिकम् ।
वरवध्वोर्धर्मविघ्नं, चक्राते वक्रतान्वितौ ॥१७७॥

तथापि च तयोश्चेतोवृत्तिरार्हतधर्मतः ।
काञ्चनाचलचूलावत्, किञ्चनाप्यचलन्न हि ॥१७८॥

अन्येद्यु**र्विमलयशा**, गेहस्योद्धर्वतले निजे ।
वासौकस्यादिमे यामे, रात्रौ सुष्वाप निद्रया ॥१७९॥

तदा च श्वशुरौ तस्या, दुष्टौ मन्त्रितपूर्विणौ ।
ज्ञात्वाऽमरं बहिर्देशात्, प्रविशन्तं निजौकसि ॥१८०॥

नरं कञ्चिद्धनैः प्राज्यैः, प्रलोभ्योद्धर्वं च सद्मनः ।
प्रस्थाप्य तारं पूत्कारमकार्ष्टां मत्सरो हहा ॥१८१॥ युग्मम् ॥

सम्भ्रान्तोऽ**मरदत्तो**ऽपि, धावित्वा शुद्धधीनिधिः ।
सौधोद्धर्वतलमारोहत्तद्वृत्तान्तदिदृक्षया ॥१८२॥

पुरुषः स च वासौकः, प्रविश्य कंज्जलध्वजम् ।
निर्वाप्य मङ्क्षु निर्गत्य, झम्पां दत्त्वा पलायत ॥१८३॥

पितृभ्यां दर्शयामासे, प्रत्यक्षं चाऽमरस्य सः ।
अमरोऽपि विषण्णात्मा, दध्यिवानिति चेतसि ॥१८४॥

प्रतीच्यां चेदुदेत्यर्कः, स्वप्रेयस्यास्तथापि न ।
सम्भावये कुशीलत्वं, दाहकत्वमिवाऽम्भसः ॥१८५॥

इदं च पश्याम्यध्यक्षमयुक्तमपि [त]द्भुत ।
दुर्बोधं दुष्टदैवस्य, किञ्चिदेतद्विजृम्भितम् ॥१८६॥

पितृभ्यां भणितश्चैष, यस्याः शीलेन मूढ रे ! ।
गर्वं वहसि तस्या धिक्, चेष्टितं वीक्षितं न वा ॥१८७॥

अस्या ईदृश एवासौ, धर्मो मुग्ध ! सदूषणः ।
व्रतिनां व्रतिनीनां चोपदेशोऽपीदृशो ध्रुवम् ॥१८८॥

तदित्थं त्वं निरीक्ष्यापि, धर्मं त्यक्ष्यस्यमुं न चेत् ।
न प्रयोजनमस्माकं, सवधूकेन तत्त्वया ॥१८९॥

एवं तारस्वरं तेषु, कुर्वत्सु कलहं द्रुतम् ।
विनिद्रा **विमला** सर्वमदः शुश्राव दुःश्रवम् ॥१९०॥

हतेव पविना मूर्ध्नि, हतसारेव सर्वथा ।
चिन्तयामास हा दैव !, किमिदं कटु चेष्टसे ? ॥१९१॥

अनिष्टां कुरु मां भर्त्तुर्हर वा सकलं सुखम् ।
अपवादं तु मे शीले, किमयुक्तं व्यधा हहा ॥१९२॥

---

१. दीपकम् ।

किञ्चाऽयशोऽस्मादृशानां, चेद्वदन्ति वदन्तु तत् ।
मन्निमित्तं तु किं धर्मे, ब्रुवते वचनीयताम् ॥१९३॥

यद्युपेक्षे च धर्मेऽपि, विगानमुदितं जडैः ।
नूनमेषा भवेयं तद्दीर्घसंसारभाजनम् ॥१९४॥

तन्मे कालोचितं वक्तुं, युक्तमेवेति सा बहिः ।
निर्गत्य श्वशुरवर्गं, प्रेयसोऽध्यक्षमब्रवीत् ॥१९५॥

'युष्मदुक्तमियत्कालं, न्यक्षं क्षान्तिपरायणा ।
अक्षाम्यं बिभ्यती क्रोधविपाका[द]तिदारुणात् ॥१९६॥

[इ]दानीं त्वयशो धर्मे, निर्मले मन्निमित्तकम् ।
प्रोच्यमानं न जीवन्ती, सहिष्येऽहं कथञ्चन ॥१९७॥

तस्मादत्र समीपस्था, **विमला**ख्याऽस्ति या नदी ।
तस्या मध्ये **महापद्मा**भिधानोऽस्ति महाह्रदः ॥१९८॥

द्विक्रोशाऽऽयाम-विष्कम्भे, तत्राऽगाधजले प्रगे ।
क्षेप्स्यामि ध्रुवमात्मानं, जनानां वश्च पश्यताम् ॥१९९॥

यद्यशुद्धा ततस्तत्र, मग्नाया मे मृतिर्ध्रुवम् ।
युष्माभिर्भणितं चैवं, सर्वं यास्यति सत्यताम् ॥२००॥

शुद्धा च चेत्तदा धर्मप्रभावाद्विगतापदः ।
भावी मे गोष्पदमिव, सुतरोऽसौ महाह्रदः ॥२०१॥

ततश्च लक्ष्मरहिता, विधास्ये स्वसमीहितम् ।
तत् किमु क्रियते व्यर्थो, युष्माभिस्तुमुलोऽतुलः ?' ॥२०२॥

कुपिताभ्यामथो श्वश्रू-श्वशुराभ्यामभण्यत ।
'अविगुप्ता पुरे कृत्स्ने, न स्थास्यति भवत्यपि ॥२०३॥

ज्ञातशीला त्वमद्यापि, किं स्वं स्वं[1] वितपस्यहो !' ।
इति श्रुत्वाऽपि सा तूष्णीं, स्थिता स्वहिततत्परा ॥२०४॥

ततः प्रगे परिहितशुद्धवासा महाशया ।
पूजयित्वा जिनान् जैनीं, देवतां प्रणिधाय च ॥२०५॥

परमेष्ठिनमस्कारं, स्मरन्ती श्वशुरादिभिः ।
सशङ्कैर्वार्यमाणाऽपि, वाञ्छन्ती शुद्धिमात्मनः ॥२०६॥

कुसुमा-ऽक्षतसम्पूर्णपाणिः पृथ्वीश्वरादिभिः ।
पुरस्कृता दृश्यमाना, जनैः कौतूहलान्वितैः ॥२०७॥

तीरं ह्रदस्य तस्याऽऽप्याऽमरदत्ताभिधं पतिम् ।
मुक्त्वा यदि मयाऽकाङ्क्षि, मनस्यप्यपरो नरः ॥२०८॥

तन्मा स्म भून्ममोत्तार, इत्याद्युक्त्वा स्फुटाक्षरम् ।
हाहारवाकुले लोके, ह्रदे झम्पामदादियम् ॥२०९॥ पञ्चभिः कुलकम् ॥

झटित्यचलसम्यक्त्वशीलवैभवरञ्जिता ।
सम्यग्दृष्टिः सुरी रत्नमय्यां नावि स्वशक्तितः ॥२१०॥

विकृतायां रत्नपीठे, महार्हे विनिवेश्य ता[म्] ।
जलादुत्तारयामास, पुष्पवर्षं वितन्वती ॥२११॥ युग्मम् ॥

मङ्गलातोद्यनिर्घोषं, दिवि देवास्तदा व्यधुः ।
तुष्टुवुश्च जना एनां, विस्मयस्मेरलोचनाः ॥२१२॥

स्वर्गापवर्गसुखदं, कल्याणद्रुमकाननम् ।
कष्टभूधरदम्भोलिर्जैनं जयति शासनम् ॥२१३॥

---

१. आत्मानम् ।

नभःस्थितैवं घोषन्ती, भूपादीनां पुरः सुरी ।
तस्याः श्वशुरवर्गस्य, सर्वं दुर्जृम्भितं जगौ ॥२१४॥

स्तुत्वा सशीलं सम्यक्त्वं, **विमलाया** मुहुर्मुहुः ।
अन्तर्दधे क्षणादेषा, शासनोन्नतिकारिणी ॥२१५॥

निन्दन्नात्मानमस्त्रौघपूर्णनेत्रोऽमरोऽप्यथ ।
प्रोचे 'प्रियेऽपराधो नः, क्षम्यतामविवेकिनाम्' ॥२१६॥

अथ क्रुद्धो महीनेता, नयशाली नयोज्झित[म्] ।
तस्याः श्वशुरवर्गं द्राग्, निग्रहीतुं प्रचक्रमे ॥२१७॥

बाढमभ्यर्थनापूर्वं, सा तु निर्मलमानसा ।
प्रत्यषेधत् क्षमानाथं, क्षमागुणवि[भू]षिता ॥२१८॥

संविग्ना व्रतमादित्सुर्भवभाववविभाविका ।
नन्तुं चचाल **भुवनलोचना**ख्यगुरूनथ ॥२१९॥

ततो नृपेण सा प्रोचे, भद्रेऽद्य प्रभृति स्वसा ।
मम त्वमसि तद्धर्मकर्मठा तिष्ठ मद्गृहे ॥२२०॥

शेषा अपि जना बाष्पपूरापूर्णदृशो भृशम् ।
युक्तं युक्तमिदमिति, सादरं न्यगदंस्तदा ॥२२१॥

ततश्च **विमला**ऽवादीद्भग्नाऽहं भवदुःखतः ।
तदपोहक्षमां दीक्षां, कक्षीकुर्वे क्षमापते ! ॥२२२॥

नूनं जैनव्रताऽगस्तेः, क्लेशवाडवदारुणः ।
अपारोऽपि भवाम्भोधिर्भासते चुलुकोपमः ॥२२३॥

अद्याहं मानुषं जन्म, प्राप्तं भाग्यशतैर्यदि ।
व्रतं विना वृथा निर्गमयाम्येषा हताऽस्मि तत् ॥२२४॥

अथ भूमीपतिस्तस्य, हृदयस्यैकतानताम् ।
ज्ञात्वाऽन्वमंस्त दीक्षायै, वीक्षायै निर्वृतिश्रियः ॥२२५॥

ततः सा नरनाथाद्यैः, प्रस्फुरद्विस्मयैर्मुहुः ।
स्तूयमानाऽन्वीयमाना, पुरं संवेगमाश्रिता ॥२२६॥

गगनस्थैः सुरैः पुष्पवृष्टिं ध्वानं च दुन्दुभेः ।
तन्वद्भिरन्विता प्राप, सूरीणामन्तिकं रयात् ॥२२७॥ युग्मम् ॥

नत्वाऽथ सूरिपादान् सा, समं भूमिधवादिभिः ।
उपविश्योचिते स्थानेऽशृणोद्धर्मं सुशर्मदम् ॥२२८॥

पप्रच्छ समये चैवमसद्भूतमिदं मया ।
कौलीनं दारुणं प्रापि, कुतः साधु[धु]रन्धर ! ? ॥२२९॥

श्रुतोपयोगविज्ञातप्राग्भवाः सूरयोऽभ्यधुः ।
भद्रे ! सपत्न्यां प्राग्जन्मन्यभवत्तव मत्सरः ॥२३०॥

अभ्याख्यानं ततस्तस्या, अदीयत तदा त्वया ।
'परपुंसा समं दृष्टा, मयेयमिति' दुःसहम् ॥२३१॥

भर्ताऽतिवल्लभत्वेन, मेने च तव तद्वचः ।
तां च निःसारयामास, भृशं निर्भर्त्स्य मन्दिरात् ॥२३२॥

ततस्तां रुदतीं दुःखविवशां वीक्ष्य निर्भरम् ।
कृपायां प्रादुर्भूतायामभाणीद्भवती पतिम् ॥२३३॥

'एवमेव मयाऽमुष्या, अभ्याख्यानमसूयया ।
अदायि नाथ ! तत् सर्वो, मन्तुर्मे क्षम्यतामयम्' ॥२३४॥

ततः सोऽपि वचस्तत्ते, दृढस्नेहादलङ्घयन् ।
आनिन्ये तां गृहे भूयोऽपनीतशुचमादरात् ॥२३५॥

इदं दुष्कर्मणस्तस्य, फलं ते किञ्चनोदितम् ।
व्रतं तु जैनमादाय, तत् सर्वं क्षपयाऽधुना ॥२३६॥

अन्यथा पुनरद्यापि, दर्शयिष्यति तच्चिरम् ।
दुःखभारं यतः **कर्मपरीणामोऽतिदारुणः** ॥२३७॥

ततः सा प्राह 'भगवन्नेवमेतन्न संशयः ।
दुःखं चैतावदालोक्य, गेहे मम रतिः कुतः ? ॥२३८॥

तन्नाथ ! भवदावासौ[1], दह्यमानां रयेण माम् ।
व्रतामृतेन संसिच्य, निर्वापय दयामय !' ॥२३९॥

एवमुक्तवतीमेनां, भववैराग्यभावितां ।
मुनिः प्रव्राजयामास, विधिना विधिकोविदः ॥२४०॥

तदा राजापि सामन्ताद्यन्वितोऽ**मरदत्त**युक् ।
निर्विण्णमानसो दीक्षां, प्रतिपेदे जिनोदिताम् ॥२४१॥

सुन्दराख्यप्रवर्त्तिन्याः, पार्श्वेऽथ **विमला** मुनी[2] ।
अधीत्यैकादशाङ्गानि, तपः कृत्वा च निर्वृता ॥२४२॥

नरनाथोऽ**मरदत्त**श्चैतावाचीर्णसद्व्रतौ ।
ब्रह्मलोकाह्वये कल्पेऽभूतां देवौ महर्द्धिकौ ॥२४३॥

भव्या ! **अमरदत्तस्य**, पत्न्या माहात्म्यमद्भुतम् ।
एवं निशम्य सम्यक्त्वे, स्थिरं चेतो विधीयताम् ॥२४४॥

मिथ्यात्वं कुगतिप्रदान[नि]पुणं, प्राप्तं स्ववंशक्रमा-
दप्युत्सृज्य विशुद्धबुद्धिनिधयो, ये सद्गुरोः सङ्गतः ।

---

१. भवदावाग्नितापे । २. साध्वी ।

सम्यक्त्वं सुगतिप्रदं भवमहादावाम्बुवाहायितं,
सेवन्ते सुरवृक्षधेनुमणयस्तेषां करेऽवस्थिताः ॥२४५॥

[शार्दूलविक्रीडितवृत्तम्]

॥ इति सम्यक्त्वमाहात्म्येऽमरदत्तभार्यादृष्टान्तः ॥

॥ श्री ॥ ग्रं. १६५ अक्षर २४ ॥

जगत्प्रभोर्देशनयाऽनया तदा, मोहान्धकारोष्णगभस्तिकल्पया ।
द्विजाः परे चापि जना जिनोदिते, धर्मे प्रबोधं स्थिरतां च लेभिरे ॥२४६॥

[उपजातिवृत्तम्]

संसारकाराग्रहतोऽतिभीतः, स्फीतप्रबोधोऽथ स **शुद्धभट्टः** ।
सा भट्टिनी च व्रतमाप्य नाथात्, सत्केवलश्रीकलितावभूताम् ॥२४७॥

[इन्द्रवज्रावृत्तम्]

आनन्दयन् भव्यजनाम्बुजालीं, सद्गोभरापास्ततमःसमूहः ।
जिनेशसूरो निजपादचारैः, पवित्रयामास महीं समन्तात् ॥२४८॥

[उपजातिवृत्तम्]

इति श्रीपद्मप्रभाचार्यचरणराजीवचञ्चरीकश्रीदेवानन्दसूरिविरचिते
श्रीअजितप्रभुचरिते आनन्दाङ्के महाकाव्ये
दृढसम्यक्त्वशुद्धभट्टवृत्तान्तप्रस्तावागताऽमरदत्तभार्या-
कथानकनिरूपणो नाम सप्तमः सर्गः ॥
[ग्रं.] २५१॥ आदितः ४७३४ अ. २१ ॥श्री॥
श्रीअञ्चलगच्छे श्रीधर्ममूर्त्तिसूरिविजयराज्ये आचार्यश्रीकल्याणसागरसूरि
तच्छिष्य वा.श्रीसौभाग्यमूर्त्तिलिखितं भद्रं भूयात् ॥

• • •

આચાર્યશ્રી ઉંકારસૂરિ જ્ઞાન મંદિર ગ્રંથાવલી

પ્રભુવાણી પ્રસાર સ્થંભ (યોજના-૧,૧૧,૧૧૧)

૧. શ્રી સમસ્ત વાવપથક શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ-ગુરુમૂર્તિ પ્રતિષ્ઠા-સ્મૃતિ
૨. શેઠશ્રી ચંદુલાલ કકલચંદ પરીખ પરિવાર, વાવ
૩. શ્રી સિદ્ધગિરિ ચાતુર્માસ આરાધના (સં.૨૦૫૭) દરમ્યાન થયેલ જ્ઞાનખાતાની આવકમાંથી
હસ્તે : શેઠશ્રી ધુડાલાલ પુનમચંદભાઈ હેક્કડ પરિવાર, ડીસા, બનાસકાંઠા
૪. શ્રી ધર્મોત્તેજક પાઠશાળા, શ્રી ઝીંઝુવાડા જૈન સંઘ, ઝીંઝુવાડા
૫. શ્રી સુઈગામ જૈન સંઘ, સુઈગામ
૬. શ્રી વાંકડિયા વડગામ જૈન સંઘ, વાંકડિયા વડગામ
૭. શ્રી ગરાંબડી જૈન સંઘ, ગરાંબડી
૮. શ્રી રાંદેરરોડ જૈન સંઘ-અડાજણ પાટીયા, રાંદેરરોડ, સુરત
૯. શ્રી ચિંતામણી પાર્શ્વનાથ જૈન સંઘ પાર્લા (ઈસ્ટ), મુંબઈ
૧૦. શ્રી આદિનાથ તપાગચ્છ શ્વેતાંબર મૂ.પૂ.જૈન સંઘ, કતારગામ, સુરત
૧૧. શ્રી કૈલાસનગર જૈન સંઘ, કૈલાસનગર, સુરત
૧૨. શ્રી ઉચોસણ જૈન સંઘ, સમુબા શ્રાવિકા આરાધના ભવન, સુરત જ્ઞાનખાતેથી
૧૩. શ્રી વાવપથક જૈન શ્વે. મૂ.પૂ. સંઘ, અમદાવાદ
૧૪. શ્રી વાવ જૈન સંઘ, વાવ, બનાસકાંઠા
૧૫. કુ. નેહલબેન કુમુદભાઈ (કટોસણ રોડ)ની દીક્ષા પ્રસંગે થયેલ આવકમાંથી

૧૬. શ્રી આદિનાથ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, નવસારી
૧૭. શ્રી ભીલડીયાજી પાર્શ્વનાથ જૈન દેરાસર પેઢી, ભીલડીયાજી
૧૮. શ્રી નવજીવન જૈન શ્વે. મૂ.પૂ. સંઘ, મુંબઈ
૧૯. શ્રી જશવંતપુરા જૈન સંઘ - શ્રાવિકા બહેનોના જ્ઞાનદ્રવ્યમાંથી
૨૦. શ્રી પાંડવ બંગ્લોઝ અને સીમા રો-હાઉસ, અઠવાલાઈન્સની આરાધક બહેનો તરફથી... પ્રેરિકા સાધ્વીશ્રી ભાવપૂર્ણાશ્રીજી

પ્રભુવાણી પ્રસારક (યોજના-૬૧,૧૧૧)

૧. શ્રી દિપા શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, રાંદેરરોડ, સુરત
૨. શ્રી સીમંધરસ્વામી મહિલા મંડળ, પ્રતિષ્ઠા કોમ્પલેક્ષ, સુરત
૩. શ્રી શ્રેણીકપાર્ક જૈન શ્વેતાંબર મૂર્તિપૂજક સંઘ, ન્યૂ રાંદેરરોડ, સુરત
૪. શ્રી પુણ્યપાવન જૈન સંઘ, ઈશિતા પાર્ક, સુરત
૫. શ્રી શ્રેયસ્કર આદિનાથ જૈન સંઘ, નીઝામપુરા, વડોદરા
૬. શ્રી અમરોલી જૈન સંઘ - અમરોલી, સુરત
૭. શ્રી ગુરૂગૌતમ લબ્ધિનિધાન જૈન સંઘ, માધવ રેસીડન્સી, સુરત
૮. શ્રી મયણા શ્રીપાલ શ્વે.મૂ. જૈન સંઘ, મણીભદ્ર રેસીડન્સી, પાલ, સુરત
૯. શ્રી અક્ષરજ્યોત શ્વે.મૂ. જૈન સંઘ, રાંદેર રોડ, સુરત
સાધ્વીશ્રી પ્રસન્નચંદ્રશ્રીજીની પ્રેરણાથી...

પ્રભુવાણી પ્રસાર અનુમોદક (યોજના - ૩૧,૧૧૧)

૧. શ્રી મોરવાડા જૈન સંઘ, મોરવાડા
૨. શ્રી ઉમરા જૈન સંઘ, સુરત
૩. શ્રી શત્રુંજય ટાવર જૈન સંઘ, સુરત
૪. શ્રી ચૌમુખજી પાર્શ્વનાથ જૈન મંદિર ટ્રસ્ટ શ્રી જૈન શ્વેતાંબર તપાગચ્છ સંઘ ગઢસિવાના (રાજ.)

૫. શ્રીમતી તારાબેન ગગલદાસ વડેચા-ઉચોસણ
૬. શ્રી સુખસાગર અને મલ્હાર એપાર્ટમેન્ટ સુરતની શ્રાવિકાઓ તરફથી
૭. રવિજ્યોત એપાર્ટમેન્ટ, સુરતની શ્રાવિકાઓ તરફથી
૮. અઠવાલાઈન્સ જૈન સંઘ, પાંડવબંગલો, સુરત શ્રાવિકાઓ તરફથી
૯. શ્રી આદિનાથ તપાગચ્છ શ્વે.મૂર્તિપૂજક જૈન સંઘ, કતારગામ, સુરત
૧૦. શ્રીમતી વર્ષાબેન કર્ણાવત, પાલનપુર
૧૧. શ્રી શાંતિનિકેતન સરદારનગર જૈન સંઘ, સુરત
૧૨. શ્રી પાર્શ્વનાથ જૈન સંઘ, ન્યુ શમારોડ, વડોદરા
૧૩. પાંડવ બંગલો (અઠવાલાઈન્સ) સુરતની આરાધક બહેનો તરફથી, સુરત
૧૪. શ્રી માડકા શ્વે.મૂ. જૈન સંઘ, માડકા (વાવપથક)
૧૫. શ્રી કલાપૂરા જૈન સંઘ, ભીનમાલ, રાજસ્થાન
૧૬. શ્રી વાવપથક ધર્મશાળાની આરાધક બહેનો (૨૦૭૦) પાલીતાણા
૧૭. શ્રી પાર્શ્વનગર ૧-૨-૩ (અડાજણ પાટીયાની આરાધક બહેનો) સુરત
૧૮. શ્રી સીમા રો-હાઉસ, ઘોડદોડ રોડ, સુરત. આરાધક બહેનો તરફથી...

પ્રભુવાણી પ્રસાર ભક્ત (યોજના - ૧૫,૧૧૧)

૧. શ્રી દેસલપુર (કંઠી) શ્રી પાર્શ્વચંદ્રગચ્છ
૨. શ્રી ધ્રાંગધ્રા શ્રી પાર્શ્વચંદ્રસૂરીશ્વરગચ્છ
૩. શ્રી અઠવાલાઈન્સ જૈન સંઘ, સુરત શ્રાવિકા ઉપાશ્રય
૪. શ્રીમતી પ્રજ્ઞાબેન કીર્તિભાઈ શાહ (L.A. અમેરિકા)
૫. શ્રી મંગલચંદજી મુણોત - જોધપુર

વાવ નગરે પૂજ્ય આચાર્ય ભગવંત ઉંકારસૂરિ મહારાજની ગુરૂ મૂર્તિ પ્રતિષ્ઠા સ્મૃતિ

૧.	રૂા.	૨,૧૧,૧૧૧	શ્રી વાવ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ
૨.	રૂા.	૧,૧૧,૧૧૧	શ્રી વાવપથક શ્વે. મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ
૩.	રૂા.	૩૧,૦૦૦	શ્રી સુઈગામ જૈન સંઘ
૪.	રૂા.	૩૧,૦૦૦	શ્રી બેણપ જૈન સંઘ
૫.	રૂા.	૩૧,૦૦૦	શ્રી ઉચોસણ જૈન સંઘ
૬.	રૂા.	૩૧,૦૦૦	શ્રી ભરડવા જૈન સંઘ
૭.	રૂા.	૩૧,૦૦૦	શ્રી અસારા જૈન સંઘ
૮.	રૂા.	૩૧,૦૦૦	શ્રી ગરાંબડી જૈન સંઘ
૯.	રૂા.	૩૧,૦૦૦	શ્રી માડકા જૈન સંઘ
૧૦.	રૂા.	૩૧,૦૦૦	શ્રી તીર્થગામ જૈન સંઘ
૧૧.	રૂા.	૩૧,૦૦૦	શ્રી કોરડા જૈન સંઘ
૧૨.	રૂા.	૩૧,૦૦૦	શ્રી ઢીમા જૈન સંઘ
૧૩.	રૂા.	૩૧,૦૦૦	શ્રી માલસણ જૈન સંઘ
૧૪.	રૂા.	૩૧,૦૦૦	શ્રી મોરવાડા જૈન સંઘ
૧૫.	રૂા.	૩૧,૦૦૦	શ્રી વર્ધમાન શ્વે.મૂ.પૂ.જૈન સંઘ, કતારગામ દરવાજા, સુરત
૧૬.	રૂા.	૧૧,૧૧૧	શ્રી વાસરડા જૈન સંઘ, સેવંતીલાલ મ. સંઘવી

●●●

પૂજ્યપાદ્ આચાર્યદેવ ઉંકારસૂરીશ્વરજી મહારાજ જ્ઞાનમંદિર ગ્રંથાવલીમાં પ્રાપ્ય પુસ્તકો...

પૂ.આચાર્યદેવ યશોવિજયસૂરીશ્વરજી મહારાજા દ્વારા લખાયેલ પુસ્તકો...

- દરિસન તરસીએ ભાગ ૧-૨ • બિછુરત જાય પ્રાણ
- પ્રગટ્યો પૂરન રાગ • આતમ જ્ઞાની શ્રમણ કહાવે
- મેરે અવગુણ ચિત્ત ન ધરો • ઋષભ જિનેશ્વર પ્રીતમ માહરો
- પ્રભુનો પ્યારો સ્પર્શ • પરમ ! તારા માર્ગે • આત્માનુભૂતિ
- અસ્તિત્વનું પરોઢ • અનુભૂતિનું આકાશ • રોમ રોમે પરમ સ્પર્શ
- પ્રભુના હસ્તાક્ષર • ધ્યાન અને કાયોત્સર્ગ • સાધનાનું શિખર
- વાત્સલ્યનો ઘૂઘવતો સાગર • રસો વૈ સઃ
- પ્રવચન અંજન જો સદ્ગુરુ કરે • એકાન્તનો વૈભવ • સાધનાપથ
- સમાધિશતક ભાગ ૧-૪ • સમુંદ સમાના બુંદ મેં
- સદ્ગુરુઃ શરણં મમ • સ્વાનુભૂતિના પગથારે
- નિરંજન નાથ મોહિ કૈસે મિલેંગે ?
- દિલ અટકો તોરા ચરન કમલ મેં... • મોક્ષ તમારી હથેળીમાં...

પૂ.આચાર્યદેવ મુનિચન્દ્રસૂરિજી મ.સા. સંપાદિત-સંકલિત પ્રેરિત ગ્રંથો

• જૈન સાહિત્યનો સંક્ષિપ્ત ઈતિહાસ (લે. મોહનલાલ દેસાઈ) • જૈન સંસ્કૃત સાહિત્યનો ઈતિહાસ ભાગ ૧-૨-૩ (લે. હીરાલાલ ૨. કાપડીયા) • પાઈઅ ભાષાઓ અને સાહિત્ય (લે. હીરાલાલ ૨. કાપડિયા) • વ્યવહાર સૂત્ર ભાગ ૧-૬ • વ્યવહાર સૂત્ર પ્રતાકારે ભાગ ૧-૭ • દસ વૈકાલિક સૂત્ર (પૂ.આ. ભદ્રંકરસૂરિજી મ.સા.ના વિવેચન સાથે) • પ્રસંગ વિલાસ • પ્રસંગ અંજન • પ્રસંગ રંગ • પ્રસંગ સરીતા • પ્રસંગસિદ્ધિ (હિન્દી) • પ્રસંગકિરણ (હિન્દી) • પ્રસંગ યાત્રા • પ્રસંગ સાગર • પ્રસંગ કલ્પલતા • પ્રસંગ સંચય • પ્રવચન

સારોદ્ધાર વિષમપદ વ્યાખ્યા • દસસાવગચરિયં • ધર્મરત્નકરંડક • કથારત્નાકર • ઉપમિતિ કથોદ્ધાર (કર્તા : પં. શ્રીહંસરત્નવિજયજી ગણિ) • ઉવવાઇયસુત્તં • રાયપસેણિયસુત્તં • સુરસુંદરી ચરિયં (સંસ્કૃત છાયા સાથે) (સંપાદિકા સા.મહાયશાશ્રીજી મ.) • પ્રમાણનય-તત્વાવલોક (વિવેચન સા. મહાયશાશ્રીજી મ.) • ચૈત્યવંદન ચતુર્વિંશતિકા (સંપાદિકા સા. મહાયશાશ્રીજી મ.) • કર્મગ્રંથ : ઉપશમશ્રેણિ, ક્ષપકશ્રેણિ, શાંતિનાથ ચરિત્ર સાનુવાદ, દાનોપદેશમાલા સવિવેચન રમ્યેરણુ • પઉમચરિયં (સંસ્કૃત છાયા સાથે) ભાગ ૧-૪ (સંપા. મુનિ પાર્શ્વનાથ વિ.) • સિદ્ધપ્રાભૃત (ગુજરાતી અનુવાદ સાથે) • જ્યોતિષ્કરંડક (ગુજરાતી અનુવાદ સાથે) • આખ્યાનકમણિકોશ (સંસ્કૃત છાયા સાથે) (મુનિ પાર્શ્વરત્નસાગર)

• • •



KIRIT GRAPHICS
09898490091